
TANTRASAMUCCAYA OF NĀRĀYAṆA

With the Commentaries Vimarsini of Sankara and Vivarana of Narayanasisya



Reprinted with an English translation of the text by

Dr. N.P. UNNI



TANTRASAMUCCAYA
of
NĀRĀYAṆA

TANTRASAMUCCAYA
of
NĀRĀYAṆA

With the Commentaries Vimarśinī of Śaṅkara and Vivaraṇa of Nārāyaṇaśiṣya reprinted with an English Translation of the text

Part III

(Paṭalas 9-12)



NEW BHARATIYA BOOK CORPORATION
DELHI (INDIA)

Publisher :

New Bharatiya Book Corporation
208, 2nd Floor, Prakashdeep Building,
4735/22, Ansari Road,
Daryaganj, New Delhi-110002
Phone : 011-23280214, 011-23280209
E-mail : deepak.nbbc@yahoo.in

First Edition : 2014

ISBN : 81-8315-222-8
: 978-81-8315-222-8

Type Setting :
Creative Graphics
Delhi

Printed at : **Jain Amar Printing Press**
Delhi-110007

श्रीनारायणप्रणीतः

तन्त्रसमुच्चयः

शङ्करप्रणीतया विमर्शिन्याख्यया व्याख्यया
तन्त्रसमुच्चयकारशिष्यप्रणीतया विवरणाख्यया व्याख्यया च समेतः

तृतीयः सम्पुटः

(पटलाः 9–12)

एन्.पी. उण्णी



न्यू भारतीय बुक कॉरपोरेशन
(दिल्ली) : : (भारत)

प्रकाशक :
न्यू भारतीय बुक कॉरपोरेशन
208, द्वितीय तल, प्रकाशदीप बिल्डिंग,
4735/22, अंसारी रोड, दरियागंज,
नई दिल्ली–110002
फोन : 011-23280214, 011-23280209
E-mail : deepak.nbbc@yahoo.in

प्रथम संस्करण : 2014

ISBN : 81-8315-222-8
: 978-81-8315-222-8

टाईप सैटिंग
क्रियेटिव ग्राफिक्स

मुद्रक :
जैन अमर प्रिंटिंग प्रैस
दिल्ली–7

CONTENTS




।। श्री ।।


नारायणप्रणीतः

तन्त्रसमुच्चयः

शङ्करप्रणीतया विमर्शिन्याख्यया नारायणशिष्य-
प्रणीतया विवरणाख्यया व्याख्यया च समेतः।



अथ नवमः पटलः



अथ प्रतिष्ठास्नपनाद्यनन्तरं समाचरेत् सर्वसुपर्वसूत्सवम्।
ततोऽनुसंवत्सरमुक्तवासरव्यवस्थया चाखिलसम्पदाप्तये।। 1।।

विमर्शिनी

एवमष्टभिः पटलैः भूपरिग्रहादिस्नपनपर्यन्तं कर्माभिधाय नवमेन पटलेनोत्सवं वक्तुमारभते–**अथेति**। अथशब्दार्थमेव विवृणोति–प्रतिष्ठास्नपनाद्यनन्तरमिति। प्रतिष्ठास्नपनं प्रतिष्ठायाश्चतुर्थदिवसस्नपनम्। आदिशब्देन जीर्णोद्धारादिकमुच्यते। प्रतिष्ठादीनां स्नपनानन्तरं सर्वसुपर्वसु सप्तस्वपि देवेषूत्सवमाचरेत्। तत आरभ्य अनुसंवत्सरं संवत्सरे संवत्सरे च उक्तवासरव्यवस्थया आगमेषूक्तसप्ताह्निकादि-दिवसव्यवस्थायोगेन अखिलसम्पदाप्तये सर्वसम्पत्समापादनाय च।। 1।।

विवरणम्

अथेदानीं वरणविधौ क्रियतां विष्णुयागो मे शिवयागस्तीर्थस्नानावसानिकः[1] स्कन्दयाग[2] इति [3]चार्थनीयतयोक्तं[4] प्रतिष्ठाशेषञ्चातुर्थिकस्नपनानन्तरम्प्राप्तं उत्सवं वक्तुमुपक्रमते–अथ प्रतिष्ठास्नपना-द्यनन्तरमिति। प्रतिष्ठास्नपनं चातुर्थिकस्नपनमादिशब्देन दिशाहोममहाबलिपीठ[5]स्नपनादेस्तुर्यदिनात्यये यदि महापीठप्रतिष्ठापनमित्याद्युक्तकालविलम्बसम्भवे तदीयावस्रावप्रोक्षणानन्तरमेवेत्युक्तम्। यद्वा प्रायश्चित्तजीर्णोद्धारादिस्नपनानामादिशब्देन ग्रहणम्। यदुक्तं स्नपनञ्चाथ कुर्यादुत्सवसंयुतमिति। सर्वसुपर्वस्विति। सुपर्वाणो विष्णुशिवादिदेवताः। ततोऽनुसंवत्सरमिति। प्रथमोत्सवे कृते च प्रतिसंवत्सरं प्रतिदिनं नित्यपूजावन्नित्योत्सवतयेति भावः।। उक्तवासरव्यवस्थयेति। आगमोक्तदिवसनियमेन। चकारः

---

1. 'कं' ख. छ. पाठः।
2. 'गस्तीर्थस्नानावसानिकं स्कन्दयाग इति' ख पाठः।
3. 'या' ख पाठः।
4. 'क्त' क पाठः।
5. 'ठप्रतिष्ठाय' ख. च. छ पाठः।

उत्सवं समाचरेदित्येतनुकर्षणार्थः। अखिलसम्पदाप्तय इति। प्रतिष्ठया तावद्याभ्युदयसिद्धिरीप्सिता सा तच्छेषभूत उत्सवेऽपि कृत एव कृत्स्ना परिपूर्णा प्राप्यत इति भावः। यद्वाखिलसम्पदाप्तये चेति सम्बन्धः। काम्योत्सवोऽप्येवमिह गृहीतो भवति। तदुक्तं "देवसन्निधये चात्र मङ्गलायाघशान्तये।। 1।।

After the ceremonial bathing ceremony on the fourth day following installation, a festival for all the deities may be performed annually extending to seven days at least to ensure the prosperity of all. (1)

मार्गादिराधावधिकेषु षट्सु मासेष्विहैकत्र परत्र वातः।
स्वर्क्षान्तमाकल्प्य समुप्तबीजः सप्ताह्निकाद्युत्सवमादधीत।। 2।।

विमर्शिनी

उत्सवस्य कालनियममाह–**मार्गादीति**। मार्गादिराधावधिकेषु मार्गशीर्षादि वैशाखान्तेषु इह षट्सु मासेषु मध्ये एकत्र मासे अतः परत्र वा स्वर्क्षान्त मार्गशीर्षादितत्तन्मासविशिष्टनक्षत्रान्तम्, अथवा स्वर्क्षान्तं विष्ण्वादिदेवेषु स्वस्वपञ्चमीदिनान्तं, यद्वा स्वस्वप्रतिष्ठानक्षत्रान्तं तस्मिन्नृक्षे तीर्थस्नानं यथा भवति तथा चाकल्प्य तत्पूर्वमेव यथाकालं समुप्तबीजः कृतमङ्गलबीजावापो भूत्वा सप्ताह्निकाद्युत्सवं यथोक्तमादधीत।।2।।

विवरणम्

उत्सवं कारयेच्छक्त्येत्यादिकस्तावदागमोक्तो वासर इत्यत्राह–मार्गादिराधावधिकेष्विति।अत्र मार्ग[1]मासो मार्गशीर्षः[2] राधश्च वैशाखः। मासेष्वेकत्रेति। एषामन्यतम इत्यर्थः। अतः परत्रवेति। मार्गाद्युक्तेभ्योऽन्यस्मिन्वा श्रावणकार्त्तिकादौ मासे। स्वर्क्षान्तमिति। तत्तद्देवस्य नक्षत्रं मृगशिरो विशाखादितत्तन्मासनक्षत्रं वाभिप्रेतम्। [3]तदुक्तं–'आर्द्रावसानं सङ्कल्प्य सप्ताहं प्रतिवत्सरम्। नियतं सर्वमासेषु मार्गशीर्षे विशेषतः।। इति। शिवविषयमेतत्। "श्रवणान्तं[4] तु सङ्कल्प्य तीर्थस्नानावसानिकम्"। इति विष्णुविषयः। एवं दुर्गादिष्वपि। तथा–

उत्सवं कारयेत् पौषे पुष्यान्तं विजयाय तु।
पितृप्रमोदनम्माघे मघान्तं फाल्गुने तथा।।

इत्यादि। समुप्तबीज इति। तदङ्गतया प्रथमतृतीयपटलारम्भोक्तरीत्या मङ्गलाङ्कुरारोपणमुक्तम्। सप्ताह्निकाद्यमिति मित्राङ्कसंख्ये दिने शैलेषुप्रमितेऽपि वेति[5] [6]तत्रोक्तविधिवदिति भावः।।2।।

The festival can be in a month between Vṛścika to Meṣa- a period of six months or in a particular month auspicious for the specified god. It may be

---

1. 'र्गो' ख. च पाठः।
2. 'र्षं' क. च पाठः।
3. 'य' च पाठः।
4. 'नतस्तु' क पाठः।
5. 'ति हि त'।
6. 'क्तं' ख. च पाठः।

initiated with the sowing of seeds (Aṅkurāropaṇa) up to the final concluding day which shall be limited to seven, nine or twelve day duration. (2)

[1]स्नाताचान्तः स्फीतभेर्यादिनादो
गर्भागारं प्राप्य नान्दीमुखान्ते।
कृत्वा पुण्याहं समाराध्य देवं
मन्त्री सङ्कल्पं करोतूत्सवस्य।।3।।

विमर्शिनी

तदारम्भविधिमाह–स्नाताचान्त इति। स्नाताचान्तः स्नानाचमनाद्यनन्तरं मन्त्री पाद्यपूजाकर्मज्ञः स्फीतभेर्यादिनादः भेरीसन्ताडनं यथोक्तं कारयित्वा गर्भागारं प्राप्य नान्दीमुखान्ते पुण्याहं कृत्वा देवं समाराध्य उत्सवस्य सङ्कल्पं करोतु, एतं कालमेवंभूतमुत्सवं करिष्य इति देवाय निवेदयेदित्यर्थः।।3।।

विवरणम्

विधानाभिप्रायं तदेव दर्शयति–स्नात्वेति। कर्माङ्गतया स्नानादिकमेतदुक्तम्। नान्दीमुखान्त इति। गणपतिं संपूज्य प्रायश्चित्तपूर्वकं नान्दीमुखं विधाय तदनन्तरमिति भावः। मन्त्रीति। प्रसन्नार्घ्यदानानन्तरमोंभगवंस्तवोत्सवंकरिष्यामीत्येवमिति भावः। सङ्कल्पश्चायं तदनुज्ञापनगर्भ इति बोद्धव्यम्। समुप्तबीज इत्यर्थादेव सङ्कल्पानन्तरं स्यादिति ज्ञेयम्।।3।।

The priest, after taking bath and arranging the sounding of drums to herald the festival, shall enter the sanctum and perform purificatory ceremony and worship the god after which he shall seek the permission of the deity for the celebration of the festival announcing his intention. (3)

तत्राग्रतः स्थापयतु ध्वजं च तद्दण्डवाहादिकमारचय्य।
संशोध्य सम्भूष्य च पल्लवाद्यैः पुण्याहमाधाय यथाविधानम्।।4।।
संशोध्य भूताप्ययधारणाद्यैस्तद्वाहनं वर्णतनुं विभाव्य।
देवाग्रसंस्थात् कृतमूर्तिकेऽस्मिन् वाहाणुना वाहनतोऽभिवाह्य।।5।।
साकल्यमापाद्य समच्य्रे केतौ सम्यक् प्रतिष्ठाप्य समिष्टपीठे।
केतुं च संस्थाप्य समिष्टपीठे गर्ते पताकादिपरिष्कृताङ्गम्।।6।।
आवाह्य सम्पूज्य निवेद्य वेद्यां कृत्वा बलिं प्रार्थयतां च मन्त्री।
ध्वजप्रतिष्ठापनकर्म यत्र तन्नित्यसान्निध्यकृते कृतं प्राक्।।7।।
तत्राधुना केतुपटेऽभिवाह्य तद् वाहमारोप्य यजे़द् यथोक्तम्।
कुर्याच्य केतून् वहिरग्निमादिदिक्पीठिकान्ते बलिदेवतानाम्।।8।।

विमर्शिनी

तत्राग्रतः पुरोभागे ध्वजं च स्थापयतु। अग्रत इत्यनेन केषाञ्चित् पक्षे प्रागेव ध्वजस्थापनाङ्गीकार

1. 'त्वा' इति मूलकोशपाठः।

उत्सवस्य सूचितः। तत्स्थापनविधानमाह–तद्दण्डवाहादिकमिति। ध्वजदण्डं वाहनं पताकां [1]घण्ट्यादिकं चारचय्य कारयित्वा मन्त्री केतुस्थान उपविश्य केतुदण्डं दर्भमृदादिभिः संशोध्य पल्लवाद्यैः सम्भूष्य यथाविधानं मूर्तिपैः सह पुण्याहमाधाय तद्वाहनं भूताप्ययधारणाद्यैः भूतसंहारेण शोषणादिभिश्च संशोध्य वर्णतनुं लिपिप्राणायामादिभिर्लिपिमयदेहं विभाव्य पीठं प्रपूज्य कृतमूर्तिके कल्पितमूर्तिकेऽस्मिन् वाहने सति गर्भागारं गत्वा देवाग्रसंस्थाद् वाहनतो वाहाणुना वाहनमभिवाह्य साकल्यमापाद्य समर्च्य केतुस्थानं प्राप्य समिष्टपीठे केतौ सम्यग् अचञ्चलं प्रतिष्ठाप्य समिष्टपीठे गर्ते पताकादिपरिष्कृताङ्गं [2]पताकाघण्टा-मालादिभिरलङ्कृतावयवं केतुं च संस्थाप्य आवाह्य सम्पूज्य निवेद्य वेद्यां तन्मूले वेदिकां कृत्वा बलिं च कृत्वा प्रार्थयतां च। मन्त्रीत्यनेन प्रार्थनामन्त्रज्ञ इति सूचितम्। यत्र तु देवालये तन्नित्यसान्निध्यकृते तस्या ध्वजदेवताया नित्यपूजाबल्यर्थं ध्वजप्रतिष्ठापनकर्म महाध्वजस्थापनं प्रागेव कृतं, तत्र त्वधुना उत्सवारम्भे केतुपटे पताकायां तद्वाहनं यथोक्तमावाह्यानन्तरं केतावारोप्य लम्बयित्वा यजेत् सम्पूज्य बलिं दद्यात्। ततो बहिरग्रिमादिदिक्पीठिकान्ते बहिर्गतानाम् अग्रगतादीनां दिक्पीठिकानां समीपे कुमुदादीनां नन्द्यादीनां वान्येषां वा बलिदेवतानां स्वस्वमन्त्रेणाष्टौ केतून् कुर्याच्च।।4- 8।।

विवरणम्

तत्राग्रतः स्थापयतु ध्वजञ्चेति। बीजवपनानन्तरमित्यर्थः। तत्प्रकारं विवृणोति तद्दण्डवाहादिकमिति। यद्यपि ध्वजप्रतिष्ठापनं प्रागुक्तं[3] किन्तु न तत्सर्वत्र सम्भवति सद्यो ध्वजस्थापनमेव सुलभमित्यभि-प्रायेणैतदिहोच्यते। अत एव ध्वजप्रतिष्ठापनकर्म यत्रेत्यादि पश्चादभिधीयत इति। तद्दण्डवाहादिकमिति[4] पताकाघण्ट्यग्रहणम्[5]। संशोध्येति। वाहनस्य दर्भमृत्त्वग्भिर्दण्डस्य क्षालनेन च शोधनमुक्तम्। सम्भूष्य च पल्लवाद्यैरिति। अत्रार्थाद् ध्वजदण्डस्यैव भवति। "सूत्रेण दर्भदाम्ना च पश्चादश्वत्थपल्लवैः। समन्ताद्वेष्टयेन्मन्त्री" इति चोक्तम्। पुण्याहमाधाय यथाविधानमिति। ध्वजदेवतापरिग्रहपूर्वकं[6] चतुर्भिर्मूर्तिपैस्सह वाहनस्य पुण्याहं कृत्वेत्यर्थः। अत्र ध्वजदण्डस्तदायतनादुत्तरत उदग्रः प्राग्वा निवेशनीयः। वाहनञ्च तण्डुलपूर्णपात्रे पताकाद्यन्वितं निवेशनीयमिति ज्ञेयम्। पुण्याहशेषेण ध्वजदण्डः क्षालनीयः।।4।।

वर्णतनुमिति। लिपिभावनाभिप्रायम्। पताकादेर्ध्वजदण्डस्यापि शोषणादिकं शक्त्यादिभिः ध्रुवेण च पूजनमपीष्यते। देवाग्रसंस्थाद्वाहनत इति। अत्र गर्भालयं समेत्येत्यादि यत् प्रागुक्तं तत्सर्वमनुसरणीयम्।।5।।

केतौ सम्यगिति। दण्डाग्रे यद्वाहनास्पदं कृतं तत्र कूर्चं निधाय किञ्चित्पीठमिष्ट्वा प्रणवादिपूर्वकं वाहनं सम्यग् दृढतया स्थापयेत्। पताकादिकमपि शक्त्यादिभिस्तदीयदण्डे सुदृढं लम्बयेत्। पताकादिपरिष्कृताङ्गमिति ह्यनूद्यते। पुनर्वाहनमावाह्य किञ्चित्सम्पूज्य रक्षां कुर्यात्। केतुञ्चेति। ततखातगर्ते

---

1. 'ण्डा चा' क. पाठः।
2. 'क' ख. घ. ङ. पाठः।
3. क्तं न क पाठः।
4. कपता।
5. ण्डादवा; ख. च
6. 'हान्वितं च' ख. च पाठः।

प्राक् पुण्याहशेषप्रोक्षिते कूर्चगन्धपुष्पाक्षतं निधाय किञ्चित्पीठमिष्ट्वा तत्र[1] तद्ध्वजं सुकुशलैर्नरै-देवाभिमुखतया प्रतिष्ठापयेत्। पुनस्तन्मूले वेदिकायां कल्पितायां तद्ध्वजस्थापनधिया स्वयं स्पृष्ट्वा पुनर्वाहनमन्त्रेण तस्मिन्नावाह्य सम्पूज्य निवेद्य बलिञ्चोपहृत्य प्रसन्नपूजां कृत्वा प्रार्थयेत यावदयमुत्सवो वर्तते तावदत्रैव रक्षार्थं तिष्ठ सर्वदेति। पुनरवसानीयार्घ्यदानादिपूर्वकं रक्षां कुर्यादिति।।6-7।।

तत्राधुनेति। ध्वजस्थापनकाले प्राप्ते इत्यर्थः। केतुपटे तद्वाहमभिवाह्येति। यथोक्तमिति सम्बन्धनीयम्। पूण्याहपूर्वकं पताकां धारणाभिः संस्कृत्य देवाग्रतो नीत्वा कृतमूर्तिकायां[2] तस्यां तद्वाहनतोऽभिवाह्य सम्पूज्य रज्जवा तां ध्वजदण्डाग्र आरोपयेत्। पुनश्च तस्यां तद्वाहने[3] चावाह्य सम्पूज्य निवेद्य बलिं दत्त्वा प्रसन्नपूजां कृत्वा प्रार्थयेत पूजां समाप्य रक्षामपि कुर्यादित्यभिप्रायः। बहिरग्रिमादिदिक्पीठिकान्तं इति। दीपशालातोऽपि बहिरष्टदिक्षु बलिपीठिका[4] सकलपीठिकास्थापनविधावेव कल्पनीया इत्यर्थाद्गम्यते। तासा[5]मित्यग्रिमाद्यष्टपीठिकानामन्ते बहिर्भाग एव सन्निधौ कुमुदनन्द्यादिप्रधानबलिदेवतानां केतून् पताकोज्जवलानष्टौ स्थापयेत्। तत्प्रयोगक्लृप्तिस्तु मण्डपसंस्कारोक्तवत् प्रतिपत्तव्या इति।।8।।

First a pit may be dug up in front of the temple after preparing a long staff and flag which are to be sanctified after washing in water. Twigs of mango and fig tree along with the tips of Darbhā grass may be tied around it in decoration. After the ceremonial purification the staff may erected. (4)

The Vāhana - the vehicle - of the particular deity having got prepared shall be taken inside the sanctum to which the spirit of divinity may be invoked in to it from the main idol. After waving light as part of the worship it shall be taken out of the sanctum to the accompaniment of the sounding of drums. After the usual washing and drying of the flagstaff the replica of the vehicle shall be fixed atop firmly with proper ceremonial chanting of hymns. The flagstaff may be put into the pit dug for the same and firmly fixed seeking the help of Brahmins. A platform around the base may be got prepared after clearing the pit taking out the mud etc. Thereafter Praṇava and Upacāra may be chanted and performed. Touching the base of the flagstaff the installation is to be conceived as properly done. The flag shall be fixed on the staff so as to be located to the left side of the pole, tying it with rope and garlands. (5-6)

After invoking the divinity and offering oblations the priest shall use Āvāhanamantra - the hymn to please the deity. The basement built around the flagstaff should also be propitiated. Divinity should also be invoked upon the flag.

---

1. 'त्र ध्व' क पाठः।
2. यामस्यां' ख च पाठः।
3. हेन चा च पाठः।
4. 'कास्था' ख पाठः।
5. 'सामगि' ख पाठः।

(The mantra shall be to the effect that here a festival of Viṣṇu is being initiated. You be present at the flag to protect the same.) (7-8)

प्राकारान्तः समन्ताद् रुचिरतरवितानादिभिर्भूषयित्वा
पूगस्तम्भादिशुम्भच्छिबिरविततिभिर्यन्त्रदीपादिभिश्च।
[1]संमृज्यालिप्य माल्यैर्बहलपरिमलैर्मण्डयित्वा विशोध्य
ग्रामे सर्वत्र संस्थापयतु शुभपताकोज्जवलान् केतुदण्डान्।।9।।

विमर्शिनी

प्राकारान्तः बाह्यगतप्राकारान्तर्भागेऽपि समन्तात्चतुर्दिक्ष्वपि रुचिरतरवितानादिभिः अतिमनोहरैः वितानाच्छादनादिभिः पूगस्तम्भादिशुम्भच्छिबिरविततिभिः पूगस्तम्भादिभिः शोभमानैर्मण्डपविशेषैः यन्त्रदीपादिभिरन्यैश्चालङ्ारैर्भूषयित्वा भूप्रदेशं समृज्यालिप्य बहलपरिमलैर्माल्यैः पुष्पविशेषैश्च मण्डयित्वालङ्कृत्य ग्रामेऽपि सर्वत्र विशोध्य शुभपताकोज्जवलान् केतुदण्डांश्च संस्थापयतु।।9।।

विवरणम्

उत्सवालङ्कारान्दर्शयति–प्राकारान्त[2]रिति। सम्मार्ज्यालिप्येति। प्राकारान्तरीति सम्बध्यते। तदुक्तं–

प्राकारान्तर्बहिश्चैव प्रथमम्मार्जनं भवेत्।
गोमयालेपनञ्चैव विधातव्यं निरन्तरम्।।
पुष्पैः सुगन्धैरुत्फुल्लैः प्राकारान्तर्भुवं शुभैः।
भूषयेत् पुष्पमालाश्च लम्बयेदभितो गृहम्।।

इति। ग्रामे सर्वत्र विशोध्येत्यन्वयः। यदुक्तं–

ग्रामवीथीश्च सम्मार्ज्य प्रोक्ष्य गन्धोदकैस्ततः।
समन्ताद्विकिरेत्पुष्पैः शोभनैश्च सुगन्धिभिः।
ग्रामपर्यन्तदेशेषु ग्रामान्तश्चत्वरेषु च।
चैत्यारामेषु गोष्ठेषु देवतायतनेषु च।
तोरणैश्च पताकाभिर्मण्डलैश्चोपशोभयेत्।।

इति।।9।।

Within the precincts of the temple festoons may be arranged with Arecanut poles having ripe areca nuts, rows of lights etc..The whole village may be swept and cleaned up and decorated with garlands of colourful fragrant flowers and erecting poles with fluttering flags here and there. (9)

आरभ्य चैवं महमाद्यरात्रौ देवार्चनं भूतबलिं च कुर्यात्।
प्रातश्च सायं च परेष्वहस्सु बलिं तदिज्यां सवनत्रयेऽपि।।10।।

---

1. 'मार्ज्यालि' इति मूलकोशपाठः।
2. 'मि' क पाठः।

विमर्शिनी

एवं महम् उत्सवमारभ्य आद्यरात्रौ प्रथमदिवसरात्रौ देवार्चनं भूतबलिं च कुर्यात्। परेष्वहस्सु उत्तरदिवसेषु प्रातः सायं च तदिज्यां देवपूजां सवनत्रयेऽपि कुर्यात्।।10।।

विवरणम्

आरभ्य चैवं महमिति। बीजवापध्वजस्थापनाद्युक्तग्रहणम्। महश्शब्दः उत्सव-पर्यायः। परेष्वहस्सु तदिज्यां सवनत्रयेऽपि प्रातश्च, सायञ्च, बलिं कुर्यादित्यनुषङ्गेण योजना।। 10।।

After initiation of the festival on the first night the propitiation of the deity as well as his attendants shall be made with proper offerings. On the three junctures of the day, on the following days similar functions may be arranged. (10)

शुद्धोदकैः स्नानविधौ सदुग्धदध्याज्यगन्धोदकपञ्चगव्यैः।
केरोदकैस्तं कलशैश्च साधु संस्नाप्य देवं विहितक्रमेण।। 11।।
[1]नवांशुकाभ्यां परिवे[2]ष्ट्य यज्ञसूत्रं च कृत्वाथ किरीटपूर्वैः।
विभूषयेत् स्वार्हविभूषणैश्च गन्धैश्च माल्यैरपि मालिकाभिः।। 12।।

विमर्शिनी

तत्र देवस्य स्नानविधौ स्नानकाले पूर्वं शुद्धोदकैः पुनः सदुग्धदध्याज्यगन्धोदकपञ्चगव्यैः पृथक् पूजितैरेतैः क्षीराद्यैः केरोदकैः नालिकेरजलैः कलशैश्च (विहित)क्रमेण तं देवं साधु संस्नाप्य वस्त्रेण बिम्बं परिमार्ज्य नवांशुकाभ्यां परिवेष्ट्य यज्ञसूत्रं चांसे कृत्वाथ किरीटपूर्वैः स्वार्हविभूषणैः स्वस्वयोग्यालङ्कारैः गन्धैर्माल्यैर्मालिकाभिश्च विभूषयेत्।।11-12।।

विवरणम्

स्नानविधाविति। माध्यन्दिनाभिप्रायमेतत्। यद्वा सवनत्रयाभिप्रायम्। विहितक्रमेणेति। स्नपनपटल इति शेषः। तत्र शुद्धोदकादिभिस्सप्तस्नानीयद्रव्याण्यपि यथायोगं तत्र तद्द्व्यकलशसन्निधावेकैकपात्रेषु विहितक्रमेण पूजनीयानि स्नानसमये तैरभिषिच्य पुनर्विहितक्रमेण कलशैरभिषिञ्चेत्। कलशानां नवकं वा केवलद्रव्यात्मकं वा शुद्धोदकान्वितं वा कल्पनीयम्। द्रव्य[3]योगे तु ह्यो निशि सम्पूज्याधिवासहोमं कृत्वा संम्पातस्पर्शनमपि कार्यमिति।।11।।

नवाम्बराभ्यामिति। अधरोत्तरवासोभिप्रायम्। यज्ञसूत्रञ्चेति। सौवर्णग्रहणम्। दुर्गायां नैत[4]दुचितम्। माल्यैरिति पुष्पग्रहणम्।। 12।।

The daily bath of the god shall be started first with pure water and then

---

1. 'नवाम्बराभ्यां विवरणपाठः।
2. 'भूष्य य' इति मूलकोशपाठः।
3. 'या' घ. च पाठः।
4. 'त्र' ख पाठः।

with coconut water followed with milk, curd, ghee, Aṣṭagandha water, Pañcagavya and tender coconut water. Rubbing the idol with fresh clothes to dry, it should be draped with new clothes and a sacred thread (the so-called brahminical string put on the occasion of the investiture). Thereafter the crown and other divine ornaments be put on the idol as also with plenty of garlands and sandal paste. (11-12)

कालेषु त्रिषु सावनैः स्वमनुभिर्मूलेन वा सर्वतः
सम्पूज्याज्यगुलोपदंशकदलीकेरादियुक्तं हविः।
दौग्धाद्यं विनिवेदयेदिह शिवे दौग्धान्नहारिद्रके
सद्यान्तं कृसरं गुलान्नसकलान्ने चाननेषु क्रमात्।। 13।।

विमर्शिनी

त्रिषु कालेषु सावनैः सवनभवैः विष्णौ द्वादशाक्षाराष्टाक्षरषडक्षरैर्मन्त्रैः, शिवे प्रासादपञ्चब्रह्मषडक्षरैर्मन्त्रैः, अन्येषु स्वस्वविहितैर्मनुभिर्वा, सर्वतः सर्वदेवेषु सर्वकालेषु च स्वस्वमूलेन वा सम्पूज्याज्यगुळोपदंशकदलीकेरादियुक्तं हविर्विनिवेदयेत्। शिवे त्विह दौग्धाद्यमपि विनिवेदयेत्। तानि पुनः सद्यान्तं भवन्ति। ईशानतत्पुरुषाघोरवामदेवसद्योजातमुखेषु क्रमाद् दौग्धान्नहारिद्रके दौग्धान्नं पायसं, हारिद्रकं निशाचूर्णेन सह पक्वं, कृसरं तिलैः सह पक्वं, गुलान्नसकलान्ने गुलान्नं सकलान्नं च गुलेन सह पक्वं सकलान्नं तच्चतुष्कमिश्रमिति।।13।।

विवरणम्

सावनैः स्वमनुभिरिति। तदुक्तं–

मूलमन्त्रैः समभ्यर्च्य त्रिसन्ध्यं विकिरेद् बलिम्।
द्विषट्केन द्विषट्केन षट्केन सवनत्रये।। इति।
निवेद्यं पायसं प्रातरिष्ट्वा प्रासादविद्यया।
गौळं पञ्चात्मना मध्यं गतेऽर्यमणि पञ्चभिः।।
निवेद्यं कृसरञ्चास्तं मध्यरात्रे नवात्मना। इति।
प्रासादमन्त्रेण च पञ्चमन्त्रैः पञ्चाक्षरेणापि यजेत्त्रि[1]वारम्।।

इति। शिवेऽर्थान्मन्त्रविकल्पो[2] भवति। एवं दुर्गादिष्वपि ज्ञेयम्। बलिप्रसङ्गे चैतद्दर्शयिष्याम इति। सावनमनुपरिग्रहे प्रथमदिनरात्रौ तीर्थयात्रादिने च मूलविधानेनैव पूजेति ज्ञेयम्। **दौग्धाद्यं हविर्विनिवेदयेदिति,** विशेषहविषां पायसगौळादिविशेषहविषां ग्रहणम्। तल्लक्षणञ्चैवमुक्तम्–

येन मानेन गृह्यन्ते तण्डुलाः कळमोद्भवाः।
तद्भागत्रिगुणे क्षीरे सुशृतं पायसं परम्।।

---

1. 'कालम्' ख. च पाठः।
2. 'ल्पोऽपि भ. ख पाठः।

पच्यत्सु तण्डुलेष्वात्मभागाद्द्विगुणकेऽम्भसि।
तण्डुलांश[1]समक्षीरे भर्जनस्फुटितांस्तिलान्।।
निधाय तण्डुलार्धांशान् मनाङ् मन्थेन लोल[2]येत्।
क्षीरतुल्यघृतोपेतं सुशृतं कृसरं भवेत्।।
निस्तुषीकृतमुद्गान्नसमतण्डुलषङ्गुणे ।
निर्जले कपिलाक्षीरे तण्डुलार्धगळान्विते।।
गुलतुल्यांशकपिलाघृतं मृदितकादळम्।
शुण्ठीजीरकसम्मिश्रं गुळान्नं सुरभीकृतम्।।
भिन्नमुद्गपदे तावन्माष[3]क्षोदाः पयः पुनः।
नालिकेरोद्भवं शुण्ठी निशाजीरककादळैः।।
क्षीरत्र्यंशैक्षवार्धांशसार्पिर्हारिद्रकं हविः।
हरिद्रामरिचक्षोदशृते पाकक्षमा[4]म्भसि।।
आपक्व्तण्डुलेऽध्यर्धभागं घनतरं दधि।
अतिषण्मासवत्सायाः सुरभेर्क्षीरसञ्चितम्।।
सार्धसर्पिर्गुलं त्र्यंशयुतं केवलमेव वा।
सुपक्वं पक्वकदलीपक्वविश्वादिसंयुतम्।।
भक्त्या योजितसिन्धूंत्थ दाधिकं साधितं हविः।

इति। क्षीराज्यतण्डुलतिलास्समास्स्युः कृसरान्नके इति। 'भिन्नमुद्गैस्समन्तण्डुलाः स्युः समास्तस्य चार्धं घृतं स्यात्। घृतार्धं गुळं तत् लभ्यस्तथा गोपयः षड्गुणं स्यात्। गुळान्नं तु तद्युक्तरम्भाफलाढ्यम्।।' इति। शिवे मुखनिवेद्यनियममाह–इह शिव इति। सद्यान्तमीशानादिसद्योजातान्तमुखेष्विति भावः। सकलान्नमिति सद्यास्ये सर्वमेव त्विति चोक्तम्। पायसाद्युकाचतुर्ग्रहणमेतत्। पयोनिशाचूर्णादिमात्रयोगेन पायसादिसम्भवे तत्सर्वयोगेनैतत्सकलान्नं सांध्यम्। शुद्धहविस्समुच्चयोऽपि सर्वत्र सम्भभववशादिष्यते। एवं[5] निवेद्यसंस्कारादि सर्वमपि सर्वत्र समानम्। सर्वान्ते प्रधानमुखे सुरभिमुद्रामन्त्रजपादिसर्वमपि पञ्चमुखैकदेवधियापि कार्यम्। होमे बलौ च सर्वेषामपि[6] विशेषयोग इति।।13।।

On all the three junctures of the day Viṣṇu may be propitiated with the mantras like Dvādaśākṣara, Aṣṭākṣara, Ṣaḍākṣara, Śiva with Prasādamantra, Pañcabrahmamantra and Ṣaḍakṣara, while other gods with their mūlamantras. Thereafter all the gods may be offered oblations consisting of ghee, molasses, food with curries, banana and slices of coconut. For Śiva

---

1. 'ग' ख. पाठः।
2. 'ड 'ख च पाठः।
3. 'षे'।
4. 'मे' ख च पाठः।
5. 'व' च. पाठः।
6. 'मवि' ख. च पाठः।

, Pāyasa with milk is a special offering. In his several mouths different varieties of food are prescribed. For Īśāna face milk food, Tatpuruṣa face food with Haridrā (turmeric), Aghora face with cooked rice with sesamum, Vāmadeva face with rice food and molasses and Sadyojāta face with all the above mentioned four types of offerings are required. (13)

कालद्वयेऽप्युत्सवनामधेयं
बलिं गुरुर्भूतबलिं किरेद् वा।
कालप्रक्लृप्त्योभयमाचरेद् वा
वक्ष्ये बलिं भौतिकमौत्सवं च।। 14।।

विमर्शिनी

अथ गुरुः स्वयं कालद्वयेऽपि प्रातस्सायं चोत्सवनामधेयं बलिं वा भूतबलिं वा किरेत्। कालप्रक्लृप्त्या प्रातरुत्सवबलिः सायं भूतबलिरिति क्लृप्त्योभयमाचरेद् वा। भौतिकं भूतबलिम् औत्सवम् उत्सवबलिं च क्रमेण वक्ष्ये।। 14।।

विवरणम्

कालद्वयेऽपीति। प्रातस्सायञ्च। मध्यन्दिनपूजान्ते वा दिवाबलिर्भवति। कालप्रक्लृप्त्योभयमिति। दिवोत्सवबलिं रात्रौ च भूतबलिम्। निशि भूतबलिं दद्यादिति चोक्तम्। यद्वा मध्यदिवसे मध्यदिवसत्रये वा दिवोत्सवबलिमितरकालेषु च भूतबलिं शक्त्यपेक्षया चानयोर्बहुधा विकल्पः। वक्ष्ये बलिमिति भूतबलिमुत्सवबलिञ्च क्रमेणेति भावः। नित्यबलिस्तु पुरोक्त एव तत्तद्वारपवाहनेत्यादि। उक्तञ्च–

स्वस्थाने देवतानाञ्च भूतानान्नामभिः क्रमात्।
विकीर्य बलिपीठे तु बलिशेषं समापयेत्।।
एष नित्यबलिः प्रोक्तस्तथा पारिषदैः सह
गणेभ्यो भूतकूरेण बाह्ये भूतबलिः स्मृतः।
वाचयित्वा गुरुः स्वस्तिं कौतुके स्थाप्य शंकरम्
सर्वोपकरणैः सार्धमुत्सवाख्यं बलिं हरेत्।

इति। नित्यबलि[1]सद्भावे च नित्यपूजा नित्यबलिकरण[2]पूर्वकमेवायं विशेषपूजा विशेषबलिश्च भौतिक औत्सवो वा यथाकालं कर्तव्य इति ज्ञेयम्।।14।।

The priest shall give Utsavabali or Bhūtabali twice a day morning and evening during the festival days. The first in the morning and second in the evening are preferred. The procedures of both are as follows. (14)

त्रिधा स्वमूलाणुसमर्चितं हवि-
र्विभज्य तद्दैविकमाद्यमंशकम्।

---

1. 'लिकरण ख पाठः'।
2. 'णमेवा' क पाठः।

सभूतकूरावितरांशकौ क्रमात्
प्रकल्पयेत् पारिषदं च भौतिकम्।। 15।।

विमर्शिनी

[1]स्वमूलाणुना समर्चितं हविस्त्रिधा विभज्य तेष्वाद्यमंशकं तद्धविर्दैविकं प्रकल्पयेत्। इतरांशकौ सभूतकूरौ "पललं रजनीचूर्णं सलाजं दधि सक्तुकम् " इत्युक्तभूतकूरयुक्तौ क्रमेण पारिषदं भौतिकं च प्रकल्पयेत्।।15।।

विवरणम्

त्रिधेति। स्वमूलाणुसमर्चितं हविस्त्रिधा विभज्येत्यन्वयः।

सुमृष्टालिप्तभूभागे पत्राण्यास्तीर्य सन्ततम्।
क्षाळितानि घृतेनोपस्तीर्य सम्पादयेद्धविः।।
प्रोक्ष्यास्त्रेण त्रितालादि कृत्वा शोषादिपूर्वकं।
पीठमिष्ट्वार्चिते शक्त्या मूलेनावाह्य पूजयेत्।।

निवेद्यसंस्कारा[2] यथार्हं कार्या इति। पुनस्त्रिधा विभज्याद्यमंशकं तद्दैविकं कल्पयेत्। उदङ्मध्य[3]दक्षिणक्रमेणायं त्रेधा विभागः। तदिति। तदेव शुद्धमेव नान्यमिश्रितमिति भावः। स भूतकूराविति भूतकूरं पुरोक्तं-' हारिद्रं दधिलाजसक्तुपललाढ्यं भूतकूराह्वयमि 'ति। भूतकुरं विभागौचित्येन तद्धविषि योजयित्वा पूजा कार्या विभज्य वास्त्रप्रोक्षणादिसंस्कृतं भूतकुरं योजनीयमिति। देवा इन्द्रादयः तत्कक्ष्यावेशिनो द्वाःस्थमातृप्रभृतयश्च तेषां पारिषदस्तत्पार्श्वमण्डलवर्तिनः वक्ष्यति च तत्तत्पार्श्वपद इति शेषः। भूता इति विभागः।।15।।

The Havis - the oblations prepared for Bhūtabali shall be divided into three parts. The items like plantain, slices of coconut and molasses shall be spread on a plantain leaf and sprinkled with ghee and sanctified properly with invocation and offering of flowers. That oblation shall be divided in to three using Darbhā grass. The first part is for god while other two are for bhūtas- attendant guards. First part shall be pure cooked rice while part shall be sprinkled with materials like powder of turmeric and fried and powdered rice, fried sesamum and parched paddy. The respective mantras shall be 'devebhyo namaḥ, pariṣadbhyo namaḥ, and bhūtebhyo namaḥ (the first part is for god alone while second part is to be divided between attendants and guards) (15)

निर्माल्यभुक्पश्चिममुख्यदेवता-
स्विष्टं हविर्दैविकमन्यदन्यतः।

---

1. 'णुस' ख ङ पाठः।
2. 'रहिं क पाठः।
3. 'ध्ये 'क पाठः।

आमन्त्रणं चाञ्चितवाद्यघोषणै-
रत्रादितो भूतगणस्य कारयेत्।। 16।।

विमर्शिनी

निर्माल्यभुक्पश्चिममुख्यदेवतासु द्वाःस्थादिनिर्माल्यधार्यन्तासु मुखभवासु विशिष्टासु वा देवतासु दैविकं हविरिष्टम्। अन्यतोऽन्यत् पारिषदेषु पारिषदं भूतेषु भौतिकं च। अत्र बलिकाले आदित आरम्भे अञ्चितवाद्यघोषणैः यथोपपत्ति पूजितानां वाद्यानां घोषणैः भूतगणस्यामन्त्रणमाह्वानं कारयेत्।।16।।

विवरणम्

तदेतद्दर्शयति-**निर्माल्यभुक्पश्चिममुख्यदेवतास्विति**। मुख्यशब्दः प्रधानवचनः। अन्यदन्यत इति। परिषद्भूतविवेकस्त्वर्थगम्य एवेति भावः। तान्भागान् देवेभ्यो नमः परिषद्भ्यो नमः भूतेभ्यो नमः इत्यभिमृशेदिति कल्पयेदित्यनेनैव लभ्यते। पुनस्तालत्रयादिक[1] सर्वमर्थसिद्धम्। अत्रादितोऽञ्चितवाद्य-घोषणैर्भूतगणस्यामन्त्रणञ्च कारयेदिति। आदितः प्रथमतः सम्प्रार्थ्य देवमित्यतः पूर्वमित्यथः। अञ्चितेतिगन्ध-पुष्पस्त्रग्वस्त्राद्यलङ्कृतत्वमुक्तम्। यद्वा आदित इति देवपूजातो देवार्थनातश्च पूर्वमेवेति भावः। अञ्चितेति पूजितत्वमलङ्कृतत्वं चोक्तम्। तदुक्तमथ ध्वजस्य तु पुरत इत्यादि। घोषणैः इति बहुवचनं त्रिविधपाण्यभिप्रायम्। कारयेदिति वादकेषु तन्नियोगोऽवसाने पुष्पाराधनपूर्व-कमर्घ्यदानमित्यप्युक्तम्। वाद्यपूजां तूपरि वक्ष्यामः।।16।।

The Havis for gods is intended for divinities including guardian of the door up to the Nirmālyadhārī–the remover of the leftovers. The other portions of the oblations are to be given to the attendant deities and bhutas who guard the shrine. First before starting Śribhūtabali the partakers may be properly invited sounding musical instruments. (16)

सम्प्रार्थ्य देवं बलिकौतुके स्वे
संयोज्य सन्धार्य च मूर्तिपेन।
तत्साक्षिकं क्लृप्तसुदीप्तदीप-
वाद्यादिहृद्यं बलिमातनोतु।। 17।।

विमर्शिनी

देवं संप्रार्थ्य 'सृष्टिस्थितिविनाशानामि 'त्यादिना प्रार्थ्य स्वे बलिकौतुके बल्यर्थं विरचिते बिम्बे संयोज्य मूर्तिपेन सन्धार्य धारयित्वा तत्साक्षिकं देवसाक्षियुक्तं क्लृप्तसुदीप्तदीपवाद्यादिहृद्यं क्लृप्तेन सुतरां दीप्तेन दीपेन वाद्यादिना वाद्यगान-नृत्तादिभिश्च हृद्यं यथा भवति तथा बलिमातनोतु।।17।।

विवरणम्

सम्प्रार्थ्य देवमिति। गर्भगृहं गत्वा पीठेज्यापूर्वकं देवमावाह्य सकलीकृत्य तदिज्यां विधायार्घ्यं दत्त्वा प्रार्थना कार्या। बलिकौतुके स्वे संयोज्येति। देवमित्यनुवर्तते। कर्मार्चमभिषिच्येत्यादि-

---
1. 'दि स 'ख. च. पाठः।

वक्ष्यमाणावाहनाद्यनुसारेणावाहनमेतदभिप्रेतम्। संयोज्येत्येवमभिधानेन संक्षालिते कर्मबिम्बे मूलबिम्बे मूलबिम्बतो मूलपुष्पार्पणमर्घ्यदानमितीयदप्य[1]वश्यंकार्यमित्यपि सूचितम्। सन्धार्य च मूर्तिपेनेति। यदुक्तं–

शिष्याणामेकमाहूय सोष्णीषं सोत्तरीयकम्।
ध्यात्वा तमृषभं मन्त्री देवं तन्मूर्ध्नि विन्यसेत्।।
वस्त्रास्तीर्णे स्थिते पात्रे सौवर्णे राजतेऽपि वा।
प्राकारान्तः करद्वन्द्वे तद्बहिर्मूर्ध्नि विन्यसेत्।।

इति। करपुटे पद्ममात्रमिष्ट्वा तत्र कौतुकं निधेयमिति। तत्साक्षिकं बलिमातनोत्वित्यन्वयः। गुरोर्दक्षिणतः सदा देवेन भाव्यम्। तत्साक्षिकमिति तथानुसन्धानार्थमुक्तम्। क्लृप्तसुदीप्तदीपवाद्यादि– हृद्यमित्यषृमङ्गलधूपादीनां छत्रध्वजवितानचामरादीनां नृत्तगीतादीनां मङ्गलस्तोत्रादीनां च यथासम्भवं ग्रहणम्।।17।।

The deity shall be approached with the following request that I may be permitted to offer oblations to your attendants to the accompaniment of the sounding of musical instruments. (17)

सृष्टिस्थितिविनाशानां कर्तर्भूतपते प्रभो।
त्वत्पारिषदमुख्यानां बलिदानाय शाधि माम्।। 18।।

विमर्शिनी

प्रार्थनामन्त्रं पठति–**सृष्टिस्थितीति**।।18।।

विवरणम्

सम्प्रार्थ्य देवमित्यत्र प्रार्थनामन्त्रमाह–सृष्टिस्थितीति।। 18।।

O god, the primordial cause of creation, sustenance and destruction, permit me to offer oblation to the chief among your attendant deities. (18)

प्रोक्ष्याराध्य विभाव्य तत्र वसुपत्राब्जस्थितां[2] देवतां[3]
पाद्याद्यं प्रसमर्प्य तत्तदणुना सम्पूज्य दत्त्वा बलिम्।
तत्तत्पार्श्वपदे प्रदाय परिषणमन्त्रेण मूलेन च
प्रार्प्यापो बलिमुद्रया प्रधिनुयादेवं बलिप्रक्रिया।। 19।।

विमर्शिनी

बलिक्लृप्तिमाह–**प्रोक्ष्येति**। बलिपीठेषु जलेन प्रोक्ष्य पुष्पेणाराध्य तत्र वसुपत्राब्जस्थिताम् अष्टदलपद्मे स्थितां देवतां विभाव्य ध्यात्वा पाद्याद्यमुपहारजातं प्रसमर्प्य तत्तदणुना जलगन्धादिभिः सम्पूज्य बलिं दत्त्वा तत्तत्पार्श्वपदे तस्य तस्य पार्श्वस्थाने परिषणमन्त्रेण तत्तत्परिषणमन्त्रेण मूलेन व बलिं प्रदाय चापः प्रार्प्य बलिमुद्रया प्रधिनुयात् प्रीणयेत्। एवं बलिप्रक्रिया बलिदानप्रकारः।।19।।

1. 'श्यमि' क पाठः।
2. 'ता।
3. ताः' घ पाठः।

विवरणम्

सर्वत्र बलिप्रक्रियामपि दर्शयति–**प्रोक्ष्येति**। द्वाःस्थवाहनादिदेवतानां यत् स्वं स्वमर्चयितुं स्थानं तत्र तदभिमुखं स्थित्वास्त्रेण फडन्तप्रणवेन वा प्रोक्ष्य तदीयमन्त्रेण तस्मिन्पीठे बिम्बे वैवभावनया पुष्पमाराधयेत्। पाद्याद्यमिति। यथा स्वं पाद्यार्घ्याचमनमुक्तम्। सम्पूज्येति। यदुक्तं–

पाद्यार्घ्याचमनं गन्धं पुष्पं धूपञ्च दीपकम्।
जलं बलिं ततो दत्त्वा बलिमुद्रां च दर्शयेत्।।

इति। दत्त्वा बलिमिति। तत्तन्मन्त्रेण देविकहविषा त्रिवारमिति भावः। बलिपीठे तु तास्मिन्नेव बलिदानं बिम्बे तु तदग्रतः स्थण्डिल इति ज्ञेयम् तत्तत्पार्श्वपद इति[1]। पार्षदान् पार्श्वमण्डल इति चोक्तम्। जलगन्धादिपूजा तेषामपि कार्या। पार्षदहविषा च बलिदानं मूलेन चेति। सकृदिति शेषः। प्राप्र्याप इति। सपारिषदस्य प्रधानस्येति भावः। बलिमुद्रया प्रधिनुयादिति। बलिमुद्रां वक्ष्यति 'हृद्बद्धमुष्टिर्बलि-मुद्रिके'त्यादि। तथा प्रीणयेदित्यर्थः। जलार्पणानन्तरं पुष्पाराधनं बलिमुद्रानन्तरम् अञ्जलिकरणञ्च कार्यमिति।। 19।।

Sprinkling water on the altar conceived as Bhūta and worshipped with flowers. Pādya-water for washing feet is to be given. The deity may be conceived as occupying an eight petalled lotus. Using the relevant Mūlamantra he should be propitiated and offerings be made along with, water, incenses etc. On the base portion of the altar stone the presence of attendants are to be conceived. They are to be worshipped with Pariṣadmantra -hymns for both. Showing the sign of bali the deity may be pleased. This is the general mode of bali. (19)

द्वाःस्थौ पार्श्वद्वये द्वार्यजितपुरमुरद्वेषिणोर्मण्डपेऽग्रये
वाहं पृष्ठेऽहिराजं यजतु सगणपं दक्षिणे दक्षिणेशम्।
शेषेष्वेतानशेषान् स्मरजिति गतवाहाहिपान् द्वाःस्थवत्सु
द्वाःस्थान् सर्वेष्वथाग्र्यादिकदिगधिपतीन् वाहनान्तान् दशेशे।। 20।।

विमर्शिनी

अत्र भूतबलेः क्रममाह–**द्वाःस्थाविति**। अजितपुरमुरद्वेषिणोःविष्णुशिवनारायणयोः द्वारि पार्श्वद्वये द्वाःस्थौ यजतु। अग्रये मण्डपे वाहं च, पृष्ठे अहिराजमनन्तं, दक्षिणे द्वारि पार्श्वद्वये सगणपं गणपतिसहितं दक्षिणेशं दक्षिणामूर्तिं च, शेषेषु पञ्चसु देवेषु एतानुक्तान् द्वाःस्थादीन् अशेषान् शेषनाम्नानन्तेन रहितान्, स्मरजिति गतवाहाहिपान् रहितवाहा[2]नन्ताभ्यां युक्तान्, द्वितीयद्वाःस्थवत्सु देवेषु द्वितीयद्वाःस्थांश्च, अथ सर्वेष्वप्यग्र्यादिकदिगधिपतीन् दश, ईशे तु बाहनान्तान् अन्ते वाहनेन युक्तान् तांश्च यजतु।।20।।

---

1. ति मण्ड' च पाठः।
2. हनान' क. ख ङ पाठः।

विवरणम्

प्राकारान्तर्देवताक्रममपि दर्शयति–द्वाःस्थाविति। द्वारि पार्श्वद्वये द्वाःस्थावित्यन्वयः। यजत्विति च सर्वत्र सम्बध्यते। द्वाःस्थक्लृप्तिं वक्ष्यति प्रासादान्तर्बहिरपीत्यादि। [1]प्रासादान्तर्भागे देववशाद्दक्षिण–पार्श्वभागे वामपार्श्वभागे चान्तर्द्वाःस्थो प्रथममिष्ट्वा बलिं हरेदुक्तविधयेत्यर्थः। मण्डपेऽग्ये वाहमिति। मुखमण्डपे वाहनसम्भवे तत्र तदभावे नमस्कारमण्डपे तदसंभवे चैत[2]स्थान इत्यर्थः। पृष्ठेऽहिराजमिति। देवस्यार्थात् प्रासादस्य पृष्ठभागेऽनन्तमिति। दक्षिणे[3] सगणपं दक्षिणेशमिति। देवस्यार्थात् प्रासादस्य च दक्षिणद्वारभागतो देववशाद्दक्षिणतो वामतश्च गणपतिं दक्षिणामूर्तिञ्चेत्यथः। शेषेष्वेतान- शेषानिति। शेषोऽनन्तः। दुर्गास्कन्दादिषु शेषदेवेष्वेतान[4]नन्तरहितान् द्वाःस्थद्वयवाहन–'गणपतिदक्षिणामूर्तीनित्यर्थः। स्मरजिति गतवाहाहिपानिति। अहिपोऽनन्तः वाहनानन्तरहितानेतानिति। तदुक्तं–'नन्दिनं च महाकालं गणेशं दक्षिणेश्वरम्' इति। द्वाःस्थवत्सु सर्वेषु द्वास्थानित्यन्वयः। प्रासादबहिर्द्वाःस्थाभिप्रायमेतत्। अथग्रयादिकदिगधिपतीन् दशेत्यन्वयः। दिगधिपतयो बलिपीठदेवताः। प्राग्द्वार इन्द्रादीन् प्रत्यग्द्वारे तु वरुणादीनिति भाव[5]ः। मुखादिसुरपुङ्गवानिति चोक्तम्। नवमदशमो ब्रह्मानन्तावेव। वक्ष्यति च 'येन सृष्टं पन्नगाधिपतिर्देव इति च। तत्रेशानपीठबहिरीशदक्षिणतो ब्रह्मा निरृतिपीठबहिरीषदुत्तरतश्चानन्तः। यदुक्तं 'चलिताः किञ्चनातः प्रादक्षिण्यादि'ति। सर्वेषां मुखक्लृप्तिश्चोक्ता। महादिङ्मुखा[6]ः सम्मुखाश्चेत्यादि ईशे वाहनान्तानिति। तदुक्तं 'दिक्पान् वाहनमेव चे'ति।। 20।।

The order of giving oblation for the attendant deities is indicated as, for Viṣṇu, Śaṅkaranārāyaṇa, the two door keepers inside the sanctum, the vehicle located in the pavilion in front, Ananta on the back and on the right side Gaṇeśa and Dakṣiṇāmūrti are to be propitiated with oblations. For the remaining five gods all these except Ananta are to be offered oblations. In the case of Śiva the Vāhana and Ananta are to be left out. Generally the doorkeepers need to be propitiated. Then in respect of all gods, lords of the quarters need to be pleased with oblation beginning with Indra or Varuṇa. For Śiva his Vāhana is the last one to be pleased with offerings. (20)

लोकेशोपरि मातृशास्तृमहिषद्विट्षणमुखार्थाधिभू-
निर्माल्यामृतभोजिनश्च निखिलेष्वप्यर्चयेत् स्वास्पदे।
सोमानन्तरमेव वार्हतु धनाध्यक्षं तथान्तर्बहि-
द्वाःस्थेज्योपरि वाहनादिकसमिज्या वैवमन्तर्बलिः।। 21।।

---

1. 'द्द्वारेऽन्त ख च पाठः।
2. च ख. च पाठः।
3. णे ग क पाठः।
4. नन्त ख पाठः।
5. 'वः। न' क. ख. पाठः।
6. 'खा श्चे क पाठः।

विमर्शिनी

निखिलेष्वपि देवेषु लोकेशोपरि लोकेशानां पूजानन्तरं मातृशास्तुमहिषद्विट्षण्मुखार्थाधिभूनिर्माल्यामृतभोजिनश्च मातृः शास्तारं दुर्गां स्कन्दं वैश्रवणं निर्माल्यधारिणं च स्वास्पदे स्वस्वस्थानेऽर्चयेत्। धनाक्ष्यक्षं वैश्रवणं सोमानन्तरं सोमस्य पूजाया अनन्तरं तदुत्तरे वा अर्हतु पूजयेत्। तथान्तर्बहिर्द्वाः स्थेज्योपरि अन्तर्द्वाःस्थानन्तरमेव[1] बहिदर्द्वाःस्थावभ्यर्च्य पुनर्वाहनादिकसमिज्या वाहनादीनां पूजा वा कार्या। एवमन्तर्बलिः अन्तर्भागगतो बलिः स्यात्।। 21।।

विवरणम्

लोकेशोपरीत्यनुवादः। शिवे लोकेशवाहनोपरीति च ज्ञेयम्। महिषद्विड् दुर्गा। अर्थाधिभूर्वैश्रवणः। निर्माल्यामृतभोजी विष्वक्सेनादिः। स्वास्पद इति। स्वे स्वे स्थाने। तदपि प्रागुक्तमेव धनाध्यक्षमिति वैश्रवणम्। तथान्तर्बहिर्द्वाःस्थेज्योपरि वाहनादिकसमिज्या वेति। सर्वेष्वपि क्रमविकल्प उक्तं। यथोक्तं –"चण्डप्रचण्डो सम्प्रोक्तावन्तर्द्वारस्य पालकौ। बहिर्द्वाःस्थौ शक्रशङ्खपाणी तत्रैव पूजयेत्"।। इत्यादि। एवमन्यत्रापि द्रष्टव्यमिति। एवमन्तर्बलिरिति। भूतबलेराभ्यन्तरमर्धमेवमुक्तमिति भावः।। 21।।

In respect of all deities after the propitiation of lords of the quarters by giving them oblations, the priest shall worship the divinities like Vīrabhadra, the seven mothers, Śāstā, Durgā, Subrahmaṇya, Vaiśravaṇa and Nirmālyadhāri in their own respective places. In the case of Vaiśravaṇa the worship may be after that of Śiva. Before that Vāhanas are taken up for worship, the doorkeepers inside the sanctum and outside the sanctum may also be propitiated. (21)

प्रासादान्तर्बहिरपि सभान्तर्बहिश्चाजितेशे
द्वाःस्थास्तेष्वन्तिमविरहिता वाद्यहीना रमेशे।
अन्त्यस्थानस्थितविरहिताः शर्वशास्त्रोः कुमार्या–
माद्योना वा गुहगणपयोर्वा तथाद्यन्तहीनाः।। 22।।

विमर्शिनी

द्वाःस्थानां क्लृप्तिमाह–**प्रासादान्तरिति**। अजितेशे प्रासादान्तर्बहिः प्रासादस्यान्तर्भागे बहिर्भागे च सभान्तर्बहिश्च सभाया अन्तर्बहिश्चेति चतुर्विधा द्वाःस्थाः। रमेशे तेषु द्वाःस्थेषु मध्ये अन्तिमविरहिताः सभाया बहिर्द्वाःस्थविरहिता वा आद्यहीनाः प्रासादान्तर्द्वाःस्थविरहिता वा। शर्वशास्त्राः अन्त्यस्थानस्थितविरहिताः सभाबहिर्द्वाःस्थरहिताः। कुमार्याम् आद्योना वा चतुर्विधद्वाःस्थयुक्ता वा। गुहगणपयोस्तथा आद्यन्तहीना वा।। 22।।

विवरणम्

अजितेशे द्वाःस्था इति। हरिहर एवञ्चत्वारो युगलाद्विपार्श्वभाज इति भावः। रमेशे तेष्वन्तिमविरहिता आद्यहीना वेत्यन्वयः। प्रासादबहिस्सभान्तर्बहिरपि[2]। यद्वा प्रासादान्तर्बहिरपि सभान्तश्चेति। त्रय एव

1. 'व बहिर्द्वाःस्थानन्तरमेव बहि' च. पाठः।
2. पि स' क पाठः।

युगला इति भावः। अन्त्यस्थानस्थितविरहिता इति। न सभाबहिर्द्वाःस्थाविति भावः। कुमार्यामाद्योना वेति। हरिहरवच्चत्वारो वापि युगलास्स्युरिति विकल्पाभिप्रायः। गुहगणपयोस्तथा वाद्यन्तहीनावेत्यन्वयो द्रष्टव्यः। तथावेत्यनेन अन्त्यस्थानस्थितविरहिता इत्येतस्य ग्रहणम्॥ 22॥

In the case of Śaṅkaranārāyaṇa there are four doorkeepers altogether inside and outside the sanctum. Viṣṇu, have six each omitting the first two above. For Śiva and Śāstā too six each are prescribed. For Durgā the number is Four. For Gaṇeśa and Subrahmaṇya it shall be four each. (22)

प्रासादान्तर्नन्दिचण्डौ हरीशे
स्यातां तद्बाह्ये जयत्सेननामा।
विष्वक्सेनश्चाप्युमा श्रीः सभान्तः
शूलं चक्रं तद्बहिश्च क्रमेण॥ 23॥

विमर्शिनी

तेषां नामानि कथयति–**प्रासादेति**। हरीशे प्रासादान्तः नन्दिचण्डौ स्याताम्। तद्बाह्ये प्रासादबाह्ये जयत्सेननामा विष्वक्सेनश्च। सभान्तश्चापि उमा श्रीरपि। तद्बहिः क्रमेण शूलं चक्रं च॥ 23॥

विवरणम्

तद्बाह्य इति। प्रासादबहिर्भागे[1]। तद्बहिश्चेति। सभाबहिर्भागे॥ 23॥

Those to be worshipped with the names in case of Śaṅkaranārāyaṇa inside are Nandī and Caṇḍa and outside, Jayatsena and Viṣvaksena. In the main hall of a big temple four divinities in this category to be worshipped are Umā, Śrī, Śūla and Cakra (with the ending of namaḥ) (23)

चण्डप्रचण्डावरिशङ्खपाणी
श्रीः पुष्टिसंज्ञाप्यजितेऽग्रयपक्षे।
स्थिताः क्रमाच्चक्रदरादिपाणी
श्रीपुष्टिबाह्ये भवतोऽन्यपक्षे॥ 24॥

विमर्शिनी

अजिते अग्रयपक्षे पक्षयोः प्रागुक्तपक्षे अन्तिमरहितपक्षे चण्डप्रचण्डौ अरिशङ्खपाणी चक्रपाणिः शङ्खपाणिश्च श्रीः पुष्टिसंज्ञापि स्थिताः। अन्यपक्षे आद्यरहितपक्षे श्रीपुष्टिबाह्ये चक्रदरादिपाणी चक्रपणिः शङ्खपाणिश्च भवतः। तत्र प्रासादबहिर्द्वार एव चण्डप्रचण्डौ॥ 24॥

विवरणम्

अग्रयपक्ष[2] इति। तेष्वन्तिमविरहिता इत्यस्मिन् पक्षे चक्रदरादिपाणी इति। आद्यहीना इत्यस्मिंस्तु

---

1. 'गे। अ क पाठः।
2. ग्र च पाठः।

पक्षे श्रीपुष्टिबाह्ये चक्रपाणिशंखपाणी स्यातामित्यर्थः। आद्यहीना इति निर्देशादेव चण्डप्रचण्डौ प्रासादबाह्ये भवतः इति।। 24।।

According to a different view the two inside are Caṇḍa and Pracaṇḍa and outside are Cakrapāṇi and Śaṅkhapāṇi. Other divinities are Sri and Puṣṭi who need oblations. (24)

प्रासादस्थाः प्रोक्ता नन्दिमहाकालशूलपाण्यभिधाः।
सहपरशुपाणयोऽन्तस्सदसि शिवे तीक्ष्णदन्तसमृगास्यौ।। 25।।

विमर्शिनी

शिवे नन्दिमहाकालशूलपाण्यभिधाः नन्दी महाकालः शूलपाणिश्च सहपरशुपाणयः परशुपाणिश्च एते प्रासादस्था द्वाःस्थाः प्रोक्ताः। अन्तस्सदसि सभाया अन्तःतीक्ष्णदन्तसमृगास्यौ तीक्ष्णदन्तो मृगास्यश्च।। 25।।

विवरणम्

अन्तस्सदसीति। सभान्तरित्यर्थः।। 25।।

For Śiva the doorkeepers are Nandī, Mahākāla, Śūlapāṇi and Paraśupāṇi (located in the sanctum). Outside the sanctum are Tiksṇadanta and Mṛgāsya who guard the courtyard (25)

शास्तरि शस्ताः क्रमशः क्षुरिकापाणिश्च खड्गहस्तश्च।
अथ वीरबाहुसमहावीरौ तीक्ष्णदन्तश्च।। 26।।

विमर्शिनी

शास्तरि क्षुरिकापाणिश्च खड्गहस्तश्च अथ वीरबाहुसमहावीरौ वीरबाहुः महावीरश्च तीक्ष्णश्च तीक्ष्णदन्तश्च द्वाःस्थाः शस्ताः।। 26।।

विवरणम्

तीक्ष्णश्च तीक्ष्णदन्तश्चेति। सभान्तरिति भावः।। 26।।

In the case of Śāstā the guards are Kṣurikāpāṇi, Khaḍgahasta, Vīrabāhu, Mahāvīra, Tīkṣṇa and Tīkṣṇadanta (six of them) to be worshipped with the mantras ending with namaḥ. (26)

प्राक् चण्डिकाम्बिके स्तो ह्लादिन्यपि मोदिनी सभान्तःस्थे।
तत्र बहिर्विजयन्तीकात्यायन्यौ च दुर्गायाम्।। 27।।

विमर्शिनी

दुर्गायां प्राक् पूर्वं चण्डिकाम्बिके स्तो भवतः। प्रागित्यनेन क्वचित् पक्षे जयाविजयाभ्यां च योगः सूचितः। सभान्तःस्थे सभाया अन्तर्भागस्थे ह्लादिनी मोदिन्यपि भवतः। तत्र सभाया बहिः विजयन्तीकात्यायन्यौ च।।

विवरणम्

प्राक् चण्डिकाम्बिके स्त इति। प्रासादस्य बहिरिति भावः। हरिहरवद् द्वाःस्थपक्षे तु चण्डिकाम्बिका चान्तः, जया विजया च बहिरिति ज्ञेयम्। तथा चोपरि वक्ष्यामः।। 27।।

For Durgā, goddess is to be worshipped first and then with the names of guards like Ambikā, Vijayā, Hlādinī, Modinī, Vaijayantī and Kātyāyanī-the last two are outside the courtyard of the shrine. (27)

वह्निभुवि वज्रहस्तः प्रासादे शक्तिपाणिश्च।
सदसि पुनरग्निकेतुर्द्वाःस्थौ स्तः सूर्यकेतुश्च।। 28।।

विमर्शिनी

बह्निभुवि प्रासादे वज्रहस्तः शक्तिपाणिश्च सदसि सभायां पुनरग्निकेतुः सूर्यकेतुश्च द्वाःस्थौ स्तः।। 28।।

विवरणम्

प्रासाद इति। तत्र बहिरित्यथः। अन्त्यस्थानस्थितविरहिता इत्यस्मिन् पक्षे तु वज्रहस्तः शक्तिपाणिश्चान्तः, सुकुमारो भद्रसेनश्च बहिरिति ज्ञेयम्।।28।।

In the case of Subrahmaṇya outside the door of the shrine the keepers are Vajrahasta and Śaktipāṇi. Inside are Agniketu and Sūryaketu. All of them are to be given oblation. (28)

प्रासादद्वारगतौ विघ्नेशे वज्रदन्त[1]मृगास्यौ।
स्यातां च चण्डविक्रमविघ्नकरौ कीर्तितौ सभान्तःस्थौ।। 29।।

विमर्शिनी

विघ्नेशे प्रासादद्वारगतौ वज्रदन्तगजास्यौ वज्रदन्तो गजास्यश्च। सभान्तःस्थौ चण्डविक्रमविघ्नकरौ कीर्तितौ स्याताम्।।29।।

In the case of Vighneśa the door keepers outside are Vajradanta and Gajāsya while inside the shrine the keepers are Caṇḍavikrama and Vighnakara. They are to be propitiated with mantras. (29)

स्थाणौ वृषो मुररिपौ गरुडो द्वयात्मा
शार्ङ्गीश्वरेऽथ गणराजि महादिचाषः।
आर्ये हयः शिखिभवे शिखिकुक्कुटौ च
सिंहो निसुम्भजिति वाहनकेतनाङ्काः।। 30।।

विमर्शिनी

बाहननामाह-**स्थाणाविति**। अथ स्थाणौ वृषः ऋषभः। मुररिपौ गरुडः। शार्ङ्गीश्वरे द्वयात्मा

1. 'गजास्यौ इति मूलकोशपाठः।

ऋषभगरुडात्मा। गणराजि महादिचाषः महाचाषः। आर्ये हयः अश्वः। शिखिभवे स्कन्दे शिखिकुक्कुटौ। तत्र शिखी वाहनं, कुक्कुटे ध्वजलक्षणम्। निसुम्भजिति सिंहः। एते वाहनकेतनाङ्काः वाहनानि ध्वजलक्षणानि च।।30।।

विवरणम्

द्वयात्मेति। वृषाय गरुडात्मने इति मनुरनेन सूचितः। यद्वाकारसूचनमप्यनेन कृतम्। तदुक्तं–

वृषञ्च वैनतेयञ्च पृथग्रूपेण कारयेत्।
वृषोपरि यथा पक्षी वैनतेयः सुतुण्डवान्।।

इति। महादिचाष इति, महाचाषः। हयोऽश्वः। शिखिकुक्कुटौ चेति। वाहनद्वयमिति भावः। वाहनकेतनाङ्का इति। मण्डपे वाहनानि, बहिर्ध्वजेषु लक्षणभूताश्चेत्यथः। स्कन्दे तु ध्वजे विशेषः। यदुक्तं–"मयूरं स्थापयेद्वाग्रे वार्क्षजं कुक्कुटं तु वा' इति। ध्वजश्च कुक्कुटारूढ इति।।30।।

The vehicle for the deities are - bull for Śiva, Garuḍa for Viṣṇu, Garuḍa riding a bull for Śaṅkaranārāyaṇa , mouse for Gaṇapati, horse for Śāstā, peacock and cock for Subrahmaṇya and lion for Durgā. These are the vehicles as well as their sign for their respective flags. (30)

द्वाःस्थान्[1] प्राच्य बहिर्निरेत्य च सभाया ये समस्तादिना
विज्ञाप्य ध्वजदेवताश्च परितस्तत्तद्गणांस्तद्बहिः।
पीठे स्वावरणावृतं परिषदध्यक्षं ततोऽष्टग्रहान्
दिक्षु क्षेत्रपतिं यजेदुदितिदिश्येवं बहिः स्याद् बलिः।। 31।।

विमर्शिनी

बहिर्बलिविधिमाह–द्वाःस्थानिति। सभाद्वाःस्थान् प्राच्य, सभाया बहिर्निरेत्य निर्गत्य, ये समस्तादिना 'ये समस्तजगदि'त्यादिना मन्त्रेण सर्वान् विज्ञाप्य, परितो ध्वजदेवताश्च यजेत्। तद्बहिरावरणे तत्तद्गणांश्च पञ्चाशद्भूतगणादींश्च, पुनः पीठे महापीठे स्वावरणावृतं स्वस्वपरिवारोपेतं परिषदध्यक्षं हरिसेनादिभूताधिपं च, ततो दिक्ष्वष्टग्रहान्, उदितिदिशि ईशानपश्चिमे क्षेत्रपतिं च यजेत्। एवं बहिःबहिर्गतो बलिः स्यात्।।31।।

विवरणम्

इदानीमस्यैव भूतबलेर्बाह्यमर्थमाह–**द्वास्थौ प्राच्र्येति।** सभायामन्तर्बहिरुभयतो वावस्थितौ द्वाःस्थावित्यर्तः। ये समस्तादिना विज्ञाप्येति। बहिर्मुखतयो[2]पस्थानमेतदुक्तम्। ध्वजदेवताश्च परित इति। दिक्पालवदग्र्यादिका[3] इति ज्ञेयम्। यजेदिति च सर्वत्र सम्बध्यते। तद्बहिस्तत्तद्गणानिति द्वितीयावृतिः। ततोऽष्टग्रहान् दिक्ष्विति। देवग्रहाद्यभिप्रायम्। तेऽप्यग्र्यादिका स्युरिति। क्षेत्रपतिमिति सर्वावरणबहिरुदितिदिग्भागे क्षेत्रपालं गन्धपुष्पादिभिर्बलिना पात्रशेषेण च यजेदित्यर्थः। तदुक्तं–

---

1. 'स्थौ इति मूलकोशपाठः।
2. 'यावस्था' च पाठः।
3. 'का ज्ञे' क पाठः।

मण्डलं विपुलं कृत्वा शेषान्नं सर्वमेव तु।
तत्रैव निक्षिपेन्मन्त्री गन्धपुष्पसमायुतम्।।

इति। महता मुष्टित्रयेण बलिं दत्त्वा पात्रशेषमग्रे न्यस्य सुरभिमुद्रां कृत्वा क्षेत्रपालाय निवेद्य पानीयादि दत्त्वा समर्च्य[1] ब्रह्मार्पणादि कृत्वा तत्प्रसादतीर्थं सर्वेभ्यः प्रोक्ष्येति। वक्ष्यति च शेषं क्षेत्राधिपाय चेति।।31।।

Thus having worshipped the doorkeepers both inside and outside the sanctum with oblation the priest shall get outside the courtyard and announce his intention. (31)

नन्दी महाकालसभूतनाथमहीधराख्यौ सहपर्वतेशौ।
ततो गुहेशामिधकालपाशकपालिनश्चाष्ट शिवे ध्वजेशाः।। 32।।

विमर्शिनी

शिवादिध्वजेशान् क्रमेण पठति–नन्दीति। इति शिवे इत्यष्ट ध्वजेशाः स्युः।।32।।

विवरणम्

नन्दीति। प्रत्यङ्मुखे पर्वतेशादयः। एवं स्कन्दादिष्वपि बोद्धव्यम्।।32।।

The presiding deities for the flagstaff are eight for the deities who are to be invoked with mantras like Nandin, Mahākāla, Bhūtanātha, Mahīdhara, Parvateśa, Guheśa,Kālapāśa and Kapālin. Mantras end with namaḥ suffixed to these names of Śiva. (32)

सदेवसेनापतिरग्निलोचनः
सदण्डहस्तोऽप्यसिधारिसंज्ञ[2]कः।
सकालपाशो ध्वजशेखराभिधो
गदी पुनः शूलविलासिनामकः।। 33।।

विमर्शिनी

गुहे नव ध्वजेशान् पठति–सदेवसेनापतिरिति।।33।।

विप्रप्रियश्चेति नव ध्वजेशा
गुहेऽन्तिमः शर्वदिशीह कार्यः।
स्वमण्डपप्रोक्तचराः परेषु
गणेश्वरे द्वारघटे[3] प्रदिष्टाः।। 34।।

गुहे अन्तिमो विप्रप्रियः शर्वदिशि कार्यः। परेषु हरौ शिवनारायणदुर्गाशास्तृषु च स्वमण्डपप्रोक्तचराः स्वस्वमण्डपसंस्कारे ध्वजेषूक्ताः। तत्र हरौ कुमुदाद्याः, शिवनारायणे नन्दिकुमुदात्माद्याः, दुर्गायां काल्याद्याः, शास्तरि गोप्त्राद्याः, गणश्वरे द्वारघटपूजायामुक्ता वज्रदन्ताद्याः प्रदिष्टाः।।34।।

---

1. 'र्घ्य' ख. च पाठः।
2. 'ज्ञितः' ग पाठः।
3. 'टप्र' इति मूलकोशपाठः।

विवरणम्

स्वमण्डपप्रोक्तचराः परेष्विति। विष्ण्वादिषु तत्तन्मण्डपसंस्कारे ध्वजेशतयैव प्रोक्तपूर्वा इत्यर्थः। यथा कुमुदकुमुदाक्षसंज्ञावित्यादि। गणेश्वर इति। यथा गणराजि वज्रदन्त इत्यादि।।34।।

For Subrahmaṇya there are eight presiding deities of flagstaff like Devasenāpati, Agnilocana, Daṇḍahasta, Asidhara, Kālapāśa, Dhvajaśêkhara, Gadin, Śūlalāsin and a ninth one as Vipriya. For gods like Viṣṇu, Śaṅkaranārāyaṇa, Durgā and Śāsta those mentioned in their respective Maṇḍapasamākāra are to be propitiated. For Gaṇeśa the protectors for the pots like Vajradanta etc., are prescribed. (33-34)

विंशद्भूतगणाः स्मृताः स्मररिपौ दिग्दिक्षु पञ्चाशतो-
द्भिन्नाश्चाष्टसु दिक्षु शार्ङ्गभृति सप्तत्या तथेशाच्युते।
षट्कोट्योद्भिदुरा गुहे महिषहन्त्र्यामष्टकोट्या तथा
तत्तत्पारिषदाः प्रभेशगणपत्योश्च द्वितीयावृतौ।।35।।

विमर्शिनी

द्वितीयावरणबलिदेवता आह-**विंशदिति।** द्वितीयावृतौ स्मररिपौ दिग्दिक्षु दशदिक्षु विंशद्भूतगणाः स्मृताः। शार्ङ्गभृति चाष्टसु दिक्षु पञ्चाशतोद्भिन्नाः पञ्चाशद्भूतगणाः। ईशाच्युते तथा सप्तत्या उद्भिन्नाः सप्ततिभूतगणाः। गुहे षट्कोट्योद्भिदुराः षट्कोटिभूतगणाः। महिषहन्त्र्याम् अष्टकोट्या उद्भिदुराः अष्टकोटिभूतगणाः। प्रभेशगणपत्योः तत्तत्पारिषदाः विघ्नपार्षदाः[1] शास्तृपार्षदाश्च[2] स्मृताः।।35।।

विवरणम्

दिग्दिक्ष्विति। दशदिशामष्टदिशाञ्च विकल्पाभिप्रायम्। पञ्चाशतोद्भिन्ना इति। गणा इति शेषः। यदुक्तं-'तत्पार्श्वमण्डले भूयः पञ्चाशद्गणमर्चयेत्' इति। सप्तत्या षट्कोट्येत्यादावप्युद्भिदुरा गणा इति योज्यम्। तत्तत्पारिषदा इति तत्तद्ध्वजाधिपपारिषदाः। यथा शास्तरि गोप्तृपारिषदेभ्यः इत्यादि।।35।।

In the second periphery surrounding the sanctum are located several attending spirits of gods. For Śiva these are twenty, for Viṣṇu the number is fifty, for Śaṅkaranārāyaṇa seventy, for Subrahmaṇya six crores, for Durgā eight crores and for Śāstā and Gaṇapati their personal attendants. Respective mantras should incorporate their identifying names. (35)

बलिपीठस्य समन्ताद्बलिजिति वलजिन्मुखाष्टदिक्क्रमतः।
कुमुदाद्यष्टकमिष्ट्वा मध्येपीठं यजेत हरिसेनम्।।36।।

विमर्शिनी

महापीठावरणान्याह-**बलिपीठस्येति।** बलिजिति विष्णौ बलिपीठस्य समन्ताद् वलजिन्मुखाष्टदिक्क्रमतः इन्द्राद्यष्टदिक्षु कुमुदाद्यष्टकमिष्ट्वा मध्येपीठं पीठोपरि मध्यभागे हरिसेनं यजेत।।36।।

1-2. 'रिपदा' ख घ. ङ पाठः।

विवरणम्

वलजिन्मुखाष्टदिस्क्क्रमत इति। महाबलिपीठस्य प्राङ्मुखत्वे प्रत्यङ्मुखत्वे प्रागाद्यष्टदिक्ष्वेव[1] परिपीठिकासु क्रमेण बलिः स्यादिति भावः। मध्येपीठमिति महापीठमध्यत इत्यर्थः।।36।।

In respect of Viṣṇu around the big altar stone in front of the shrine eight divinities like Kumuda are to be propitiated with their respective hymns. In the center Harisena is to be worshipped with flowers and oblations (36)

पुरभिदि भूतिदसंज्ञं सदुर्निरीक्षं सभीमरूपमथ।
यजतु सुलोचनसुमुखौ समहाबाहू दिशास्वधश्चोर्ध्वम्।। 37।।
त्रिशिरस्त्रिभुजौ पिङ्गलहरिसेनौ चाह्वयैर्द्विठान्तैः स्वैः।
चतुरो भूतिदपूर्वांश्चतुरः कुमुदादिकांश्च शार्ङ्गीशे।। 38।।

विमर्शिनी

पुरभिदि भूतिदं दुर्निरीक्षं भीमरूपं सुलोचनं सुमुखं महाबाहुं त्रिशिरसं त्रिभुजं पिङ्गलं हरिसेनं च महापीठस्य पूर्वादिदिशास्वधश्चोर्ध्वं च द्विठान्तैः स्वाहान्तैः स्वैराह्वयैर्नामभिः 'भूतिदाय स्वाहा' इत्याद्यैर्मन्त्रैर्यजतु। शार्ङ्गीशे भतिदपूर्वान् शिवोक्तांश्चतुरः कुमुदादीन् विष्णूक्तांश्चतुरो यजतु।।37–38।।

विवरणम्

दिशास्वधश्चोर्ध्वमित्ति। प्रागाद्यष्टपरिपीठिकासु कुमुदनैरृतभागे महापीठमध्यतश्चेत्यर्थः।।37।।

द्विठान्तैः स्वैराह्वयैरिति[2]। यथा 'भूतिदाय स्वाह' इत्यादि। चतुरो भूतिदपूर्वानिति। सम्भूयाष्टौ प्रागादिपरिपीठिकास्विति भावः। नास्मिन्पक्षेऽधः पिङ्गलोपपत्तिः।।38।।

द्वितयान् द्विशोऽखिलान् वा परितोऽधः पिङ्लं यजेदुपरि।
परमेष्ठीशपदाद्यं सेनमथायान्तुमन्त्रतश्चान्ते।। 39।।

विमर्शिनी

द्वितयान् शैवोक्तान् वैष्णवोक्तांश्चाखिलान् परितो द्विशः द्विद्विशो वा अधःपिङ्गलम् उपरि परमेष्ठीशपदाद्यं सेनं परमेष्ठीशसेनं च यजेत्। अन्ते 'आयान्तु पार्षदा' इति मन्त्रेण च यजेत्।।39।।

विवरणम्

द्वितयानखिलान्वेति। भूतिदादीनष्टौ कुमुदादीनप्यष्टाविति। द्विश इति। प्राक्पीठिकायां भूतिदकुमुदौ दक्षवामयोरित्यादि। अस्मिन् पक्षे भेदमाह–अधःपिङ्गलमिति। पक्षद्वयेऽविशेषमाह–उपरि परमेष्ठीशपदाद्यं सेनमिति। परमेष्ठीशसेनमित्यथः। आयान्तु मन्त्रतश्चान्ते यजेदित्ययं हरिहरेऽपरो भेद इति।।39।।

In the case of Śiva on all the eight sides of the big altar stone as well as on its base and tops the following ten mantras may be chanted for worship

---

1. 'व क्र' ख. च पाठः।
2. 'ति। परिपीठिकासु य' च पाठः।

(using the word namaḥ at the end). Bhūtida, Durnirīksa, Bhīmarūpa, Sulocana, Sumukha, Maḥābāhu, Triśiras, Tribhuja, Piṅgala and Harisena.

For Sankaranarayana the eight mantras of Viṣṇu may be used beginning with the east. At the base the mantra shall include the name of Pingala while at the top it should be Parameṣṭhiśasena. Thereafter the spirits may be invited to take part in the oblation. (37-39)

आयान्तु पार्षदाः सर्वे शाङ्करा वैष्णवास्तथा।
बलिपीठेऽत्र सन्तुष्टा निवसन्तु यथासुखम्।।40।।

नमः सर्वपार्षदेभ्यो नम इति।

ब्रह्मसुपूर्वे घोष्यौ सयज्ञवेष्ट्यौ सुरङ्गिणी समुखी।
सुभुजा प्रमोदिनी पुनरात्मन्यपि कीर्तितान्तिमा ब्राह्मी।।41।।

एताः क्रमेण पूज्या दुर्गायां दिक्षु पीठमध्ये च।
ब्राह्म्यन्तेऽब्जदलस्थाः काल्याद्याश्चात्र पूजनीया वा।।42।।

विमर्शिनी

दुर्गायाम् एताः क्रमेण दिक्षु पीठमध्ये च पूज्याः। कास्ताः, व्रह्मसुपूवे घोष्यौ ब्रह्मघोषी सुघोषी च, सयज्ञवेष्ट्यौ यज्ञवेष्टी च, पुनः सुरङ्गिण्याद्याः। अन्तिमा अवसानभूता ब्राह्मी कीर्तिता। अत्र ब्राह्मयन्ते ब्राह्म्या अवसाने समीपे वा अब्जदलस्थाः पीठपद्मस्य पूर्वादिदलेषु कालीकराल्याद्याः पूजनीया वा।।41-42।।

विवरणम्

ब्रह्मसुपूर्वे इति। यदुक्तं-'ब्रह्मघोषी सुघोषी च यज्ञवेष्टी सुरङ्गिणी इत्यादि।।41।।

दिक्ष्विति। प्रागादिपरिपीठिकासु। ब्रह्मयन्त इति। ब्राह्मीं महापीठे बलिनेष्ट्वा समापयेत्। यद्वा ब्राह्मीं तत्कर्णिकायामिष्ट्वा पुनः प्रागादितदीयदलेषु काल्याद्यष्टावपीष्ट्वा समापयेद्वेत्यर्थः।।42।।

May the attendants of Śaṅkara and Visnu be present in the Balipītha with pleasure taking part in the oblation. For Durgā in the eight directions and at the top the following nine mantras are to be used with proper modifications. Brahmaghoṣī, Sughoṣi, Yajñaveṣṭī, Suranginī, Sumukhī, Subhujā, Pramodinī, Ātman and Brāhmī.

Hereafter the presiding deities of the flagstaff are also to be propitiated. (40-42)

शूरोग्रशिखिजगत्पूर्वाश्च महाचण्डपूर्वकौ सेनाः।
क्रुद्धक्रूरजयत्स्कन्दाद्याश्च दशेशवत् स्कन्दे।।43।।

अथवात्र भूतिदादीन् सपिङ्गलस्कन्दसेनपर्यन्तान्।
प्रयजेद् ये भूतादिग्रहादिकाभ्यामपीह बलिरिष्टः।।44।।

ये भूताः स्कन्दसेनस्य पार्षदा बलिभोजिनः।
तृप्यन्तु ते मुदं यान्तु सद्भ्योऽसद्भ्यो नमो नमः।। 45।।

'ग्रहेभ्यः स्कन्दपार्षदेभ्यश्च सर्वेभ्यस्तेभ्यस्ताभ्यो नमो नमः' इति।

विमर्शिनी

स्कन्दे शूरोग्रशिखिजगत्पूर्वाः शूरादिपदाद्याः, महाचण्डपूर्वकौ महाचण्ड इत्याद्यौ च, क्रुद्धक्रूरजयत्स्कन्दाद्याः क्रुद्धादिशब्दाद्याः दश सेनाः ईशवत् पूर्वादिदशदिक्षु, अथवा अत्र स्कन्दे भूतिदादीन् सपिङ्गलस्कन्दसेनपर्यन्तान् शैववत् स्कन्दसेनान्तानेव पूजयेत्। यथा पूर्वं बलिपीठप्रतिष्ठायां कृतं तथैवाधुनापि पूजयेदित्यर्थः। ये भूताः स्कन्दसेनस्य,'ग्रहेभ्यः स्कन्दपारिषदेभ्यश्च' इति द्वाभ्यामपीह मध्ये बलिरिष्टः।।43-45।।

विवरणम्

शूरोग्रेति। शूरसेनोग्रसेनादय उक्ताः। ईशवदिति। जयत्सेनोऽधः। स्कन्दसेन उपरि महापीठ इति भावः।।43।।

पिङ्गलेति। पिङ्गलोऽधः, उपरि स्कन्दसेनः। बलिरिष्ट इति। अयं स्कन्देऽपरो भेद इति भावः।।44-45।।

In the case of Subrahmaṇya the ten names to be used in the mantra for giving oblations are - Śūrasena, Ugrasena, Śikhisena. Jagatsena, Caṇḍasena, Kruddhasena, Krūrasena, Jayatsena and Skandasena. Oblations may be given in all the directions as in the case of Śiva. (43)

Or in the case of Subrahmanya the mantras from Bhūtida to Piṅgala and Skandasena- the ten names- be used as in the case of Śiva. (44)

The mantra states that the attendants of Skandasena be pleased with offering of oblations given to them. The mantra is to end with an invocation to the attendants of Skanda. (45)

अथ गजवक्त्रगणेशौ विनायकश्चण्डविक्रमः क्रमशः।
विघ्नकरसर्पमेखलसशूर्पकर्णाख्यनागदन्त्यभिधाः ।।46।।

नवमोऽत्र रुद्रवक्त्रजनामा दशमस्तु विघ्नसेनाख्यः।
विघ्नेश्वरबलिपीठे दिक्ष्वध ऊदर्ध्व च पूजनीयाः स्युः।।47।।

विमर्शिनी

अथ विघ्नेश्वरबलिपीठे गजवक्त्राद्याः क्रमशो दिक्ष्वध ऊर्ध्वं च पूजनीयाः स्युः। अत्र नवमो रुद्रवक्त्रजनामा। दशमस्तु विघ्नसेनाख्यश्च।।46-47।।

In the big altar stone in front of Gaṇeśa the following eight names are to be used in the mantra to offer oblations to attendants. Gajavaktra, Gaṇeśa, Vināyaka, Caṇḍavikrama, Vighnakara, Sarpamekhala, Śūrpakarṇa, and

Nāgadantin. These are to be used in eight directions. A ninth name Rudravaktraja is to be used in the base while a tenth Vighnasena is to be used at the top. (46-47)

आर्ये द्वारघटोक्ता दिक्ष्वचर्च्या वीरबाहुपूर्वाः स्युः।
भूतेशशास्तृसेनावध ऊर्ध्वमपीति पीठबलिक्लृप्तिः।। 48।।

विमर्शिनी

आर्ये दिक्षु वीरबाहुपूवाः द्वारघटेक्ताः, अध ऊर्ध्वं च भूतेशशास्तृसेनौ च पूजनीयाः स्युः। इति पीठबलिक्लृप्तिः महाबलिपीठस्थिता बलिक्लृप्तिः।। 48।।

In the case of Śāstā in all the eight directions attendants beginning with Vīrabāhu mentioned in connection with the sanctification of pot at the doorstep is to be used in offering oblation to them. As the ninth and tenth at the base and top the names of Bhūteśa and Śāntisena are to be used in respect of the big altar stone. (48)

देवग्रहादिबलिकर्मणि दिग्बलिं स्व-
मूलाणूना क्षिपतु पारिषदात्मनाथ[1]।
क्षिप्रप्रदक्षिणबलिं प्रविधाय शेषं
क्षेत्राधिपाय च समर्पयतूपहारैः।। 49।।

विमर्शिनी

देवग्रहादिबलिकर्मणि देवग्रहादि वा पितृग्रहादि वा[2] ग्रहाणां बलिकाले स्वमूलाणुना दिग्बलिं च क्षिपतु। अथ पारिषदात्मना 'विष्णुपारिषदेभ्यः सर्वेभ्यो भूतेभ्यो नमः' इत्यादिपरिषण्मत्रेण क्षिप्रप्रदक्षिणबलिम् अविच्छिन्नबलिं मूलपरिषण्मन्त्रावेकीकृत्य उभयत्र वा प्रविधाय शेषं हविरुपहारैः सह क्षेत्राधिपाय समर्पयतु। समर्पयत्वित्यनेनान्ते निवेदनमपि सूचितम्।।49।।

विवरणम्

देवग्रहादिबलिकर्मणीति। प्रथमपटल एत उक्ताः। अत्र देवासुरेत्यादि तेषामग्र्यादिभाजां बलिः पुनः कार्यः। ततोऽष्टग्रहान् दिक्ष्विति ह्युक्तम्। तत्तद्बलिसमये तत्तद्दिशि मूलेन जलगन्धपुष्पान्वितेन हविषा [3]सकृद्दिग्बलिश्च कार्यः। अथ पारिषदात्मना क्षिप्रप्रदक्षिणबलिं प्रविधायेत्यन्वयः। ग्रहान्ताद्वाग्रदेशाद्वा बलिं कृत्वाथ शेषतः। तत आरभ्य तन्निष्ठं परीयाद्विदधद् बलिम्" इति। विष्णुपारिषदेभ्यस्सर्वेभ्यो भूतेभ्यो नम' इत्येवमिह मनुरभिप्रेतः। सर्वान्ते क्षेत्रपाले संस्थानक्लृप्तिमुपदिशति-शेषमिति। हविश्शेषं पात्रे[4] शेषितमिति वार्थः। उपहारैरिति। पाद्यादिभिर्जलगन्धादिभिर्बलिना निवेद्येन बलिमुद्रादिभिर्ब्रह्मार्पणेन चेति भावः। एवं तावत् सर्वेषु भूतबलिरुक्तः।।49।।

---

1. 'वा' क पाठः।
2. 'वाग्रादिग्र क. ख पाठः।
3. 'कृद्वलि क. च पाठः।
4. 'त्र' घ पाठः।

On the third round of distributing oblations the priest shall serve Devagrahas and Pitṛgrahas with their chant of their mūlamantra. After this round of distribution to the spirits of the quarters, on the third round offering shall be made to the attendants of Viṣṇu in a quick circumambulation. Thereafter the oblation that remains shall be given to Kṣetrapāla- the guard of the temple with acts of propitiation and plenty of offerings. (49)

उपस्थाय स्तोत्रैः प्रविकिरतु मन्त्रैर्निजनिजै-
र्यथान्यायं द्वाःस्थप्रभृतिदिगधीशान्तिमबलिम्।
दशस्वाशास्वाशाधिपपरिषदन्तेऽत्र मनुनों
नमो भूतेत्याद्येन च सकलदेवोत्सवबलौ।।50।।

विमर्शिनी

अथोत्सवबलिविधानमाह–**उपस्थायेति**। सकलदेवोत्सवबलौ सकलानां देवानामुत्सवबलौ निजनिजैः स्तोत्रैस्तं तमुपस्थाय उपस्थानं कृत्वा निजनिजैर्मन्त्रैः'ओं चण्डाय नमः' 'ओं प्रचण्डाय नमः' इत्यादिभिर्भूतबलावुक्तैर्मन्त्रै द्वाःस्थप्रभृतिदिगधीशान्तिमबलिं द्वाःस्थादिदिक्पालपर्यन्तं बलिं यथान्यायं भूतबलिन्यायेन प्रविकिरतु। अत्र दिक्पालबलौ दशस्वाशासु अग्रत आरभ्याष्टदिक्ष्वीशकोणे निऋतिकोणे च आशाधिपपरिषदन्ते दिक्पालानां तत्तत्पारिषदानां चान्ते 'ओं नमो भूतेभ्य इत्याद्येन मनुना च बलिं किरतु।।50।।

विवरणम्

अथोत्सवबलिरुच्यते–**उपस्थाय स्तोत्रैरिति**। यथान्यायमिति। भूतबल्युक्तन्यायेन। किन्तु पद्मे तत्तद्देवताभावनानन्तरं तत्तत्स्तोत्रैरुपस्थाय पाद्यार्घ्यादिसमर्पणादिकमित्येव विशेषः। दिगीशबलिसमये [1]त्वन्यो विशेषः। तदाह दशस्विति। ओं नमो [2]भूतेभ्य इत्याद्येन मनुनेति। बलिं प्रविकिरत्वित्याकृष्यते।।50।।

In the Utsavabali related to all deities the relevant stotras of the particular gods have to be chanted with devotion. The propitiation shall begin with the doorkeepers and cover all the ten directions where they are located or presiding over. With the final invocation to the Bhūtas the function shall be concluded. (50)

पूर्वस्यां[3] दिशि पूर्वकेण च नमो भूतादिमन्त्रान्ततो
दिग्दिक्ष्वीशगणेशवह्निभुवि ये भूतादिमन्त्रेण च।
ओजाशासु बलिं करोतु हरिवर्जं सर्वतो वा तथा
शर्वे प्रागमृतांशुपूजनविधेरर्च्यश्च वित्ताधिपः।।51।।

1. 'त्वस्त्यन्यो'।
2. ताद्ये ख. च पाठः।
3. 'स्यामिति पू इति मूलकोशपाठः।

विमर्शिनी

ईशगणेशवह्निभुवि शिवगणपतिस्कन्देषु नमो भूतादिमन्त्रान्ततः 'ओं नमो भूतेभ्य इत्यादिमन्त्रेण बलिदानानन्तरं दिग्दिक्षु दशदिक्ष्वपि पूर्वस्यां दिशि पूर्वकेण 'ओं पूर्वस्यां दिशि शिवस्ये'त्यादिना बलिं करोतु। ओजाशासु पूर्वदक्षिणपश्चिमोत्तरोर्ध्वदिक्षु ये भूतादिमन्त्रेण 'ये भूताःपुरस्सद इत्यादिना मन्त्रेण च बलिं करोतु। हरिवर्जं हरिं वर्जयित्वा सर्वतः सर्वदेवेषु तथा वा। शर्वे अमृतांशुपूजनविधेः सोमाराधनात् प्राग् वित्ताधिपो वैश्रवणोऽर्च्यश्च।।51।।

विवरणम्

विशेषान्तरमप्याह-**पूर्वस्यामिति**। पूर्वकेणेति। ओजाशासु ये भूतादिमन्त्रेण चेत्यन्वयः। एतदुक्तं भवति। दिगीशबलाविन्द्रतत्पारिषदबलिं कृत्वा तद्बहिः 'ओं नमो भूतेभ्य' इति तदब्हिः 'ओं पूर्वस्यां दिशि'ति तद् बहिश्च 'ये भूताः पुरस्सद' इति च मालामन्त्रैः क्रमेण बलिं दद्यात्। दशदिक्ष्वप्येवम्। किन्तु ये भूता इत्यनेन प्राग्याम्यापश्चिमोदगुपरि दिक्ष्वेव बलिं दद्यादिति। हरिवर्जं सर्वतो वा तथेति। शिवस्कन्दगणपतिष्वयमेकः प्रकार[1]:। हरावपरः प्रकारः। वक्ष्यति च-'विष्णौ दिग्गणमन्त्रत' इति, 'ये भूतादिपुरःप्रभृत्युपरिनिष्ठैरि'ति च। हरिहरे दुर्गायां शास्तरि चोभयथापि[2] विकल्पः। वक्ष्यति च-यत्रान्तः शिववदित्यादि। शर्वे प्रागिति भूतबलौ तु शिवेऽपि विकल्प उक्तः। षण्मुखार्थाधिभू इति सोमानन्तरमेव वार्हतु धनाध्यक्षमिति च। इह तु नियमान्तरमुक्तमिति बोद्धव्यम्। 'पीठे-श्रीदो दिशाहोमे सोमो वा स्थापितो भवेत्। स्थापितस्य स्वपीठे स्याद् बलिरन्यस्य भूतले'। इति।।51।।

For Śiva, Gaṇapati and Subrahmaṇya from the eastern direction onwards oblations may be given using the mantra "namo bhūtebhyaḥ". Thereafter in all the cardinals and corners oblations shall be distributed to guards using the mantra "pūrvasyāmdiśi" etc. Again in the cardinal points as well as above oblations be given using the mantra "ye bhūtāh". Except in the case of Viṣṇu this can be the procedure. For Durgā and Subrahmaṇya also this mode is acceptable. But before offering Utsavabali to Śiva, Vaiśravaṇa also is to be propitiated. (51)

यथान्यायं मातृप्रभृतिगुहनिष्ठावृतिमथो
यजेद् गायत्र्याद्यैर्मनुभिरपि सर्वेषु विधिवत्।
इमां प्रागाद्याशापरिगतकुमारादिसहितां
त्रिधामन्येवं वा सहरिहरसुम्भासुररिपौ।। 52।।

विमर्शिनी

अथो सर्वेषु देवेषु मातृप्रभृतिगुहनिष्ठावृतिं मातृशास्तृदुर्गास्कन्दान् यथान्यायं न्यायाविरोधेन गायत्र्याद्यैर्वक्ष्यमाणैर्मनुभिरपि विधिवद् यजेत्। त्रिधामनि विष्णौ इमामावृतिं

---

1. 'रः। व' च पाठः।
2. था वि' च पाठः।

प्रागाद्याशापरिगतकुमारादिसहितां प्रागाद्याशासु स्थितस्कन्दाद्यावरणसहितां यजेत्। सहरिहरसुम्भासुररिपौ शिवनारायणे दुर्गायामप्येवं वा यजेत्।।52।।

विवरणम्

यथान्यायमिति। पूर्ववत् गायत्र्याद्यैर्मनुभिरपीत्यत्रैव विशेषसमुच्चयः। इमामिति। उक्तामावृतिम्। त्रिधामनीति। यजेदिति सम्बध्यते। अयमाशयः शिवादिषु मात्रादिस्कन्दान्ततयार्धावृतिरियं भवति। विष्ण्वादिषु तु स्कन्दादीशान्ततया सर्वावृतिरिति। शास्तरि त्वर्धाच्छिववदेवेति लभ्यते।।52।।

In the case of all gods in the periphery where Subrahmanya and the seven mothers are installed Gāyatri mantra and Pārṣadamantra may be used for worship. In the case of Viṣṇu also such a round may be conceived. For Durgā and Śaṅkaranārāyaṇa such a periphery called Skandavaraṇa may be conceived as an option. (52)

प्राचि स्कन्दं प्रभेशं शिखिनि पितृपतौ धर्ममातॄस्तथार्यं
भङ्गे भानुं पितृस्थं दुहिणमुदकराजीरणे सूकरार्ये।
स्कन्दं मुख्येऽन्यमातॄरपि तुहिनरुचावम्बिकां त्र्यम्बकं स्वे
कोणे चार्हेत् परीत्यार्चयतु पुनरुदित्यां च निर्माल्यभाजम्।। 53।।

विमर्शिनी

स्कन्दाद्यावृतिमाह-**प्राचीति**। प्राचि इन्द्रस्य बहिर्भागे स्कन्दमर्हेत्। शिखिनि अग्नेः बहिः प्रभेशं शास्तारं, पितृपतौ यमस्य दक्षिणे धर्ममातॄः धर्मं मतॄश्च, तथा भृङ्गे यमनिर्ऋत्योरन्तराले आर्यं, पितृस्थं निर्ऋतिस्थं भानुं सूर्यम्, उदकराजि वरुणे दुहिणं ब्रह्माणम्, ईरणे वायौ सूकरार्ये वराहं दुर्गां च, मुख्ये स्कन्दं, तुहिनरुचौ सोमे अन्यमातॄः उत्तर[1]मातॄ अम्बिकामपि, त्र्यम्बकं शिवं स्वे कोणे च, पुनः परीत्य परिक्रम्य [2]उदित्याम् ईशपश्चिमे निर्माल्यभाजं चार्चयतु।।53।।

विवरणम्

अथामुं स्कन्दाद्यावरणं वदन् पक्षद्वयेऽप्यावरणक्लृप्तिं दर्शयति-**प्राचि स्कन्दमिति**। तथार्यं भृङ्ग इति वाक्यम्। दुहिणमुदकराजीति च वरुणे ब्रह्माणमित्यर्थः।ईरणे सूकरार्ये इति। वायौ वराहं दुर्गाञ्चेत्यर्थः। स्कन्दं मुख्ये। अन्यमातृरपीति उत्तरमातृग्रहणम्। स्कन्दं मुख्ये पूजयित्वा तत्पूर्वत उत्तरमातॄः पूजयेदिति। तुहिनरुचावम्बिकामिति वाक्यम्। स्वे कोण इति। ऐशदिशि। परीत्यार्चयत्विति। स्कन्दाद्यावरणसद्भाव एवायं नियमः। मात्रादिस्कन्दान्तावृतियोगे तु तदनन्तरमेवोदितौ निर्माल्यभुगिज्यत इति। किञ्च स्कन्दाद्यावरणं प्राङ्मुखे प्रत्यङ्मुखे च देवे प्रागाद्येव भवति। नाग्र्यदिगादीत्यप्यवधार्यमिति।।53।।

The nature of Skandāvaraṇa is as follows: Subrahmaṇya in the east, Śāstā in southeast, Yama and the Seven mothers in the south. In between south and southwest Śāstā , in the southwest proper Āditya, Brahmā in the

---

1. 'म' घ. च पाठः।
2. 'दु' क पाठः।

west, in northwest Varāha and Durgā, between northwest and west proper Subrahmaṇya, Ambikā in the north and Śiva in the northeast is the order of the locations to which oblations are to be given for the respective deities. Just before the northeast towards south is located Nirmālyadhāri demanding worship. (53)

नमस्ते द्वारपालाय चण्डायामिततेजसे।
नरसिंहतनूजाय चक्रेणाङ्कितमौलये।।54।।

नमस्ते द्वारपालाय प्रचण्डायामितौजसे।
नरसिंहतनूजाय शङ्खेनाङ्कितमौलये।।55।।

वाहनाय महाविष्णोस्ताक्ष्र्यायामिततेजसे।
गरुडाय नमस्तेऽस्तु दुष्टसर्पेन्द्रमृत्यवे।।56।।

शय्या यो जगतां धातुर्विष्णोर्विविधमायिनः।
अनन्ताय नमस्तुभ्यमहीन्द्रनमिताङ्घ्रये।।57।।

नमस्ते सर्वभूतेश! सर्वसम्पत्प्रदायिने।
सर्वविघ्नविनाशाय विघ्नेशाय शिवात्मने।।58।।

नमस्तेऽस्तु महायोगिन्! व्याख्यामुद्रालसत्कर!।
दक्षिणामूर्तिरूपाय रुद्राय परमात्मने।।59।।

नमस्ते द्वारपालाय चक्रव्यग्रमहाभुज!।
दृष्ट्या निहतदैत्याय वैष्णवाय नमो नमः।।60।।

नमस्ते द्वारपालाय शङ्खव्यग्रमहाभुज!।
दृष्ट्या निहतदैत्याय वैष्णवाय नमो नमः।।61।।

दैत्यदर्पविनाशाय सहस्राक्षाय धीमते।
कुलिशव्यग्रहस्ताय नमस्तेऽस्तु शतक्रतो!।।62।।

मुखं यः सर्वदेवानां येन हव्यं च नीयते।
येन प्रवर्तते सर्वं नमस्तस्मै हविर्भुजे।।63।।

येन संह्रियते सर्व येन धर्मं च रक्ष्यते।
यस्माद् बिभेति लोकोऽयं प्रेतनाथ! नमोऽस्तु ते।।64।।

राक्षसा यातुधानाश्च पिशाचाश्चाश्रयन्ति यम्।
तस्मै निरृतिरूपाय रक्षसां पतये नमः।।65।।

येन संरक्ष्यते सर्व यस्मिन् सर्वं प्रतिष्ठितम्।
अमोघपाशहस्ताय तस्मैऽपांपतये नमः।।66।।

पूर्यन्ते च ह्रियन्ते च येन प्राणादयः क्रमात्।
भूतानां पतये नित्यं नमस्तस्मै मरुत्पते।।67।।

यं प्राश्यामरतां यान्ति देवा यज्ञशरीरिणः।
सोमाय गदिने तस्मै ज्योतिषां पतये नमः।।68।।

यत्प्रसादाज्जगत् सर्वं धनेन परिपूर्यते।
यक्षगुह्यकनाथाय धननाथ! नमोऽस्तु ते।।69।।

येन कालाग्निना लोको युगान्तेष्ववदह्यते।
तस्मै ते ब्रह्मणः पुत्र! विरूपाक्ष! नमोऽस्तु ते।।70।।

येन सृष्टं जगत् सर्वं सर्गादौ विष्णुशासनात्।
पितामह! नमस्तुभ्यं सर्वलोकेश! पद्मज!।।71।।

पन्नगाधिपतिर्देव! अनन्तो नाम नामतः।
पातालवासिने नित्यं नागराज नमोऽस्तु ते।।72।।

वीरभद्र! नमस्तेऽस्तु नमो विघ्नेश्वराय च।
ब्राह्म्यादिभ्यश्च[1] मातृभ्यः सर्वाभ्यो वै नमो नमः।।73।।

श्रीधराय नमस्तेऽस्तु नमस्तेऽश्वमुखाय च।
वागीश्वर्यादिमातृभ्यः सर्वाभ्यो वै नमो नमः।।74।।

विष्वक्सेन! नमस्तेऽस्तु देवनिर्माल्यधारिणे।
शङ्खचक्रगदापाणो महापारिषदेश्वर!।।75।।

विमर्शिनी

'उपस्थाय स्तोत्रैरि'त्याद्युक्तमुत्सवबलिं विवृण्वन् पूर्वमुपस्थानमन्त्रान् क्रमेण पठति-नमस्ते द्वारपालायेत्यादि। अत्र केषाञ्चित् प्रधानानामेवोपस्थानमन्त्रा भवन्ति। इतरेषां तु स्वस्वनाममन्त्रा एवोपस्थाने प्रयोज्या इत्यवगन्तव्यम्।।54-75।।

विवरणम्

इदानीं'मुपस्थाय स्तोत्रै'रित्युद्दिष्टानि स्तोत्राणि वदन् प्रथमं तावद्विष्णावाह नमस्ते द्वारपालायेति। शास्तृदुर्गास्कन्दानामितरेषाञ्च स्कन्दप्रभेशादीनां स्तोत्राभाव इति।।54-75।।

The nature of mantras to various deities are provided

Dvārapālamantra (54-55); Garuḍamantra (56); Anantamantra (57); Gaṇapati and Daksiṇāmūrti (58); Dvārapālas of Viṣṇu (60-61); Indramantra (62); Vāhanamantra (63); Yamamantra (64); Nirṭimantra (65); Varuṇamantra (66); Vāyumantra(67); Somamantra (68); Vaiśravaṇamantra(69); Īśānamantra

1. 'श्च सर्वाभ्यो मातृभ्यो वै ख. ग. पाठः।

(70); Mantra for Brahmā (71); Anatamantra (72); Mantra for Seven mothers (73); Mantra for Śrīdhara (74); Mantra for Viṣvaksena (75). (54-75)

एते हरावुपस्थानमन्त्रास्तत्र शिवादिषु।
साधारणास्त एव स्युर्विशेषोक्तान् पृथग् ब्रुवे।।76।।

नमस्ते द्वारि युक्ताय शूलहस्ताय धीमते।
दृष्ट्या निहतदैत्याय शाङ्कराय नमो नमः।।77।।

नमस्ते द्वारि युक्ताय परशुव्यग्रपाणये।
दृष्ट्या निहतदैत्याय शाङ्कराय नमो नमः।।78।।

येन प्रसूयते सर्वं यस्मिन् सर्वं प्रलीयते।
अमोघपाशहस्ताय तस्मैऽपांपतये नमः।।79।।

वाहनाय महाशम्भोः शैलार्णवघनस्वन!।
ऋषभाय नमस्तुभ्यं सर्वदुष्टप्रशान्तये।।80।।

नमस्ते द्वारि युक्ताय शूलहस्ताय धीमते।
दृष्ट्या निहतदैत्याय शाङ्कराय नमो नमः।।81।।

नमस्ते द्वारपालाय चण्डायामितौजसे।
नरसिंहतनूजाय चक्रेणाङ्कितमौलये।।82।।

नमस्ते द्वारि युक्तायै चण्ड्यै खेटासिधारिणि!।
नरसिंहतनूजायै चक्रेणाङ्कितमौलये।।83।।

नमस्ते द्वारि युक्तायै अम्बिकायै महौजसे।
नरसिंहतनूजायै शङ्खेनाङ्कितमौलये।।84।।

नमस्ते द्वारि युक्तायै जयायै ज्वालयावृते!।
दृष्ट्या निहतदैत्यायै कात्यायन्यै नमो नमः।।85।।

नमस्ते द्वारि युक्तायै विजयायै महौजसे।
दृष्ट्या निहतदैत्यायै कात्यायन्यै नमो नमः।।86।।

वाहनाय महादेव्याः सिंहायामिततेजसे।
अतुल्यबलवन्नत्र[1] नमस्तेऽस्तु हरीश्वर!।।87।।

दैत्यदर्पविनाशाय सहस्राक्षाय धीमते!।
कुलिशव्यग्रहस्ताय नमस्तेऽस्तु शतक्रतो!।।88।।

1. 'वानत्र' क. घ पाठः।

मुखं यः सर्वदेवानां येन हव्यं च नीयते।
येन प्रवर्तते सर्वं नमस्तेऽस्मै हविर्भुजे।।89।।

दण्डहस्ताय भीमाय सर्वप्राणहराय च।
प्रेतनाथ! नमस्तेऽस्तु पितृलोकनिवासिने।।90।।

खड्गहस्ताय घोराय नैर्ऋताय महामते!।
रक्षोधिपाय तीक्ष्णाय नमस्तेऽस्तु निशाचर!।।91।।

जलाधिपाय प्राणाय सर्वभूतहिताय च।
पाशहस्ताय भीमाय नमस्तेऽस्तु अपांपते!।।92।।

सदागताय प्राणाय सर्वभूतहिताय च।
ध्वजहस्ताय शब्दाय नमस्तेऽस्तु समीरण!।।93।।

नक्षत्राणां च[1] सर्वेषां सोमो राजा प्रकीर्तितः।
गदापट्टसधारी च सोमराजाय ते नमः।।94।।

धनदाय कुबेराय सर्वौषधिध[2]राय च।
पौलस्त्याय च नीलाय नमस्तेऽस्तु धनाधिप!।।95।।

ईशानः सर्वविद्यानामक्षमालाधरो हरः।
हरिणहस्तो महात्मा च नमस्तेऽस्तु हरिप्रिय!।।96।।

स्रष्टा चरस्य सर्वस्य लोकानां च पितामहः।
आदिश्च सर्वभूतानां तस्मै वेदात्मने नमः।।97।।

पन्नगाधिपतिर्देव! अनन्तो नाम नामतः।
पातालवासिने नित्यं नागराजाय ते नमः।।98।।

तर्जयन्ती जगत् सर्वं सदा निर्माल्यधारिणि!।
वरदाभयहस्तायै चण्डिकायै नमोऽस्तु ते।।99।।

इन्द्रः सुरपतिश्चैव वज्रहस्तो महाबलः।
शतयागाधिपो देवस्तस्मै यागात्मने नमः।।100।।

सर्वदेवमयो देवो रक्षोवह्निर्महाबलः।
सप्तजिह्वो महावीर्यो नमो वैश्वानराय च।।101।।

[3]दण्डहस्तो महादेवो धर्माध्यक्षो महाबलः।
आवाहये [4]धर्मराज[5]! तस्मै प्रेतात्मने नमः।।102।।

---

1. 'तु' ख पाठः।
2. 'रसाय' ग पाठः
3. 'च' क पाठः।
4. 'द्ध' ग. घ पाठः।
5. 'जं' ख. ग. घ पाठः।

खङ्गहस्तधरो देवो नैर्ऋतो[1] नीलविग्रहः।
निर्ऋते! च नमस्तुभ्यं खङ्गहस्तात्मने नमः।।103।।

जलराज! महाराज! विख्यात इति निम्नगः।
पश्चिमां दिशमाचष्टे पाशहस्तात्मने नमः।।104।।

सर्वप्रकाशको नित्यः सर्वलोकाधिदेवता।
ध्वजहस्तो महाप्राणस्तस्मै वाय्वात्मने नमः।।105।।

नक्षत्राणां च सर्वेषां सोमो राजा प्रकीर्तितः।
गदापट्टसधारी च सोमराजाय ते नमः।।106।।

सर्वलोकाधिपो देव ईशानो नाम नामतः।
शूलपाणिर्महादेव! त्रैलौक्याधिपते नमः।।107।।

स्त्रष्टा चरस्य सर्वस्य लोकानां च पितामहः।
आदिश्च सर्वभूतानां तस्मै वेदात्मने नमः।।108।।

पन्नगाधिपतिर्देव! अनन्तो नाम नामतः।
पातालवासिने नित्यं नागराजाय ते नमः।।109।।

वाहनाय गणेशस्य महाचाषाय धीमते।
मध्ये पारिषदेशानां भ्राजमानाय वै नमः।।110।।

विमर्शिनी

हरौ एते द्वाःस्थादिनिर्माल्यधार्यन्तेषूपस्थानमन्त्राः स्युः। शिवादिषु तत्र उक्तेषु मन्त्रेषु साधारणाः केचित् त एव। विशेषोक्तान् विशेषत उक्तान् पृथग् ब्रुवे।।76-110।।

विवरणम्

शिवे भेदमाह-नमस्ते द्वारियुक्तायेति। नन्दिमहाकाळयोः स्तोत्राभावः। कश्चित्तयोरपि स्तोत्रमाह-

नमस्ते द्वारि युक्ताय शूलहस्ताय धीमते।
दृष्ट्या निहतदैत्याय नन्दीशाय नमो नमः।।
नमस्ते द्वारि युक्ताय परशुव्यग्रपाणये।
दृष्ट्या निहतदैत्याय महाकाळाय ते[2] नमः।।

इति। सोमे 'यं प्राश्यामरतां यान्ती'ति। यद्वा स्तोत्रान्तरम्-

नक्षत्राणां च सर्वेषां सोमो राजा प्रकीर्तितः।
गदापट्टसधारी च सोमरजाय ते नमः।।

---

1. 'त्यो' ख. ग. घ.. पाठः।
2. 'वै' ख पाठः।

इति। हरिहरे भेदमाह-नमस्तो द्वारि युक्तायेति। वाहने तु स्तोत्रद्वयं योज्यम्।।76-82।।

दुर्गायां भेदमाह-**नमस्ते द्वारियुक्तायै** इति।।83-99।।

स्कन्दे भेदमाह-**इन्द्रस्सुरपतिश्चैवेति**।।100-109।।

गणपतौ भेदमाह-**वाहनाय गणेशस्येति**। शास्तरि न भेद इति।। 110।।

What has been said forms the Upasthāna mantras especially for Viṣṇu. For Śiva and other deities they are commonly used. For the Dikpālas of these deities also they are applicable. What is peculiar to a specific purpose is to be narrated separately as under:

For Doorkeepers inside the sanctum of Śiva the mantras are narrated in these (77, 78). Mantras for Varuṇa (79), Vāhanamantra (80), Caṇḍeśwarastuti (81), For inner guards of Śaṅkaranārāyaṇa (82,83), for inner guards of Durgā (84, 85), for outer guards of Durgā (86), for Simha the vehicle of Durgā (87), for Indra (88), for Agni (89), for Yama (90), for Nirti (91), for Varuṇa (92), for Vāyu (93), for Soma (94), for Vaiśravaṇa (95), for Īśāna (96), for Brhamā the mantra is this (97), for Ananta (98), for Nirmālyadhāri (99), for Indra (100), for Vahni (101), for Yama (102), for Nirti (103), for Varuṇa (104) for Vāyu (105), for Soma (106), for Īṣāna (107), for Brahmā (108), for Ananta (109), for the Vāhana of Gaṇeśa (110). These are to be used appropriately with the ending of namaḥ. (76-110)

एवं गिरीशशार्ङ्गीशदुर्गास्कन्दादिषूदिताः।
द्वाःस्थवाहनदिक्पादिस्तुतिमन्त्रा विशेषिताः।। 111।।

विमर्शिनी

एवमुक्तप्रकारेण गिरीशशार्ङ्गीशदुर्गास्कन्दादिषु, आदिशब्देन विघ्नो गृह्यते, द्वाःस्थवाहन-दिक्पादिस्तुतिमन्त्राः द्वाःस्थादीनाम् उपस्थानमन्त्रा ये ये विशेषितास्ते ते उदिता उक्ताः।।111।।

विवरणम्

स्तोत्रप्रकरणमुपसंहरति-**एवमिति**। विष्णौ तावत्सर्वेऽपि स्तोत्रमन्त्रा निगदिताः। शिवादिषु तु विशेषिता भेदवन्तस्तुतिमन्त्रा उक्ताः। ते च यथायोगानां द्वास्थादीनां स्युः। विशेषाणान्तु विष्णूक्ता एव सामान्यरूपा ग्राह्या इति।।111।।

These are the mantras regarding the doorkeepers, vehicles and propritiation in regard to the deities of Śiva, Śankaranārāyaṇa, Durgā, Subrahmaṇya etc. They have been indicated with their special features (111)

ताराद्यं निजनाम ङेन्तमथ विष्णवादीष्टदेवाक्षर-
प्रोद्यत्पारिषदाक्षरं सह चतुर्थ्या हार्दहृद्यं वदेत्।
एवं स्यात् परिवारदैवतमनूनां लक्षणं तत्पद-
प्रोद्यत्पारिषदेभ्य एष परिषन्मन्त्रो नमोऽन्तः स्मृतः।। 112।।

विमर्शिनी

उपस्थानमन्त्रान् पठित्वा स्वस्वमन्त्रानाह–**ताराद्यमिति**। ताराद्यम् आदौ तारविशिष्टं ङेन्तं चतुर्थ्येकवचनान्तं च निजनाम स्वस्वनाम 'ओं चण्डाये'त्यादि। अथानन्तरं विष्ण्वादीष्टदेवाक्षर-प्रोद्यत्पारिषदाक्षरं विष्ण्वादीनां तत्तदिष्टानां देवानां वाचके प्रोद्यत् प्रकर्षणोद्गच्छत् पारिषद इत्यक्षरं, तत् पुनश्चतुर्थ्या विभक्त्या सह हार्दहृद्यं नमसा युक्तं वदेत्। 'ओं चण्डाय विष्णु पारिषदे नमः'। एवं परिवारदैवतमनूनां परिवारदेवता मन्त्राणां लक्षणं स्यात्। तत्पदप्रोद्यत्पारिषदेभ्यः, तत्पदेन चण्डादिपरिवारदैवतनामोच्यते, 'चण्डपारिषदेभ्य' इत्यादि। अथवा तदित्ये(व?तत्)पदानन्तरं पारिषदेभ्यः इति तत्पारिषदेभ्यः। एष परिषन्मन्त्रो नमोऽन्तश्च स्मृतः 'तत्पारिषदेभ्यो नम' इति। एतत् परिवारमन्त्रलक्षणं भूतबल्यादावपि सर्वत्र समानम्।।112।।

विवरणम्

इदानीं द्वाःस्थादीनां प्रधानपरिवाराणां पूजाद्यार्थतया नाममन्त्रं लक्षणेनाह–**ताराद्यमिति**। निजनामेति तत्तत्परिवारनाम। विष्ण्वादीष्टदेवाक्षरेति। विष्णुपारिषदे रुद्रपारिषदे इत्यादि। प्रधानानां परिषन्मन्त्रमप्याह–तत्पदादिति। तदित्यस्मादेव पदाद्यथा 'तत्पारिषदेभ्यो नमः' इति। यद्वा तत्पदादिति तच्छब्देन प्रधानदेवताग्रहणम्। यथा 'चण्डपारिषदेभ्यो नमः'। नन्दिपारिषदेभ्यो नमः'।।112।।

The nature of the mantra is as follows. It shall begin with Praṇava, the name in dative case singular, again the name of the attendant in dative case and ending with namah. Thus the form will be like "Om Caṇḍāya Viṣṇupārṣade namaḥ". Or it can end with "Tat pārṣadebhyo namaḥ" if the name of the god is already mentioned. (112)

यद्यन्तर्द्वारमधिकौ श्रीशेऽत्रानन्दनन्दनौ।
द्वाःस्थौ जया च विजया [1]तथैव महिषद्वि[2]षि।।113।।

विमर्शिनी

श्रीशेऽन्तर्द्वारं भवति यदि अत्रान्तद्वारि आनन्दनन्दनौ द्वाःस्थौ अधिकौ पूर्वोक्तादधिकौ। महिषद्विषि तथा यदि, अन्तश्चण्डिकाम्बिके बहिश्च जया च विजया च भवतः।।113।।

In the case of Viṣṇu there are two keepers inside called Ananta and Nandana. So also in the case of Durgā there are two keepers Caṇḍikā and Ambikā inside, Jayā and Vijayā outside as extra doorkeepers. (113)

स्फुरस्फोटय हुं त्र्यक्ष स्वाहा नन्दिमनुः शिवे।
प्रों कपालिन् ह इत्येष महाकालमनुर्हृदा।।114।।

---

1. 'बहिश्च म'।
2. षि। कुमारे सुकुमारश्च भद्रसेनश्च कीर्तितौ। स्फु ग पाठः।

विमर्शिनी

शिवे 'स्फुर स्फोटय हुं त्र्यक्ष स्वाहा' इति नन्दिमनुः। हृदा नमसा सहितः 'प्रों कपालिन् ह' इति महाकालमनुः। अनयोर्मन्त्रानन्तरं नाममन्त्राभ्यामपि बलिदानं कार्यम्।।114।।

विवरणम्

शिवे नन्दिमहाकालयोर्मूलमन्त्रोऽप्यस्तीत्याह-स्फुरेति। हृदेति। नमोऽन्त इति भावः।।114।।

In the case of Śiva there are some modifications. Before "Nandine namaḥ" Sphura, Sphota etc are to be prefixed. Before "Mahākālāya namaḥ "Prom Kapālin etc, to be added while offering oblations to the attendants of the god The first is referred to as Nandimanu while the second one is called Mahākālamanu. (114)

गरुडमनुस्तारादिस्वाहान्तः पक्षिराजाय।
गरुडाय वैनतेयायेत्यपि नत्याथ तस्य गायत्री।।115।।

'वैनतेयाय विद्महे पक्षिराजाय धीमहे[1]। तन्नो गरुडः प्रचोदयात्।

विमर्शिनी

तारादिस्वाहान्तः पक्षिराजायेति गरुडमनुः। नत्या नमसा सह गरुडाय वैनतेयायेति द्वावपि। अथ तस्य गायत्री, लिख्यत इति शेषः।।115।।

विवरणम्

विष्णौ वाहनस्य मूलनाममन्त्रगायत्रीराह-गरुडमनुरिति।।115।।

The mantras to offer oblations to Garuḍa, the vehicle of Viṣṇu is like Pakshirājāya. The Gāyatri is Vainateyāya and Prasādamantra is also needed. (115)

सिंहस्य वज्रनखदंष्ट्रायुधायपदान्ततः।
महासिंहाय हूं नत्या मनुरेवं समीरितः।।116।।

विमर्शिनी

वज्रनखदंष्ट्रायुधायपदान्ततः 'ओं वज्रनखदंष्ट्रायुधाय' इति पदान्ते महासिंहाय हुं' इति नत्या च वदेत्। एवं सिहस्य मनुः समीरितः।।116।।

विवरणम्

सिंहस्येति। प्रागुक्तसमष्टिमनुरेवायमिति।।116।।

The mantra for Simhavāhana is noted here starting with Vajranakha etc, and ending with namaḥ. (116)

---

1. 'धीमहि इत्येव प्रसिद्धो गायत्र्यां पाठः।'धीमहे' इति त अत्रोपरिष्टाच्च पठ्यते।

विष्ण्वादिदेवनाम्नः पुरतस्तु सुरादिजातिनामाद्यम्।
अधिपतयेपदमत्र प्रयोज्यमिन्द्रादिदिक्पमन्त्रेषु।।117।।

विमर्शिनी

दिक्पालमन्त्रलक्षणमाह–**विष्ण्वादीति**। अत्र इन्द्रादिदिक्पमन्त्रेषु विष्ण्वादि–देवनाम्नः पुरतः पूर्वं तु सुरादिजातिनामाद्यं सुरतेज इत्यादीनां जातीनां [1]नामाद्यं यथा भवति तथाधिपतयेपदं प्रयोज्यं स्यात्। 'ओं इन्द्राय सुराधिपतये विष्णुपारिषदे नमः' इत्यादयो मन्त्रा इत्यर्थः।।117।।

विवरणम्

दिक्पालमन्त्रेषु विशेषमधिकमाह–**विष्ण्वादिदेवनाम्न** इति।।117।।

Prefixed to the name of gods like Viṣṇu the Jātināma- the category name is needed. The categories are mentioned hereafter. Then the forms of the mantra will be like Indrāya surādhipataye Viṣṇupāriṣade namaḥ. (117)

सुरतेजःप्रेताख्या रक्षांसि तथा जलानि च प्राणाः।
नक्षत्राण्यपि विद्या लोका नागाश्च जातयोऽत्र दश।।118।।

'ओं नमो भूतेभ्यो भूतकृद्भ्यः सर्वेभ्योऽरिष्टकृद्भ्यः सद्भ्योऽसद्भ्यः सदसद्भ्यः सर्वगणेभ्यो नमो नमः स्वाहा'।।

'पूर्वस्यां दिशि हरेर्भगवतो ये गणा वज्रपाणयः श्वेताः श्वेताक्षाः श्वेतलोहिता दिव्यन्तरिक्षभौमाः पातालनिवासिनश्च तेभ्यो वै नमो नमः स्वाहा'।।

विमर्शिनी

जातीराह–**सुरेति**। सुरतेजःप्रेताख्याः सुरतेजःप्रेतेति तिस्त्र आख्याः रक्षांसि जलानि प्राणाः नक्षत्राणि विद्याः लोकाः नागश्चेति अत्र दश जातयः स्युः।।118।।

पुनः 'ओं नमो भूतेभ्यः' इत्याद्युक्तान् मन्त्रान् पठति–**पूर्वस्यां दिशीत्यादि**।।

There are Jati categories to be mentioned along with the mantra of guardian deities. They are Sūra, Tejas, Preta, Rakṣas, Jala, Prāṇa, Nakṣatra, Vidyā, Loka, and Nāga. The mantra for Indra should be prefixed with Surādhipataye, for Agni with Tejodhipataye, Yama with Pretādhipātaye. Thus ten categories are to be conceived here. (118)

प्राचीत्यणुरिहान्यत्राशास्त्रवर्णपदे क्रमात्।
आग्नेय्यां शक्तिरक्ते च याम्यायां दण्डसंयुतम्।।119।।

कृष्णं तथैव नैरृत्यां खड्गं श्यामसमन्वितम्।
वारुण्यां पाशशबले वायव्यां पुनरङ्कुशम्।।120।।

---

1. 'नाम्नमा' क, नाम्नाद्य' च पाठः।

पीतं तथैव सौम्यायां गदां सितसमन्विताम्।
ऐशान्यां शूलकपिले तूर्ध्वायां पद्मसूक्ष्मके।।121।।
अधस्ताद् विषधूम्रे च योज़येन्मन्त्रवित्तमः।
हरिस्थानेऽन्यदेवेषु शिवादिस्वस्वनाम च।।122।।

'ये भूताः पुरस्सदो निशाचरा रौद्राः सन्तोऽसन्तः सदसन्तो विरूपा विश्वरूपा महारूपा घोररूपा मृगास्या विहगाननाः पुष्टिकृतोऽपुष्टिकृतः कामदाश्च बलिमिच्छन्ति, तेषां सर्वेषां बलिं हरामि महद्भ्यः क्षुद्रकेभ्यश्च [1]तेभ्यो नमो नमः स्वाहा'।।

इति।

विमर्शिनी

मन्त्रे दिगादिविशेषयोजनप्रकारमाह-प्राचीति। प्राचि पूर्वदिग्भागे इत्यणुः। अन्यत्र अग्न्यादौ इह आशास्त्रवर्णपदे दिशामायुधानां वर्णानां पदेषु स्थानेषु क्रमान्मन्त्रवित्तम एतानि पदानि योजयेत्। तानि क्रमेणाह-आग्नेय्यामित्यादि-आग्नेय्यां शक्तिरक्ते च 'आग्नेय्यां दिशि हरेर्भगवतो ये गणाः शक्तिपाणयः रक्ता रक्ताक्षाः' इत्यादि। याम्यायां दण्डसंयुतं कृष्णं 'याम्यायां दिशि हरेर्भगवतो ये गणा दण्डपाणयः कृष्णाः' इत्यादि। नैर्ऋत्यां खड्गं श्यामसमन्वितं 'नैर्ऋत्यां खड्गपाणयः श्यामाः'। वारुण्यां पाशशबले 'वारुण्यां पाशपाणयः शबलाः'। वायव्यां पुनरङ्कुशं पीतं 'वायव्याम् अङ्कुशपाणयः पीताः'। तथैव सौम्यायां गदां सितसमन्वितां 'सौम्यायां गदापाणयः सिताः'। ऐशान्यां शूलकपिले 'ऐशान्यां शूलपाणयः कपिलाः'। ऊर्ध्वायां पद्मसूक्ष्मके 'ऊर्ध्वायां पद्मपाणयः सूक्ष्माः'। अधस्ताद् विषधूम्रे च 'अधस्ताद् दिशि हरेर्भगवतो ये गणा विषपाणयः धूम्रा धूम्राक्षाः' इत्यादीत्यर्थः। अन्यदेवेषु हरिस्थाने हरेरित्यस्य स्थाने स्वस्वनाम योजयेत्। 'पूर्वस्यां दिशि शिवस्य भगवतो ये गणा वज्रपाणयः श्वेताः श्वेताक्षाः' इत्यादीत्यर्थः।।119-122।।

तृतीयं मालामन्त्रमाह-**ये भूता** इति।।

विवरणम्

प्राचीत्यणुरिति। प्राच्यां दिश्येवम्। पूर्वस्यां दिशीत्ययं मालामनुरित्यर्थः। अन्यत्रेति। आग्नेय्यादिदिक्षु। आशास्त्रवर्णपदे इति। पूर्वस्यां दिशि वज्रपाणयश्चैता इति दिगायुधवर्णानां स्थाने एतानि वक्ष्यमाणानि योजयेदिति भावः।।119।।

मन्त्रवित्तम इति।।122।।

On the east the mantra is as stated above (Purvasyām diśi etc.). In the Vahni corner-southeast weapon and colour are Śakti and Rakta- like "Āgneyyām etc. "In the south-dark colour with a staff. In the southwest-Bhūtas holding swords with dark colour as and possessed of dark eyes. In the west noose is the weapon with variegated colour and having variegated

---

1. तेभ्यस्ताभ्यो ख ग पाठः।

eyes. In the northwest Bhūtas with trident and yellow colour and eyes. In the north club is the weapon white in colour with eyes of similar colour. In the northeast Śūla is the weapon with red colour with eyes possessing the same colour,. In the space under southeast - Bhūtas with smoke colour and smoky limbs and eyes. They hold poison in their hands. All these are to be propitiated with mantras matching their names colours and weapons.

The prose contains invocations to the guardians with different forms and holding a variety of weapons. Offerings are also given to them. (119-122)

प्राचीत्यणुर्दक्षिणपश्चिमोत्तरो-
पर्यक्षराण्योजदिशास्वतोऽन्यतः।
पुरःपदेऽग्न्यादिविदिक्पनाम च
क्रमान्नवाशासु यदीह योजयेत्।। 123।।

विमर्शिनी

इति प्राचि भागे अणुः। अतोऽन्यतः [1]ओजदिशासु अयुग्मदिक्षु पुरःपदे पुर इत्यस्य[2] स्थाने दक्षिणपश्चिमोत्तरोपर्यक्षराणि दक्षिण-पश्चिम-उत्तर-उपरीति पदानि क्रमाद् योजयेते। 'ये (देवा? भूता) दक्षिणसदः' इत्यादि। नवाशासु यदि विष्ण्वादौ कुहचिद् बहिर्बलिकाले बलिपीठबाह्यतो नवाशासु अतोऽन्यतः कोणेषु पुरःपदे क्रमाद् अग्न्यादिविदिक्पनाम च अग्न्यादिकोणपालानां नाम च योजयेत्। 'ये (देवा? भूता) अग्निसदः' इत्यादि।। 123।।

विवरणम्

प्राचीत्यणुरिति। ओजदिशासु यद्यतोऽन्यतः दक्षिणपश्चिमोत्तरोपर्यक्षराणि पुरःपदे योजयेदित्यन्वयः। यथा 'ये भूता दक्षिणसद' इत्यादि नवाशासु यद्यग्न्यादिविदिक्पनाम च योजयेदिति। विदिक्ष्विति ज्ञेयम्। अतोऽन्यत इति सामान्येन ह्युक्तम्। यथा 'ये भूता अग्निसदः', 'ये भूता निरृतिसदः' इत्यादि।। 123।।

For east the mantra is Prācī, for other directions like south, west, north and top separate mantras are indicated. They are like purassadaḥ, dakṣiṇasadaḥ, paścimasadaḥ, uttarasadaḥ and uparisadaḥ. The names of the deities are lords of the region have to be incorporated properly (like Agnisadaḥ etc.) (123)

ऋषभायेति नमोऽन्तो महाबलायाथ सौरभेयाय।
हरवाहनाय चैते वृषमनवोऽथेति तस्य गायत्री।। 124।।

'सौरभेयाय विद्महे महाबलाय धीमहे। तन्नो वृषः प्रचोदयात्'।

---

1. 'जाशा ख पाठः।
2. 'त्युपस्था' क. 'त्युकस्था' ङ पाठः।

विमर्शिनी

ऋषभमन्त्रानाह-**ऋषभायेति**। नमोऽन्त ऋषभायेति नमोऽन्त इति प्रत्येकं सम्बध्यते। महाबलायेति, तथा सौरभेयायेति, तथा हरवाहनायेति, एते [1]वृषमनवः। अथेति तस्य गायत्री च भवति।।124।।

तां लिखति-**सौरभेयायेत्यादि**।।

विवरणम्

अथ शिवे लोकपालानन्तरं वाहनमिति तदीयमूलमन्त्रादिसर्वमाह ऋषभायेति।।124।।

Mantra for the bull of Śiva- vāhanamantra- has to incorporate adjectives like Rṣabhāya, Mahābalāya, Saurabheyāya, and Haravāhanāya. The Gāyatri is also given as Saurabheyāya Vidmahe etc. up to Tanno vṛṣaḥ pracodayāt (124)

ओं नमः षण्मुखायेति स्कन्दमैन्द्र्यां स्थितं यजेत्।
शास्तारमग्नौ भांबीजं भूताधिपतये नमः।।125।।

विमर्शिनी

स्कन्दाद्यावरणं क्रमेण विवृणोति-**ओं नम इत्यादि**। ऐन्द्र्यां प्राच्यां स्थितं स्कन्दं 'ओं नमः षण्मुखाये'ति यजेत्। अग्नौ भांबीजयुक्तं 'भूताधिपतये नम' इति मन्त्रेण शास्तारं यजेत्।।125।।

विवरणम्

स्कन्दाद्यावरणमन्त्रान्यथाभ्युपगमं सर्वदेवविषयानाह[2]-ओं नम इति। पितृपतौ धर्ममातृरित्यत्र धर्ममन्त्रो धर्मराजाय नम इति सामान्यसिद्ध एव।। 125।।

With the mantra "om namah Ṣaṇmukhāya" god Skanda may be propiatiated in the eastern direction preside over by Indra, while Śāstā may be worshipped with the mantra Bhūtādhipataye etc., in the south east direction. (125)

वीरभद्रं गणपतिं प्राक्प्रत्यक्पार्श्वयोस्ततः।
ब्रह्माणीमपि तन्मध्ये यजेन्माहेश्वरीमपि।।126।।
कौमारीं वैष्णवीं तद्वद् वाराहीं च सबीजकैः।
नाममन्त्रैस्तथेन्द्राणीं चामुण्डीं सजिनाक्षरैः।।127।।

'वीरभद्राय विद्महे [3]महाननाय धीमहे। तन्नः शान्तः प्रचोदयात्'।
'एकदंष्ट्राय विद्महे गजाननाय धीमहे। तन्नो दन्तिः[4] प्रचोदयात्'।

---

1. 'षे' क पाठः।
2. 'होत्रम पितृ' क पाठः।
3. 'से' ग पाठः।
4. 'न्ती' ख. ग. घ पाठः।

'ब्रह्मभूतायै विद्महे कुशहस्तायै धीमहे। तन्नो ब्राह्मी प्रचोदयात्'।
'महेश्वरभूतायै विद्महे शूलहस्तायै धीमहे। तन्नो माहेश्वरी प्रचोदयात्'।
स्कन्दभूतायै विद्महे शक्तिहस्तायै धीमहे। तन्नः कौमारी प्रचोदयात्'।
'विष्णुभूतायै विद्महे चक्रहस्तायै धीमहे। तन्नो वैष्णवी प्रचोदयात्'।
प्रजापतिभूतायै विद्महे गदाहस्तायै धीमहे। तन्नो वाराही प्रचोदयात्'।
इन्द्रभूतायै विद्महे वज्रहस्तायै धीमहे। तन्न इन्द्राणी प्रचोदयात्'।
'रुद्रभूतायै विद्महे खड्गहस्तायै धीमहे। तन्नश्चामुण्डी प्रचोदयात्'।

विमर्शिनी

पुनर्दक्षिणे ओं धर्माय नमः इति धर्ममाराध्य तत्पश्चिमे मातॄर्यजेत्। तत्र प्राक्प्रत्यक्पार्श्वयोर्वीरभद्रं गणपतिं च यजेत्। ततस्तन्मध्ये सबीजकैः, वीं गं व्यों मं[1] मां ह्यौं[2] हें हों हुं एतानि बीजानि, स्वस्वनाममन्त्रैः ब्रह्माणीं माहेश्वरीं कौमारीं वैष्णवीं वाराहीमिन्द्राणीं चामुण्डीं यजेत्। [3]सजिनाक्षरैः स्वस्वगायत्रीभिश्च।।126-127।।

गायत्रीः क्रमेण पठति-**वीरभद्रायेत्यादि**।।

विवरणम्

वीरभद्रमिति। सबीजकैर्नाममन्त्रैस्सजिनाक्षरैरिति सर्वत्रापि सम्बध्यते। प्राक्प्रत्यक्पार्श्वयोरिति मिथस्सम्मुखाविति ज्ञेयम्-

द्वयोः स्वाद्यर्णमेकस्या वायुस्थं सतिलं द्वयोः।
बीजं विषं स्वमन्यासाञ्चातुर्थाद्य त्रयोदशैः।।
स्वैराद्यद्वितीयद्वादशैरेकादशेन च।
त्रयोदशेन षष्ठेन युक्तं बिन्द्वन्वितं क्रमात्।।

इति। यथा वीं वीरभद्राय नमः इति। 'व्यों ब्रह्माण्यै नमः' इत्यादि। इति।।126-127।।

Vīrabhadra and Gaṇapati at the east and west directions may be worshipped and the seven mothers Brāhmī, Māheśvarī, Kaumārī, Vaiṣṇavī, Vārāhī, Indrāṇī and Cāmuṇḍi may be propitiated between them using the respective bījamantra pertaining to them mentioning their names as Brahmāṇyai namaḥ etc, Gāyatrī mantra also may be used while offering oblations.

The Gāyatri mantras of the Seven mothers are provided in prose with prefixes and suffixes as required. (126-127)

---

1. ओं' ख ग पाठः।
2. 'हें ह्यौं हों'।
3. 'स्व' ङ पाठः।

मातृभ्यो लोकमातृभ्यः सर्वमातृभ्यः इत्यपि।
सर्वमातृगणेभ्यश्च क्रमाद् दिक्षूर्ध्वतोऽमुना।।128।।

'नानारूपा मातरः प्रतिदिशं व्यवस्थिताः दिव्यन्तरिक्षभौमाः पातालनिवासिन्यश्चेहायान्तु विष्णवाज्ञया मामनुगृह्णन्तु प्रतिगृह्णन्तु पूजां सौम्यरूपधारिण्यस्ताभ्यो देवीभ्यो नमो नमः स्वाहा'।

विमर्शिनी

'मातृभ्यो नमः' इत्यादिभिश्चतुर्भिर्मन्त्रैः क्रमाद् दिक्षु, अमुना 'नानारूपा' इत्याद्येन मन्त्रेण ऊर्ध्वतो यजेत्।।128।।

मालामन्त्रं पठति-नानारूपा इति।।

विवरणम्

क्रमाद्दिक्ष्विति। मातृपीठान्तर्भागे प्रागादिचतुर्दिक्षु। यद्वाग्न्यादिचतुर्दिक्षु। यदुक्तं-

मातृभ्यो लोकमातृभ्यः सर्वमातृभ्य इत्यपि।
सर्वमातृगणेभ्योऽन्ते सर्वदिक्षूर्ध्वतोऽमुना।।

इति[1]। यद्वा क्रमाद्दिक्ष्विति प्राङ्मध्यपश्चाद्दिक्षु क्रमेणेति भावः।ऊर्ध्वतोमुनेति। तन्मध्ये नानारूपेति मालामन्त्रेणेत्यथः। प्राङ्मध्यादि दिक्क्रमे तूपर्येतद्भवति।।128।।

In the different directions of the altar stones in which the Seven mothers are installed mantras like Mātṛbhyaḥ, Lokamātṛbhyaḥ, Sarvamātṛbhyaḥ and Sarvamātṛgaṇebhyah are to be chanted and oblations sprinkled with a fifth mantra the center of the stone is also to be worshipped. The mantra begins with nānānūpa etc. (128)

साधारणमनौ विष्णुपदे स्वस्वाक्षरं पठेत्।
सर्वत्राकाशमातृभ्यस्तद्गणेभ्योऽपि वा हरेत्।।129।।

विमर्शिनी

साधारणमनौ साधारणेऽस्मिन् मन्त्रे विष्णुपदे स्वस्वाक्षरं शिवादिपदं पठेत्। पुनः सर्वत्र आकाशमातृभ्यस्तद्गणेभ्य इत्यपि हरेद्वा।।129।।

विवरणम्

सर्वत्राकाशमातृभ्य इति। विष्णुशिवादिष्वित्यर्थः।।129।।

While offering oblations to the Seven mothers the pries. shall say that he is doing it as ordered by the particular deity of the temple like "Viṣṇvājñayā, Rudrājñayā" etc. Finally for all the Akāśamātṛs and Ākāśamātṛgaṇas are also to be given oblations. Final mantra shall also mention the Parāsādas of the respective deities. (129)

---

1. 'ति। क्र' क पाठः।

निजमन्त्रशास्तृशम्बरकुमारहस्त्यश्वनीलकालाश्च[1] ।
आर्यार्चने कपर्द्युग्रो रुद्रसुतश्च भूतनाथश्च ।। 130 ।।

विमर्शिनी

आर्यार्चने निजमन्त्रशास्तृशम्बरकुमारहस्त्यश्वनीलकालाश्च निजमन्त्रो निजमूलमन्त्रः 'शास्त्रे नमः' शम्बरकुमाराय नमः' हस्त्यश्वाय नमः' 'नीलाय नमः' 'कालाय नमः' कपर्दी 'कपर्दिने नमः' उग्रः 'उग्राय नमः' रुद्रसुतश्च 'रुद्रसुताय नमः' भूतनाथश्च भूतनाथाय नमः' एते मन्त्राः ।। 130 ।।

विवरणम्

तथार्यं भृङ्ग इति यदुक्तं तत्र मूलादिसर्वमाह–निजमन्त्रेति । निजमूलमन्त्रग्रहणमेतत् ।। 130 ।।

While offering oblations to the servants of Śāstā the following nine mantras are also to be used incorporating their synonyms such as Śāstā, Śambarakumāra, Hastyaśva, Nīla, Kāla, Kapardi, Ugra, Rudrasuta and Bhūtanātha (130)

भूतनाथाय विद्महे भवपुत्राय धीमहे।
गायत्री चेति [2]तन्त्रोक्ता तन्नः शास्ता प्रचोदयात् ।। 131 ।।

चाम्बादीनां गणाः सर्वे कोटिकोटिगणाधिपाः ।
भवन्तु[3] सहिताः सर्वे तेभ्यस्ताभ्यो नमो नमः ।। 132 ।।

विमर्शिनी

तत्र 'भूतनाथाय विद्महे' इत्याद्या चोक्ता ।। 131–132 ।।

Gāyatris of the god are given here in full form. (131-132)

चाम्बाद्यः पश्चिमे शास्तुः स्वनाम्नार्च्यो दिवाकरः ।
खषोत्कायेति मन्त्रो वा हुतान्तस्तद्विधौ स्मृतः ।। 133 ।।

विमर्शिनी

शास्तुः पश्चिमे चाम्बाद्यः 'चाम्बादीनां गणा' इत्याद्यो मन्त्रः स्यात् । निर्ऋतिबहिः स्वनाम्ना 'ओं सूर्याय नमः' इति वा, हुतान्तः स्वाहान्तः 'खषोत्काये'ति मन्त्रो वा तद्विधौ सूर्ययजने स्मृतः ।। 133 ।।

विवरणम्

चाम्बादीनामित्युक्तबलेः स्थानमाह–चाम्बाद्याः पश्चिमे शास्तुरिति । स्वनाम्नार्च्यो दिवाकर इति । तदेव स्वन्नाम बोद्धव्यम् ।। 133 ।।

Towards the west of Śāstā, the form of a crocodile may be shaped with

1. 'श्च ।। सकपर्द्युग्रो रुद्रसुताद्यं च शास्तृयजनेस्युः ।। भू ।
2. संप्रोक्ता' ग, स्योक्ता' क. घ पाठः ।
3. 'न्ति' क पाठः ।

cooked rice and worshipped with a mantra incorporating the word" Khaṣolkāya svāha". There are crores of attending spirits in the courtyard of the temple waiting for oblation. They belong to the class of attendants of the deities. (133)

ओं [1]तदादिद्विषट्केण ब्रह्मा हूमिति सूकरः।
दुर्गा स्वमूलतः स्कन्दो मूलनामजिनाक्षरैः।।134।।

'सनत्कुमाराय विद्महे षडाननाय धीमहे। तन्नः स्कन्दः प्रचोदयात्'।

विमर्शिनी

ओं तदादिद्विषट्केण 'ओं तत्सन्नमो ब्रह्मणे तत्सन्नमः' इति द्वादशाक्षरेण ब्रह्माच्यः। हूमिति बीजेन सूकरो वराहोऽर्च्यः। दुर्गा स्वमूलतोऽर्च्या। मूलनामजिनाक्षरैः स्वमूलेन षण्मन्त्रैर्गायत्र्या च स्कन्दोऽर्च्य।।134।।

तद्गायत्रीं पठति-सनत्कुमारायेति।।

विवरणम्

ओं तदादिद्विषट्केण ब्रह्मेति। बाह्यं द्वादशाक्षरमुक्तं; तच्च प्रथमपटल उक्तं तत्सन्नमः प्रपुटितमि'त्यादि।।134।।

Brahmā should be worshipped with Dvādaśākṣara mantra after giving an oblation to Sun god. Varāha should be worshipped in the corner of Vāyu-northwest. For worshipping Durgā her mūlamantra is needed. For Skanda his own Gāyatri and mūlamantra are required. (The Ṣaṇ mantra incorporates the names of Sanatkumāra, Skanda, Indra, Viśākha, Śāstā and Ṣaṇmukha). (134)

श्रीधराश्वमुखौ पार्श्वद्वये वागीश्वरी क्रिया।
कीर्तिर्लक्ष्मीस्तथा सृष्टिर्विद्या शान्तिश्च मातरः।।135।।

विमर्शिनी

पुनरुत्तरमातृणां पार्श्वद्वये श्रीधराश्वमुखौ। तन्मध्ये वागीश्वरी क्रिया कीर्तिः लक्ष्मीः सृष्टिः विद्या शान्तिश्च सप्त मातरः।।135।।

The Seven matrs located at the north are flanked by the guardian deities of Śrīdhara and Aśvamukha. The mātṛs are Vāgīśvarī, Kriyā, Kīrti, Lakṣmī, Srṣṭi, Vidyā and Śānti. They too need oblations and worship. (135)

तद्बीजं तुर्यषष्ठौ च द्वादशश्च त्रयोदशः।
आद्यश्चैकादशश्चैव द्वितीयश्चेन्द्रगाः स्वराः।।136।।

---

1. तत्सदादिस्वष ख. ग घ. च पाठः।

विमर्शिनी

तत्र इन्द्रगाः लकारगताः तुर्यषष्ठौ द्वादशः त्रयोदशश्च आद्याः एकादशश्च द्वितीयश्च स्वराः। लीं लूं लैं लों लं ले लां इति तद्बीजं तासां बीजानि।।136।।

विवरणम्

तद्बीजमिति। तासां सप्तानां बीजम् इन्द्रगास्तुर्यषष्ठादिस्वराः। इन्द्रे लकारः यथा लीं वागीश्वर्यै इत्यादि। श्रीधराश्वमुखयोस्तु स्वाद्यक्षरं बीजं द्रष्टव्यम्।।136।।

The Bījākṣaras of the seven mothers on the north side are noted here. All are related to the letter "la". They are like "lim Vāgīśvaryai namaḥ"etc. (as noted in the commentary) (136)

गायत्रीरहितं सर्वं योज्यमत्रापि पूर्ववत्।
शिवं यजेत् षडर्णेन नाम्ना निर्माल्यधारिणम्।।137।।

विमर्शिनी

अत्रापि गायत्रीरहितं सर्वं मन्त्रजातं पूर्ववद् दक्षिणमातृवद् योज्यम्। षडर्णेन स्वेन षडक्षरेण शिवं यजेत्। निर्माल्यधारिणं [1]स्वनाम्ना यजेत्।।137।।

विवरणम्

योज्यमत्रापि पूर्ववद् इति। प्रागुक्तमातृवदित्यर्थः। तुहिनरुचावंबिकामित्यत्र 'ओं अम्बिकायै नमः' इत्येव मन्त्रः। नाम्ना निर्माल्यधारिणमिति। स्वस्वनाममन्त्रेणेत्यर्थः।।137।।

All of them may be used without the prefixation of Gāyatri (as in the case of southern mothers). Śiva also may be propitiated with six lettered mantra. Nirmālyadhārī is to be worshipped using respective names. (137)

विष्वक्सेनोऽन्तवौङ्कारो नमोऽन्तः परिकीर्तितः।
क्लीं मुण्डिन्यै नम इति मुण्डिनीमनुरीरितः।।138।।

विमर्शिनी

विशेषमाह-**विष्वक्सेन** इति। अन्तवौङ्कारः नामान्ते वौंकारयुक्तः नमोन्तश्च विष्वक्सेनः 'ओं विष्वक्सेन वौं नमः' इति मन्त्र इत्यर्थः। 'लीं मुण्डिन्यै नमः' इति मुण्डिनीमनुरीरितः।।138।।

विवरणम्

क्यचिन्मूलमन्त्रमपि दर्शयति-**विष्वक्सेन** इति।।138।।

Viṣvaksena is to be worshipped with "Vam" at the end of the name. For Muṇḍinī a prefixation of 'Klīm" is needed and shall end with namaḥ. (138)

चण्डेश्वरस्य मन्त्रोऽथ धुनिचण्डहुमस्त्रकम्।
चण्डेति चण्डचण्डेति नाम चण्डश्वरेति च।।139।।

---

1. 'णं स्वस्व ख. ग. घ. ङ च पाठः।

विमर्शिनी

अथ धुनिचण्डहुमस्त्रकम् इति चण्डेश्वरमन्त्रः। चण्डेति चण्डचण्डेति चण्डेश्वरेति च नाम। 'चण्डाय नमः' इत्याद्या नाममन्त्रा इत्यर्थः।।139।।

Caṇḍeśvara mantra is given in the stanza beginning with "Dhuni". The names Caṇḍa, Caṇḍacaṇḍa and Caṇḍeśvara could be used. (139)

चण्डचण्डाय विद्महे चण्डेश्वराय धीमहे।
इति चण्डेशगायत्री तन्नश्चण्डः प्रचोदयात्।।140।।

विमर्शिनी

चण्डचण्डेत्याद्या तस्य गायत्री च।।140।।

Caṇḍeśa Gāyatri is spelt out here as "Caṇḍacaṇḍāya vidmahe" etc. (140)

गोपुरद्वारि सम्पूज्यौ शङ्खपुष्पनिधी हरौ।
शङ्खचक्रौ बहिर्द्वारि ततः सर्वत्र घोषयेत्।।141।।
ये समस्तं जगद् व्याप्य तिष्ठन्ति बलिकाङ्क्षिणः।
विष्णुपारिषदाः सर्वे गृह्णन्तु बलिमुत्तमम्।।142।।

विमर्शिनी

हरौ गोपुरद्वारि शङ्खपुष्पनिधी शङ्खनिधिः पुष्पनिधिश्च पूज्यौ। तत्र बहिर्द्वारि शङ्खचक्रौ चेति भूतबलेरत्र विशेषः। ततः सर्वत्र ये समस्तमित्यादिना घोषयेद् उच्चैरुच्चरेत्।।141-142।।

विवरणम्

अथ विष्णावुत्सव एव सभायां द्वाःस्थानुपदिशति-गोपुरद्वारीति। सभान्तर्द्वाराभिप्रायम्। शङ्खपुष्पनिधी हराविति। प्राग्द्वाःस्थानुक्रमणे श्रीः पुष्टिसंज्ञापीत्युक्तयोरयमपवादः। यद्वा तत्पूजापूर्वकमनयोरपि पूजाभिप्रयते। बहिर्द्वारीति। सभाया इति शेषः। ततः सर्वत्र घोषयेदिति सर्वेष्वपि समानम्।।141।।

ये समस्तमिति। उपस्थानमित्यर्थः। घोषयेदित्यनेनोपस्थानसमये तदङ्गतया वाद्यघोषणमपि सूचितम्। बहिर्निष्क्रम्य घोषयेद् 'ये समस्त'मित्यादि चान्यत्रोक्तम्।।142।।

In the case of Viṣṇu the nidhis Śaṅkha and Puṣpa need be worshipped at the doorstep and Śaṇkha and Cakra at the outside. Bhūtabali applies to all these four. (141-142)

आराध्य ध्वजदेवतादिबहिरावारद्वयं पूर्ववद्
विष्णौ दिग्गणमन्त्रतश्च दशदिक्ष्वत्राहरेद् वा बलिम्।
ये भूतादिपुरःप्रभृत्युपरिनिष्ठैः सर्वदिक्षु क्रमात्
पीठस्याधिपतिं निजावृतिवृतं मध्ये समभ्यर्चयेत्।।143।।

विमर्शिनी

विष्णौ ध्वजदेवतादिबहिरावारद्वयं कुमुदादिकं पञ्चाशत्भूतगणस्वरूपं चावरणद्वयं पूर्ववद्

भूतबलिवदाराध्य दशदिक्षु दिग्गणमन्त्रतः 'पूर्वस्यां दिशि हरेरि'त्यादिमन्त्रेण अत्र तृतीयावरणे बलिमाहरेत्। वेति समुच्चयार्थः। ये भूतादिपुरःप्रभृत्युपरिनिष्ठैः'ये भूतात् पुरस्सदः इत्यादि 'ये भूता उपरिषदः' इत्यन्तैर्नवभिर्मन्त्रैः क्रमात् पीठस्य सर्वदिक्षु नवसु दिक्षु, निजावृतिवृतं कुमुदाद्यावृतिसहितम् अधिपतिं मध्ये च समभ्यर्चयेत्।।143।।

विवरणम्

बहिरावारद्वयं पूर्ववदिति। भूतबल्युक्तवदित्यर्थः। दिग्गणमन्त्रतश्चेति। 'पूर्वस्यां दिशि विष्णोर्भगवतः' इत्यादिमन्त्रग्रहणम्। आहरेद्वा बलिमिति। बल्यकरणमपि[1] विकल्प्यते। सर्वदिक्षु क्रमादिति। मन्त्रवशान्नवदिशामेव ग्रहणम्। क्रमान्नवाशासु। यदीह योजयेदिति ह्युक्तं, बलिमाहरेदिति चानुषङ्गः। निजावृतिवृतमिति। तदुक्तं-कुमुदाद्यष्टकमिष्ट्वा मध्येपीठं यजेत हरिसेनम्' इति।।143।।

In the case of Utsavabali of Viṣṇu the two peripheries outside the sanctum shall be covered with oblations to Bhūtas. Thereafter in all the ten locations beginning with Indra- meaning east- may be similarly covered giving oblation to attendants. Mantras like "Ye Bhūtāh"- nine of them are to be employed in this connection. The big altar stone may be worshipped all around, sides as wll as its top. Kumuda and other guards are located around while Harisena occupies the top. All of them need to be propitiated. (143)

स्थाणौ भूतबलिक्रमेण बलिपीठान्तं बहिः स्याद् बलि-
र्यत्रान्तः शिववद् बहिश्च शिववत् तत्रान्यतश्चान्यथा।
दुर्गायां प्रथमोदितावरणबाह्येऽर्च्याः सुदुर्गादय-
स्तत्तद्दिश्यगणाः स्मरद्विषि महाकालादयश्चोदिताः।।144।।

विमर्शिनी

स्थाणौ भूतबलिक्रमेण बलिपीठान्तं बहिर्बलिः स्यात्। यत्र देवेऽन्तर्बलिः शिववत् 'पूर्वस्यां दिशी'त्यादिकं 'ये भूताः' इत्यादिकं चान्तः परिगृह्यते, तत्र बहिश्च शिववद् बलिपीठपर्यन्त-बलिर्भूतबलिक्रमेण स्यात्। अन्यतश्चान्यथा यत्रान्तर्विष्णुवद् भवति तत्र बहिरपि विष्णुवदित्यर्थः। दुर्गायां प्रथमोदितावरणबाह्ये काल्यादिध्वजावरणबाह्येऽष्टकोटिगणेभ्य इत्यस्य स्थाने सुदुर्गादयः तत्तद्दिश्यगणाः तत्तद्दिग्भवा गणा अर्च्या उदिताः। स्मरद्विषि महाकालादयो विंशद्भूतगणाश्च।।144।।

विवरणम्

बलिपीठान्तमिति। ध्वजदेवताद्यावरणद्वयं सावरणबलिपीठाधिपश्चोक्तः। यत्रान्तशिशववद् बहिश्च शिववत्तत्रेति वाक्यम्। 'दिग्दिक्ष्वीशगणेशवह्निभुवी'त्यत्र चैतत्सर्वमभिहितम्। अन्यतश्चान्यथेति। यत्रान्तर्हरिवत्तत्र बहिरपि हरिवदित्यर्थः। प्रथमोदितावरणबाह्य इति। ध्वजावरणानन्तरमिति भावः। सुदुर्गादिगणानां सङ्ग्रहोद्देशमात्रमेव भूतबलौ महिषहन्त्यामष्टकोट्येत्येतावित्यभिप्रायः।।144।।

---

1. मिति वि' क. पाठः।

In respect of Śiva, Bhūtabali may be performed up to the big altar stone. The procedures inside the courtyard of the temple shall be as stated earlier. In the second periphery or corridor outside the first one the lords of quarters may be worshipped. For Siva spirits like Mahākāla are also propitiated in the second corridor. (144)

ये भूतादिमनुद्वयेन पृथगावृत्त्या गुहेऽत्रार्यके
चाम्बेत्यादिभिरुत्सवार्थमिति विघ्नेशे ग्रहोपान्ततः।
सर्वत्रैकपरिक्रमात् त्रिविधमन्त्रैर्ये समस्तं नमो
गृह्णन्त्वादिभिरीश्वरे प्रथमतो वैतैर्ध्वजावारतः।।145।।

विमर्शिनी

गुहेऽत्र षट्कोट्यावरणान्ते ये भूतादिमनुद्वयेन 'ये भूताः स्कन्दसेनस्य' इत्यादिना 'बलिग्रहेभ्यो भूतेभ्यः' इत्यादिना च पृथगावृत्त्या आवरणद्वयेन बलिं हरेदिति शेषः। आर्यके एतत्स्थाने चाम्बेत्यादिभिः 'चाम्बादीनां गणाः' इत्यादिना 'नमोऽस्तु भीमरूपेभ्यः' इत्यादिना 'प्राग् गणेभ्यः' इत्यादिना 'सर्वेभ्यः पिङ्गलेभ्यः' इत्यादिना च वक्ष्यमाणैश्चतुर्भिर्मन्त्रैः पृथगावृत्त्या च, विघ्नेशे एतत्स्थाने 'उत्सवार्थमि'ति मनुन। च बलिं हरेत्। सर्वत्र सर्वदेवेषु ग्रहोपान्ततः देवग्रहादेः पूर्वं ये समस्तं नमो गृह्णान्त्वादिभिः 'ये समस्तमि'त्यादिना 'ओं नमो भूतेभ्यः' इत्यादिना 'गृह्णन्तु बलिम्' इत्यादिना च त्रिविधमन्त्रैः एकपरिक्रमाद् एकावृत्त्या च बलिं हरेत्। ईश्वरे ध्वजावारतः नन्द्यादिध्वजावरणात् प्रथमत एतैस्त्रिविधमन्त्रैर्वा।।145।।

विवरणम्

ये भूतादिमनुद्वयेन पृथगावृत्त्या गुहेऽत्रेति। प्रथमोदितावरणबाह्य इत्यर्थः। यदुक्तं- "तन्मत्रेण नमोऽन्तेन ध्वजमूले बलिं हरेत्। ये भूतादिमन्त्रमुक्त्वा-"द्वितीयावरणे दिक्षु मन्त्रेणानेन दापयेत्" इत्यादि। ध्वजदेवतावरणं 'षट्कोट्योद्भिदुरा गुहे' इत्येतदावरणञ्च सम्पूज्य पुनरेतदावरणद्वयं पुनर्महाबलिपीठे बलिरि[1]ति बोद्धव्यम्। शास्तरि गणपतौ च सममेतत्। अथ सर्वत्र ग्रहोपान्ततस्त्रिविधमन्त्रैरेक-परिक्रमादित्यन्वयः। सर्वत्र सर्वदेवेषु। एकपरिक्रमादिति। एकावृत्त्येत्यर्थः। एतदनन्तरमेव देवासुरादि-ग्रहबलिः। ईश्वरे प्रथमतो वैतैर्ध्वजावारत इति बहिर्निष्क्रम्य 'ये समस्त'मित्युपस्थानानन्तरमिममेकावृत्त्या बलिं विकीर्य पुनर्नन्द्यादिध्वजदेवताः पूजयेत्। महाबलिपीठसमनन्तरं देवासुरादिग्रहबलिरेवेति भावः।।145।।

In respect of Guha there are several Āvaraṇas - corridors around the sanctum. Dhvajāvaraṇa is to be propitiated with the mantra "Ye Bhūtāḥ". Next Āvaraṇa is Śaṭkoṭi. Third is with the mantra "Ye Bhūtāḥ Skandasenasya". Fourth Āvaraṇa is with "Baligrahebhyaḥ". With these all the eight regions are to be covered.

For Śāstā four mantras beginning with "Cāmbādīnām" is riquired

For Gaṇapati the mantra "Utsavārtham" is required.

1. 'मि' क पाठः।

Three types of mantras are to be followed for this Utsavabali up to the flagstaff and big altar stone. (145)

सुदुर्गा च विदुर्गा च निदुर्गा सु[1]विलोचना।
सुलोचना सुभद्रा चातिदुर्गा दुर्गविक्रमा।। 146।।

अकन्या च सुकन्या च रविकन्या च कन्यका।
र[2]क्षःकन्या मारकन्या सुरकन्या रविप्रभा।। 147।।

कृत्तिका कार्तिका सर्वकार्तिका कार्तिकायनी।
कृत्यान्ति[3]का कृत्यकन्या कृत्तिनी कृत्तिकोद्भवा।। 148।।

वामा सुवामा वामार्हा वामाङ्गी वामलोचना।
वामोद्भवा वामसमा वाममूर्तिधरा पुनः।। 149।।

देवी सुदेवी यादेवी समदेवी सुमर्दिनी।
विदेवी रविदेवी च देवदेवीति कीर्तिता।। 150।।

अदण्डा च विदण्डा च सुदण्डा दण्डविक्रमा।
शतदण्डा महादण्डा दुर्दण्डा दुरतिक्रमा।। 151।।

अगौरी च विगौरी च सुगौरी गौरिविक्रमा।
निर्गौरी चैव दुर्गौरी सुगौरी गौरिवल्लभा।। 152।।

जया च विजया चैव अजया च जयावती।
सुजया व जयाक्रा[4]न्ता जय[5]न्ता जयविक्रमा।। 153।।

काली चैव सुकाली च विकाली कारकालिका।
दुष्क[6]ाली कार्तिकाकाली निष्काली भद्रकालिका।। 154।।

समेदिनी सुमेदिनी वसुधा च वसुन्धरा।
भूमिरुर्वी धरा पृथ्वीति क्रमात् परिकीर्तिताः।। 155।।

विमर्शिनी

सुदुर्गाद्यष्टविधाः शक्तिराह–सुदुर्गेति।। 146–155।।

In the case of the Utsavabali of Durgā the eight Śaktis fo the deity are

---

1. 'च' क. पाठः।
2. 'यक्ष' ख. ग. घ. पाठः।
3. 'न्त' ख. पाठः।
4. 'का'।
5. 'या' ख. ग. पाठः।
6. 'र्गा' क. ख. ग. पाठः।

narrated in these stanzas. The prowesses of the goddess are suggested by the various synonyms like Sudurgā, Vidurgā etc. (146-155)

सुदु[1]र्गाद्यष्टशक्त्यन्ते प्राक्स्थिताभ्योक्षरान्ततः।
स्याद् देवग्रहशक्तिभ्यो दुर्गावर्णसमन्वितः।।156।।
कोटिपारिषदीभ्योऽन्ते नमो नम इतीरितः।
प्राङ्मन्त्रोऽन्यत्र तच्छक्तिदिग्ग्रहार्णविभेदितः।।157।।

विमर्शिनी

अष्टविधशक्तीनां मन्त्रानुद्धरति-**सुदुर्गाद्यष्टशक्त्यन्त** इति। सुदुर्गाद्यष्टशक्तीरुक्त्वा। प्राक्स्थिताभ्योऽक्षरान्ततः 'प्राक्स्थिताभ्यः' इत्यक्षराणामन्तः देवग्रहशक्तिभ्यो दुर्गावर्णसमन्वितः 'देवग्रहशक्तिभ्यो दुर्गा' इति वर्णैर्युक्तः, कोटिपारिषदीभ्यः इत्यन्ते नमो नमः इति प्राङ्मन्त्र ईरितः स्यात्। सुदुर्गेत्यादि पद्यमुक्त्वा वा, 'ओं सुदुर्गाविदुर्गानिदुर्गासुविलोचनासुलोचना-सुभद्रातिदुर्गादुर्गविक्रमाभ्यः' इत्युक्त्वा वा 'प्राक्स्थिताभ्यो देवग्रहशक्तिभ्यो दुर्गाकोटिपारिषदीभ्यो नमो नमः' इति प्राङ्मन्त्रः। अन्यत्र नवसु मन्त्रेषु तच्छक्तिदिग्ग्रहार्णविभेदितः तत्तच्छक्तिभिर्दिग्भिर्ग्रहार्णैश्च विशेषेण भेदितः। अकन्याद्यष्टशक्त्यन्ते 'अग्निदिक्स्थियताभ्योऽसुरग्रहशक्तिभ्यः' इत्याद्यूहयेत्। उपर्यधोभागयोर्ब्रह्मग्रहसर्पग्रहौ योज्यौ।।156-157।।

विवरणम्

तेषामेवावशेषभागमाह-**सुदुर्गाद्यष्टशक्त्यन्त** इति। यथा 'ओं सुदुर्गा च विदुर्गा चे'त्यादि 'दुर्गविक्रमे'त्यन्तमुक्त्वा 'प्राक्स्थिताभ्यो देवग्रहशक्तिभ्यो दुर्गाकोटिपारिषदीभ्यो नमो नमः' इति। एवमकन्या चेत्यादिष्वपि ज्ञेयमिति। कालीचैव सुकाली चेत्युपरिमन्त्रः। यदुक्तमूर्ध्वतः 'काल्याद्यं वसुधाद्यं स्यादधस्तादष्टकं पुनः' इति। वसुधापदेन समेदिनीत्याद्युपलक्ष्यते। अत्रार्था 'दुपरिस्थिताभ्यो दुर्गाकोटिपारिषदीभ्यो नमो नमः। अधःस्थिताभ्यो दुर्गाकोटिपारिषदीभ्यो नमो नमः' इत्येवावशेषः स्यादिति।।156-157।।

In the Utsavabali of Durgā after the conclusion of each of the Śakti mantras used from eastern direction. In other locations like Agni-southeast-mantra may be changed incorporating the name of the presiding deity of the location. For the first item the mantra begins with "Prāksthitābhya" while for the second onwards Agnidiksthitābhya" etc. (156-157)

महाकालो विधाता च वज्रपाणिः क्रतुः प्रभुः।
दक्षः शतक्रतुर्मूर्तिरप्रमेयश्च वीर्यवान्।।158।।
नित्यो विद्युत्प्रभः शूली शूलहस्तस्त्रिणेत्रवान्।
स्वाङ्गदीप्तस्तमोघातः सृष्टिकृद् वीर्यविक्रमः।।159।।

---

1. 'र्गाष्टकश' ख. पाठः।

मान्धाता सृष्टिकृद् वीर्यो नित्ययोगः प्रतापवान्।
एते विंशतिकोटीनां प्राक्स्थियतानां नमो नमः।।160।।

अग्निरग्निसमानश्च ज्वा[1]ली विश्वभुगव्ययः।
हुताशी मूर्तिमान् व्यापी कपिलो रक्तलोचनः।।161।।

उग्रो रक्तवपुर्धूम्रः सप्तार्चिर्विश्वभेषजी।
हुतभुक् सत्यवान् वेगी भस्मच्छन्नो मरुत्सखः।।162।।

योगप्रियः सदाकाङ्क्षी दारुजः स्पन्दनो जटी।
इत्येते कोटिगुणिता अग्निरूपा नमो नमः।।163।।

यमो वैवस्वतो घाता शत्रुघातः प्रजान्तकः।
मृत्युः प्रेताधिपो धर्मः कृष्णः कृष्णाक्ष एव च।।164।।

नित्ययोगी सुहृत्क्षेमी आत्मधर्मी सदान्तकः।
मायारूपी प्रजाकाङ्क्षी सत्यासत्यप्रियः सुहृत्।।165।।

इत्येते कोटिगुणिता यमरूपा नमो नमः।
र[2]क्षोऽसुरः पिशाचश्च निर्ऋतिर्वीर एव च।।166।।

तीक्ष्णश्चक्षुर्ब्रसीदेही यज्ञहर्ता विनायकः।
अतिमूर्तिरनेकाङ्गी क्रूरः क्रूरवपुर्महान्।।167।।

सूक्ष्मरुद्रो विरूपाक्षो भस्माङ्गी धूम्रलोचनः।
इत्येते कोटिगुणिता निर्ऋतिरूपा नमो नमाः।।168।।

वरुणः शम्बरो भृङ्गी निम्नगाधिपतिः क्षमः।
श्रीमानभ्रघनः कान्त आनन्दस्तत्त्वदर्शनः।।169।।

पाशहस्तः पशुर्वेगी आक्र[3]न्दः श्यामलोचनः।
कपर्दी प्राणदः श्यामः सत्यबुद्धिः सनातनः।।170।।

इत्येते कोटिगुणिता वरुणरूपा नमो नमः।
वायुर्गन्धवहः सूक्ष्मस्तत्त्वात्मानन्द एव च।।171।।

प्राणोऽपानः समानश्च ज्ञानाक्षो ज्ञानिनो वरः।
कपाली शूलपाणिश्च व्यानोदानौ च साकली।।172।।

अमाली मालवान् बिन्दुर्मूलशाकी विभावरी।
इत्येते कोटिगुणिता वायुरूपा नमो नमः।।173।।

---

1. 'ज्व' क. पाठः।
2. 'य' ख. पाठः।
3. 'कान्तः श्या' क पाठः।

यक्षोऽथ रयिवान् सोमः सूक्ष्मः कालो निराश्रयः।
आलम्बो भैरवो भिक्षुर्वि[1]कारो वाम एव च।।174।।
ज्येष्ठो मालाधरश्चण्डो मनश्चोन्मन एव च।
रौद्रो बलधरः कालः सर्वत्र बलवानपि।।175।।
इत्येते कोटिगुणिता यक्षरूपा नमो नमः।
ईशान ईश्वरः शम्भुः शूलहस्तस्त्रिणेत्रवान्।।176।।
अनादिनिधनो रागी कपिलः कपिलाक्षधृक्।
रुद्रो गणाधिपो यो[2]गी विश्वहर्ता दिगम्बरः।।177।।
धूम्राक्षो धूम्ररूपश्च नीलो विश्वभुजो हरः।
इत्येते कोटिगुणिता रुद्ररूपा नमो नमः।।178।।
महाबलो महानादो मूर्तिर्मूर्तिपतिः शिवः।
पवित्रो राजयः स्थाणुरघोरो घोर एव च।।179।।
अरुणो लाङ्गलो मन्दुरङ्गारः शिवभूषणः।
जीमूतो मूर्तिकृद् वाग्मी मन्त्रीशस्त्रिपुरान्तकः।।180।।
गणाधिपाः शिवस्यैते ऊर्ध्वरूपा नमो नमः।
बुधः प्रत[3]र्दनः शुद्धः कालरूपोग्रदंष्ट्रवान्।।181।।
दीर्घवबाहुः प्रकाशश्च भर्ता हर्ता विचक्षणः।
कालाग्नी रौरवोऽघोरो नरकः शर्व एव च।।182।।
नागश्चैवाथ घोरश्च किम्बुरुर्दनुजः क्षमी।
इत्येते कोटिगुणिताः पातालास्ते नमो नमः।।183।।
ये भूताः स्कन्दसेनस्य पार्षदा बलिभोजिनः।
तृप्यन्तु ते मुदं यान्तु सद्भ्योऽसद्भ्यो नमो नेमः।।184।।
'बलिग्रहेभ्यो भूतेभ्यः स्कन्दपार्षदेभ्यो नमो नमः स्वाहा।'

विमर्शिनी

स्कन्दे ये भूतादिमन्त्रद्वयं पठति—ये भूता इत्यादि।।184।।

विवरणम्

महाकालो विधातेत्यादि। दश मन्त्रा भवन्ति। तेषाञ्च नमो नम इत्यवसानं प्रतिपत्तव्यम्। यद्यपि

---

1. 'कि' क पाठः।
2. 'योनिर्विश्च' ख. ग पाठः।
3. 'म' ख. ग पाठः।

विष्ण्वादिष्वपीदृशा मन्त्राः सन्ति किन्तु तथा प्रयोगोऽपि विजयबल्यादिष्वपि असुलभ इति तेषामनाम्नानमिति बोद्धव्यम्। यथा विष्णौ तावत्–

उत्कटः प्रकटश्चैव उन्मुखोविमुखस्तथा।
अश्वग्रीवोऽश्ववदन अश्वजिह्वस्तथैव च।।
हस्तिवक्त्रो मुकुन्दश्च हस्तिपादस्तथैव च।
केशवो वामनश्चैव नरो नरक एव च।।
मन्दरो मन्ददृष्टिश्च कन्दुकः कदुलोचनः।
पटहाक्षो विशालाक्षः क्षामकः क्षमकस्तथा।।
अश्वसेनो विसेनश्च विष्वक्सेनो विदारणः।
पाण्डरः पाण्डुपृष्ठश्च दुर्दिनस्सुदिनस्तथा।।
वामदेवो महादेवो महानी मधुसूदनः।
कालकः कलनश्चैव भावनो भगवानपि।।
भानुमान् भागधेयश्च भास्करो भासुरस्तथा।
विश्वसेनो विसेनश्च विष्वक्सेनो विदारणः।।
विस्तरो विश्वरश्चैव विदण्डी दण्ड एव च।
क्रमकः कामकश्चैव कामभृत्कामशासनः।।
पञ्चाशच्च गणा ह्येते पूर्वां दिशमुपाश्रिताः।
एते पारिषदाः प्रोक्ताः कुमुदस्य वशानुगाः।।
ऐन्द्र्यां दिशि पञ्चाशद्भूतगणेभ्यो नमः।
आग्नेयो निधनश्चैव अग्निजिह्वो हुताशनः।।
अग्निरूपोऽग्निकेशश्चाग्निवर्णोऽग्निरेव च।
अग्निवक्त्रो महावक्त्रो महासेनो महोदरः।।
करालः कालजिह्वश्च काकवक्त्रो विवक्त्रकः।
मण्डु[1]र्मण्डूकवक्त्रश्च देवलो देवकस्तथा।।
शार्वरः शम[2]कश्चैव शङ्कुश्शङ्कुश्रवास्तथा।
मारीचो द्रोणमारीचो महिषो माहिषस्तथा।।
कुम्भनासो विनासश्च कुम्भकर्णोऽथ कुम्भकः।
विसारी विक्रमी चैव मस्करी मस्करस्तथा।।
सूकरः सूकरास्यश्च शशः शशमुखस्तथा।
सिंहस्सिंहमुखश्चैव नरसिंहो दलस्तथा।।
कालभृत्काळसूत्री च सूत्रभृत्सूत्र एव च।
विनाळी नालकर्णश्च आग्नेयीं दिशमाश्रिताः।।

1. 'धु'।
2. 'शङ्करश्चै' क पाठः।

कुमुदाक्षगणाह्येते आसुरग्रहसंयुताः।
आग्नेय्यां दिशि पञ्चाशद्भूतगणेभ्यो नमः।।
यमो धर्मधरो धर्मो धर्मराजो धनुर्धरः।
मृत्युः कालाधिपः कालः कृष्णः कृष्णाक्ष एव च।।
नित्य[1]योगी सुहृत्क्षेमी आत्मधर्मी सदान्तकः।
विनयः प्रश्रयश्चैव निःश्रयो निपुणोऽलसः।।
कुणपः कुणिबाहुश्च कुब्जः प्रांशुर्विमर्दनः।
निष्क्रोशो निरनुक्रोशो निर्मलो निवहो वहः।।
आहो हुताहो आहाश्च हूहू रक्षण एव च।
एककः कापलश्चैव तुण्डकः कटुको विटः।।
शङ्खी चक्री च धन्वी च शार्ङ्गी शार्ङ्गधरस्तथा।
वासुदेवो विभद्रश्च केतुमान्केतुकः क्षमी।।
गणाः पञ्चाशदेते तु दक्षिणां दिशमाश्रिताः।
पुण्डरीकानुगा ह्येते गन्धर्वग्रहसंयुताः।।
याम्यायां दिशि पञ्चाशद्भूतगणेभ्यो नमः।
निर्ऋतिः प्रकृतिश्चैव सुकृतिर्विकृतिस्तथा।।
दारुणो दमकश्चैव राक्षसो राजकस्तथा।
मासपोऽमासपश्चैव निष्ठुरः खरभाषणः।।
प्रलम्बो लम्बकश्चैव प्राणदः प्रणवस्तथा।
वीरसेनो गदश्चैव विभाषी च विभाषणः।।
रक्ताक्षो लोहिताक्षश्च रक्तजिह्वो विजिह्वकः।
विद्युत्केशो विशालाक्षो विक्षरो विरहस्तथा।।
अक्ष[2]रः प्राक्षरश्चैव कामरूपी विरूपणः।
सर्वगस्सर्वविद्गौरः सम्भवः प्रभवस्तथा।।
वैकर्तनो विकर्ता च वारुणो वसुरेव च।
विरदो[3] मदनश्चैव कपर्दी वृष एव च।।
नन्दकी वृष[4]कश्चैव कीनाशी वरुणोऽरुणः।
गणा एते तु पञ्चाशन्नैर्ऋतीं दिशमाश्रिताः।।
यक्षग्रहैस्तु संयुक्ता वमनस्यानुगा इमे।
नैर्ऋत्यां दिशि पञ्चाशद्भूतगणेभ्यो नमः।।

---

1. 'भो' क पाठः।
2. 'अरः प्राक्षरकश्चैव' च पाठः।
3. 'विमर्दो मर्दन'।
4. 'पृ' क पाठः।

वरुणो वरुणश्चैव पाशी पाशधरो गुरुः।
क्षेपणः क्षोभणश्चैव नारदः पर्वतो रविः।।
सुनामा नामनो हंसो वैकुण्ठः परमः परः।
हनुमान् वसुमान् भेदो विरूपः प्रद्रवस्तथा।।
महाकर्णो विकर्णश्च शशकः शलकः कविः।
नारदो नरकश्चैव कर्णी कर्णरथोऽगुमान्।।
चक्रभृच्छंखभृद्वज्री वज्रनागो विनाशकः।
कुररः कुतपश्चैव दक्षिणः क्षणदः सुहृत्।।
दु[1]र्गन्धः पूतिगन्धश्च तार्क्ष्यो गरुड एव च।
विरोधो रोधको रोधः कङ्कणी च गणास्त्वमी।।
पश्चिमां दिशमाश्रित्य तिष्ठन्ति विविधायुधाः।
शङ्कुकर्णवशा ह्येते पितृग्रहगणान्विताः।।
वारुण्यां दिशि पञ्चाशद्भूतगणेभ्यो नमः।
मरुन्मारुतगौरर्वागायुर्वायुस्तथाऽनलः ।।
गळ्को वर्तकः कङ्को मार्गणः प्रगणो बलः।
बलो बलनिधिर्वीरो विराधो रोधको मधुः[2]।।
नवधस्सुवधश्चैव सङ्गरो धीकरस्तथा।
मली मलनिधिर्ध्वस्तः समस्तः सहसो वसुः।।
कु[3]करः कुटकश्चैव गन्धो गन्धवहः पटुः।
सिक्तकः सिक्तरोही च सेवकस्सेवनस्सवः।।
औषधो भेषजश्चैव रोगी रोगधरस्तथा।
करणः कारणः कर्ता द्वारचारी बलोऽबलः।।
गणा पञ्चाशदेते तु वायव्यां दिशमाश्रिताः।
सर्वनेत्रानुगा नित्यं नागग्रहसमन्विताः।।
वायव्यां दिशि पञ्चाशद्भूतगणेभ्यो नमः।
सोमस्सोमलकस्सामः सामवित् सामनाशनः।।
सुधा सुधाता धाता च सुराष्ट्रः काष्ठकः कलिः।
कालवान् कालचक्रश्च कालकूट[4]विषोज्ज्वलः।।
अमृतोऽमृतनाभश्च केयूरी केवली वली।
विष्णुः कृष्णः विशङ्गी च रेखो लेखः पिकः शुकः।।

---

1. 'गन्धर्वः पू' च पाठः।
2. 'ऽधमः' क पाठः।
3. 'कुरकः कु' च पाठः।
4. 'टो' ख. च पाठः।

उलूकः शकटश्चैव श्येनश्श्येनमुखस्तथा।
मार्जारो वल्गुवल्वा च गुप्तः कणवकः कणः।।
शेषो विशेष उच्छेषः कर्दमः पूतिविग्रहः।
साम्बस्साम्बत्सरश्चैव वेगी वेगधरो मरुत्।।
गणाः पञ्चाशदेते तु सोमस्य दिशमाश्रिताः।
सुखस्य वशगा ह्येते राक्षसग्रहसंयुताः।।
सौम्यायां दिशि पञ्चाशद्भूतगणेभ्यो नमः।
ईशान ईश्वरो व्यापी व्यसनो विसनो वसुः।।
हरो वारो विशो पाशः शकुनिश्शकुनोऽवटः।
वृक्षः कक्षः क्षमश्शान्तिर्मरो मारी कविर्जविः।।
ब्रह्मज्ञो ब्रह्मविद् ब्रह्मी ब्रह्महा ब्रह्मसाधनः।
वेदी वेदविदुद्धर्षः शङ्करः शाङ्करस्तथा।।
धीमान्धीदृष्टिरिष्टात्मा दुष्टात्मा दुष्टकर्मकृत्।
विनतो विकचो वादी वेनो दिवक एव च।।
सर्वभृत्सर्वगस्सर्वस्सर्वभागी सनातनः।
गोविन्दो गोपतिर्गोप्ता ऐशानीं दिशमाश्रिताः।।
सुप्रतिष्ठवशा ह्येते पिशाचग्रहसंयुताः।
ऐशान्यां दिशि पञ्चाशद्भूतगणेभ्यो नमः।।

इति सप्तत्या तथेशाच्युत इत्यत्र द्वयेऽप्येकमन्त्ररूपेण प्रयोज्याः। यदुक्तं- 'महाकालो विधाता चे'त्यादि। नित्ययोगः प्रसादनः। उत्कटः प्रकटश्चैवेत्यादि। कामभृत्काम(नाशनः? शासनः)। "सप्ततिस्तु गणाः प्राच्यां हरनारायणस्य तु। प्राच्यां दिशि सप्ततिभूतगणेभ्यो नमः।।" इत्यादि। स्कन्दे तु-"इन्द्र ऐन्द्रेऽथ कुमुदः कुन्दरश्चाथ डम्बरः। आडम्बरश्च स्कन्दस्य पूर्वस्यां दिशि वै गणाः।। पूर्वस्यां दिशि षट्कोटिगणेभ्यो नमः" इत्यादि। गणपतौ शास्तरि च ध्वजदेवताः कोटिगणाधीशाः एव। तदुक्तं-"एते कोटिगणाधीशा सम्पूज्यैषां बलिं क्षिपेत्।" ततश्च "पूर्वस्यां दिशि वज्रदन्तपार्षदेभ्यो नमः" इत्येवं बलिरिष्यत इति। इदानीं ये भूतादिमनुद्वयेन पृथगावृत्त्या गुहेऽत्रेत्युद्दिष्टं मनुद्वयमाह ये भूता स्कन्दसेनस्येति।।158-184।।

For the eastern direction mantras refer to Viṃśatikoṭi - twenty crores. (three stanzas 158,159,160) beginning with Mahākāla.

For the Agni-southeast corner (three stanzas 161, 162, 163) beginning with Agniragni.

For the south - the region of Yama (five lines -164, 165, first half of 166) up to Ityete koṭiguṇita

For Nirti - south west corner (five lines from Rakṣosura to Ityete- second half 166, 167 and 168)

For Varuṇa - at the west, five lines from Varuṇa up to Ityete (169,170, first half of 171)

Far Vāyu (five lines from second half of 171,172,173)up to Vāyurūpa namo nama.

For Soma at the north stanzas from Yakṣotha- 174, 175 and first half of 176 up to Yakṣarūpa namo namaḥ.

For Īśāna at the northeast- five lines from Īśāna up to Ityete (second half of 176,177and 178 ending with Rudrarūpa namo namaḥ.

For guards of Īśa at the top of the north east- five lines Mahābalo etc, up to Gaṇādhipāḥ (179, 180 and first half of 181) and ending with Ūrdhvarūpā namo namaḥ

Below Nirti- south west (second half of 181, 182 and 183) , five lines ending with Pātālāste.

The guards of Skandasena, his attendants and those who are to share the oblations may be pleased with these offerings. The mantra for this is given as "Baligrahebhyaḥ" etc. (158-184)

चाम्बादीनां गणाः सर्वे कोटिकोटिगणाधिपाः।
भवन्तु सहिताः सर्वे तेभ्यस्ताभ्यो नमो नमः।। 185 ।।

'नमोऽस्तु भीमरूपेभ्यो भीमवक्त्रेभ्यो विविधाकृतिभ्यो वरदेभ्यश्च वो नमो नमः।

'प्राग्गणेभ्यो बहुरूपेभ्यो विश्वरूपेभ्यः सद्भ्योऽसद्भ्यः सर्वगणेभ्यो नमो नमः।

विमर्शिनी

आर्ये चाम्बादिमन्त्रचतुष्कं क्रमेण पठति-चाम्बादीनामित्यादि।। 185 ।।

For Śāstā the attendants are in crores in different forms and different attitudes. All of them may be pleaded to share the oblations. The mantras are given (in prose) here. (185)

एष प्राग्गणमन्त्रोऽत्र प्राक्स्थाने दक्षिणेति च।
पश्चिमेत्युत्तरेत्यर्णं योजयेद् दक्षिणादिषु।। 186 ।।

सर्वेभ्यः पिङ्गलेभ्यो महाशनेभ्यो घोररूपेभ्यो मृगयुभ्यो विनायकेभ्यो मूकेभ्यो बधिरेभ्योऽन्धेभ्यो जळेभ्यः स्थूलेभ्यः कृशेभ्यो दीर्घेभ्यो ह्रस्वेभ्यो नपुंसके[1]भ्यः सद्भ्योऽसद्भ्यः सदसद्भ्यः सर्वगणेभ्यो नमो नमः स्वाहा।'

विमर्शिनी

तत्र तृतीये मन्त्रे विशेषमाह-एष इति। एष प्राग्गणमन्त्रः। अत्र प्राक्स्थाने प्रागित्येतस्य स्थाने दक्षिणादिषु दिक्षु दक्षिणेति पश्चिमेति उत्तरेति अर्णं योजयेत्।। 186 ।।

1. 'भ्यः स्त्रीभ्यः स' क. ख., 'भ्योऽस्त्रीभ्यः स' ग पाठः।

विवरणम्

आर्ये चाम्वेत्यादिभिरित्युद्दिष्टं मनुत्रयमाह–चाम्बादीनामिति। द्वितीयमन्त्रेण चतुर्दिक्ष्वेव बलिः प्रतिदिशं मन्त्रश्च भिद्यते एतद्दर्शयति–एष प्राग्गणमन्त्र इति।।185–86।।

उत्सवार्थं गता ये च याश्च विघ्नप्रहर्षणाः।

'ॐ नमो विघ्नपार्षदेभ्यो[1] विघ्नपार्षदीभ्यो नमो नमः स्वाहा[2]।'

The mantra named Prāggaṇa to be used from east onwards are given. Suitable modifications are needed with reference to locations like south, west and north

The mantra is spelt out here "Sarvebhyaḥ" up to "namo namaḥ svāhā". (186)

स्वनाममन्त्रगायत्रीतत्तन्मूर्त्यादिमन्त्रकैः।।187।।

सासङ्ख्यदेवतामूलैर्बलिपीठे बलिं हरेत्।

'हरिसेनाय विद्महे महाबलाय धीमहे। तन्नः शान्तः प्रचोदयात्।'

'अष्टमूर्तिपार्षदेभ्यः सद्भ्योऽसद्भ्यः सदसद्भ्यः सर्वगणेभ्यो नमो नमः स्वाहा।'

विमर्शिनी

विघ्ने उत्सवार्थमित्यादिमन्त्रं पठति।।

महाबलिपीठे भूतबलेर्विशेषमाह–स्वनामेति। स्वनाममन्त्रगायत्रीतत्तन्मूर्त्यादिमन्त्रकैः स्वनाममन्त्रेत्यनेन विष्णौ 'बलाय नमः' 'हरिसेनाय नमः' इति मन्त्रद्वयमुक्तम्। अन्येषु हरसेनादिस्वस्वनामैव। गायत्री लिख्यते। तत्तन्मूर्यादिमन्त्रकैरिति विष्णुदुर्गयोः 'अष्टमूर्त्या'दि, अन्येषु 'दशमूर्तिपार्षदेभ्यः सद्भ्यः' इत्यादि। सासंख्यदेवतामूलैः 'असंख्याता गणाः' इत्यादिना 'देवताभ्यः पितृभ्यः' इत्यादिना तत्तद्देवस्य मूलेन च बलिपीठे बलिं हरेत्।।

विवरणम्

उत्सवार्थमिति। विघ्न इति। उद्दिष्टं मनुमप्याह–उत्सवार्थं गता ये चेति। यावदेक एवायं मन्त्र इति बोद्धव्यम्। महाबलिपीठे विशेषमाह–स्वनाममन्त्रेति स्वमन्त्रो विष्णौ 'बलाय नमः' 'इति। नाममन्त्रो 'हरिसेनाय नमः' इति। गायत्रीमाह–हरिसेनाय विद्महे इति।।187।।

Mantra for the Utsavabali of Vighneṣa is given here. They are to be used with proper changes in Name, Gāyatri and Mūrti. (187)

तत्तन्मूर्त्यादिमन्त्रमाह–अष्टमूर्तिपारिषदेभ्य इति।
असङ्ख्याता गणाः सर्वे कोटिकोटिगणाधिपाः।।188।।

---

1. 'भ्यो न' क पाठः।
2. 'हा। ओं सर्वेभ्यो विघ्नपार्षदेभ्यो नमः। ख' ग पाठः।

विवरणम्

असंख्यमन्त्रमाह-असङ्ख्याता इति।।188।।

Bali may be given to the big altar stone. Names of Harisena, Aṣṭamūrti are to be referred to. Mantra may be commenced with the names in dative case and suffixed with namah at the end.

The ganas who demand the oblations are in crores. (188)

भवन्ति सहिताः सर्वे तेभ्यस्ताभ्यो नमो नमः।
देवताभ्यः पितृभ्योऽथ भूतेभ्यः सह जङ्गमैः।।189।।

एतत्स्थाननिवासिभ्यः प्रयच्छामि बलिं नमः।

'हरसेनाय विद्महे महाबलाय धीमहे। तन्नः शक्तिः प्रचोदयात्।

'दशमूर्तिपार्षदेभ्यः सद्भ्योऽसद्भ्यः सदसद्भ्यः सर्वगणेभ्यो नमो नमः स्वाहा।'

Devatas, Pitṛs, Bhūtas and their groups are to be propitiated and oblations be offered to them (189)

ये समस्तं जगद् व्याप्य तिष्ठन्ति बलिकाङ्क्षिणः।।190।।

विष्णुपारिषदाः सर्वे गृह्णन्तु बलिमुत्तमम्।

'ओ नमो भूतेभ्यो भूतकृद्भ्यः सर्वेभ्योऽरिष्टकृद्भ्यः सद्भ्योऽसद्भ्यः

सहसद्भ्यो सर्वगणेभ्यो नमो नमः स्वाहा।
गह्णन्तु वलिमेतत्तु बाह्यस्था विहगाननाः।।191।।
ये हरा येऽल्पसत्त्वाश्च भूतप्रेतपिशाचकाः।
वेतालाश्चैव मातङ्गा हीनाहीनाश्च ये गणाः।।192।।
सर्वेषां चैव तेषां च हरामि बलिमुत्तमम्।
सर्वेभ्य एव तेभ्यश्च सगणेभ्यो नमो नमः।।193।।

इति।

विमर्शिनी

तान् मन्त्रान् क्रमेण पठति-हरिसेनाय विद्महे इत्यादि।।

पुनः ये समस्तमित्यादिमन्तत्रयमेकावृत्तिबलिदानाय क्रमेण पठति-ये समस्तमित्यादि, ओं नमो भूतेभ्य इत्यादि, गृह्णन्तु बलिमेतत् तु इत्यादि।।190-193।।

विवरणम्

देवतामन्त्रमाह-देवताभ्य इति। पुनर्मूलमिति शिवे 'हरसेनाय नमः' इति स्वमूलमन्त्रः।'महाबलाय नमः' इति नाममन्त्रः।।189।।

गायत्रीमाह-हरसेनायेति।।

तन्मूर्त्यादिमन्त्रमाह–**दशमूर्तिरिति**। शेषं समानम्। दुर्गादिषु गायत्र्यादिनावगम्यत इति। इदानीमथ ग्रहोपान्ततः सर्वत्र एकपरिक्रमादित्युद्दिष्ट मन्त्रत्रयं पठति–**ये समस्तमिति**। पुनर्देवग्रहादिबलिरन्ते क्षेत्रपाले संस्थापनञ्चेति।। 190–193।।

The bali is to be offered to those who dwell in these regions. They include Viṣṇupāriṣadas the attendants of Viṣṇu who remain every where in the world. Sometimes they appear as birds. Some of them are cruel and weak. Dead people, Vetālas, Goblins, elephants and a variety of creatures are to be propitiated to partake in the offering. (190-193)

प्रोक्तक्रमेण सकलं बलिपीठवर्जं
क्षेत्राधिपालबलिकर्मयुतं विधाय।
स्वावारवीतमभिपूज्य च पीठमध्ये
[1]पीठाधिपं विधिवदत्र समापयेद् वा।। 194।।

विमर्शिनी

अत्र भूतबलावुत्सवबलावपि क्रियाक्रमे पक्षभेदमाह–**प्रोक्तक्रमेणेति**। बलिपीठवर्जं सकलं कर्म क्षेत्राधिपालबलिकर्मयुतं प्रोक्तक्रमेण विधाय स्वावारवीतं स्वावरणपरिवृतं पीठाधिपं पीठमध्ये (विधिवत्) अभिपूज्यात्र समापयेद्वा।। 194।।

विवरणम्

केषाञ्चिदिह महाबलिपीठे संस्थापनमित्याह–**प्रोक्तक्रमेणेति**। स्वावारवीत[2]मिति। विष्णौ 'ये भूताः पुरस्सदः[3]' इत्यादीनामपि ग्रहणं कृतमिति ज्ञेयम्। विधिवदिति स्वनाममन्त्रगायत्रीत्याद्यभिप्रायम्। यद्वा पात्रशेषविनियोगाभिप्रायम्। नित्यबलौ भूतवलौ च तेषामेव प्रयोग इति।। 194।।

Having performed the rituals excepting those relating to Balipīṭha , Kṣetrādhipathe chief of the guards of the temple campus and the Pīthādhipa - the master of the altar stone may be worshipped properly to conclude the festival. (194)

बलिं विधायेति परीत्य सन्नतः
स्वाचम्य गर्भालयमभ्युपेत्य च।
आयोज्य देवं बलिबिम्बसंस्थितं
स्वमूलबिम्बे तमथ क्षमापयेत्।। 195।।

विमर्शिनी

इति उक्तक्रमेण बलिं विधाय परीत्य प्रदक्षिणीकृत्य सन्नतः सम्यङ् नमस्कृत्य स्वाचम्य तर्भालयमभ्युपेत्य बलिबिम्बसंस्थितं देवं स्वमूलबिम्ब आलोज्याथ तं क्षमापयेत्।। 195।।

---

1. 'भुताधि' ख पाठः।
2. 'पीठमि' क पाठः।
3. 'र' च पाठः।

विवरणम्

अथ यत् प्राग्बलिकर्मारम्भ उक्तं 'सम्प्रार्थ्य देवं बलिकौतुके स्वे संयोज्ये'त्यादि तस्य विपर्ययप्रयोगमवसानेऽभिधत्ते–**बलिं विधायेतीति**।। 195 ।।

Thus having propitiated the guards, the priest is to circumambulate the sanctum. After performing Ācamana and other purificatory rites he shall enter the Garbhagṛha and transfer the Caitanya - the divinity from the portable image to the original one installed inside. Finally he has to seek the indulgence of the gods for the possible omissions and commissions. (195)

इत्युत्सवं त्रिषवणार्चितदेवदेव-
भूदेवदेवपरिषत्प्रकराभिरामम् ।
आतोद्यवाद्यबहुलोज्ज्वलदीपदीप्रं
कुर्वीत सर्वदिवसेषु सु[1]भावितात्मा ।। 196 ।।

विमर्शिनी

उत्सवं विशेषेण सादरं कर्तव्यमाह–**इत्युत्सवमिति**। सुभावितात्मा सुतरां भावित उद्योजित आत्मा मनो यस्य सः आचार्यः सर्वदिवसेषु उत्सवान्तर्भूतेषु सर्वेषु दिवसेष्वपि इति उक्तप्रकारेण त्रिषवणार्चितदेवदेवभूदेवदेवपरिषत्प्रकराभिरामं सवनत्रयेऽप्यर्चितेन देवदेवेन देवानामिन्द्रादीनामपि देवेन विष्ण्वादिना तथार्चितैर्भूदेवैर्ब्राह्मणैः तथाचार्चितेन देवस्य परिषत्समूहेन चाभिरामं मनोहरम्, आतोद्यवाद्यबहुलोज्ज्वलदीपदीप्रं च आतोद्येन वीणादिना तथान्यवाद्यविशेषैर्बहुलैरुज्ज्वलैर्दीपैश्च दीप्रमतिशयेन प्रकाशनशीलमुत्सवं कुर्वीत।। 196 ।।

विवरणम्

उत्सवमिति। यथोक्तोत्सवबलिप्रकरणोपसंहारः। भूदेवदेवाः ब्राह्मणाः तेषां पूजाङ्गतया भोजनाभिप्रायमेतत्। सुभावितात्मेति प्रतिदिनं पूजाद्यावृत्तावप्येकसपर्या प्रतिमानिति भावः।। 196 ।।

Thus the festival of the god may be initiated with the propitiation of the god in all the three junctures of the day, where the presence of the royalty, Brāhmins and elite people are ascertained and accompanied by the sounding of drums and other musical instruments. All the localities and parts of the shrine may be lit up on all days with a devotional fervour. (196)

तीर्थस्नानदिनाधरेद्युरभिसायं सोऽयमाचार्यको
ग्रामे चैत्यचतुष्पथादिषु बलिं कुर्वन् परीत्याखिले।
ग्रामान्ते मृगयाप्रचारविहृतिं कृत्वा सुयोधैः समं
प्रत्यापत्य ततः स्वकौतुकगतं मूले समायोजयेत्।। 197 ।।

---

1. 'समाहिता' क पाठः।

विमर्शिनी

ततः तीर्थस्नानदिनाधरेद्युः तीर्थस्नानदिनात् पूर्वेद्युः अभिसायं सायन्तनबलिकाले सोऽयमाचार्यकः स्वमेवाखिले ग्रामे चैत्यचतुष्पथादिषु चैत्यं प्रसिद्धाश्वत्थादिवृक्षस्थानं चतुष्पथं चतुर्णां पथां सङ्गमः, आदिशब्देन विशेषस्थानान्तराण्युच्यन्ते, तत्र तत्र बलिं कुर्वन् परीत्य परितो गत्वा ग्रामान्ते ग्रामसमीपस्थवने सुयोधैः सुप्रसिद्धैर्योद्धृभिः समं सह मृगयाप्रचारविहृतिं तीक्ष्णमृगहननादिक्रीडां कृत्वा प्रत्यापत्य पुनः स्वस्थानमागम्य ततः स्वकौतुकगतं देवं मूले मूलबिम्बे समायोजयेत्।।197।।

विवरणम्

तीर्थस्नानदिनाधरेद्युरिति [1]ग्रामबलिमृगयाभिधानम्। क्षिप्रबल्यनन्तरं गोपुराद्बहिर्निष्क्रम्य मन्त्रौ शार्ङ्गिणीत्यादिमनुभिश्चैत्यचतुष्पथादिषु बलिं दद्यात्। सरोवनग्रामान्तसीमादीनामादिशब्देन ग्रहणम्। मृगयाप्रचारविहृतिस्त्वेवं दिवैव वा स्यात्। प्रत्यापत्येति। बलिं विधायेति परीत्येत्युक्तरीत्या प्रासादं प्राप्येत्यर्थः। ग्रामबलौ तु शार्ङ्गिणी मन्त्रावित्येवं योजनीयं वा।।197।।

On the previous day of Tīrthābhiṣeka–the ceremonial bath at the culmination of the festival, the priest shall go around the streets, junctions having the trees Aśvattha - the fig tree- and offer oblations to the spirits and manes. By the evening he shall go for a ceremonial hunt carrying the portable image of the god in a procession and reach a forest area at the end of a village along with experienced soldiers. Once the hunt is over he shall return to the shrine in procession and enter the sanctum. Now he has to transfer back the divinity from the portable idol to the permanent one installed there. (197)

मन्त्रौ शार्ङ्गिणि विष्णुपारिषदमात्रर्णादिकौ तौ शिवे
स्यातां ग्रामबलौ तु रुद्रपदभिन्नौ वा नमो भूतकः।
गृह्णत्वीशहरौ निसुम्भजिति हृद्भूतादिगृह्णन्त्वणू
गृह्णन्त्वाद्यणवो गुहे प्रमथनाथे पिङ्गलाद्यस्तथा।।198।।

तत्र ग्रामबलौ शार्ङ्गिणि विष्णुपारिषादमात्रर्णादिकौ 'विष्णुपारिषदेभ्यश्च' 'मातृभ्यस्तद्गणेभ्यश्चै' इत्यादिकौ मन्त्रौ स्याताम्। शिवे रुद्रपदभिन्नौ, विष्णुस्थाने रुद्रपदयुक्तौ, 'ओं नमो भूतेभ्यः' इत्यादि वा। ईशहरौ 'गृह्णन्त्वि'ति। निसुम्भजिति हृद्भूतादिगृह्णन्त्वणू 'ओं नमो भूतेभ्यः' इत्यादि 'गृह्णन्तु बलिमि'त्याद्यं च। गुहे गृह्णन्त्वाद्याणवः 'गृह्णन्त्वि'त्यादि, 'ग्रामपर्वतवन'इत्यादि, 'नमोऽस्तु सिन्धुचारिभ्यः' इत्यादि, 'शून्यग्रामनिवासिभ्यः' इत्यादि मनवः। प्रमथनाथे तथा पिङ्लाद्यश्च 'ओं ध्रूं नमः सर्वेभ्यः पिङ्गलेभ्यः' इत्यादि।।198।।

विवरणम्

नमो भूतक इति। 'ओं नमो भूतेभ्य' इत्येष एव वेत्यर्थः। हृद्भूतादीति। 'ओं नमो भूतेभ्यः' इत्यस्यैव ग्रहणम्।।198।।

---

1. 'या' क पाः।

For the distribution of oblations in the village the mantra in respect of Visnu is "Viṣṇupāriṣadebhyaḥ" etc, and "mātṛbhyastada' etc. For Śiva it may be "Rudrapāriṣadebhyaḥ'' and 'Namo bhūtebhyah". For Śaṅkaranārāyaṇa" Gṛhṇantu balim" etc. For Durgā 'Namo bhūtebhyaḥ"and Gṛhṇantu balim". For. Subrahmaṇya the mantra is "Gṛhnantu balim etc. (198)

विष्णुपारिषदेभ्यश्च प्रमथेभ्यो नमो नमः।
मातृभ्यस्तद्गणेभ्यश्च सर्वेभ्यो वै नमो नमः॥199॥

'ओं नमो भूतेभ्यो भूतकृद्भ्यः सर्वेभ्योऽरिष्टकृद्भ्यः सद्भ्योऽसद्भ्यः सदसद्भ्यः सर्वगणेभ्यो नमो नमः स्वाहा।'

गृह्णन्तु बलिमेतत् तु बाह्यस्था विहगाननाः।
ये क्रूरा येऽल्पसत्त्वाश्च भूतप्रेतपिशाचकाः॥200॥

वेतालाश्चैव मातङ्गा हीनाहीनाश्च ये गणाः।
सर्वेषां चैव तेषां च हरामि बलिमुत्तमम्॥201॥

सगणेभ्य एव तेभ्यश्च सर्वोणेभ्यो नमो नमः।

'ग्रामपर्वतवनचारिभ्यो नमो नमः।'

नमोऽस्तु सिन्धुचारिभ्यश्चतुष्पथगताय च।
शून्यागारनिवासिभ्यः सर्वेभ्यो वै नमो नमः॥202॥

विमर्शिनी

तान् मन्त्रान् क्रमेण पठति–**विष्णुपारिषदेभ्य इत्यादि**॥199–202॥

विवरणम्

गृह्णन्त्वाद्यणवो गुह इत्युद्दिष्टान्मन्त्रानाह-**गृह्णन्त्विति**॥199–202॥

शून्यग्रामनिवासिभ्यो वृक्षगुल्मगताय च।
देवागारनिवासिभ्यो भूतेभ्यश्च नमो नमः॥203॥

The mantra for Viṣṇu is given here along with those for mothers. They are

"Viṣṇupāriṣadebhyaḥ and Mātṛbhyaḥ" etc.

For Bhūtas, Bhūtakrt and similar spirits are also addressed. Cruel spirits, those with mouths of birds, Bhūtas, Pretas, Piśācas, Vetālās, elephants are addressed with oblations. All groups are invited including those in empty houses and villages, those dwelling in trees and temples concluding with all the groups who wait for oblation. (199-203)

'ओं घ्रुं नमः सर्वेभ्यः पिङ्गलेभ्यो बहुरूपेभ्यो महागणेभ्यो घोर[1]रूपेभ्यो मृगयुभ्यो विनायकेभ्यो बधिरेभ्योऽन्धेभ्यो जळेभ्यः स्थूलेभ्यः कृशेभ्यो दीर्घेभ्यो ह्रस्वेभ्यो मुण्डेभ्यः स्त्रीभ्यो नपुंसकेभ्यो बहुरूपेभ्यः सद्भ्योऽसद्भ्यः सदसद्भ्यः सर्वगणेभ्यो नमो नमः।' इति

बलिं दत्त्वा यथान्यायं शेषं शुद्धे तु भूतले।
नमः पारिषदेभ्यश्चेत्युक्त्वान्ते निक्षिपेद् गुहे।।204।।

विमर्शिनी

गुहे तु यथान्यायं बलिं दत्त्वा शेषं हविः शुद्धे भूतले 'नमः पारिषदेभ्यश्च' इत्युक्त्वा निक्षिपेत्।।204।।

After giving oblations to these spirits etc., the leftover shall be dumped in empty ground with the invocation that it is for the attendants of the deities. This applies to Subrahmanya alone (since all others are covered by earlier statements). (204)

अथाप्लुतो मङ्गलपालिकादिभिः
स्वलङ्कृते तत्र निषद्य मण्डपे।
समर्चितात्मा शयने प्रसाधिते
यथापुरं पीठमपि प्रपूजयेत्।।205।।

विमर्शिनी

अथ बलिदानानन्तरम् आप्लुतः स्नात्वा मङ्गलपालिकादभिः स्वलङ्कृते तत्राग्रगते मण्डपे निषद्य समर्चितात्मा सकलीकरणशङ्खपूरणात्माराधनकृद् भूत्वा यथापुरं प्रतिष्ठायाः पुरस्तादधिवासनमण्डपे यथा तथा शयने प्रसाधिते सति पीठमपि प्रपूजयेत्।।205।।

विवरणम्

प्रमथनाथे पिङ्गलाद्यथेत्यमुं मन्त्रमपि पठति–ओं घ्रुं नम इत्यादि। इति।

उक्तोऽयमुत्सवः सर्वः स्वापनावभृथावथ।
वाच्याविहान्तरा किञ्चित् प्रसङ्गात्कर्म कीर्त्यते।।
भेदो विजयबल्यादावुक्तोत्सवबलेरिह।
स्वल्प एव ह्यतोऽस्योक्तौ लाघवानुग्रहौ स्फुटम्।।

इति।

विजयबलिप्रमुखैरथ यजनविशेषैः स्वकल्पसङ्कथितैः।
विष्णवादीनिह चतुरो यजेत देवान् स्वपञ्चमीसमये।।

इति। विष्णौ विजयबलिः। शिवे जयाबलिः, दुर्गायां दुर्गाबलिः, स्कन्दे कौमारबलि इति।

1. 'रेभ्यो' ख पाठः।

स्वपञ्चमीसमय इति पुर्वपक्षपञ्चमी विष्णुपञ्चमी अपरपक्षपञ्चमी च रुद्रपञ्चमी। पञ्चमीशब्दश्चेह[1] तत्सदृशदिनान्तरेष्वपि प्रयोगविद्भिः प्रयुक्तः।

अष्टमीद्वयचतुर्दशीद्वयार्द्रासु रुद्रमथ पर्वयुग्मके।
द्वादशीश्रवणभे च शार्ङ्गिणं पुजयेदिह विशेषतो बुधः।।
पञ्चमीषु शिवकीर्तितासु वा स्थाणुविष्णुमजितेरितासु वा।
अर्चयेत नवमीचतुर्दशीकृत्तिकासु माहिषासुरद्विषम्।।
षष्ठीचतुर्दश्यनलर्क्षकेषु षडाननं रुद्रसमीरितासु।
विघ्नं चतुर्थीसितवारयोरप्यार्यं भग[2]क्षीसितवारयोश्च।।

इति। विषुवायनादिकालोऽपीष्यत एव। यद्युत्सवमध्ये विजयबलिर्जयाबलिर्वा तदौत्सवाविरोधेन स कार्यः। निशि भुतबलिं द्रुतं विधाय पुनर्हविस्संस्कृत्यामुं बलिं विदध्यात्। तदा च वाद्यपूजोत्सवारम्भदिन एव कार्या। यदि हि नोत्सवो तदा पूर्वं देवस्य शुद्धिं कुर्यात्। तदुक्तं–'वैशेषिकयजनविधौ विशेषतः शुद्धिरादितः कार्या'। इति।

पूर्वेद्युर्निशि देवदेवमभिपूज्याज्ञाप्य नीत्वा निजां
कर्मार्चां बलिपीठिकाबहिरिहार्चावन्निधायार्प्य च।
भैर्याद्यं पुरतो निधाय सहकोणं प्रार्च्य सन्ताडयन्
भूतामन्त्रणकर्म तेन तनुयात् त्रिः शब्दतत्त्वं जपन्।।

इति। पूर्वेद्युर्निशि देवदेवमभिपूज्येति यजनीयदिनाधरेद्यू रात्रौ कलशाभिषेकपूर्वकं केवलं वा स्वमूलमन्त्रविधानेनानुज्ञापूजोक्ता। विष्णौ षडक्षरविधानं भवति तदा च जनितेऽग्नावधिवासहोम-मात्रमेकविप्रभोजनमपि युक्तमिति। इहार्चावन्निधायेत्यष्टदलकमले पीठं व्रीहिवस्त्रादिभिर्विरचय्य तत्र बहिर्मुखतया निधायेति भावः। ध्वजे सति तत्सम्मुखीयं भवति। यदुक्तं–

ध्वजपीठस्य पुरतः कृत्वा गोमयवारिणा।
आलिप्य चतुरश्रञ्च सुधाचूर्णेन शोभयेत्।।
चतुरश्रं धान्यपीठे द्रोणपञ्चकशालिनाम्।
कल्पयित्वा कालचक्रं तस्य मध्ये निवेशयेत्।।
बल्यर्थं चक्रमत्रैव स्थापयेद् ध्वजसम्मुखम्।
पूजयित्वा निवेद्याथ हवींषि विविधानि च।।
तदग्रे स्थण्डिले पद्मं विलिख्य शुभकर्णिकम्।
तत्र शूलं प्रतिष्ठाय यथावदभिपूजयेत्।।

इति। चक्रशूलग्रहणं बलिबिम्बविकल्पोपलक्षणम्। भेर्याद्यं पुरतो निधाय सहकोणमिति। कोणस्तद्वादनदण्डः ध्वजान्तर्भाग एव। तदर्चाभिमुखतया स्वस्तिकपीठे वाद्यनिधानम्। यदुक्तं–

---

1. **'श्चैतत्स' क पाठः।**
2. **'क्षार्कजवा' क पाठः।**

आलिप्ते पुरतस्तस्य भूतले धान्यपीठके।
तावदेव महाभेरीं वेष्टितां नववाससा।।

इति। शब्दतत्त्वं जपन् त्रिः सन्ताडयंस्तेन भूतामन्त्रणकर्म तनुयादित्यन्वयः।

मुहूर्ते शोभने भेरीं शब्दतन्मात्रविद्यया।
कोणेन ताडयेन्मूर्ध्नि त्रयं ध्यायन् गुरुः स्वयम्।।

इति। 'ओं नमः पराय शब्दतन्मात्रात्मने नमः। ओं हं नमः पराय शब्दतन्मात्रात्मने नमः' इति वा[1] मन्त्र इति। शिवे तु विशेषः।

ततस्त्रियम्बकाद्येन मन्त्रेण प्रथमं गुरुः।
कोणेन ताडयेद् भेरीमिदं विष्णवादिना ततः।।
तृतीयं ब्रह्मजज्ञानमनुनैव तु ताडयेत्।

इति। वाद्यपूजाप्रकारस्तूच्यते।

पीठाराधनकृत्स्वबीजमनुनस्तच्छक्तितश्च क्रमात्
कृत्योर्दक्षिणवामपुष्करजुषोर्गौण्या प्रकृत्या तथा।
तद्रज्ज्वामथ शक्तितः समभिबाह्याराध्य भेरीमूखे-
भ्यर्हेच्छाब्दिकतत्त्वतः प्रणवतः कोणेऽपि वाद्यार्चने।।

इति। वाद्यानामस्त्रप्रोक्षणादि सर्वं सामान्यसिद्धम्। शक्तेरेव पीठमाराधनीयम्। स्वबीजमनुत इति विष्णुबीजाभिप्रायम्। तच्छक्तितश्चेति श्रीबीजाभिप्रायम्। कृत्तिरिति पिधानचर्मोच्यते। तत्र तद्रज्ज्वामिति तन्मध्येऽपीति वा पठनीयम्। यदुक्तं-

'त्रिगुणां प्रकृतिञ्चैव मध्यभागे सभाजयेत्।'

इति। शैवे भेदः

रुद्रं दक्षिणतो भेर्यां वामतस्तु जनार्दनम्।
मध्ये ब्रह्माणमाराध्य कोणदण्डे गुहं यजेत्।।

इति। भेरीमुखं दक्षिणकृत्तिरेव। सा च तदा देवसम्मुखी वा कार्या। युदक्तं- भेरी तु सकलवाद्याग्रतः स्थाप्या। तस्या दक्षिणकृत्तिस्तु देवसम्मुखतया देवदक्षिणभागतया वा स्यात्। तत्सन्निधौ तदीयः कोणश्च निवेशनीय इति। त्रिस्ताडयन्निति मन्दमध्यविलम्बिताद्यभिप्रायमिति।

वाद्यैः पञ्चभिरञ्चितैरिति कृतस्नानादिका वादकाः
वाद्येऽन्तश्च समाहतैस्तदुपहूतिं भाविदण्डक्रमात्।
कुर्युः पर्ययणक्रमात् समुपहूता देवताः प्रीणयेत्
पुष्पैर्देवसमक्षमेष्यति बलौ सोपक्रमं ज्ञापयेत्।।

इति। समाहतैरिति त्रिविधपाण्याभिप्रायम्। एष्यति भाविनि घोषयेत् 'घोषयेद् गुरुणेन्द्रादौ हूयमाने

---

1. 'नामम' ङ पाठः।

मरुद्गणे' इति चोक्तम्। ततश्चैवमिह क्रमः स गुरुर्वाद्यं पारशवे दत्त्वा देवपरिवारदेवतानामन्येषाञ्च ब्रह्मविष्णुरुद्रादीनां सावरणानामाह्वानं भावनीयम्। तदाह्वानभावनासमये पारशवेन वाद्यं वादनीयम्। तदवसाने चाहूतानामर्हणपूर्वकं स्वोपक्रमज्ञापनमिति। कर्मार्चास्थं देवं मूलार्चायां नियोज्य यज्वा अथ कलशेज्यादिकमखिलं तद्रजनीसमुचितं चरेत्। कर्मेति परेद्यवि माध्यन्दिनाभिषेकार्थं द्रव्यकलशपूजा तदधिवासहोमश्च त्रिषवणपूजाङ्गतयाधिवासहोमकृतेऽग्रमण्डपादौ कृते कुण्डेऽग्निजननञ्चोक्तमिति।

स्वपञ्चम्यां स्नातो विधिविहितनित्यस्त्रिषवणे-
ष्वथाभ्यर्चेद् देवं बहुलविलसद्भक्तिविभवैः।
निजे बिम्बे वह्नौ द्विजवरमुखे चोपहितया
स्वमूर्त्या तिष्ठन्तं स्वसमयसमिज्योक्तमनुभिः।।
नादब्रह्म[1]षडक्षरैः स्मररिपौ सूर्याष्टषड्वर्णकै-
र्लक्ष्मीशे महिषद्विषि त्रिषवणेज्यां वैदिकैस्तान्त्रिकैः।
मिश्रैश्च क्रमतः करोतु मनुभिः स्कन्दे तमर्वन्तमि-
त्याद्यृक्पञ्चकमूलकोपचरणाख्यैर्मूलतो वाखिले।।

इति। सर्वपूजास्वपि तत्तन्मन्त्रपूजितनवकादिकलशैः स्नपनमपि कार्यमिति।

त्रिकालपूजामनुभिश्च तत्तत्काले चतुर्द्रव्यहुतिं विधाय।
प्रसन्नपूजावसरेऽर्पयेत्तत्सम्पातसर्पिर्मनुबिम्बमूर्ध्नि ।।

इति। सम्पातस्पर्शं कृत्वा वा देवस्य पानीयादिसमर्पणं स्यादिति।

प्रातर्हरौ पौरुषजैर्जुहोतु मध्येऽह्नि नारायणजैश्च सर्पिः।
प्राग्द्रव्यहोमान्मनुभिस्त्वतो देवाद्यैश्च विष्णोर्न मुखैश्च सायम्।।
वैदिकदुर्गामनुभिर्हुत्वाष्टोर्ध्वं शतं घृतं पूर्वम्।
समिदादिकं कुमार्यां हुनेत् स्वमूलेन सर्वदा वेह।।
स्कन्दे जुहोतु सर्पिस्तत्र तमर्वन्तमादिपञ्चकतः।
तदनु कुमारं माताद्विकयस्मिन्वृक्ष आदिपञ्चकतः।।
मूलमनुद्वयषट्कद्विषट्कनामाणुदेवसेनाद्यैः ।
मन्त्रैश्च द्रव्यहुतेः प्रागिह सर्वेषु सवनेषु।।

इति। मूर्तिप एवाधिवासहोमं कुर्यात्। तदा चतुर्द्रव्यहोमे कृते गुरुः स्वयं तस्मिन्नग्नौ पूजावैश्वदेवहोमं कुर्यात्। पुनः स मूर्तिपो होमशेषं समापयेदिति।

विप्रान्समभ्यर्च्य च केशवाद्यैस्सम्भोजयेद्द्वादशशस्त्रिधाम्नि।
तद्वत् कु[2]मार्यां सवनत्रयेऽपि षट् षट् षडास्ये मनुभिश्च षड्भिः।।

इति। शिवे नास्त्यधिवासहोमः। अथवास्त्येव। तदुक्तं-

---

1. 'समाक्ष' क पाठः।
2. 'कुर्यात् स' पाठः।

अग्निमुत्पाद्य हुत्वाग्नौ पक्वमाज्यञ्च पञ्चभिः।
अपामार्गसमित्सर्पीरन्नमज्यं शतं शतम्।।
नादेनाष्टाधिकं हुत्वा होमशेषं समाप्य च।

इति। "मध्याह्ने यागहोमादि पूर्ववत् ब्रह्मभिश्चरेत्। उदुम्बरभवैस्तद्वद्रात्रौ होमं तु पाटलैः। यागहोमादिपञ्चार्णैः 'इति विप्रांस्त्वैकादश भोजयेत्। दक्षिणामपि शक्तितो दद्याद् इति।

अथ व्यतीते निशि याममात्रे बलिं समारभ्य समापयेच्च।
ब्राह्मे मुहूर्ते विधिरुत्सवोक्तः प्रायोऽत्र भेदं कथयेऽजितादौ।।

इति।

देवं सायन्तनेज्यासमुदितमनुनान्तस्सतत्प्रोक्तमूर्ति-
श्रीभूब्रह्मत्रिदौवारिकमथ पुरुषादीन् बहिस्सार्यकादीन्।
वाहाद्यादिक्पयतत्पारिषदमथ स तत्रत्यवास्तुस्थदण्डं
स्कन्दाद्यावारकञ्च प्रयजतु बलिनान्तस्सचाम्बादिदण्डम्।।
द्वाःस्थानग्रगतान् बहिश्च विकटादीनन्तहारा चतु-
र्दिग्द्वाःस्थान् कुमुदादिदिश्यमनुनिष्ठावारकांस्त्रीनपि।
ये भूतादिकदण्डपूर्वबलिपीठास्त्राष्टकाणुस्त्रयी
शर्वस्कन्दसुरग्रहाद्यमखिलं श्रीशे बहिश्चार्चयेत्।।

इति। विष्णौ सायन्तनेज्यामनुः षडक्षरः। अन्तरिति गर्भगृहे तत्प्रोक्तमूर्तयो वासुदेवादयः। पुनरभितः श्रीः भूमिश्च, पुनर्ब्रह्मा स च वास्तुदेवतैव, पुनस्त्रिदौवारिकाः द्वाःस्थयुगलत्रयं तैः सहितं देवं प्रयजत्विति सम्बध्यते। गुरुः स्नानादि कृत्वोत्सवोक्तवद्धविः सम्पूज्य पारशवैर्वाद्यघोषणे कृते अन्तः प्रविश्य पीठमिष्ट्वा षडक्षरेण देवमावाह्य व्यापकाङ्गन्यासं विधाय विग्रहपूजां कृत्वा बिम्बाग्रतस्त[1]ले षडक्षरेण सप्तवारमेकविंशतिवारं वा दैविकेन हविषा बलिं दद्यात्। पुनस्तत्पारिषदेभ्यो नम इति तत्पार्श्वं सम्पूज्य त्रिवारं सप्तवारं वा बलिं दद्यात्। तदुक्तं-

देवाग्रे विष्णवे तस्य परिषद्भ्यो ब्रह्मणे हरेत्।

इति। परिषदः पृथग्वा पूज्याः। तत्प्रोक्त[2]मूर्तिरित्यभिधानात्। वासुदेवादिभिः केशवादिभिश्च यथास्थानं सम्पूज्य त्रिस्त्रिः बलिं दद्यात्, इति। 'ओं श्रियै नमः ओं पुष्ट्यै नमः' इति। देवदक्षिणवामयोः श्रीभूमी सम्पूज्य सप्तवारं वलिं दद्यात्। पुनस्सकृज्जलं दत्त्वा देवस्य गण्डूषादि दत्त्वा किञ्चित्सम्पूज्य षडक्षरेण पुष्पाञ्जलिं विधाय 'सृष्टिस्थितिविनाशाना'मिति प्रार्थ्य ब्रह्मादिभ्यो बलिं हरेत्। देवबलिस्थानात् पुरतःस्थल एव ब्रह्माणं स्वेन षडक्षरेण द्वादशाक्षरेण वा सम्पूज्य सप्तवारं बलिर्देयः। पुनस्त्रिदौवारिकबलिः।

गर्भभुवि नन्दकुमुदौ द्वाःस्थौ हरिसम्मुखाविहाद्यौ स्तः।
आनन्दनन्दनाख्यौ प्राग्वत् चण्डप्रचण्डौ च।।

---

1. 'स्थ' क पाठः।
2. र्तीत्यं' ख. च पाठः।

इति। ब्रह्मयजनानन्तरं तत्रैव बहिर्मुखस्तिष्ठन् गर्भगृहान्तर्द्वाःस्थाभ्यां नन्दकुमुदाभ्यां स्वनाम्ना सम्पूज्य बलिं हरेत्। वास्तुदेवताव्यतिरिक्तानां तत्पारिषदयोगः सर्वत्रावबोद्धव्यः। बलिदानप्रक्रिया तु पुरोक्तैव। पुनर्गर्भगृहान्निष्क्रम्यान्तरालद्वार्यन्तर्मुखस्तिष्ठन् आनन्दनन्द[1]नाविष्ट्वा मुखमण्डपद्वार्यन्तर्मुखस्तिष्ठन् चण्डप्रण्डौ पूजयेत्। तयो'र्नमस्ते द्वारपालाये'त्युपस्थानं पुरोक्तमेव। अन्तराळाभावे नास्त्यानन्दनन्दनबलिः। मुखमण्डपाभावे तु प्रासादद्वारबहिरेव चण्ड[2]प्रचण्डबलिः स्यादिति। अथ पुरुषविश्वसत्या वैकुण्ठाच्युतकसर्वरूपाश्च। अनिरुद्धविश्वभावनयुक्ता जगती बहिस्वपारिषदैः।। इति। सार्यकादीन्पुरुषादीनिति ह्युक्तः। ततश्चैवं प्रयोगः। चण्डप्रचण्डयोर्मध्ये पुरुषं सपारिषदमिष्ट्वा तस्य सन्निधावेव दक्षिणत आर्यकं यजेत्। पुनर्मुखमण्डपबहिर्निष्क्रम्याग्निकोणे जगतीक्षेत्रबाह्ये विश्वं सपारिषदं इष्ट्वा तयभितः पार्श्वयोस्सावित्रसवितारौ यजेत् प्राग् उक्तम् आर्यकसावित्राख्यावित्यादि। एवं सत्यविवस्वदादिशेषो बोद्धव्य इति। गर्भावरणमेतत्। यदुक्तं–

दद्याच्च पुरुषार्याभ्यां बलिञ्चैव पुरोमुखे।
सावित्राय सवित्रेऽग्नौ विश्वमिष्ट्वास्य पार्श्वयोः।।

इत्यादि। वाहाद्यादिक्पतत्पारिषदमित्युत्सवोक्तवदिति शेषः। पूर्वद्वार इन्द्रान्तर्भागेन पश्चिमद्वारे वरुणबहिर्भागेन गत्वा मण्डपे गरुडं यजेत्। पक्षविक्षेपेत्यादि, पुनः प्रासादपृष्ठदेशं प्राप्य प्राग्द्वारेऽच्युतमित्रयोः, प्रत्यग्द्वारे पुरुषार्यकयोर्मध्येऽनन्तं यजेत्। विवस्वत्सत्योरपि पार्श्वभागे गणपतिदक्षिणामूर्ती भवतः। सोपानमारुह्य चक्रपाणिं शङ्खपाणिञ्च सम्पूज्य पुनरिन्द्रं यजेत्। 'दैत्यदर्पविनाशाये'त्यादि। अथ स तत्रत्या वास्तुस्थदण्डमिति कथमित्यत उच्यते–

तत्तद्दिगीशद्वयमध्यसंस्थचतुश्चतुर्वास्तुसुरान् समर्च्य।
सप्तवारं दण्डवदों नमो भूताद्येन दद्याद् बलिमन्तराले।।

इति। इन्द्रतत्पारिषदपूजानन्तरमिन्द्राद्यग्न्यन्तान्तरालं फडन्तप्रणवेन प्रोक्ष्य चत्वारि वास्तुपदानि संविभज्यादिचतुर्वास्तुदेवतास्तेषु संपूज्य बलिं दत्त्वा पुनरिन्द्राद्यग्न्यन्तं पुष्पाराधनादि सर्वं विधाय 'ओं नमो भूतेभ्यः 'इति मालामन्त्रेण त्रिस्त्रिवारं जलादिभिः संपूज्य सप्तवारमिन्द्राद्यग्न्यन्ततया दण्डाकारेण बलिं विदध्यात्। हविश्शेषेण दण्डमुच्छ्रिततया पूरयेत्। पुनर्मूलेन सकृत्तदुपरि विकिरणं सकृज्जलदान[3] कुसुमदानं बलिमुद्रामञ्जलिञ्च इन्द्राद्याग्न्यन्तं विदध्यादिति। एवम[4]न्त्यादिष्वपि द्रष्टव्यमिति।

सत्यादिक्लृप्तेन पथा सुरादिक्लृप्तेन वेत्वा परिपूर्य दण्डं।
इष्ट्वा बहिष्ठानखिलानुपेत्य प्रोद्वास्य तेनैव पथान्तरे तु।।

इति। बहिरवस्थितेन बलिदानेन मार्गानपेक्षा अन्तरवस्थितेन बलिदानेन पूर्वद्वारे आदित्यसत्यमध्ये मार्गः। प्रत्यग्द्वारे वरुणासुरमध्ये मार्गः। प्राग्द्वारे वास्तुदेवताचतुष्कमिष्ट्वा दण्डसमये त्विन्द्रबलिपीठद्यादित्यसत्यमध्यमार्गोदवसीमपर्यन्तं तद्दक्षिणसीमाद्यग्निबलिपीठपर्यन्तञ्च तथाविच्छिन्नदण्डं

1. 'न्दावि'।
2. 'ण्डब' ख पाठः।
3. 'नं ब' क पाठः।
4. 'मिन्दादि' च पाठः।

विधाय पुनरीशानान्तबलिः। तदादीन्द्रबलिपीठान्तं दण्डञ्च विधाय तेन मार्गेण बहिर्निष्क्रम्य तमेव मार्गं तेनैव मन्त्रेण किञ्चित्सम्पूज्य तेनैव तं विच्छिन्नभागं पूरयेदिति। इष्ट्वा बहिष्ठानखिलानिति[1] स्कन्दादिविष्वक्सेनान्तब्रह्मानन्ताभिप्रायम्। प्रोद्वास्येति दण्डोद्वासनमुक्तम्। देवाग्रतो दण्डबहिः स्थित्वा मूलेनाभ्यर्च्य दण्डबलेन जलगन्धादिमुद्रां दर्शयन् सर्वं समर्प्य तदूनातिरेकशान्त्यर्थं गोदानं कृत्वा प्रणवेन दण्डं, सर्वं तदीयभोक्तृभूतमुखे समुद्वास्य मार्गं विच्छिन्द्यात्। बल्यवसाने च तेन मार्गेण प्रासादान्तरियादिति। यद्वा बहिष्ठानखिलानिति स्कन्दादिक्षेत्रपालान्तं सर्वदेवताभिप्रायम्। सदा चान्तरा बलिंसमापन-पर्यन्तमवहितदृष्ट्यो रक्षका अपि कल्पनीया इति, प्रसङ्गादेवेदानीमेतदुक्तमिति[2] च बोद्धव्यमिति। ततः स्कन्दाद्यावरणं तदा चाम्बाद्याः पश्चिमे शास्तुरित्येतस्मिन्नवसरे 'चाम्बादीनां गणास्सर्व' इत्यनेन मन्त्रेण प्रागादिपश्चिमापवर्गं सम्पूज्य सप्तवारं शिंशुमाराकृतिरूपेण दण्डं विदध्यात्। शेषमुंत्सवसमानम्। परीत्यार्चयतु च। पुन 'रुदित्याञ्च निर्माल्यभाज'मिति विष्वक्सेनञ्च यजेदिति।

श्रीभूनिधियुगदण्डप्रदण्डकानथ गदाञ्च मुसलं च।
चक्रं शङ्खञ्च यजेत् पार्श्वयुगे मण्डपे सभायाञ्च।।

इति। मण्डपस्य बहिर्द्वारि देवाभिमुखः स्थित्वा 'श्रियै नमः पुष्ट्यै नमः'। सभाद्वार्यन्तर्बहिर्मुखः स्थित्वा 'शङ्खनिधये पुष्पनिधये[3] नमः'। सभान्तः प्रविश्य देवाभिमुखः स्थित्वा 'दण्डाय नमः प्रदण्डाय नमः'। तयोः पुरतः समीपे 'गदायै नमः मुसलाय नमः'। सभाबहिर्द्वार्यन्तर्भागे बहिर्मुखः स्थित्वा 'चक्राय नमः शङ्खाय नमः'। पुनर्बहिर्निष्क्रस्यान्तर्मुखः स्थित्वा विकटविरूपाक्षौ पूजयेदिति। विकटविरूपाक्षसनातनसनकाः प्राच्यवाच्योः स्युः। शान्तप्रमोदसुखदा[4]ः ससर्वदमनाः प्रतीच्युदीच्योश्चेति। अवाची दक्षिणा दिगुच्यते। सनातनसनकौ दक्षिणदिग्द्वारि बहिर्द्वाःस्थौ शान्तप्रमोदौ पश्चिमदिग्द्वारि सुखदसर्वदमनौ उत्तरदिग्द्वारि बहिर्द्वाःस्थाविति द्वाःस्थावरणमेतत्। ततः।

आराध्य ध्वजदेवतादिबहिरावारद्वयं पूर्ववद्।
विष्णौ दिग्गणमन्त्रतश्च दशदिक्ष्वत्राहरेद्वा बलिम्।

इति। तदुक्तं–'कुमुदादिदिश्यमनुनिष्ठावारकांस्त्रीनपी'ति। 'ये भूतादिकदण्डपूर्वबलिपीठे'ति, तत्प्रकारस्तूच्यते।

ये भूतादिकमनुभिर्नवभिर्बलिपीठिकां परीत्य गुरुः।
दद्यात् त्रिसप्तवारं दण्डवदथ शेषमाचरेत् प्राग्वत्।।

इति। महाबलिपीठसन्निधिमुपेत्य फडन्तप्रणवेन प्रोक्ष्य पुष्पाञ्जलिं कृत्वा पीठाधिपं संवन्द्य प्राग्दिशि कुमुदपीठबहिर्दक्षिणत उदङ्मुखः स्थित्वान्तरादि बहिरपवर्गं फडन्तप्रणव[5]प्रोक्षणादिसर्वं विधाय 'ये भूताः पुरस्सदः' इत्यनेनैकविंशतिवारं हस्तमात्रायतं दण्डं विदध्यात्। पुनरग्निकोणे प्राङ्मुखः स्थित्वा

1. 'ति ब्रह्मानन्तस्क' च पाठः।
2. 'ति त' क पाठः।
3. 'ये स' क पाठः।
4. 'मुखाः सर्व' क पाठः।
5. 'वेन प्रो' क पाठः।

'ये भूता अग्निसदः इत्यन्त[1]रादिबहिराग्नेयापवर्गं दण्डं विदध्यादित्यादि। ऐशदण्डादीषद् बहिर्दक्षिणभागे 'ये भूता उपरिसदः' इत्युपरिदण्ड इति। पुनः कुमुदाद्यष्टमूर्तिर्बलादिमन्त्रैरुपरिपीठे बलिश्चोत्सववदेव। पुनरायुधावरणम्।

शङ्खञ्चक्रञ्च गदा मुसलं शार्ङ्गं शरञ्च खड्गं च।
खेटकमपि विदुरस्त्राण्यष्ट प्रागादिदिक्स्थितानि हरेः।।

इति। पुनर्मन्त्रत्रयावरणं ये समस्तं ओं नमो भूतेभ्यः गृह्णन्त्विति यदुक्तं शङ्खाय दिक्षु चक्रायेत्यादि खेटकाय चेति गृह्णन्तु बलिमित्यादिमन्त्रेणापि तदैव हीति। पुनः शर्वस्कन्दाद्यावरणम्। तदुक्तं–

शर्वस्कन्दं विदारीञ्चाप्य[2]र्यमाख्यं च पूतनाम्।
जम्भकं राक्षसीं पापां पिलिपिञ्जं चरादिकीम्।।

इति। पुनर्देवग्रहादिबलिः। क्षेत्रपालबलिश्च पुनरुपेत्य प्रोद्वास्य तेनैव पथान्तरे त्विति बलिं विधायेति। परीत्य सन्नत इत्याद्युक्तं च कार्यमिति। येषान्तु बलिपीठे समा[3]पनं विजयबलिस्तावदेवमुक्तः। अथेतरबलिष्वत्रैवायं भेदः।

लक्ष्मीशेतरदेवतासु पुरुषाद्यैरूनितोऽन्तर्बहिः
शङ्खाद्यैश्च विधिस्त्वयं स्मरहरे वास्तुस्थितैश्चामरैः।
दुर्गायां बलिपीठिकार्चनविधौ शक्त्यात्मकैरष्टभि–
र्दण्डैस्तां परितोऽभिवेष्ट्य नवमं कुर्वीत शार्व्यां दिशि।।
लोकेशापचितौ निजोत्सवसमुक्तैस्सर्वमन्त्रैर्बलिं
दायं दायमिहोक्तदण्डयजनं कुर्यात्कृशानूद्भवे।
एतस्मिन्परितो ध्वजेशयजनेऽप्येतेन मालाणुना
कार्यो दण्डबलिर्जयाबलिसमूह्यश्चात्र शेषो ब[4]लिः।।
सव्येऽभ्यर्च्य महेश्वरे परशुपाणिं शूलपाणिं यजेत्
वामेऽनन्तरमेव सोमयजनस्यार्थेश्वराभ्यर्चनम्।
चण्डेशं परिपूज्य वाहनसमिज्यां [5]चाचरेदग्रतो
दण्डेज्याबलिपीठयागविहिताः पञ्चैव चोर्ध्वान्तिमाः।।

इति। शिवदुर्गास्कन्देष्विह पुरुषाद्यावरणं शङ्खाद्यावरणञ्च नास्ति। दुर्गास्कन्दयोस्तु पुनः ब्रह्मार्यकादिवास्तुदेवतास्सन्ति। शिवे तु तासामप्यभाव इति तावद्भेदः। ततश्च दुर्गाबलौ तावत्सायन्तनेज्यामनुविधानेन देवीं सकळीकृत्य सम्पूज्य निवेद्य काले तन्मन्त्रैस्सप्तवारमेकविंशतिवारं वा तले बलिं विकीर्य गण्डूषादि दत्त्वा किञ्चित्सम्पूज्य पुष्पाञ्जलिं विधाय 'सृष्टिस्थितिविनाशाना'मिति

1. 'राव' च पाठः।
2. 'प्यार्यकाख्यं' क पाठः।
3. 'मानं... बलिपीठकार्चनविधौशक्यात्मकैरष्टमिर्दण्डैस्तां परि' च पाठः।
4. 'विधिः।' ख. च पाठः।
5. 'त्वा' च पाठः।

प्रार्थ्य देव्यग्रतःस्थले ब्रह्माणं स्वद्वादशाक्षरेण यजेत्। पुनरुपस्थानादिपूर्वकं[1] चण्डिकाम्बिके जयाविजये च सम्पूज्यार्यकादिद्वादशवास्तुदेवताः पुनर्मण्डपे सिंहमिष्ट्वा गणपतिदक्षिणामूर्त्यनन्तरं 'दैत्यदर्पविनाशाये'त्यादि पुनरन्तराल आदित्यसत्यभृशान्तरीक्षानिष्ट्वा 'ओं नमो भूतेभ्यः' इति सप्तवारं दण्डबलिरित्यादि। पुनरनन्तानन्तरं स्कन्दाद्यावरणं तत्र चाम्बादीनां दण्डबलिः[2]। पुनर्निर्माल्यधारिण्यनन्तरं सभाद्वारि ह्लादिन्यादिचतुष्टयं बहिर्निष्क्रम्य 'ये समस्त'मित्यु-पस्थाय काल्याद्यावर[3]णं सुदुर्गाद्यावरणं पूर्वस्यां दिशि दुर्गाया भगवत्या 'ये गणा' इत्याद्यावरणं ततो महाबलिपीठे प्रागाद्यष्टमूर्तिबाह्येष्वष्टौ शक्तीर्विधिवद्विभाव्य तासु प्रागाद्यष्टदि[4]ग्गतासु 'ये भूताः पुरस्सदः' इत्यादिमन्त्रैरेकविंशतिवारं दण्डबलिं विधायेशानदण्डबाह्ये 'ये भूता उपरिसदः' इति दण्डबलिं कुर्यात्। पुनरन्तः काल्यादिपीठिकाबलिः। उपरिपीठे ब्राह्म्यादिबलिश्च। पुनर्मन्त्रत्रयावरणं शर्वस्कन्दाद्यावरणं देवग्रहाद्यावरणं क्षेत्रपालबलिश्चेति। कौमारबलौ च देवमुपचारमूलेन सकळीकृत्य सम्पूज्य बलिमेकविंशतिवारं विधाय गण्डूषादि दत्त्वा सम्पूज्य पुष्पाञ्जलिं प्रार्थनाञ्च कृत्वा ब्रह्मणे तदीयद्वादशाक्षरेण बलिं दद्यात्। पुनर्वज्रहस्तशक्तिपाण्योः सुकुमारभद्रसेनयोर्मण्डपे मयूरस्य च बलिं दत्त्वा इन्द्रस्सुराधिपश्चैवेत्यादि तत्र विशेष[5]ः। लोकेशापचितौ निजोत्सवसमु[6]क्तैः सर्वमन्त्रैरिति[7]। तदुक्तं–'दशस्वाशास्वाशाधिपपरिषदन्तेऽत्र मनुना 'ओं नमो भूताद्येन चे'ति। [8]अत्रैवं प्रयोगः। इन्द्रस्सुरपतिश्चैवेतीन्द्रमुपस्थाय तस्मै तत्पारिषदेभ्यश्च बलिं दत्त्वा 'ओं नमो भूतेभ्यः पूर्वस्यां दिशि स्कन्दस्य भगवतो ये भूताः पुरस्सद'इत्येभिरपि, विधिवद् बलिं दत्त्वा पुनरिन्द्राग्न्योरन्तराले आदित्यसत्यभृशान्तरिक्षानिष्ट्वा तत्र 'ओं नमो भूतेभ्यः' इति सप्तवारं बलिं कुर्यादित्यादि। पुनर्मातृप्रभृतिधूर्तसेनान्तबलिं विदध्यात्। तदुक्तं–जयाबलिसमूह्यश्चात्र विशेषो विधिरिति। केचित्पूर्वस्यां दिशीत्यादिभिर्दण्डानन्तरं प्रागादिदिक्ष्वावरणमाचरन्ति। पुन[9]स्सभायामाग्निकेतुसूर्यकेतू बहिर्निष्क्रम्य 'ये समस्त'मित्युपस्थाय ध्वजावरणं यजेत्। तत्र विशेषः एतस्मिन् परितो ध्वजेशयजन इति प्राग्देवसेनापतिं सम्पूज्य बलिं दत्त्वा तदाद्यग्निलोचनपर्यन्तान्तराळे फडन्तप्रणवप्रोक्षणादिसर्वं विधाय 'ओं नमो भूतेभ्यः' इत्यनेनैव सप्तवारं दण्डबलिं दद्यात्। एवं समन्तादपीति। पुनः षट्कोट्याद्यावरणत्रयं पुनर्महाबलिपीठबलि मन्त्रत्रयावरणं शर्वस्कन्दाद्यावरणं ग्रहावरणं क्षेत्रपालबलिश्चेति। जयाबलौ विशेषः। देवं षडक्षरेण सकळीकृत्य सम्पूज्यार्घ्यं दत्त्वा पुष्पाञ्जलिं विधाय प्रार्थ्य नन्द्यादिभ्य उत्सववद् बलिं दद्यात्। केचिद्देवायार्घ्यदानसमये मूलेन सप्तवारमीशानादिभिस्त्रिस्त्रिवारं[10] देववामदक्षिणयोः

---

1. 'र्वं च' क पाठः।
2. 'लिं नि' ख. च पाठः।
3. 'णं पू' च पाठः।
4. 'दिक्षु गता' क पाठः।
5. 'षा' क पाठः।
6. 'मु' च पाठ।
7. 'ति। अथ मन्त्रैरिति। त' क पाठ।
8. 'त' ख. च पाठः।
9. 'नः पुनस्स' ख. च पाठः।
10. 'रं वा' क पाठः।

उमागङ्गाभ्यामपि बलिं विदधत इति। बहिर्द्वाःस्थयोर्व्यत्ययः, तदुक्तं सव्येऽभ्यर्च्येत्यादि। पुनरिन्द्रतत्पारिषदबलिदानानन्तरं 'ओं नमो भूतेभ्यः' इत्यन्तराले सप्तसप्तवारं दण्डबलिनित्यादि पुनर्वाहनमनिष्ट्वा मातृप्रभूतिचण्डसेनान्तं पुनरेव मण्डपे वाहनमिति पुनस्सभायां द्वाःस्थाविष्ट्वा बहिर्निष्क्रम्य 'ये समस्त'मित्युपस्थाय ध्वजावरणा-द्यावरणत्रयमिष्ट्वा महाबलिपीठे बलिं दद्यात्। तत्र विशेषः। 'दण्डेज्याबलिपीठयोगविहिता' इति। तत्र पीठाधिपा[1]नुज्ञामवाप्य 'ये भूताः पुरस्तदः' इत्येकविंशतिवारं प्राग्दिश्यन्तरा-दिबहिरपवर्गं दण्डबलिं विकीर्य पूनर्दक्षिणतः पश्चिमत उत्तरत ऐशे चेषद्बहिर्दक्षिणतो दण्डबलिं कुर्यात्। पुनर्भूतिदादिसर्वमुत्सवोक्तवत्। मन्त्रत्रयावरणं ग्रहावरणं क्षेत्रपालबलिश्चेत्येवं जयाबलिप्रक्रियेति। "पुनःपरेद्यव्यभिपूज्य देवं मूलेन पूर्वेद्युरिवाथ देवात्। प्रसन्नतोऽनुग्रहमाददीत वृतो यदि प्राग्यजमानयुक्तः "इति पूर्वेद्युरेवेति तस्मिन्नेवाग्नावधिवासहोममात्रमेकविप्रभोजनमप्युक्तम्। तदा सम्पाते तदग्न्युद्वासनमपि कार्यम्। तदसम्भवे यज[2]नीयदिनसायन्तनहोमानन्तरं सम्पाते तदुद्वासनमिति ज्ञेयम्। वृतो यदि प्रागिति। कर्त्रा पूर्वं वस्त्रद्वयपवित्रसमर्पणेन वृतश्चेदेतत्सर्वं कृतवांस्तदा तेन यजमानेन सहितो देवात् प्रसन्नादनुग्रहं तत्पूजाफलरूपमाददीतेति। दक्षिणादिसर्वमर्थसिद्धमिति। इदानीं प्रकृतमनुसरामः।

ग्रामबल्यनन्तरं देवस्य स्वपनं कारयितव्यमिति, तत्प्रस्तौति-अथाप्लुत इति। तत्र मण्डप इति मुखमण्डपग्रहणम्। तदसम्भवे पूजामण्डपग्रहणम्। तस्य मार्जनालेपनाभ्यां शोधनम्। यथापुरमिति मङ्गलपालिकादिभिरित्यत्रापि संबध्यते। तदुक्तम्-'अथ सम्मृष्टलिप्तायामि'त्यादि 'शिरोपधानादियति'-त्यन्तम्। पुनः,

मङ्गलान्यष्ट परितस्तथा मङ्गलपालिकाः।
प्रदीपार्दीश्च विन्यस्य मण्डयेन्मण्डपोदरम्।।

इति। पुनश्चेष्टविष्टरे, यजेत तस्मिन् यजने समाहितः स्वकीयशक्तिं निजबीजविद्यया।

इति। तत्सन्निधौ भद्रासनं निधाय तत्रापि पीठमात्रं पूजनीयम्। वक्ष्यति च- 'पीठे न्यस्य प्रथममहित' इति।।205।।

After distributing oblations to the manas of the village the priest shall take his bath and enter the pavilion in the temple which is well decorated with auspicious pots and festoons. Purifying his limbs and sanctifying water in the conch he shall prepare a couch in which the portable idol is to be placed after invocation. To the northern side of the couch an auspicious stool is to be placed and worshipped. (205)

गर्भालयं प्राप्य समिष्टविष्टरे
देवं समास्थाप्य समर्च्य चार्चकः।
प्रसाद्य दत्त्वा व्यजनाद्युपाहृतीः
कृताञ्जलिः प्रार्थयतामनेन तम्।।206।।

1. 'पमनुज्ञाप्य'क पाठः।
2. 'ननियतदि' क पाठः।

विमर्शिनी

अथार्चकः गुरुः गर्भालयं प्राप्य समिष्टविष्टरे पूजिते पीठे देवं समास्थाप्य सम्यगावाह्य समर्च्य निवेद्य व्यजनाद्युपाहृतीः तालवृन्तादिसर्वोपहारान् दत्त्वा कृताञ्जलिर्भूत्वा 'तीर्थयात्रा त्वये'त्यनेन तं देवं प्रार्थयताम्।।206।।

विवरणम्

गर्भालयं प्राप्येति। तत्रास्त्रेण रक्षां विधाय गर्भालयं प्राप्नुयात्। देवं समास्थाप्येत्यावाहन[1]मुक्तम्। समर्च्य चेति। पूजानिवेदनाद्युक्तम्। प्रसाद्येति प्रसन्नपूजाव्यजनाद्युपाहृतीर्दत्त्वेति। प्रसन्नपूजासमय इति भावः।।206।।

After reaching the Garbhagṛha and worshipping the deity he shall beseech the indulgence of the god with folded hands after placing items like Vyajana (fan) and other objects. The request is as follows. (206)

तीर्थयात्रा त्वया देव! श्वः कर्तव्या सुरेश्वर!।
तत्र प्रतिसरारम्भं त्वमनुज्ञातुमर्हसि।।207।।

विमर्शिनी

प्रार्थनामन्त्रं पठति—**तीर्थेति**।।207।।

विवरणम्

अनेनेत्यभिप्रेतं मन्त्रमाह—**तीर्थयात्रेति**। दुर्गायां 'देवि सुरेश्वरी'ति च विशेषः।।207।।

O God of gods you be pleased to proceed on a Tīrthayātrā- procession- to a holy ghat. You may permit me to tie a Pratisara- a cord of thread around the waist to mark the auspicious event. (207)

अश्वत्थपत्रयुगलैरथ साग्रदूर्वा-
सिद्धार्थसंयुतघृतं परिगृह्य दोर्भ्याम्।
मन्त्रैः सुशोभनसुभद्रसुमङ्गलार्ण-
भिन्नैर्भवत्ववसितैः क्रमशोऽधिबिम्बम्।।208।।
आरोपयेत् कटितटावधि कन्धरान्तं
कान्तं च दोर्विनिमयोभयपार्श्वयुक्त्या।
प्रक्षालयेत् करयुगं पृथगत्र तत्त-
दश्वत्थपत्रकमपास्य च तस्य पृष्ठे।।209।।

विमर्शिनी

घृतारोपणमाह—**अश्वत्थेति**। अथ प्रार्थनानन्तरम् अश्वत्थपत्रयुगलैस्त्रिभिः साग्रदूर्वासिद्धार्थसंयुतघृतं

---

1. 'नादिकमु' च पाठः।

दूर्वाग्रसिद्धार्थसंयुतं घृतं दोर्भ्यां परिगृह्य सुशोभनसुभद्रसुमङ्गलार्णभिन्त्रैः सुशोभनं सुभद्रं सुमङ्गलम् इत्यक्षरसंयुक्तैः भवत्ववसितैः भवतु इत्यन्ते युक्तैः 'सुशोभनं भवतु' इत्यादिभिर्मन्त्रैः अधिबिम्बं बिम्बे कीटतटावधि कटिपर्यन्तं कन्धरान्तं कण्ठान्तं कान्तं मूर्धान्तं च क्रमशो दोर्विनिमयोभयपार्श्वयुक्त्या करयोर्विनिमयाद् दक्षिणकरस्य दक्षिणपार्श्वे वामकरस्य वामपार्श्वे योगश्च यथा भवति तथारोपयेत्। अत्र पृथक् तत्तदश्वत्थपत्रं तदा तदा तस्य देवस्य पृष्ठेऽपास्य करयुगं प्रक्षालयेच्च।।208-209।।

विवरणम्

घृतारोपणमाह-**अश्वत्थपत्रयुगलैरिति**। दोर्भ्यामश्वत्थपत्रयुगलैस्साग्रदूर्वासिद्धार्थसंयुत[1]घृतं परिगृह्याधिबिम्बं दोर्विनिमयोभयपार्श्वयुक्त्या आरोपयेत् तदश्वत्थपत्रकं पृष्ठदेशे अपास्य करयुगं प्रक्षाळयेच्चेत्येवं योजना। एकस्मिन्पात्रे षडश्वत्थपत्राणि क्षालितानि निधाय तेषु दूर्वात्रयसिद्धार्थसंयुतमाज्यं सम्भृत्यास्त्रप्रोक्षणं शोषणादिकं प्रणवपूजनञ्च कुर्यात्। पुनर्हस्ताभ्यां ते द्वे पत्रे समादाय देवस्य पादतलप्रदेशे निदध्यात्[2]। तदा दक्षिणहस्तो दक्षिणपादसन्निधावितर[3]: इतरसन्निधौ स्यात्। ताभ्यां पादतलाद्याकटितटं 'ओं सुशोभनं भवतु' इत्यारोपयेत् तदा च दूर्वाग्रतस्तदाज्यस्य बिम्बे तथा पातोऽपीष्यते। पुनस्तत्पत्रद्वयं बिम्बपृष्ठे निरस्य हस्तद्वयं प्रक्षाळ्य द्वितीयं घृतारोपणमेवं विदध्यादिति।।208-209।।

With a bunch of Aśvatthapatra- leaves of fig tree- along with a handful of Dūrvā grass, the priest shall take hold of a pot full of ghee in which mustard also is sprinkled and poured the same on the idol. He shall chant invocations to the effect that may every thing be auspicious - the three different mantras- using the words Śobhana, Subhadra and Sumangala and put the leaves on the idol touching various parts of the idol from hip to neck. After dropping the leaves behind the idol the priest shall wash his hands. (208-209)

कर्मार्चामभिषिच्य तत्र पुरतः कृत्वा विधाय द्विजैः-
पुण्याहं प्रकलय्य कौतुकमघोरेणेश्वरेऽन्येषु तत्।
प्राग्वद् भूतलयादिकं लिपिमनुन्यासान्तमाधाय त-
त्पीठं मूर्तिमपि प्रकल्प्य कुसुमाराध्या समाज्ञाप्य तम्।।210।।

विमर्शिनी

कर्मार्चामभिषिच्य तत्र देवस्य पुरतः कृत्वा स्थापयित्वा द्विजैः सह पुण्याहं विधाय ईश्वरे अघोरेण मन्त्रेण अन्येषु प्राग्वच्च तत् क्षौमक्षिप्तसमुक्तसर्षपसुवर्णोर्ज्वस्वलमित्युक्तं कौतुकं प्रकलय्य बद्ध्वा पुनस्तस्यां कर्मार्चायां भूतलयादिकं भूतसंहारशोषणादि भूतसृष्टिलिपिप्राणायामं च ,लिपिमनुन्यासान्तं लिपिन्यासं मन्त्रप्राणायामा[4]न्तं न्यासं चाधाय तत्पीठं सम्पूज्य मूर्तिमपि प्रकल्प्य कुसुमाराध्या तं देवं समाज्ञाप्य प्रार्थ्यावाहयेत्।।210।।

1. 'तं' च पाठः।
2. 'त्। द'
3. 'रस' क पाठः।
4. 'न्त' ख पाठः।

विवरणम्

कर्मार्चामिति। तीर्थार्चाभिप्रायम्। तत्र पुरतः कृत्वेति। भद्रासने मूलबिम्बसम्मुखतयेति द्रष्टव्यम्। विधाय द्विजैस्सह पुण्याहमिति। 'कौतुकदेवता प्रीयन्ताम्' इति मन्त्रः। कौतुकं प्रकलय्येति। बद्ध्वेत्यर्थ। कथमित्याह–ईश्वरे अघोरेण, अन्येषु प्राग्वदिति। यथा प्रागुक्तं 'स्थित्वा प्रार्थ्य नमस्त इत्यणुयुजे'त्यादि। पुनः प्रागुक्तवद् भूतलयादिकं लिपिमनुन्यासान्तं कुर्यात्। फडन्तप्रणवेन प्रोक्ष्य जीवमात्मनि संहृत्य भूतसंहारं शोषणादिकं जीवप्रतिसङ्क्रमणं भूत[1]सर्गं लिपिन्यासं मन्त्रोदयादिपूर्वकं मन्त्राक्षराङ्गन्यासं कुर्यादित्यर्थः। तत्पीठं मूर्तिमपि प्रकल्प्येति पीठपूजापूर्वकं कर्मबिम्बे मूर्तिमन्त्रेण मूर्तिकल्पनमुक्तम्। कुसुमसंराध्या समाज्ञाप्य तमिति मूलबिम्बे पुष्पाञ्जलिपूर्वकमावाहनार्थमभ्यनुज्ञापनमुक्तम्।।210।।

Bathing the movable idol after placing it in front of the installed image Puṇyaha may be got performed by Brahmins. Along with his assistants the priest shall tie the thread of Pratisara invoking the pleasure of the divinity with hymns. In the case of Śiva, Aghora mantra is to be chanted. Rituals like Bhūtasamhāra, Lipinyāsa and Mantranyāsa etc., shall be performed on it. After worshipping the altar with flowers the priest shall seek the permission of the installed deity to transfer his prowess to the portable idol. (210)

प्रष्ठोद्गीथोपचारै[2]र्मनुवरपुटितैः सृष्टिसंहाररीत्या
प्रोक्तैरावाहयामीत्युपरतिसहितैः पञ्चमन्त्रैस्तदीयात्।
हृत्पद्मादात्मतेजःकणमधिदरवारि प्रणीयामुत[3]स्तं
कर्मार्चायां सुयोज्य प्रकटयतु सहाङ्गीक्रियाद्यं च सद्यः।।211।।

विमर्शिनी

आवाहनविधिमाह–**प्रष्ठेति।** प्रष्ठोद्गीथोपचारैः प्रष्ठः पुरोभागः उद्गीथः प्रणवः पुरोभागगतप्रणवोपचारयुक्तैः मनुवरपुटितैः मूलपुटितैः सृष्टिसंहाररीत्या प्रोक्तैः पूर्वं सृष्टिक्रमेण पुनः संहारक्रमेण च प्रोक्तैः आवाहयामीत्युपरतिसहितैः अवसाने आवाहयामीति सहितैः स्वीयै[4]ः स्वीयैः पञ्चमन्त्रैः तदीयाद् देवस्य हृत्पद्माद् आत्मतेजःकणं परचैतन्यात्मकं तेजोलेशम् अधिदरवारि शङ्खजले प्रणीय अमुतः शङ्खात् (तं) कर्मार्चायां सुयोज्य सप्त एव सहाङ्गीक्रियाद्यं सकलीकरणाद्यं च प्रकटयतु कुर्यादित्यर्थः।।211।।

विवरणम्

आवाहनप्रक्रियामाह–**प्रष्ठोद्गीथोपचारैरिति।** पञ्चमन्त्रैरित्येतस्य विशेषणमेतत्। शिवे पञ्चमन्त्राः पञ्चब्रह्माणि शेषेषु निजपञ्चतत्त्वानि। प्रष्ठावग्रगामिनावुद्गीथोपचारौ येषामिति समासः। प्रणवोपचारपूर्वकं

---

1. 'र्ग' क. च पाठः।
2. 'रैर्निजमनुपु' क. ग. पाठः।
3. 'स्तत् क' ख. ग. घ पाठः।
4. 'यैः प' घ. च पाठः।

मूलपुटितान् पञ्चमन्त्रान् सर्गक्रमेण संहारक्रमेण चोच्चरेत्। पुनरावाहयामि इति च ब्रूयात्। देवपदस्यामन्त्रणं आगच्छद्वयं देवपदस्यैवद्वितीयान्तत्वमित्येतत् सर्वमर्थसिद्धम्। तदीयाद्धृत्पद्मादिति बिम्बहृत्कमलग्रहणम्। अधिदरवारिति। शङ्खसम्भृतजले। ततश्च प्रागेव शङ्खे जलं सम्भृत्य किञ्चित् सम्पूज्य तमञ्जलिपुटेन परिगृह्य मूलबिम्ब[1]हृदयसन्निधिं नीत्वैवं तस्मिन् आवाहयेदिति यल्लभ्यते अमुतस्तत्कर्मार्चायां सुयोज्येति शङ्खतः तज्जीवमयं वारीत्यर्थः। प्रकटयत्विति। कुर्यादिति भावः।।211।।

With the chanting of Praṇava thrice invoking the divinity in the ritualistic manner, the portable idol shall be infused with divine power to which the mental power of the priest shall also be merged. In all these procedures the process shall be by the way of creation and sustenance by the action of invocation. Finally the portable idol shall be infused with Tattvanyāsa. and Aṅganyāsa along with Praṇava. (211)

तत्त्वन्यासप्रभृतिविधिना सुस्थितं मूलसंस्थं
कृत्वा देवं विहृतममुतो मण्डपान्तः प्रणीय।
पीठे न्यस्य प्रथममहिते स्वाणुनावाह्य भूयः
साङ्गीकृत्य प्रयजतु निवेद्यान्तिमैश्चोपहारैः।।212।।

विमर्शिनी

मूलसंस्थं मूलार्चागतं देवं तत्त्वन्यासप्रभृतिविधिना तत्त्वन्यासादिना सुस्थितं स्थिरीभूतं कृत्वा अमुतोऽस्मात् प्रदेशाद् विहृतं कौतुकगतं देवं मण्डपान्तः प्रणीय प्रापयित्वा प्रथममहिते शय्याराधनकाल एव पूजिते कस्मिंश्चित् पीठे न्यस्य भूयः स्वाणुना स्वमूलेनावाह्य साङ्गीकृत्य निवेद्यान्तिमैरुपहारैः प्रयजतु।।212।।

विवरणम्

तत्त्वन्यासप्रभृतिविधिनेति। हृद्येव त्रिवारं पञ्चमन्त्रन्यासम[2]ङ्गन्यासं च कृत्वा रक्षां विदध्याद् इत्यर्थः। विहृतं कर्मबिम्बे नीतम्। अमुत इति गर्भगृहात्।।212।।

After assuring the divinity of the Mūlabimba-the originally installed idol and ascertaining its divine power both the permanent and the portable idols shall be worshipped by waving lights The priest shall cover the idol with fresh clothes and get out of the sanctum. He shall place the portable idol in the pavilion in front where a altar is already prepared. Then he shall perform rituals up to the offering of food and other items. (212)

ताम्बूलव्यजनार्पणादिसुभगां कृत्वा प्रसन्नार्चनां
प्रागन्त्यार्घ्यविधेः स्वपञ्चमनुभिः शय्यातले शाययेत्।

---

1. 'म्बे' ख पाठः।
2. 'सं कृ' क पाठः।

व्याप्यैनं पुनरुत्क्रमेण शरतत्त्वैर्मूलतश्चादिना
जाग्रत्स्वप्नसुषुप्तिसंज्ञितदशास्तीर्त्वा तुरीयां नयेत्।।213।।

विमर्शिनी

ताम्बूलव्यजनार्पणादिसुभगां ताम्बूलार्पणादिभिर्व्यजनार्पणादिभिश्च[1] मनोहरां प्रसन्नार्चनां कृत्वा प्रागन्त्यार्घ्यविधेः अवसानीयार्घ्यदानात् पुर्वं स्वञ्चमनुभिः स्वस्वपञ्चतत्त्वमन्त्रैः शय्यातले शाययेत्। एनं देवं पुनरुत्क्रमेण संहारमार्गेण पठितैः शरतत्त्वैः पञ्चतत्त्वैः मूलतः आदिना प्रणवेन चोत्क्रमेण पादादिकेशान्तं पृथग् व्याप्य जाग्रत्स्वप्नसुषुप्तिसंज्ञितदशाः जाग्रदवस्थां स्वप्नावस्थां सुषुप्त्यवस्थां च क्रमात् तीर्त्वा अतिक्रम्य तुरीयां दशां नयेत् प्रापयेत्।।213।।

विवरणम्

प्रागन्त्यार्घ्यविधेः कृत्वेत्यवसानीयार्घ्यग्रहणम्। तत्तु श्व एव कार्यम्। वक्ष्यति च 'अर्घ्यसमर्पणाद्य'मिति[2]। स्वपञ्चमनुभिरिति पूर्ववत्। व्याप्येति त्रिर्मन्त्रव्यापकमुक्तम्। उत्क्रमेणेति संहारव्यापकमभिप्रायं पञ्चतत्त्वानां संहार[3]क्रमाभिप्रायञ्च। आदिनेति प्रणवेन। तीर्त्वेत्यतिवाह्येत्यर्थः।।213।।

Performing the Prasannārcanā - the ritual to make the god pleasant - by submitting Tāmbula, Vyajana etc., the idol should be laid down on the couch chanting the Pañcatattva mantra related to the particular deity. Again the god may be worshipped with Pañcatattva, Mūlamantra and Praṇava from head to foot. The states like Jāgrat, Swapna,and Suṣupti (awakened state, dreaming state and sleeping state) are to follow. From the last-position the god shall be led to the fourth state- Turīya- in which he is comfortably rested. (213)

दशां तुरीयामधिगम्य रम्यां
देवं स्वरूपानुभवानुषक्तम्।
ध्यायन् धियानन्दघनं सुरक्ष्य
संवृत्य शेषां क्षपयेत् क्षपां च।।214।।

विमर्शिनी

रम्यां तुरीयं दशामवस्थामधिगम्य देवं स्वरूपानुभवानुषक्तं स्वस्वरूपानुभवयोगयुक्तम् आनन्दघनं धिया ध्यायन् तं सुरक्ष्य संवृत्य यवनिकयाच्छाद्य शेषां क्षपां रात्रिं क्षपयेद् अतिवाहयेत्।।214।।

विवरणम्

संवृत्येति वस्त्रेणाच्छादनमुक्तम्। शेषां क्षपयेत् क्षपाञ्चेति।।214।।

---

1. श्च सुभगां म' क पाठः।
2. 'त्यादि। स्व' ख. च पाठः।
3. 'रव्यापकक' क पाठः।

The god who is now in the fourth state called Turīya is to be meditated upon by the priest and protected by various mantras related to Dikpālas and Astramantras. In all the eight directions beginning with the east flowers may be strewn before the idol is draped in fresh clothes to serve as bed sheets. Completing the Gaṇeśapūjā and shielding the deity the priest shall remain near the deity who is in a sleeping position himself remaining vigilant and awake. (214)

काल्योचितं कर्म विधाय साधु
सविग्रहीभूतसमर्चितात्मा ।
तारेण मूलेन च पञ्चत[1]त्त्वैः
संव्याप्य तं ध्यायतु जागरूकम्।।215।।
उत्थाप्य धेन्वादिकमङ्गलानि
प्रदर्श्य कृत्वार्घ्यसमर्पणाद्याम्।
प्रारब्धपूजासुसमाप्तिमिष्टे
पीठे च कृत्वा सकलीकरोतु।।216।।

विमर्शिनी

काल्योचितम् उषसि योग्यं सन्ध्यावन्दनादिकं कर्म विधाय साधु यथावत् सविग्रहीभूतसमर्चितात्मा सकलीकरणं शङ्खपूरणमात्माराधनं च कृत्वा तारेण मूलेन पञ्चतत्त्वैश्च तं संव्याप्य सम्यक् केशादिपादान्तं व्याप्य जागरूकं जाग्रदवस्थां गतं तं ध्यायतु।।215।।

पुनरुत्थाप्योत्थानं कारयित्वा धेन्वादिकमङ्गलानि धेन्वादीनि शुभदर्शनयोग्यानि मङ्गलानि प्रदर्श्य अर्घ्यसमर्पणाद्यां प्रारब्धपूजासुसमाप्तिं पूर्वदिवसकृतायाः पूजायाः समाप्तिमवसानीयार्घ्यदानलयाङ्गाद्यां कृत्याथ इष्टे पीठे कृत्वा स्थापयित्वा सकलीकरोतु।।216।।

विवरणम्

काल्योचितमिति। गुरोरात्मनस्सन्ध्योपासनादिसर्वमुक्तम्। सविग्रहीभूतसमर्चितात्मेति स्वात्मनस्सकळीकरणाद्यात्माराधनान्तमुक्तम्। मण्डपबहिर्भागे मार्जनालेपनशुद्धस्थ[2]ले भद्रपीठं निधाय तत्सन्निधावुपविश्यैतत्सर्वं कार्यम्। पुनस्तस्मिन्पीठे पीठपूजा च कार्येत्यौचित्याद् अवगन्तव्यम्। यदाह–इष्टे[3] पीठेऽथ कृत्वेति। पुनर्मण्डपान्तः प्रविश्य प्रबोधनं कार्यं तदाह–तारेणेति। प्रथमं पुष्पाराधनपूर्वक[4] मञ्जलिमा[5]त्रमवश्यकार्यमेव। पुनः पूर्वकृतवैलोम्येन व्यापकत्रयं विधाय प्रागवस्थं विभाव्य पञ्चमन्त्रैरुत्थाप्यार्घ्यं दत्वा मङ्गलानि नेत्रमन्त्रेण दर्शयेत्। धेन्वादिकानि लौकिकान्यष्टमङ्गलानि।

1. 'मन्त्रैः सं' क पाठः।
2. 'द्धे' ख. च पाठः।
3. 'ष्टपीठमथ' क पाठः।
4. 'र्वम'
5. 'पूर्वम' क पाठः।

आगमिकाष्टमङ्गलोपलक्षणमेतत्। कृत्वार्घ्यसमर्पणाद्यामिति। अवसानीयार्घ्यदानं व्यापकं लयाङ्गकरणं चोक्तम्। प्रारब्धपूजासुसमाप्तिमिति पीठे न्यस्य प्रथममहित इत्येवं ह्य एव प्रारब्धायाः पूजायाः सुसमाप्तिमित्यर्थः, तदनुसन्धानविच्छेदार्थम् एतद्यत्नकरणमिति ज्ञेयम्। इष्टे पीठेऽथ कृत्वेत्यर्थात् तन्मण्डपबहिर्भाग इति लभ्यते। सकलीकरोत्वित्यावाहनपूर्वकमिति भावः।।215-216।।

On the next morning the priest shall perform the morning routines like purification of limbs, ceremonial filling up of the conch with sanctified water, concentration of the mind etc. At the door steps two stools may be arranged. One of them is to hold water trough and the other to place the idol lying on the couch. Reciting Praṇava, chanting Mūlamantra and Pañcatattva the priest shall conceive that the god is awake and vigilant. (215)

Placing the portable idol on the couch in a standing position and showing auspicious items like Aṣṭamaṅgalya, the priest shall ceremonially open the eyelids and present to the deity Arghya etc. After the worship, the idol may be taken up and placed on the auspicious stool and conceived as possessing all limbs. (216)

इज्योदितानि पुनराचमनावसाना-
न्यस्मै सदन्तरसनापवनानि दत्त्वा।
गण्डूषकं बहु समर्प्य सपाद्यकाद्यं
संस्नाप्य पाद्यमथ साचमनं प्रदद्यात्।।217।।

विमर्शिनी

पुनरिज्योदितानि पूजापटलोक्तानि पुनराचमनावसानानि अर्घ्यादीनि पाद्यादीनि वा सदन्तरसनापवनानि दन्तकाष्ठजिह्वाशोधनसाधनसहितानि तान्यस्मै दत्त्वा बहु बहुशो गण्डूषकं सपाद्यकाद्यं समर्प्य संस्नाप्याथ पाद्यं साचमनं प्रदद्यात्।।217।।

विवरणम्

इज्योदितानीति। यदुक्तं पाद्यार्घ्याचामादिक्लृप्त्येत्यादि। पीठान्तरे पूजिते निवेश्यैतत्सर्वं कार्यम्। सदन्तरसनापवनानीति। दन्तकाष्ठमपामार्गादिकृतं मन्त्रप्रोक्षणादिसंस्कृतमुपचारेण समर्च्यास्त्रेण तेन दन्तशोधनं विधाय तत्संक्षाळ्य जह्यात्। पुनरस्त्रेण गण्डूषं दद्यात्। शलाकामयीं रसनाशोधनीं च अस्त्रप्रोक्षणसंस्कृतामुपचारेण दद्यात्। शेषं प्राग्वदिति। सपा[1]द्यकाद्यमिति। स्नानाङ्गतयेति शेषः। संस्नाप्येति कटाहादौ संस्कृतजलैरस्त्रेण प्रागभिषेक उक्तः।।217।।

Thereafter a complete ritualistic worship is to be performed and the idol may be conceived as undergoing daily rituals like cleaning the body, brushing the teeth, and gargling the mouth with water etc. Thereafter Arghya etc., are to be given along with water for washing the body and feet and for the ceremonial sipping. (217)

---

1. 'द्यमि' क पाठः।

प्रोक्ष्यापो हिपुरम्मरैर्मधुघृतेनाक्त्वा हरिद्रादिभि-
र्घृष्ट्वासिच्य शुभैर्जलैः समभिषिञ्चेन्मन्त्रतोयैरपि।
वस्त्रादीनि समर्प्य चोपहरणानि त्रीणि दूर्वाङ्कुरान्
पुष्पं चन्दनमञ्जनागरुरसौ चास्मै प्रदद्यात् क्रमात्।।218।।

विमर्शिनी

आपो हिपुरस्सरैः 'आपो हिष्ठा'दिभिर्मन्त्रैः प्रोक्ष्य मधुघृतेन मधुसहितघृतेन अक्त्वाभ्यज्य हरिद्रादिभिश्चूर्णैर्घृष्ट्वा शुभैर्जलैरासिच्य मन्त्रतोयैरपि 'प्राणापानव्याने'त्या दिभिः सप्तशुद्धिमन्त्रजलैः पुरुषसूक्तादिमन्त्रजलैरपि समभिषिञ्चेत्। वस्त्रादीनि त्रीणि वस्त्रोपवीतभूषणान्तुपहराणानि समर्प्यास्मै दूर्वाङ्कुरान् पुष्पं चन्दनमञ्जनागरुरसौ च क्रमात् प्रदद्यात्।।218।।

विवरणम्

मधूघृतेनाक्त्वेति, प्रागेव लेशे पात्रविशेषे वा पूजितेनेति भावः उक्त्वेत्याभिषेकाभिप्रायम् हरिद्रादिभिर्घृष्ट्वेति मङ्गलोन्मर्दनाभिप्रायम्। आसिच्येत्यस्त्रेण संक्षाळनमुक्तम्। मन्त्रतोयैरिति मूलाङ्गसप्तशुद्ध्यादिभिरभिषेक उक्तः। त्री[1]णी(ति) वस्त्रोपवीतभूषणग्रहणम्। दूर्वाङ्कुरादीनामप्यु-पचारमन्त्रेणैवास्त्रप्रोक्षणादिसंस्कृतानां समर्पणं कार्यम्।।218।।

Using the mantra like "Āpohisthā "the idol is to be sprinkled. Honey, ghee, powder of turmeric etc., may be applied to the idol and a powder of Sirīṣa is to be used Jo rub away the oily matter. The water kept in a trough may be poured on the idol to bathe it. Saptaśuddhi , Puruṣasūkta, Viṣṇusūkta etc; are to be chanted and flowers of Dūrvā grass are to be given along with Agaru, Sandal etc; in their proper order. (218)

सम्भूष्यादर्शमपि परिदर्श्यार्चयित्वा गणेशं
दत्त्वा गोभ्यो यवसमितिहासादिकं श्रावयित्वा।
विप्रेभ्यस्तण्डुलघटसुवर्णादि दत्त्वाथ देवं
प्राच्र्योद्वास्य प्रकृतशयनाद्यं नयेन्मूलधाम।।219।।

विमर्शिनी

सम्भूष्यालङ्कृत्य आदर्शं दर्पणमपि परिदर्श्य गणेशमर्चयित्वा गोभ्यो यवसं दत्त्वा इतिहासादिकं महाभारतपुराणादीनि श्रावयित्वा विप्रेभ्यः तण्डुलघटसुवर्णादि तण्डुलपूर्णघटं सुवर्णं तिलं गवादिकं च दत्त्वाथ देवं प्राच्र्य प्रकृतशयनाद्यं प्रस्तुतशयनबीजाङ्कुराद्यमुद्वास्य देवं मूलधाम प्रासादं नयेत्।।219।।

विवरणम्

सम्भूष्येति। किरीटमकुटाद्यभिप्रायम्। आदर्शमपि परिदर्श्येति। उपचारेण दर्पणं समर्प्य नेत्रमन्त्रेण[2] तत्र देवस्य निजसुभगरूपदर्शनं कारयेदिति भावः। अथ देवं प्राच्र्येति विधिवत् कृत्स्ना पूजोक्ता।

1. 'णि' क. च पाठः।
2. 'ण तस्य तत्र दे' क पाठः।

प्रकृतशयनाद्यमुद्वास्येति शयनीयमङ्गलाङ्कुरैर[1]पि तत्पीठोद्वासनमुक्तम्। नयेन्मूलधामेति नीराजनार्घ्यदानपूर्वकमिति भावः।।219।।

Thereafter the idol may be decorated using mirror. Cows may be fed with suitable grass. Purāṇas shall be recited so as to make the lord hear them. Brahmins may be presented with costly items like gold, cow etc. The god may be pleased with presentable items. All the divine powers may be transferred to the idol which is to be taken inside the shrine. (219)

मूलार्चामभिषिच्य पीठमभिपूज्यात्र प्रकल्प्याणवीं
मूर्तिं तत्र सुयोज्य कौतुकगतं देवं पुरोक्ताणुभिः।
अन्वावाह्य निजेन मूलमनुना कृत्वा सहाङ्गीक्रियां
तस्मिन् साम्प्रतिकार्चनादिकविधिं कुर्वीत सर्वं ततः।।220।।

विमर्शिनी

पुनर्मूलार्चामभिषिच्य पीठमभिपूज्यात्राणवीं मन्त्रमयीं मूर्तिं प्रकल्प्य तत्र पुरोक्ताणुभिः पुरोक्तप्रकारेण कौतुकगतं देवं सुयोज्यान्वावाह्य स्वस्मादपि निजमन्त्रेणावाह्य सहाङ्गीक्रियां सकलीक्रियां कृत्वा सांप्रतिकार्चनादिकविधिं संप्रति योग्यं पूजादिकं च सर्वं ततः कुर्वीत।।220।।

विवरणम्

मूलार्चामभिषिच्येति। अन्तर्देवं प्रवेश्य मूर्तिपहस्ते कृत्वा मूलार्चामन्त्रेण[2] विधिवदभिषिञ्चेत्। पुनस्तदग्रत उपविश्य कर्मार्चां प्रागवद्बिम्बाग्रतो निधाय उभयत्रापि पीठं सम्पूज्य मूलबिम्बे मूर्तिमन्त्रेण सम्पूज्य कर्मविम्बे मूर्तिकल्पनपूर्वकं आवाहनादि विधाय पाद्यादि दद्यात्। पुनः प्रागावाहितरीत्या ततः कृत्स्नां देवशक्तिं शङ्खसम्भृतोदके प्रणि[3]धाय मूलबिम्बे नयेत्। पुनः पञ्चमन्त्रैर्हृदि न्यासादि सर्वं सामान्यसिद्धमेव। अन्वावाह्येति त[4]दनन्तरं स्वहृदयादावाहनमुक्तम्। साम्प्रतिकेति तदाकार्यतया प्राप्ताया[5] नित्यप्रातस्तनपूजाया ग्रहणम्। नित्यब[6]ल्यादिसद्भावे तस्यादिशब्देन ग्रहणम्।।220।।

After the bathing the installed idol taking away the flowers already used and conceived the divinity in it the priest shall transfer the divine spirit back into it it from the portable idol chanting the Mūlamantra. Procedures like Aṅganyāsa are to be followed before the waving of light. Now the usual rituals from the morning onwards axe to be performed and a ceremonial circumambulation of the idol around the shrine may be initiated. (220)

---

1. 'रैः तत्पी' ख. च पाठः।
2. 'स्त्रे' ख. च पाठः।
3. 'णीय' ख. च पाठः।
4. 'समन' ख. च पाठः।
5. 'यामिति। अत्र प्रा
6. 'वैकल्या' क पाठः।

यात्राहोममथादधीत विनिधायाग्निं यथोक्तक्रमात्
कृत्वास्मिन् परिवारहोमचरमं सर्पिर्हुनेदेकशः।
षण्मन्त्रैश्च कनिक्रदत्प्रभृतिभिः स्वस्त्यादिपञ्चाणुभि-
श्चाथ स्वेन जुहोतु मूलमनुना द्रव्याणि चत्वार्यपि[1] ।।221।।

विमर्शिनी

अथ यात्राहोममादधीत। कथं, यथोक्तक्रमात् स्वगृह्योक्तक्रमादग्निं विनिधायास्मिन् सामान्यन्यायेन परिवारहोमचरमं कृत्वा कनिक्रदत्प्रभृतिभिः षण्मन्त्रैः स्वस्त्यादिपञ्चाणुभिश्च एकशः एकैकशः सर्पिर्हुनेत्। अथ स्वेन मूलमनुना चत्वारि द्रव्याण्यपि जुहोतु।।221।।

विवरणम्

इदानीं तीर्थयात्रां वदंस्तदङ्गतया होमं तावदभिधत्ते–यात्राहोममिति। द्रव्याणि चत्वार्यपीति होमपरिसमाप्त्युपलक्षणम्।।221।।

Thereafter the priest shall begin the Yātrāhoma - the sacrifice to herald the procession according tot the Gṛhya rites ordained for him. Mantras like Ṣaṇmantra, Kanikrad etc; shall be used in pouring ghee and other materials in to the sacrificial fire. Using the Mūlamantra the priest shall submit the four items to the fire. (221)

गत्वा गर्भगृहं समिष्टनिजपीठे देवमास्थापितं
संस्नाप्याचमनीयकावधि समर्प्य प्रोक्ष्य चाप्यादिभिः।
चूर्णैस्तण्डुलमुद्गमाषयवहेमादिक्षपागन्धजैः
स्थाणावग्निहृदाजिते द्रुपदया शेषेपु चोद्वर्तयेत्।।222।।

विमर्शिनी

पुनर्गर्भगृहं गत्वा समिष्टनिजपीठे आस्थापितमावाहितं (देवं) संस्नाप्य आचमनीयकावधि पाद्यार्घ्याचमनीयानि समर्प्य च आप्यादिभिः 'आपो हि ष्ठा'दिपुण्याहमन्त्रैः प्रोक्ष्य तण्डुलमुद्गमाषयवहेमादिक्षपागन्धजैः। हेमादीत्यादिशब्देन लोहचूर्णानि गृह्यन्ते। गन्धाः स्वस्वकलशोक्ताः तैश्चू[2]र्णैः स्थाणौ अग्निहृदा अधोरास्त्रेण, अजिते द्रुपदया 'द्रुपदादिवेन्मुमुचान' इत्यनया ऋचा, शेषेषु स्वस्वमूलेन चोद्वर्तयेत्।।222।।

विवरणम्

देवमास्थापितमित्यावाहनाद्यभिप्रायम्। प्रोक्ष्य चाप्यादिभिरित्यब्लिङ्गादिमन्त्रैश्चूर्णैरुद्वर्तयेदिति सम्बन्धः। तण्डुलमुद्गमाषयवादयो हेमादयः क्षपागन्धश्च [3]तद्भवैश्चूर्णैरिति तन्निर्माणोपदेशः। स्थानावग्नि–

1. 'पि।। तीर्थार्थमत्रैव जुहोतु वाज्यं स्वैः पञ्चमन्त्रैः पृथगष्टसङ्ख्यम्। तीर्थोपकण्ठाहितपावके वा कुर्यात् ततः स्विष्टकृदादिशेषम्।। ग' ग. घ पाठः।
2. 'श्च चूर्णैः'क पाठः।
3. 'तदुद्भ' च पाठः।

हृदेत्यघोरेणेत्यर्थः। अजिते द्रुपदयेति 'द्रुपदादिवेन्मुमुचान' इत्यृचेत्यर्थः। शेषेषु चेति। द्रुपदयेत्यनुषङ्गः। अत्र चूर्णनिर्माणं प्रागेव शुद्धाभिर्देवदासीभिः साधनीयम्। तदुक्तम्–

वस्त्रदूर्वाद्यलङ्कारैरुलूखलमलङ्कृतम् ।
क्षाळितं तण्डुले पीठे स्थापयित्वा चतुर्मुखः।।
श्रीसूक्तविद्यया लक्ष्मीं ध्यात्वा मन्त्री तमर्चितं।
मुसलं क्षाळितञ्चापि मन्त्रितं मूलविद्यया।।
आदाय मूर्तिपैः सार्धं देशिकेन्द्रः समाहितः।
अवहत्य निशाचूर्णं निक्षिप्तं तदुलूखले।।

इत्यादि। देवाग्रतो दर्भसंस्तरे पात्रान्तरे समुपनिधायास्त्रप्रोक्षणशोषणादि कृत्वा मुलेन सम्पूज्य तेनोद्वर्तनं कार्यम्। तदप्युक्तम्–

निक्षिप्तचूर्णं तदनु कुम्भं संवेष्ट्य वाससा।
स्थापितं मूलमन्त्रेण गन्धादिभिरथार्चितम्।।
आदाय कुम्भं चूर्णैस्तैः श्रीसूक्तेनाभिषेचयेत्।

इति। श्रीसूक्तग्रह[1]णं तत्तदुचितमन्त्रोपलक्षणम्। इति।।222।।

Entering the shrine the priest shall bathe the idol installed there and offer materials upto Ācamanīya and prepare Puṇyāhajala and sprinkle it chanting "Apohiṣṭhā" etc. Thereafter using the powder of materials like Taṇḍula (rice), Mudga (green beans), Māṣa (black gram), Yava, gold and turmeric along with the Aṣṭagandha the idol shall be anointed and washed with water using the Mūlamantra of deity. In the case of Sīva a slight change in the mantra is warranted. The rest of the powder after smearing on the limbs of the deity may be put on its head. (222)

संस्नाप्य सम्पूज्य तथैव वा तं
कृत्वा तदग्रे शुचि कर्मबिम्बम्।
तीर्थेति मन्त्रेण गुहे गणेशे-
ऽप्यन्येषु कर्मेत्यणुनार्थयेत।।223।।

विमर्शिनी

तं संस्नाप्य संपूज्य निवेद्य प्रसाद्य वा तथैवोद्वर्तनानन्तरमेव वा तदग्रे शुचि पूर्वच्छोधितं कर्मबिम्बं कृत्वा विन्यस्य गुहे गणेशेऽपि 'तीर्थाभिगमनादि'ति अन्येषु 'कर्मार्चा तीर्थयात्रे'ति मन्त्रेण चार्थयेत।।223।।

विवरणम्

संस्नाप्य सम्पूज्येति। पुनस्सम्यक् संक्षाळ्याभिषिच्य तां पूजां विधिवद्विधाय समाप्येत्यर्थः। तथैव वेति पुनस्संक्षाळनं तत्पूजाशेषपरिसमाप्तिञ्च कृत्वैवेत्यर्थः। एवमुभयथापि विकल्प उक्तः। 'कृत्वा

1. 'णं तदु' क च पाठः।

तदग्रे शुचि कर्मबिम्बम्' इति प्राचीनमेव कर्मबिम्बमभिषिच्य पुण्याहं कृत्वा मूलबिम्बसम्मुखतया भद्रासने निधायेत्यर्थः।।223।।

After bathing, worshipping and pleasing the god the portable idol may be taken by the priest for the procession in respect of the ceremonial bath at the end of the festival. (223)

तीर्थाभिगमनाद् यावद् देवाभिगमनं पुनः।
तावत् त्वं कौतुकमिदमधिष्ठाय प्रसीद नः।।224।।
कर्मार्चा तीर्थयात्रार्थं तवेयं कल्पिता विभो।
तीर्थयात्रां कुरुष्वास्यां सङ्क्रम्यानुग्रहाय नः।।225।।

विमर्शिनी

मन्त्रद्वयं पठति-तीर्थेति कर्मेति च।।224-225।।

The mantras are mentioned here. For Gaṇapati and Subrahmaṇya the mantra is "Tīrthābhigamanāt" etc. For all other gods it is like "Karmārcā" etc. (224-225)

सम्पातं प्रसमर्प्य मूलमनुबिम्बात् कर्मबिम्बे ततो
देवं प्रोक्तविधानतः समभिवाह्याधाय साङ्गीक्रियाम्।
मूलार्चां परिरक्ष्य कौतुकगतं देवं गृहीत्वा बहि-
[1]र्निर्गच्छेन्निजमूर्तिपैः सह सुधीर्मङ्गल्यवा[2]दं वदन्।।226।।

विमर्शिनी

पुनर्यात्राहोमजं संपातं तन्मन्त्रैः प्रसमर्प्य ततो मूलबिम्बात् कर्मबिम्बे प्रोक्तविधानतः 'प्रष्ठोद्गीथोपचारैरि'त्यादिश्लोकोक्तविधानतः देवं समभिवाह्य साङ्गीक्रियामाधाय मूलार्चां परिरक्ष्य कौतुकगतं देवं गृहीत्वा निजमूर्तिपैः सह मङ्गल्यवादं वदन् निर्गच्छेत्। सुधीरिति मङ्गल्यवादे सावधानतोक्ता।।226।।

विवरणम्

सम्पातं प्रसमर्प्येति। मूलबिम्बे यात्राहोमसम्पातसमर्पणमुक्तम्। यदा प्रारब्धपूजा समाप्यते तदा पुनः पीठमिष्ट्वावाहनादि विधाय प्रार्थ्य सम्पातस्पर्शनं कार्यमिति ज्ञेयम्। प्रोक्तविधानत इति "प्रष्ठोद्गीथोपचारैं रित्याद्युदीरितरीत्यर्थः। मङ्गल्यवादं वदन् निष्कामेदित्यन्वयः।।226।।

The Sampāta - the left overs of the various items kept apart- is to be poured over the portable idol and obtaining the permission of the god he shall get out of the sanctum after protecting the installed idol and touching

1. 'ष्कामेन्नि'
2. 'दान्' क पाठः।

its limbs. While the priest is to get out of the sanctum Maṅgalavādya - auspicious sounding of the drums are to be arranged. (226)

जगन्निर्माणसंहारस्थित्यनुग्रहहेतवः ।
देवानामीश्वरा देवा मङ्गलं प्रदिशन्तु नः।।227।।

विमर्शिनी

मङ्गल्यवादस्यादिश्लोकपठनेन तच्छेषमपि जप्तव्यमिति सूचयति जगन्निर्माणेति।।227।।

विवरणम्

मङ्गल्यवादं यथाशक्ति वदेदित्यभिप्रायेणैकं पठति-**जगन्निर्माणेति**।।227।।

"O Gods who preside over the creation , sustenance and progress of the world's peace accord protection for us " (227)

अन्तर्विकीर्य बलिमेकपरिक्रमेण
बाह्ये च तद्ध्वजचितीः प्रविलाप्य देवे।
क्षेत्रेशगुप्तसदनोऽन्यगणैः प्रयातु
देवं निजे समधिरोप्य रथादियाने।।228।।

विमर्शिनी

पुनरन्तर्बहिश्च एकपरिक्रमेण एकैकेन प्रदक्षिणेन तत्तद्दिशि पूर्वप्राप्तानां परिवाराणां पूर्वपूर्वक्रमयोगेन बलिं भूतबलिं विकीर्य तदा तद्ध्वजचितीश्च देवे विलाप्योद्वास्य क्षेत्रेशगुप्तसदनः क्षेत्रपालं तत्पुररक्षणार्थं तत्रैव स्थितं कल्पयित्वा अन्यगणैरन्यपरिवारैः सह देवं निजे रथादियाने। निज इत्यनेन यानस्य स्वस्ववाहनत्वकल्पनं स्वस्ववाहनमन्त्रेणाराधनं च सूचितम्। तत्र समधिरोप्य सम्यक् स्थापयित्वा प्रयातु गच्छेत्।।228।।

विवरणम्

एकपरिक्रमेणेति। एकयैव प्रदक्षिणावृत्त्येत्यर्थः। यथा विष्णौ तावच्चण्डप्रचण्ड-गरुडेन्द्राग्निगणपतिदक्षिणामूर्तियममातृशास्तृनिरृत्यनन्तवरुणवायुदुर्गास्कन्दसोमधनदविष्वक्सेने-शानब्रह्मसभाद्वाःस्था इति। बाह्ये चेति। एकपरिक्रमेणेत्यनुकृष्यते। कुमुदपञ्चाशद्भूतगणदेव-ग्रहसावान्तरद्रुतबलि[1]कुमुदाक्षपञ्चाशद्भूतगणासुरग्रहसावान्तरद्रुतब[2]लीत्यादिक्रमो ज्ञेयः। महाबलिपीठबलिस्तु पिशाचग्रहसावान्तरद्रुतबल्यनन्तरमविरुद्धम्। यद्वा कुमुदपञ्चाशद्भूतगणानन्तरमेतद् बलिं कृत्वैव देवग्रहसावान्तरद्रुतबल्यादिकमिति। तद्ध्वजचितीः प्रविलाप्य देव इति। कुमुदादितत्तद्ध्वजदेवताबल्यनन्तरं देवे प्रणवेन तत्तद्ध्वजोद्वासनं तदङ्गव्यापकं चोक्तम्। महाध्वजोऽपि तद्बल्यनन्तरं किञ्चित्सम्पूज्य निष्कळीकृत्य तदैव देवे वाहनतयोद्वासनीयः। क्षेत्रेशगुप्तसदन इति। प्रागेकपरिक्रमेणान्तर्बहिर्बलिविधौ तत्तत्परिषदां देवेन सह गमनं विभावनीयम्। क्षेत्रपालबलौ तु तस्य

1. 'लिं' ख पाठः।
2. 'बल्यादि' ख पाठः।

तत्रैवावस्थाय क्षेत्ररक्षणमर्थनीयमित्यभिप्रायः। केत्वीशगुप्तसदन इति वा पाठः। केत्वीशः केतुगतं गरुडादिवाहनं तदा क्षेत्रपालस्य देवस्यानुगमः। महाध्वजश्चेदानीं नोद्वासनीय इति। प्रगुप्तेति प्रशब्देन तथा भावनाविधौ तच्छेषतयास्त्रेण तालत्रयादिकञ्च सूचितम्। निजे[1] रथादियान इति फडन्तप्रणवप्रोक्षणादि सर्वं निजवाहनमन्त्रेण पूजनमपि कार्यम्।।228।।

Oblation shall be given to spirits both inside and outside the sanctum with a circumablulation and invoking the divinity of the flagstaff to the portable idol and conceiving that the protection is entrusted with Kṣeṭrapāla- the chief guardian of the shrine. The idol may be taken out in procession in a carriage for the ceremonial bath. (228)

द्वाःस्थादियज्वा यजमानयुक्तो
दिङ्मन्त्रतः सालबहिः परीत्य।
अर्वाग् व्रजेद् योजनतः समेतो
विप्रैर्हविष्याम्बुघटादिहस्तैः ।।229।।

विमर्शिनी

यजमानयुक्तो महामर्यादाप्राकारगोपुरे द्वाःस्थादियज्वा द्वाःस्थाविष्ट्वा बलिं दत्त्वा बहिरपि सर्वभूतेभ्यो बलिं दत्त्वा दिङ्मन्त्रतः 'ये भूताः' इत्यादिमन्त्रेण सालबहिः प्राकारबहिर्भागे बलिं दत्त्वा परीत्य हविष्याम्बुघटादिहस्तैः बलिदानसाधनसहितैर्विप्रैः समेतो योजनतोऽर्वाग् योजनात् किञ्चिदूनमध्वानं व्रजेद् गच्छेत्।।229।।

विवरणम्

द्वाःस्थादियज्वेति। गोपुरद्वारि द्वाःस्थौ सूर्यचन्द्रो भवतः। आदिपदेन तद्बहिर्बलिपीठे बलहरसेनाद्युचितभूतराजपूजोक्ता। चतुर्दिक्षु गोपुरसम्भवे तेष्वप्येवं द्वाःस्थादिपूजा स्यादिति। दिङ्मन्त्रतस्सालबहिः परीत्येति। सालशब्देन तत्तत्क्षेत्रकृतो महाप्राकारोऽभिप्रयते। तदभावे तु तत्स्थानबहिर्दिङ्मन्त्रेण पर्ययणं कार्यम्। योजनतोऽर्वाग्व्रजेदिति। नद्यादिजलाशयोद्देशेन गमनमेतदुक्तम्। यदाह-'आसाद्य नद्यादिविशिष्टतीर्थ'मिति।।229।।

After pleasing the guardian of the door with proper sacrifices the priest along with the owner of the shrine shall go forward to a specific distance on the way followed by Brahmins holding pots filled with sanctified water. (229)

शङ्खप्रेङ्खच्चटुलपटहोत्तालतालोरुभेरी-
रङ्गच्छृङ्गोड्डुमरडमरूद्दीप्रवीणाप्रवीणाः ।
ढक्काढुक्काविरलमुरलीकर्मठाश्चाभियायुः
स्फायद्दीपास्तमिह महितोद्दामहेला महेलाः ।।230।।

---

1. 'ज' क पाठः।

विमर्शिनी

इह गमने तं देवं शङ्खप्रेङ्खच्चटुलपटहोत्तालतालोरुभेरीरङ्गच्छृङ्गोड्डमरडमरूद्दीप्रवीणाप्रवीणाः शङ्खेन सह प्रेङ्खति शब्दायमाने चटुले समीचीने पटहे वाद्यविशेषे, उत्ताले उद्गच्छत्कालक्रियामानयुक्ते ताले च वाद्यविशेषे, उर्व्यां बृहत्यां भेर्यां च, रङ्गति शब्दविशेषं कुर्वति शृङ्गे मुखवाद्यविशेषे च, उड्डमरे शब्दायमाने च डमरौ वाद्यविशेषे च, उद्दीप्रायां प्रकाशनशीलायां वीणायां च प्रवीणाः कुशलाः ढक्काढुक्काविरलमुरलीकर्मठाश्च ढक्कायां ढुक्कायां च वाद्यविशेषयोः अविरलायामम्यूना[1]यां मुरल्यां च कर्मठः कर्मणि कुशलाश्च स्फायद्दीपाः प्रज्वलद्दीपायुक्ताः महितोद्दामहेलाः महनीयाश्च विशृङ्खलविलासयुक्ताः महेलाः प्रौढा युवतयश्च अभियायुः अग्रे गच्छेयुः।।230।।

विवरणम्

यात्रायां कोलाहलं दर्शयति–शङ्खेति। शङ्खा[2]दिषु प्रवीणा विदग्धाः इह तं देवमभियायुरिति सम्बन्धः। प्रेङ्खच्चटुलपटहेति वादनरयेण नानाचलनं पटुरवत्वञ्च पटहानामुक्तम्। उत्तालताळेति ताळानामुच्चैश्श्राव्यत्वमुक्तम्। उरुभेरीति। भेरिणां स्वरूपतो ध्वनितश्च महत्त्वं, रङ्गच्छृङ्गेति शृङ्गकाहळादीनां आकारतो ध्वनितश्च शोभमानत्वमुक्तम्। उड्डुरडमर्विति क्षुद्रदुन्दुभीनां घृष्टस्फुटध्वनियोगः। उद्दीप्रवीणेति वीणाभेदानामुज्ज्वलस्वरशालित्वं, ढक्कादिषु कर्मठः, अविरळमुरळीति वंशीनां भूयस्त्वमभिन्नमिति स्वरशालित्वञ्चोक्तम्। स्फायद्दीपा इति। चकाराध्याहारः। दीपानां स्फीतत्वमुज्ज्वलत्वं महाप्रकाशत्वञ्च। महितोद्दामहेलाः महेळा इति। हेलाः नानाविधाः क्रीडाः ताश्च यौधानां कृत्रिमरथतुरगादिविज्ञानविदां नर्तकादीनाञ्च सम्भवति। तासां गुणातिशयतो महनीयत्वामनर्घत्वं च महितोद्दामेति विशेषणाभ्यामुक्तम्। तासु महेळास्समर्थाश्चेत्यभियायुरिति सम्बन्धः।।230।।

Ahead of the procession shall proceed experts in sounding conches, drums, cymbals, horns, kettle drums, flutes and other instruments that rend the air with hilarious sounds. Those proficient in other musical instruments shall also move ahead with noble damsels holding blazing lambs to lend charm to the procession. (230)

पञ्चवाद्यवरवादनाविधाचुञ्चवोऽस्य पुरतः प्रयान्त्विह।
छत्रचामरविधारिणोऽभितः पृष्ठतो जयजयादिवादिनः।।231।।

विमर्शिनी

इहैव गमने पञ्चवाद्यवरवादनाविधाचुञ्चवः तेषां विशिष्टवाद्यानां वादनाविधायां प्रयोगे चुञ्चवः प्रसिद्धाः अस्य देवस्य पुरतः प्रयान्तु। छत्रचामरविधारिणः छत्राणि चामरादीनि च विशेषेण धारिणः अभितः पार्श्वयोश्च जयजयादिवादिनः स्तुतिपाठकाश्च पृष्ठतश्च प्रयान्तु।।231।।

विवरणम्

विधाचुञ्चव इति। 'तेनवित्तश्चुञ्चुप्चणपौ' इति तया लोके प्रथिता इत्यर्थः। अस्येति देवग्रहणम्।।231।।

---

1. 'यां च मु' क. च पाठः।
2. 'ङ्खेषु' क पाठः।

Experts in sounding Pañcavādya- (tata, vitata, ghana, susira and ghana sounded together or to be more specific Viñā, veṇu, mṛdaṅga, śaṅkha and paṭaha) a or peculiar musical combination of Kerala shall move ahead in the procession followed by people holding Parasols and Chowries proclaiming victory to the god. (231)

आसाद्य नद्यादिविशिष्टतीर्थं तत्सम्मुखं न्यस्य समिष्टपीठे।
साङ्गीक्रियाद्यं प्रविधाय तस्मै दद्याद् द्वितीयाचमनावसानम्।।232।।

विमर्शिनी

पुनर्नद्यादिविशिष्टतीर्थं नदीनदादिप्रसिद्धतीर्थं पुण्यजलस्थानमासाद्य तत्समीपे समिष्टपीठे तत्सम्मुखं तीर्थाभिमुखं यथा तथा न्यस्य साङ्गीक्रियाद्यं प्रविधाय तस्मै देवाय द्वितीयाचमनावसानमुपहरणं दद्यात्।।232।।

विवरणम्

नद्यादिविशिष्टतीर्थमिति। तत्र प्रपां मण्डपिकां वा तत्सम्मुखतया विधाय मार्जनालेपशोधिते तदन्तर्भागे भद्रपीठं विन्यस्य तत्र पीठं सम्पूज्य तस्मिन् देवं तत्सम्मुखतयैव विधाय विश्रमार्घ्यमपि दद्यादिति। साङ्गीक्रियाद्यमिति मूलेनावाहनादिकमुक्तम्।।232।।

Reaching a holy ghat like that of a river and placing the idol on an auspicious stool the priest shall perform actions like rubbing the limbs up to the Ācamana - the final sipping of the water for the idol. (232)

विशोधिते तीर्थजले जलेशादीज्यातदर्हाहुतिजाज्यसिद्धे।
त्रिर्मज्जयेत् तज्जलसम्मुखीनं देवं सुधी स्वैरथ पञ्चमन्त्रैः।।233।।

धारणादिभिर्विशोधिते जलेशादीज्यातदर्हाहुतिजाज्यसिद्धे तीर्थं वरुणदेवं च पृथक् पृथगावाह्य पूजिते तद्योग्यपञ्चतत्त्वमन्त्रादिहुतसंपातसंस्पृष्टे च तीर्थजले तज्जलसम्मुखीनं तज्जलाभिमुखीकृतं देवमथ स्वैः स्वैः पञ्चमन्त्रैः सुधीस्तज्जलैर्देवस्याप्यायनं स्मरन् त्रिः त्रिवारं मज्जयेत्।।233।।

विवरणम्

विशोधिते तीर्थजल इत्यस्त्रप्रोक्षणं रक्षाशोषणादिकमुक्तम्। जलेशादीज्येति। वरुणपूजा तीर्थशक्तिमयगङ्गापूजा मूलपूजा चोक्ता। तदर्हाहुतिजाज्येति तीर्थहोमसम्पातग्रहणं ताभ्यामिज्ययाज्येन च सिद्धे संस्कृते।।233।।

Purifying the holy waters of the ghat with ceremonial acts and invoking the pleasure of lord Varuṇa the priest shall plunge the idol thrice in water to the accompaniment of the chant of Pāñcamantra related to the deity. (233)

पीठेऽत्रैव निधाय देवमुपचर्याचामनिष्ठं क्रमा-
न्मन्त्री तन्मनुभिः प्रमार्ज्य महितैश्चूर्णैः समुद्वर्त्य च।
नाभीदघ्नजले स्थितोऽसुयमनं कुर्वन्नृतं चादिभि-
र्मन्त्रैस्तत्र कृताघमर्षणविधिस्तीर्थे पुनः स्नापयेत्।।234।।

विमर्शिनी

अत्रैव पूर्वपीठ एव निधाय आचामनिष्ठं पाद्यार्घ्याचमनान्युपचर्य मन्त्री 'आपो हि ष्ठा'दिमन्त्रज्ञः तन्मनुभिः प्रोक्षणमन्त्रैः क्रमात् प्रमार्ज्य अभ्युक्ष्य महितैः पूजितैः हेमनिशादिभिश्चूर्णैः समुद्वर्त्य नाभीदघ्नजले नाभिप्रमाणजले स्थितो भूत्वा 'ऋतं च सत्यं चा'दिभिर्मन्त्रैः असुयमनं प्राणायामं कुर्वन् कृताघमर्षणविधिः कृताघमर्षणकर्मा तत्र तीर्थे पुनरपि स्नापयेत्।।234।।

विवरणम्

आचामनिष्ठैरिति। यथा स्वमर्घ्यपाद्याचमनीयग्रहणम्। तन्मनुभिः प्रमार्ज्येति मार्जनोचितमन्त्रग्रहणम्। यदुक्तं–

'जलेष्वावाह्य गङ्गाद्याः सरितस्ताः सभाजयेत्।'

इत्यादि। तथा–

प्रोक्षयेत् कुशपाणिस्तु मूर्तिपैः सहितो गुरुः।
सुरभिमत्यब्लिङ्गाभिर्वारुणीभिश्च मन्त्रवित्।।
ततो हिरण्यवर्णाभिः पावमानीभिरेव च।
व्याहृतीभिश्शान्तिकैश्च षण्मन्त्रैर्मूलमन्त्रतः।।

इति। मन्त्रीति महितैश्चूर्णैस्समुद्वर्त्य चेति प्रागुक्तविधिनैवेति भावः। नाभीदघ्नजले स्थित इति। तस्मिन् तीर्थे[1] देवं गृहीत्वा नाभ्यन्तमवतीर्य तत्रावतिष्ठमान इत्यर्थः। ऋतञ्चादिभिर्मन्त्रैरसुयमनं कुर्वन्निति तत्रार्धनिमग्नकायस्सन्निति सम्प्रदायः. मन्त्रीत्यनुकृष्यते मन्त्रार्थप्रतिपत्तिसमर्थ इति। व्यष्ट्यात्मनो देवस्य प्रणवम[2]न्त्रेणैव परचिद्रूपे स्वरूपे संहारं पुनः 'ऋतञ्च सत्यञ्चे'ति सूक्तं त्रिवारं जपंस्ततः स्वरूपादभीद्धतपोवस्थादृतसत्याद्युत्पत्तिक्रमेण समष्टिरूपेण वैराजरूपपर्यन्तयापि जापं त्रिवारमनुसन्दध्यादिति च तदाशयः। तत्र कृताघमर्षणविधिरिति। एतदेवानुसधानम् अघमर्षणमिति स्वात्मनोऽप्येवं देवाभेदानुसन्धानेनाघमर्षणसिद्धिः। तदा सहस्नानं विदधतामप्येवं अघमर्षणादिर्भवति। तदुक्तं–

देवेन सह तत्काले निमज्जन्ति च ये नराः।
ते निर्धूयाशुभं सर्वं महापातकमप्यथ।।
यान्ति ध्रुवं सुदुष्प्रापं स्थानमाचन्द्रतारकम्।

इति। तीर्थे पुनः स्नापयेति त्रिवारमृतञ्चेत्यादि सूक्त[3]जपसमनन्तरमेव त्रिवारं प्रणवेन मूलेन वा मज्जनमुक्तम्।।234।।

Placing the deity there itself on the stool, giving Arghya, Pādya, Ācamana, the mantra Āpohiṣṭhā shall be chanted to sprinkle water. Then

1. 'र्थ इति व्याष्ट्या' च पाठः।
2. 'मात्रेणै' घ पाठः।
3. 'क्तग्रहणम्' क पाठः।

rubbing the idol with powders and again washing it in water, the priest standing in water plunging upto his navel shall chant mantras like "Ṛtam Ca" and perform Prāṇāyāma and Aghamarṣaṇa. Then again the idol shall be dipped in water. (234)

पीठे निवेश्य वसनाद्यमथोपहृत्य
देवं समर्च्य विनिवेद्य निवेद्यमग्नौ।
हु[1]त्वोक्तवद् बलिमपि प्रविकीर्य पूजा-
शेषं समाप्य मनुनेति निवेदयेच्च।।235।।

विमर्शिनी

अथ पीठे[2] पुनरपि निवेश्य वसनाद्यं वस्त्रोपवीतावमुपहृत्य देवं समर्च्य निवेद्यं विनिवेद्य अग्नौ हुत्वा पूजाहोमं विधाय उक्तवत् तीर्थे बलिमपि प्रविकीर्य पूजाशेषं समाप्य इति वक्ष्यमाणमनुना निवेदयेच्च।।235।।

विवरणम्

पीठे निवेश्येति। पुनरुन्मज्ज्य नीत्वा पीठे प्राग्वन्निवेशयेत्। वसनाद्यमित्यङ्गवस्त्रादिग्रहणम्। अग्नौ हुत्वेति पूजाङ्गतया होम उक्तः। उक्तवदिति। यथा प्रासादेऽस्य पूजायां होमो बलिश्चैवमिहापि कार्यमिति भावः। इति मनुना निवेदयेच्चेति। अनेन मन्त्रेणेत्यर्थः।।235।।

Once again placing the idol on a stool it should be draped with fresh clothes and Yajñopavīta- the sacred thread. Now the usual propitiation of the god upto the Naivedya- offering- a part of which shall be put in sacrificial fire. After the final distribution of oblations to the spirits the priest shall pray to the following effect. (235)

तीर्थेऽस्मिन् पावने पुण्ये स्नातोऽसि पुरुषोत्तम!।
अतस्त्वमनुगृह्णीष्व स्वस्थानोपाश्रयेण नः।।236।।

विमर्शिनी

तन्मनुं पठति-तीथेऽस्मिन्निति।।236।।

विवरणम्

तन्मनुं पठति-तीर्थेस्मिन्निति।।236।।

"O best of gods, Puruṣottama, you have been bathed in this holy ghat. Hence you please return to your abode along with us" (236)

हरिविषये मनुरेवं परेषु परमेश्वरादिपदमत्र।
पुरुषोत्तमपदविषये कुर्यात् स्वस्वोचितं मन्त्री।।237।।

---

1. 'त्वामितो ब' ख पाठः।
2. 'ठे नि' ख. ग. ङ. च पाठः।

विमर्शिनी

हरिविषये विष्णौ एवं मनुः। परेषु देवेषु अत्र पुरुषोत्तमपदविषये पुरुषोत्तमशब्दस्थाने मन्त्री मन्त्रपदयोजने कुशलः स्वस्वोचितं स्वस्वयोग्यं परमेश्वरादिपदं कुर्याद् योजयेत्।।237।।

विवरणम्

मन्त्रीति। दुर्गायां परमेश्वरीत्याद्यभिप्रायम्।।237।।

This is the mantra in respect of Viṣṇu; for other gods words like Parameśvara may be appropriately used in place of Puruṣottama. (237)

उद्वास्य तीर्थं निजवाहने त-
मारोप्य मूलालयमागमय्य।
तस्मिन्नहन्येव नि[1]योज्य मूल-
बिम्बेऽभिषिच्य प्रयजेच्च देवम्।।238।।

विमर्शिनी

ततस्तीर्थमुद्वास्य तं देवं निजवाहने पूर्ववदारोप्य मूलालयमागमय्य तस्मिन्नहन्येव मूलबिम्बे नियोज्याभिषिच्य देवं यथावत् प्रयजेच्च।।238।।

विवरणम्

उद्वास्य तीर्थमिति। प्रणवेन किञ्चिदिष्ट्वा सर्वमेकीकृत्य तेनैव देवमुद्वासयेत। तस्मिन्नहन्येव। एवं मूलालयमागमय्य मूलबिम्बे नियोज्येत्यन्वयः। हेत्वन्तरेण रात्रावेवागमनादिसंभवे प्रायश्चित्तं स्यादित्यर्थात्सूचितम्। द्रुततरं स्वालयप्रापणं कार्यमित्यप्युक्तम्। तदा च बहिरन्तश्च प्रदक्षिणसमये प्रागनुगतानां परिषदां यथास्थान-मवस्थानमपि भावनीयमित्यर्थादवबोद्धव्यम्। अभिषिच्येति संस्नाप्य सम्पूज्येत्येवमभ्युपगमे गर्भगृहं प्रापय्य मूलबिम्बमभिषिच्य प्रागुक्तरीत्या कर्मबिम्बान्मूलबिम्बे देवमुद्वासयेत्। तथैव वेत्येवमभ्युपगमेऽपि गर्भालयं प्रापय्य मूलबिम्बं प्रागसंक्षाळितं तच्चूर्णपरित्यागंपूर्वमभिषिच्योद्वासयेत्। पुनः प्रयजेच्च। तथैव वेत्यत्र तदनन्तरमङ्गवस्त्रादिसमर्पणक्रमेण तत्प्रारब्धपूजापरिसमापनमेव कार्यमिति। ध्वजे रक्षार्थं कल्पिते च तस्य शङ्खेन प्रासादान्तर्वाहनसमुद्वासनमपि कार्यम्।।238।।

Sprinkling the Tīrtha in a gesture of release the god may be placed back in to his vehicle. Leading him to the sanctum the divinity may be invoked back into the original idol after the pouring of sanctified water. (238)

तस्मिन् परस्मिन्नथवाह्नि देवं समुक्तनीत्या कलशैः प्रभूतैः।
संस्नाप्य यात्रोदितदोषशान्त्यै समर्चयेद् भूतबलिं किरेच्च।।239।।

विमर्शिनी

तस्मिन् परस्मिन् वा अह्नि तद्दिने उत्तरदिवसे वा समुक्तनीत्या कलशपटलोक्तरीत्या प्रभूतैर्बहुभिः

---

1. 'सु'।

कलशैर्देवं यात्रोदितदोषशान्त्यै स्वस्थानाद् दूरगमनदोषशान्त्यै संस्नाप्य समर्चयेत्। भूतबलिं च[1] किरेत्।।239।।

Having done these acts of pouring water on the idol from the several sanctified pots oblations shall be distributed to the spirits to ward off the evil effects due to the procession undertaken. (239)

इति तन्त्रसमुच्चये ध्वजेज्या-
बलिसंवेशनतैर्थिकक्रियाढ्यः ।
नवमोऽनवमार्थदायिदेवो-
त्सववादी पटलः प्रगुम्फितोऽभूत्।।240।।

विमर्शिनी

पटलमुपसंहरति-इतीति। तन्त्रसमुच्चये ग्रन्थे नवमः पटलः प्रगुम्फितो बद्धोऽभूत्। कथंभूतः, अनवमार्थदायिदेवोत्सववादी अनवमानुत्कृष्टानर्थान् धर्मादिपुरुषार्थान् (दायिनः) दानशीलस्योत्सवस्य वादी। कथंभूतः पुनरुत्सवपरिकरः, ध्वजेज्याबलिसंवेशनतैर्थिकक्रियाढ्यः ध्वजेज्यया ध्वजस्थापनपूज[2]या, बलिना भूतबलिनोत्सवबलिना च, संवेशनेन स्वापनेन च, तैर्थिकक्रियया तीर्थस्नानक्रियया च आढ्यः परिपूर्णः।।240।।

विवरणम्

भूतबलिं किरेच्चेति तदा प्रागादिभूतानां विसर्जनमपि भावनीयमिति।।240।।

Thus the ninth Paṭala of Tantrasamuccaya dealing with the worship of flagstaff, oblation to spirits and procession for ceremonial bath to a holy ghat in connection with the festival has been composed. (240)


इति तन्त्रसमुच्चयविवरणे नवमः पटलः।।



---

1. 'कुर्यात्।।' क पाठः।
2. 'जनादिमिः ब' क. घ पाठः।

अथ दशमः पटलः



देवे स्वभक्तजनतानुजिघृक्षयार्चो-
पाधौ तथा नियतसन्निधिमादधाने।
श्रेयोदुरासदतया तदपासनार्थं
स्याच्चेन्निमित्तमथ निष्कृतिमादधीत।।1।।

विमर्शिनी

एवं नवभिः पटलैः भूमिपरिग्रहादितीर्थाभिषेकावधिकं क्रमेण[1] तूक्तं कर्मकलापमभिधायाथ प्रतिष्ठितस्य देवस्यावश्यकर्तव्याया नित्यपूजायाः केनापि निमित्तेन विरोधे प्राप्ते तत्परिहाराय दशमपटलेन निष्कृतिं वदन् तत् प्रस्तौति-देव इति। स्वभक्तजनतानुजिघृक्षया स्वस्मिन् भक्तस्य जनसमूहस्यानुग्रहेच्छया अर्चोपाधौ प्रतिमारूपे स्वाश्रये तथा उक्तक्रियाभिः नियतसन्निधिं नित्यसान्निध्यम् आदधाने कुर्वाणे देवे पुजकस्य श्रेयोदुरासदतया श्रेयसो दुष्प्रापकत्वाद्धेतोर्गर्हितं निमित्तं स्याच्चेत् संभवेद् यदि अथ तदनन्तरमेवाविलम्बितं तदपासनार्थं तस्य दुर्निमित्तस्य परिहाराय निष्कृतिं प्रायश्चित्तमादधीत।।1।।

विवरणम्

हरिः।। एवं तावत् प्रतिष्ठितस्य देवस्य नित्यकर्मपूजोत्सवादिकमुक्तम्। नैमित्तिकन्तु वक्तव्यम्। तत्र प्रायश्चित्तं जीर्णोद्धारापेक्षया नित्यं तन्निमित्तानां प्राचुर्यतस्सम्भवादिति प्रायश्चित्तं पूर्वं वदन् देवे निमित्ततन्निष्कृत्योरसम्भवे बिम्बोपाधिवशात्तत्सम्भवं दर्शयति-देव इति। देवे तथार्चोपाधौ नियतसन्निधिमादधाने[2] निमित्तं स्याच्चेदथ निष्कृतिमादधीतेति सम्बन्धः। तथेत्युक्तप्रतिष्ठाप्रकारानुवादः। नियतो नित्यो न तु मण्डलादाविवापेक्षिकः सन्निधिः तमादधाने स्वेच्छया कुर्वति।

"सान्निध्यञ्च तथा देव प्रत्यहं परिवर्धय।"

इति हि प्रतिष्ठायामर्थितम्[3]। तत्र हेतुः स्वभक्तजनतानुजिघृक्षया इत्युक्तः। निमित्तं प्रायश्चित्तस्यैव हेतुः। यद्वा स्वभक्तजनताया एव 'सभूपालं तथा राष्ट्रम्' इत्यादिरूपायाः नानाविधविपत्सूचकहेतुरुत्पातः तस्य देवे दोषरूपं कार्यम्। तदपासनार्थमित्युक्तम्। तस्य नियतस्यापि सन्निधेरपासनं तद्विरोध्यपसंस्काराधानेनापोहनं तदर्थमिति। प्रागाहितसान्निध्यस्य निमित्तजन्यापसंस्कारैरपायसम्भव इति भावः। तत्र हेतुश्श्रेयोदुरासदतया इत्युक्तः। श्रेयश्शब्देन पूजोत्सवादिलभ्योऽनुग्रहोऽभिप्रेतः। निमित्तं

1. 'णेत्युक्तं' ख. ग. घ. ङ च पाठः।
2. 'नेन नि'
3. मवस्थितम् क पाठः।

स्याच्चेदिति वदतोऽयमाशयः। न तावन्निमित्तैरपि देवायतने भाव्यमिति ततश्च तदनवकाशकरणे यजमानादिभिर्महान् यत्न आस्थेय इति। यथा राक्षोघ्नादिजपः सुरभिधूपाजस्रदीपादिपरिकल्पनमवहितै- र्मार्जनालेपनादीनां नित्यत्वं रक्षिणां सभागोपुरादिषु सन्निधानमिति। यत उक्तं-

प्रासादगर्भपीठर्चाः शरीरत्वेन शार्ङ्गिणः।
कथिताः सर्वदा रक्ष्या विप्रैरुत्पातशङ्कया।।

इति। निष्कृतिः प्रायश्चित्तं देवे बिम्बोपाधियोगतो निमित्तसम्भवे तत्प्रतिक्रियादिसम्भव इति भावः। सति निमित्ते सद्यः प्रायश्चित्तं कर्तव्यमित्यथेत्युक्तम्।।1।।

While the god is present in the form of an idol with a view to bless people, if there occurs any kind of impediments or misfortune to the priest expiatory ceremonies shall be performed without any delay. (1)

क्षेत्रे मृतिर्जननमङ्गणमण्डपादौ
मूत्रासृगादिपतनं पतितादिवेशः।
सोलूकगृध्रकरटश्वखरोष्ट्रकोल-
क्रोष्टृवृक्षडुण्डुभपुरस्सरगर्भवेशः ।।2।।

विमर्शिनी

निमित्तानि गणयति-**क्षेत्र इति**। क्षेत्रे मर्यादासीमाया अन्तर्भागे मृतिर्जननं च मनुष्याणां मरणं जननं च। अङ्गणमण्डपादौ प्रासादालिन्दाङ्गणमण्डपबलिपीठिकादौ मूत्रासृगादिपतनम् आदिशब्देन पुरीषादिकं च। पतितादिवेशः पतिताः स्वकुलाद् भ्रष्टाः तेषा चण्डालादीनां च गोपुरादन्तःप्रवेशः। सोलूकगृध्रकरटश्वखरोष्ट्वृक्षडुण्डुभपुरस्सरगर्भवेशः सोलूकः उलूकश्च पुरस्सरशब्देन श्येनकुक्कुटादयः। एतेषां गर्भगृहप्रवेशः।।2।।

विवरणम्

तत्र निमित्तानि तावद्वदन् प्रथमं सामान्योत्पातरूपाणि निमित्तान्याह क्षेत्रे मृतिरिति। क्षेत्रं देवायातनं प्राकाराभ्यन्तरदेशः। तत्र मृतिर्जननमिति एतानि निमित्तकानीत्युपरि सम्बन्धः। केषां मृतिर्जननं वेति मनुष्याणां पशूनाञ्च प्रसिद्धत्वात्। तत्र ब्राह्मणशूद्रदिजातिवशाद् गवाश्वादिजातिवशात् प्रासादप्राङ्कणा[1]दिदेशवशाच्च दोषभेदः। वक्ष्यति च। गुरुलाघवभेदवन्तीति। अङ्कणमण्डपादौ मूत्रासृगादिपतनमिति। अङ्कणमन्तर्मण्डला[2]न्तर्भागः मण्डपश्च पूजामण्डपः। यद्वा अङ्कणं[3] मध्यहारान्तर्भागो मण्डपश्च बलिपीठमण्डपः। आदिशब्देन प्रासादादिग्रहणम्। मूत्रादीनि मूत्रपुरीषादिमलानि। असृगादीनि रुधिरमांसाद्यङ्गानि। केषामिमानीति। मनुष्याणां पशूनाञ्चैव। पूर्ववद्दोषभेदः। पतितादिवेश इति। पतितानामङ्कणमण्डपादावावेशः। पतिता महापातकादिदोषवशाद्

1. 'णात् देवव'।
2. 'लमन्त'
3. 'ण' क पाठः।

भ्रष्टाः। आदिशब्देनाशौचिनश्चातुर्वर्ण्यबाह्या म्लेच्छपाषण्डिनो दाहकादयश्चोरा व्रात्याश्च गृह्यन्ते। प्राग्वद्दोषभेदः। एवं सामान्योत्पाताः। अथ वैकल्पिकाः सोलूकेति। करटः काकः। कोलो वराहः। ऋक्षो वानरः पुरस्सरशब्द आद्यर्थः। तेन चकोरकपिञ्जलचातकवलाकातित्तिरिश्यामकपोतादीनां गर्दभव्याघ्रादीनामपि ग्रहणम्। तेषां गर्भगृहे प्रवेशः। यत्र देश उलूकादायः प्रचुरास्तत्र सामान्योत्पातकत्वं इतरत्राद्भुतोत्पातकत्वमित्येवं इह विकल्पः। गर्भग्रहणं च प्रचुरविषयाभिप्रायम्। इतरत्र प्रासाद आवेशोऽपि गृह्यते। अत्रापि दोषभेद ऊहनीयः।।2।।

The causes that give rise to pollution within the temple campus are death and birth of people and cattle, contamination of urine, blood and filth in places like inner quadrangle of the shrine, courtyard and big altar stone and the entrance of people with impurity, low class and fallen people from status. In addition the entrance of owl, hawk, crow, dog, ass, camel, hog, jackal, monkey, serpent etc, are also causes of impurity. (2)

बिम्बस्य पातचलनादिरथ प्रदाह-
स्वेदप्ररोदहसितानि तथाद्भुतानि।
छत्राकनाकुमधुकादिसमुद्गमाश्च
पूजाविलुप्तिरपि चासति दिष्टदोषे।। 3।।

विमर्शिनी

अथ बिम्बस्य पातचलनादिः पतनचलनस्फुटनादीनि। तथाद्भुतानि आश्चर्यभूतानि प्रदाहस्वेदप्ररोदहसितानि। प्रदाहः औष्ण्यं, स्वेदः स्वेदजलस्त्रवः, प्ररोदः भावे दुःखप्रतिभानम्। छत्राकनाकुमधुकादिसमुद्गमाश्च। दिष्टदोषे निर्दिष्टदोषे असति अभावे निमित्तभावे पूजाविलुप्तिरपि। अनेन निमित्ते सति पूजा न कार्येत्यपि सूचितम्।।3।।

विवरणम्

अद्भुतरूपाणि निमित्तानि दर्शयति–छत्राकेति। नाकुर्वल्मीकं, [1]मधुकं मधुनीडम्। आदिशब्देन कृमिकीटनिकरादीनामुत्काशनिपातभूकम्पादीनामपि ग्रहणम्। एतच्च सर्वं क्षेत्रेऽभिप्रयते। यदुक्तम्–'अथ [2]प्रासादहारासु वल्मीकमथवा मधु' इत्यादि। विमाने वाशनिः पतेद् गोपुरे वेत्यादि। पूर्ववद्दोषभेदः। अर्चा(?)स्वेदप्ररोदहसितानीति वैवर्ण्यालापाद्युपलक्षणमेतत्। तथा[3] प्रदाह इति बिम्बप्रासादयोरेतत्सम्भवः। बिम्बस्य पातचलनादिरिति [4]दिगाश्रयावनत्यादेरादिशब्देन ग्रहणम्। बिम्बस्याङ्गभङ्गो हस्तपादादीनां छेदभेदस्फोटादिः तथा प्रभामण्डलकिरीटाद्युपाङ्गानामपि भङ्गः पारिषदानामङ्गदेवतानामपि भङ्ग इति। एतच्च सकलोपहत्युपलक्षणम्। तदुक्तं 'पार्षदोपहतिष्वपी'ति [5]यथाष्टमूर्त्याद्युपघातो महाबलिपीठोपघातो

1. 'मधुकनीडम' ख पाठ
2. 'प्राकारहा' क पाठः।
3. 'दो' च पाठः।
4. 'शा'
5. अ' च पाठः।

ध्वजोपघात इति। यद्यपि प्रदाहादिषूद्धार उत्तरपटलेऽभिमतः, किन्तु निष्कृतियोगतस्स कार्यः। तस्य वा बह्वर्थव्ययसाध्यतया विलम्बसम्भवे निष्कृतिमात्रमपि सद्यः कर्तव्यं ज्वालास्पर्शादिषु वा स्यान्निष्कृतिमात्रं न तूद्धार इति प्रदाहादीनामिहाप्यभिधानम्। पूजाविलुप्तिरपि चासति दिष्टदोषे इति। क्षेत्रे मृतिर्जननमित्याद्युपदिष्टसम्भवे[1] तावत् सद्यः प्रायश्चित्तं कृत्वैव नित्यपूजादि सर्वं कार्यमित्यप्यर्थाद्दर्शितं भवति। तदुक्तम्–

"अकृतायां तु निष्कृत्यामपूज्यं सर्वथा बुधैः।" इति।।3।।

Other causes of impurity of the idol are -falling down of the idol, shaking of the idol in the altar stone, breaking of limbs , hotness of idol without any reason, presence of sweat or vapour , appearance of sorrow or laughter, appearance of mushroom, sand hill, beehive and nest of wasp. In the absence of these omissions of rituals is also a reason for blemish. (3)

क्षुद्रान्यमन्त्रयजनं प्रतिषिद्धदुष्ट–
पुष्पादिपूजनमथो मरिचादिलेपः।
एतानि तन्त्रकथितानि निमित्तकानि
ज्ञेयानि तत्र गुरुलाघवभेदवन्ति।।4।।

विमर्शिनी

क्षुद्रान्यमन्त्रयजनम् आभिचारकर्मणे क्षुद्रमन्त्रेण पूजनं च। प्रतिषिद्धदुष्टपुष्पादिपूजनं निषिद्धैरशुद्धैर्वा पुष्पादिभिः पुष्पगन्धजलनिवेद्यादिभिः पूजनम्। अथो मरिचादिलेपः मरिचादितीक्ष्णद्रव्यैर्लेपनं च। एतानि तन्त्रकथितानि तन्त्रेषु कथितानि निमित्तकानि। तत्र तेषु मध्ये गुरुलाघवभेदवन्ति एतद् गुरु एतल्लध्विति भेदेन साधकैर्ज्ञेयानि।।4।।

विवरणम्

क्षुद्रान्यमन्त्रयजनमिति। क्षुद्रमन्त्राः [2]क्षपणमन्त्रादयः अन्यमन्त्राः विष्णौ शैवः शिवे वैष्णव इत्येवमादयः। प्रतिषिद्धदुष्टपुष्पादिपूजनमिति कर्मशेषाद् ग्राह्याग्राह्यपुष्पतण्डुलाद्यवगमः। मरिचादिलेप इति। यथोक्तं–

मरिचलवणोन्मत्तहिङ्गुपाषाणसर्षपैः।
प्रयोगज्ञैः सुसंलिप्ते विष्णुविम्बे समाहितैः[3]।।

इति। तन्त्रकथितानीति क्षेत्रे कलहादीनामन्येषामपि निमित्तानामुपसंग्रहार्थम्। गुरुलाघवभेदवन्तीति। निमित्तानामेषां जातिदेशादिभेदवशाद् गौरवं लाघवञ्च भेदो भवतीति भावः। एतच्च यथाप्रयोगं वक्ष्याम इति।।4।।

---

1. 'घुद्दिष्ट' घ. च पाठः।
2. 'णकम' घ. च पाठः।।
3. 'षै' घ. च पाठः।

Propitiation of the idol with sorcery, wrong use of hymns pertaining to other divinities, use of unfit flowers, incenses and filthy offering of oblations, anointment of pungent substance like pepper etc., are also cause for the loss of power noted by Tantric text. Proper expiations should be performed taking into consideration the seriousness of the fault. (4)

प्रासादोऽर्चा च विश्वेशितुरिह वपुषी स्थूलसूक्ष्मे यतोऽतो-
ऽत्राधाराधेयभावादितरतरभवोऽन्यत्र चाभ्येति दोषः।
दोषेऽत्रैकस्थितेऽप्याचरतु तदुभयोः शोधनं स्थानसंस्थे
तद्वत् तच्छोधनाद्यं यदि न परकृतावस्तुतोक्षा स्थलेऽलम्[1]।। 5।।

विमर्शिनी

तच्छोधनादिकं प्रस्तौति-**प्रासाद** इति। इह दोषे सति प्रासादोऽर्चा च विश्वेशितुः देवस्य स्थूलसूक्ष्मे वपुषी प्रासादः स्थूलं वपुः प्रतिमा सूक्ष्मं वपुरिति यतः यस्मात् अतोऽस्माद्धेतोः अत्रानयोराधाराधेयभावात् प्रासाद आधारः प्रतिमा त्वाधेयमिति व्यवस्थापितत्वाद् इतरतरभवः तयोरेकस्मिन्नुद्भूतो दोषोऽन्यत्र चाभ्येति प्राप्नोति प्रासादस्थो दोषः प्रतिमां प्राप्नोति प्रतिमास्थः प्रासादं च। अत्रानयोरेकत्र स्थितेऽपि दोषे प्रासादे प्रतिमायां वापि स्थिते दोषेऽपि तदुभयोः शोधनमाचरतु। प्रासादप्रतिमाभ्यामन्यत्र कुत्रचित् स्थाने स्थितो दोषश्चेत् किं कर्तव्यमित्यत्राह-स्थानसंस्थ इत्यादिश्लोकशेषेण। दोषे स्थानसंस्थे सति तच्छोधनाद्यं स्थानशोधनमाद्यं यथा भवति तथा तद्वत् प्रासादप्रतिमयोः शोधनमाचरतु। न यदि दीषः स्थानसंस्थो न चेत् स्थले सर्वत्र परकृतावस्तुतोक्षा इतरत्र कृतेन सम्पादितेनावस्तुतेनोक्षणमेव अलं पर्याप्तं भवति।।5।।

विवरणम्

ननु बिम्बस्य पातचलनादिरस्तु निमित्तं तत्रैव[2] देवस्य नियतसन्निधानात् क्षेत्रे मरणादीनां[3] कथं तदुपपत्तिरिति तद्दर्शयन् प्रथमं प्रायश्चित्तात् पूर्वमेव कर्तव्यं शोधनं वक्तुमारभमाणस्तद्विषयविभागमपि करोति-प्रासादोऽर्चा चेति। इह विश्वेशितुः प्रासादोऽर्चा च स्थूलसुक्ष्मवपुषी यतः अत आधाराधेयभावादत्र इतरतरभवो दोषः। अन्यत्र चाभ्येतीत्यन्वयः। इहेत्यर्चोपाधौ। नियतसन्निधाने देव इत्यर्थः। वपुर्व्यवस्था तु स्थापनासमय एव तावत्कल्पिता। तत्र प्रासादः स्थूलं वपुराधारः। बिम्बं सूक्ष्मं वपुराधेयम्। अत्रेत्यनयोर्बिम्बप्रासादयोरित्यर्थः। इतरतरभवोऽन्यतरभवः। प्रासादगत उलूकादिप्रवेशजन्यो बिम्बे प्राप्नोति। बिम्बगतश्च चलनतादिजन्यः प्रासादे [4]चोरादिभिर्बिम्बस्पर्शजन्यस्य तूभयत्रापि साक्षात् सम्भवः। एतच्च न्यायप्रदर्शनम्। तेनैतदपि सिध्यति। क्षेत्रप्रासादयोराश्रयाश्रयितया व्याप्यव्यापकतया वाधासधेयभावादत्राप्यन्यतरभवो दोषोऽन्यत्रचा[5]भ्येतीति व्याप्तिरपि च स्थापनासमय एव कल्पिता।

1. 'लम्'।। सद्यः शवादिसमशेषमपास्य तत्र संमार्जनादिषु कृतेषु यथोपपत्ति। संक्षालने प्रथमतो बहुवारिभिर्वा स्नानादिकृद् गुरुवरः खननादि कुर्यात्।। ख' क. ग. घ. पाठः।
2. 'व स्यात नि' क पाठः।
3. 'नामपि क' क पाठः।
4. 'दिबिम्ब'
5. 'चाप्यस्तीति' क पाठः।

यथोक्तं बह्माध्वेद्धचितादिनेत्यादि। विश्वेशितृग्रहणमप्येतदभिप्रायम्। तथैव चोक्तं–अखिलं काण्डमित्यादि। दोषेऽत्रैकस्थितेऽप्याचरतु तदुभयाः शोधनमिति। दोषशब्देन निमित्तं विवक्षितम्। यद्वा प्रत्यक्षदोषाभिप्रायमेतत्। यत्र निमित्तं तत्र दोषः प्रत्यक्षः इतरत्र परोक्ष इति तदिति तस्माद्यथोदीरिताद्धेतोरित्यर्थः। द्वयोरपि स्थिते दोषे द्वयोः शोधनं तावत् कार्यमेवेत्यपिशब्दाभिप्रायः। स्थानसंस्थे तद्वत्तच्छोधनाद्यमिति। दोष इत्यनुषङ्गः। तद्वदिति बिम्बप्रासादयोरुभयोश्शोधनमिति दृश्यते। तच्छोधनाद्यमिति[1]। स्थानशुद्धिरपि पूर्वं कार्येत्यर्थः। आद्यपदेन क्रमः प्रदर्शितः बिम्बप्रासादयोस्तावत् प्रासादशुद्ध्यनन्तरं बिम्बशुद्धिः स्थानप्रासादादिषु स्थानशुद्ध्यनन्तरं प्रासादादिशुद्धिरिति प्रासादेऽपि स्थानत्वाविशेषादेतत्सम्भवः। [2]यदा स्थाने परोक्षो दोषः तदा विशेषमाह–यदि नेति। यदि स्थानसंस्थो नास्ति दोषः किन्तु प्रासादे बिम्ब एव वा प्रत्यक्षो दोषस्तत्सम्बन्धात् स्थानेऽपि परोक्षतया प्राप्त इत्यर्थः। तदा परकृतावस्तुतोक्षा बिम्बाभिषेकादिसम्पादितावस्त्रावप्रोक्षणं स्थले शुद्धये पर्याप्तमिति। अत्र मार्जनादि सर्वं प्रासादशुद्ध्यवसर एव स्थानेऽपि यथासम्भवं कार्यम्। स्थानशुद्धिसम्भवे तु तदा मार्जनादि क्रियते। वक्ष्यति च–'स्थानं विशोधेये'ति।।5।।

One should not forget that in the matter of pollution the shrine and the idol are the gross and subtle bodies. Prāsada the shrine is the gross body and idol is the subtle one. The relation between them is like the base and substance. A blemish is mutually applicable. Hence expiations are warranted like purification of the shrine and that of the idol. If the fault is on the roof sprinkling of the sanctified water is enough to purify it. (5)

खननं हरणं दाहः पूरणं गोनिवासनम्।
विप्रोच्छिष्टं च गव्यं च सप्तैताः स्थानशुद्धयः।।6।।

विमर्शिनी

स्थानशुद्धिं क्रमेणादिशति–खननमिति। एताः सप्त स्थानशुद्धयः स्युः।।6।।

विवरणम्

बिम्बशुद्धिषु तु तत्तदवशेषेण पारिषदानामपि शुद्धिरिष्यते इति लौकिकशुद्धिपूर्विकैवेयं शास्त्रीया शुद्धिः स्यादित्याह–सद्य[3] इति। सम्मार्जनादिष्विति स्थानाभिप्रायम्। प्रथमतः कृतेष्विति सम्बन्धः। यथोपपत्तीति गन्धलेपक्षयकरमित्याद्युपपत्तिः अभिप्रेतः। संक्षालन इति बिम्बपीठाभिप्रायम्। कृतशब्दोऽनुवर्तनीयः। कदाचित् प्रासादतलादिष्वप्येतत् सम्भव इति सामान्येनैतदभिधानम्।।

इदानीं स्थानशुद्धिं विभजते– खननमिति। सप्तैता इति। अत्रायमाशयः–

लेपमात्रे विडा[4]दीनां स्थाने सप्तैव शुद्धयः।
पतितादिषु [5]सर्वास्स्युर्महत्यो लेपभूमनि।।

1. 'ति। प्रासा' क पाठः।
2. 'था' च पाठः।
3. 'सद्यः शवादिक'मित्याद्यधिकपाठमवलमवलभ्य प्रवृत्तेयं व्याख्या।
4. 'पीठदी' क पाठः।
5. 'र्वासु' क पाठः।

प्रसवे नरपश्वादेर्मरणे पुष्पितादिभिः।
चण्डालाद्यैश्च शयिते तद्वद्दाहादिषु त्वपि।।

इति। सामान्यतो विण्मूत्रासृगादीनां लेपमात्रे खननाद्यास्सप्तैव स्थान[1]शुद्धयः स्युः। पतितादिसम्बन्धितया विण्मूत्राद्यवधृता वक्ष्यमाणाः सर्वा अपि कार्याः। विण्मूत्रादीनां भुम्ना लेपे तु महत्य एताः स्युः। यथा धनुर्मात्रं खननं दण्डमात्रं खननमिति। पुष्पिता रजस्वला। आदिशब्देन सूतिकादाहकादिग्रहणम्। तद्वदिति सर्वा अपीत्यर्थः।।6।।

The seven acts of purifying the location are digging, removal, burning and filling, occupation by the cattle, placing of the leftovers of food supplied to Brahmins and sprinkling with Pañcagavya. (6)

खदिरकृतखनित्रेणास्त्रमन्त्रेण खात्वा
निर्ऋतिदिशि बहिस्तत्पांसुजातं निरस्य।
दहतु हुतभुजा दर्भादिना भस्म हृत्वा-
प्लुतयतु पशुमूत्रब्रह्मपादोदगव्यैः।।7।।

विमर्शिनी

एताः क्रमेण विवृणोति-**खदिरेति**। खदिरेण कृतेन खनित्रेण खननसाधनेनास्त्रमन्त्रेणाशुद्धस्थलं यथादोषं खात्वा बहिर्निर्ऋतिदिशि तत्पांसुजातं दोषयुक्तं पांसुपटलं निरस्य दर्भादिना तद्गते दर्भसमित्कुशादिकं निक्षिप्यास्त्रमन्त्रेण हुतभुजा अग्निना तत्स्थलं दहतु। तद्भस्म हृत्वा त्यक्त्वा पशमूत्रब्रह्मपादोदगव्यैः गोमूत्रैर्ब्राह्मणपादोदकैः पञ्चगव्यैश्च आप्लुतयतु आप्लुतं करोतु।।7।।

विवरणम्

दाहस्सोपानमण्डपादीनां उत्का[2]शन्यादिभिर्दाह इति यथोप[3]देशं विवृणोति-**खदिरकृतखनित्रेणेत्यादि**। देहशुद्ध्यादिसर्वमिहार्थसिद्धम्। खनित्रादिसाधनजातम् औचित्यादादित एव संस्करणीयम्। खात्वेति। यत्र स्थाने शवलेपादि सम्भूतं तत् स्थलम् अरत्निजानुपुरुषादिप्रमाणं दोषभेदानुसारतः समन्ततोऽधश्च खननीयम्। मृण्मये स्थाने खननसम्भवः। शिलामये तु जलमापूर्योद्धर्षणं कार्यम्। निर्ऋतिदिशीति प्रकारबाह्यतोऽपि नैर्ऋतभागे दूरतो निर्हरणमुक्तम्। सर्वत्रास्त्रमन्त्रोऽनुवर्तनीयः। शि[4]लामये तु तन्मलमयं जलं निर्हरणीयम्। बलिपीठादिस्थानेष्वेतत्सम्भवे तत्प्रतिष्ठित्यविरोधेन सर्वं कार्यम्। हुतभुजेत्यग्निः। दर्भादिनेति यथाद्युयोगं पलाशपयोदुमादिग्रहणम्। भस्म हृत्वेति। दग्धपांसुमिश्रितभस्मापनयमुक्तम्। पूर्ववन्निर्ऋतिभाग एवैतदिष्यते। प्लुतयत्विति गोमूत्रेण ब्राह्मणपादावनेजनजलेन पञ्चगव्येन च तत्स्थलं सर्वं क्लिन्नं करोत्वित्यर्थः।।7।।

The polluted spot may be dug up using a spade made of the Khadira

---

1. 'ने' घ. च पाठः।
2. 'त्कादि क पाठः।
3. 'थादेशं' घ. च पाठः।
4. 'लातले तु' च पाठः।

wood (Mimosa catechu). Chanting the Astramantra of the particular deity the soil may be deposited outside the shrine in the south east corner and burnt it with Darbhā grass, Samit (Palāśa) again using the Astramantra. Removing the ash the pit may be sprinkled with urine of cow, sanctified water after washing the feet of Brahmin and Pañcagavya. (7)

कौशादिमृद्भिरभिपूर्य विलोड्य दार्ढ्य-
मापाद्य हस्तिचरणैरथ गा निवास्य।
स्थानं विशोध्य परिकल्पितमण्डपेऽत्र
सम्भोजयेद् द्विजवरान् सघृतं पयोन्नम्।।8।।

विमर्शिनी

कौशादिमृद्भिः कुशदर्भादिस्थानाद् गृहीताभिर्मृद्भिस्तद्गर्तमभिपूर्य विलोड्य शुद्धैर्जलैरार्द्रीकृत्य हस्तिचरणैर्गजपादाकारैः पालाशादिकाष्ठविशेषैः दार्ढ्यं स्थैर्यमापाद्याथ गाः धेनूर्निवास्य पुनस्तत्स्थयानं विशोध्य परिकल्पितमण्डपे मण्डपाकारेण चतुर्दिशमावृत्यात्र द्विजवरान् आभिजात्यविद्यातपोयुक्तान् ब्राह्मणश्रेष्ठान् सघृतं पयोन्नं संभोजयेद् इच्छाभोजनं कुर्यात्।।8।।

विवरणम्

कौशादिमृद्भिरभिपूर्येति। कुशमूलक्षेत्रनदीपर्वतवल्मीकाग्न्यायतनतीर्थगोनिवासह्रद सामान्यमृद्भिर्यथायोगं पूर्वप्रमाणमभिपूर्येत्यर्थः। हस्तिचरणैर्दार्ढ्यमापाद्येत्यन्वयः। गा निवास्येति यवसादिदानेन तत्र बह्वीर्गाः याममात्रं निवासयेदित्यर्थः। दोषगौरत्रेऽपि समानमेतत्। तद्दिन एव धारापर्यन्तानुष्ठानविधानादिति स्थानं विशोध्येति। मार्ज्जना[1]लेपनमात्रं मार्जनादिधूपदीपादि सर्वं वाभिप्रेतम्। संभोजयेदित्युच्छिष्टस्पर्शनोपाय एवायमंवगन्तव्यः। यत्र स्थले भोजनमसाधनीयं तत्र त्वन्यत्र भोजयित्वोच्छिष्टमानीय स्पर्शयितव्यम्। प्रासादान्तर्भागेऽपि समानप्रेतत्।।8।।

The pit may be filled up with the soil from the base of the Kuśā grass, fertile land and hill and the place may be levelled by a wooden spade, cow may be made to eat some grass at spot. Thereafter in a levelled ground a pavilion may be erected in which Brahmins may be supplied sumptuous food including ghee and Pāyasa. (8)

उच्छिष्टमुद्धृत्य विशोध्य भूमिं
गव्येन सिञ्चेद् विकिरैः किरेच्च।
मूलेन तत्राष्टदले सरोजे
देवं य[2]थावत् परिपूजयेच्च।।9।।

1. 'नमाले' क पाठः।
2. 'विधिज्ञः प' क. ग पाठः।

विमर्शिनी

उच्छिष्टमुद्धृत्य भुमिं विशोध्य गव्येन सिञ्चेत्। विकिरैश्च किरेत्। अष्टदले सरोजे अष्टदलपीठादियुक्तं पद्मं कृत्वा तत्र मूलेन देवमावाह्य यथावत् परिपूजयेच्च।।9।।

विवरणम्

विधिज्ञ इति विकल्पतस्समुच्चयतो वास्त्रपूजाप्युक्ता। देशव्याप्तिजुषो मूलबिम्बचैतन्यस्याप्यायनार्थं पूजनमित्यपि सूचितम् इति।।9।।

After removing the leftovers the spot may be washed with water and Pañcagavya may be sprinkled thereafter. Powder of selected woods and flowers may be sprayed over the spot. Drawing a diagram of lotus with eight petals the god may be propitiated using the Mūlamantra. (9)

[1]दोषे सति स्थानगतेऽस्य शुद्धिं
कृत्वेति सूत्रत्रयवेष्टनाद्याम्।
प्रासादशुद्धिं प्रविधाय पुण्या-
हान्तां विदध्यादथ बिम्बशुद्धिम्।।10।।

विमर्शिनी

दोषे स्थानगते सति अस्य स्थानस्य शुद्धिम् इति उक्तप्रकारेण कृत्वा तत्र सूत्रत्रयवेष्टनाद्यां पुण्याहान्तां प्रासादशुद्धिं तृतीयपटले[2] प्रोक्तक्रमेण प्रविधायाथ बिम्बशुद्धिं विदध्यात्।।10।।

विवरणम्

स्थानं विशोध्येतीति। बीजवापक[3]लविधानार्थमुक्तस्थानशुद्ध्यनुवादः। यथार्हमिति कलशाल्पत्वे नैतत् कर्तव्यम्। कलशभूयस्त्वे तु कर्तव्यमित्यर्थः। तदुक्तम्-

"मङ्गलाङ्कुरसंयुक्तं साधिवासनमेव च।"

स्नपन"मिति। यद्वा यथार्हमिति पञ्चाहसप्ताहाद्यभिप्रायम्। तत्र धारावगाहादिदिवसभूयस्त्वे बिम्बशुद्धिमध्ये बीजा[4]वापः स्यादिति। यद्वा यथार्ह प्रासादशुद्धिमित्यन्वयः। प्रासादस्यापस्पर्शनादौ पञ्चगव्यप्रोक्षणमात्रम्। साक्षात् स्पर्शे विण्मुत्रादिलेपसम्भवे च प्रभूतपञ्चगव्यसमुक्षणमिति।।10।।

If the blemish is related to a spot it may be removed in this manner. After performing rites up to Puṇyāha the priest shall now purify the idol. (10)

क्षालनप्लावनस्नानमार्जनानि यथाक्रमम्।
धारावगाहसेकाश्च सप्तैता बिम्बशुद्धयः।।11।।

---

1. 'स्थानं विशोध्येति यथार्हमुप्तबीजोऽथ सु' क. ग घ पाठः।
2. 'ल' ख.ग.घ.ङ.च.पाठः।
3. 'कवि' क पाठः।
4. 'ज' घ.च पाठः।

विमर्शिनी

बिम्बशुद्धिरुद्दिशति–क्षालनेति। क्षालनप्लावनस्नानमार्जनानि चत्वारि, धारावगाहसेकास्त्रयः सेकः पञ्चस्नानम् एताः यथाक्रमं बिम्बशुद्धयो भवन्ति।।11।।

विवरणम्

बिम्बशुद्धिं विभजते– क्षालनेति। क्षालनादिचतुश्शुद्धिनां समासेऽयमाशयः। तेषां पृथक् पूजापक्षेऽपि धारादिवत् नानाविधानं मा भूदिति। सप्तैत[1] इति। अत्रायमाशयः सकलदोषेषु सप्तैव शुद्धयो लेपादिषु तु शुद्ध्यन्तरमपि कार्यमिति। वक्ष्यति च लेपादौ त्वित्यादि। किञ्च–

सर्वेष्वपीह दोषेषु सप्त सामान्यशुद्धयः।
बिम्बे समाधिशुद्धिश्चापीष्यते दोषभूमनि।।
दुर्जनश्वादिविण्मूत्रशवादिस्पर्शने तथा।
क्षुद्रमन्त्रादिसंसर्गे महत्य इह शुद्धयः।।

इति। दोषभूमनीति। पतितप्रवेशदुष्टनैवेद्यनिवेदनादिषु समाधिशुद्धिः भुतसंहारादिलक्षणा। वक्ष्यति च–'कृत्वा शुद्धिमिहावगाहचरमामि'त्यादि। दुर्जनाश्चण्डालपतितचोरादयः। श्वादयः च सृगालकाकोलूकराजिलादयः। विण्मूत्रादीनि प्रागुक्तानि। क्षुद्रमन्त्रादयः क्षपणमन्त्रो भिन्नदेवतामन्त्रः। मरिचमाहिषादिः प्रतिषिद्धपुष्पमित्येवंप्रभृयः महत्य इति। यथा वक्ष्यति–'दोषे भूयसी'त्यादि इति।। 11।।

The seven modes, of purifying the idol are washing, plunging, bathing ,rubbing, pouring, submerging and dipping in water in that order. (11)

पात्रं पीठसमर्चनाद्युदितक्लृप्त्या दर्भमृत्त्वग्जलै–
रेकं साक्षतगन्धपुष्पसलिलैर्न्यक्कूर्चकं चापरम्।
अन्यत् कूर्चयुतं हिरण्यफलयुक्तैस्तैः पिधानान्वितं
तुर्यं चापि तथा प्रपूर्य मनुवित् प्राच्र्य प्रसाध्याग्रतः।।12।।

तूर्ष्णीं दर्भमृदादिभिः प्रथमतः सङ्घृष्य संक्षाल्य तद्
बिम्बं पीठयुतं द्वितीयसलिलैराप्लाव्य चामन्त्रतः।
संस्नाप्य स्नपने तृतीयसलिलैः शान्तिं स्मरन् मन्त्रतः
कूर्चाग्रैर्विधिवत् प्रमार्ज्य च तुरीयैर्देवमभ्यर्चयेत्[2]।।13।।

---

1. 'ता उत्तरत्रा' क पाठः।
2. 'तु।।
दोषे भूयसि मुष्टिभिस्तु तिसृभिर्वल्मीकतीर्थाकर–
क्ष्माभृन्मृद्भिरहार्यवारमिह तूर्ष्णीं क्ष्रौं निजास्त्रेण च।
पिष्टैर्दुग्धतरुत्वचामपि विघृष्यार्चां पृथक् क्षालयेत्
तत्तोयैर्मतिमानघोर इह शर्वादौ नृसिंहास्पदे।।
पूर्णं प्रोक्तनयेन शान्त्युपनिषन्मूलैर्महत्पत्रमि–
ष्ट्वावर्त्याष्टशतं च बिम्बममुना मन्त्रं परिप्लावयेत्।

विमर्शिनी

ता बिम्बशुद्धीर्विवृणोति-**पात्रमिति**। मनुवित् क्षालनादिचतुश्शुद्धौ मन्त्रसम्बन्धं क्रमेण योजयेत्। गुरुरग्रतो देवस्याग्रभागे पीठसमर्चनाद्युदि[1]तक्लृप्त्या प्रत्येकं पीठपूजापात्रशोधनादिक्लृप्त्या चतुर्षु मध्ये एकमग्निकोणस्थितं, न्यक्कूर्चकमिति सर्वत्र सम्बध्यते, दर्भमृत्त्वग्जलैः दर्भशकलैर्वल्मीकमृदा क्षीरिद्रुमत्वग्भिर्जलैश्च, अपरं निऋतिकोणस्थितं पात्रं साक्षतगन्धपुष्पसलिलैश्च, अन्यद् वायुकोणगतं कूर्चयुतम् अपरेणापि कूर्चेण युतं हिरण्यफलयुक्तैः साक्षतगन्धपुष्पसलिलश्च, तुर्यं चतुर्थम् ईशकोणगतं तैरुक्तैर्द्रव्यैः पिधानान्वितं चापि तथा क्रमेण प्रपूर्य प्राच्र्य प्रसाध्य सम्पाद्य प्रथमतः प्रथमद्रव्यैर्दर्भमृदादिभिः तूष्णीं मन्त्रसम्बन्धं विना पीठयुतं तद् बिम्बं संघृष्य संक्षाल्य द्वितीयसलिलैश्चामन्त्रत आप्लाव्य स्नपने स्नानकाले शान्तिं स्मरन् मन्त्रतः संस्नाप्य तुरीयैश्च कूर्चाग्रैर्विधिवत् प्रमार्ज्य प्रोक्ष्य देवमभ्यर्चयेत्। प्रत्येकं देवं पूजयेदिति केचित्।।12-13।।

विवरणम्

यथोद्देशं विवृणोति-**पात्र** इत्यादि। अग्रत एकं पात्रं दर्भमृत्त्वग्जलैः अपरं गन्धपुष्पसलिलैर्हिरण्यफलयुक्तस्तैः अन्यत्। तथा तुर्यञ्च प्रपूर्य प्राच्र्य प्रसाध्येत्यन्वयः। उत्तरश्लोकेन च सम्बन्धः। अत्राग्रत इति चतुर्णां पात्राणां सम्पादने देश उक्तः। प्रासादान्तरेव बिम्बाग्रतस्त[2]ल इति। पात्रमिति स्थाल्यादिभाजनमुक्तम्। केचित्तु स्नाने कुम्भमभ्युपयन्ति मर्जनेऽपि च[3]पदे कलशजलसम्प्रोक्षणादिषु तथा दर्शनादिति दर्भमृत्त्वग्जलैरिति। प्रपूर्येति सम्बन्धः। दर्भशब्देनेह भाव्युद्ध[4]र्षणविनियोगोपपत्त्या मुष्टीकृतदर्भनिचयग्रहणम्। तदुक्तम्-

"एकविंशतिदर्भैस्तु कृत्वा मुष्टित्रयं पुनः।"

इति। मृदः सामान्याद् वल्मीकमृदः त्वचश्च क्षीरिवृक्षाणां त्वचः। यद्वा बिम्बशुद्ध्यादिप्रकरण (मता? तो) मृत्त्वक्परिग्रहः हिरण्यफलयुक्तैस्तैः प्रपूर्येति साक्षतगन्धपुष्पसलिलैरित्येतस्य ग्रहणम्। तथेति पूर्ववत् साक्षतगन्धपुष्पसलिलैर्हिरण्यफलयुक्तैः प्रपूर्य इत्यर्थः। न्यक्कूर्चञ्चेत्यपरमित्यस्य विशेषणम्। तेन क्षाळनीये कूर्चाभावः न्यक्कूर्चकमित्येतत् स्नानीये[5] मार्जनीयेऽप्यनुवर्तनीयम्। कुर्चयुतमित्येतदन्यदित्यस्य विशेषणम्। पिधानान्वितमिति तुर्यविशेषणम्। पात्रान्तरेण पिधानमपि कार्यमित्यर्थः। कुम्भपक्षे तु चक्रि[6]कैव पिधानं भवति[7]। पठिसमर्चनाद्युदि[8]तक्लृप्तयेति सर्वसामान्येनोक्तम्। प्रपूर्य प्राच्र्य

तैरेव स्नपयेदतो वसुशतं पात्रान्तरेणाणुभिः
प्रोक्षेत् तैः क्रमविद् गुरुः सपवमानाब्लिङ्गहोत्रादिभिः।।
ऐ' क,'त।। ऐ घ.पाठः।

1. 'चि' ख.घ.च. पाठः।
2. 'स्थ' क पाठः।
3. 'चादौ क' घ. च पाठः।
4. 'त्क' क पाठः।
5. 'येऽप्य' क :।
6. 'ण्डि' च पाठः।
7. 'तीति' क पाठः।
8. 'चि' घ. च पाठः।

प्रसाध्येति च सम्बन्धः। पीठे समर्चनादिरुदिता क्लृप्तिरिति समासः। पीठसमर्चनं पात्रसंसादनं पात्रसंस्कारः तत्र पूजा पुनरभिमन्त्रणमित्येतत् सर्वमिहाभिप्रेतम्।। 12।।

तूष्णीममन्त्रतः शान्तिं मन्त्रतः स्मरन् विधिवत् मन्त्रतः प्रमार्ज्येति। यथास्वं भावि विनियोगानुसृतिरुचितपदेन विवक्षिता। अयमाशयः क्षालनीयं तावत् तूष्णिं सम्पादनीयम्। प्लावनीयममन्त्रतः स्मरणेन सम्पाद्यम्। स्नानीयं मन्त्रमात्रेण। मार्जनीयं तु प्रसिद्धरीत्येति। मनुविदित्यर्थात् स्नानीयादिविषयम्। तत्र स्नानीये मूलं शन्नोदेवीरिति वा मन्त्रः। मार्जनीये शान्तिपञ्चतत्त्[1]वमूलानि। मन्त्रैः प्रपूज्य चेति दर्शनादिति। इह तूष्णीममन्त्रत इत्यत्रास्त्रप्रोक्षणादि सर्वं कार्यमेव। प्लावनीये मूलमूर्तेशशान्तेर्वा स्मरणमित्यापि मन्त्रविदिति सूचितम्। एतच्च साधनचतुष्टयं तत्तत्स्नानसमये बिम्बाग्रतः सम्पादनीयम्। प्रातिपादनसौकर्यादेवमभिधानमिति। एवमिह प्रयोगः। देवस्य स्नानावधि विधायाग्रत[2]स्तलं विशोध्य तत्र दर्भान् विकीर्य वा स्वस्तिके धान्यपीठं कृत्वा केव[3]लां वा सूत्रादिसंस्कृतां वा स्थलीं न्यग्विलं संसाद्य तूष्णीं पीठं सकृदिष्ट्वास्त्र[4]प्रोक्षणादि विधाय प्रणवेन प्रोक्ष्यास्त्रोक्षितमुष्ट्यादित्रयं पात्रे विन्यस्य जलेन सम्पूर्य तूष्णीं[5] पूजयेत्। तेन च क्षालनं कृत्वा देवं पूजयेत्। प्लावनेऽपि समष्टिमन्त्रं स्मरन् पीठमिष्ट्वा पात्रसंस्कारानन्तरं[6] मधोऽग्रकूर्चं निक्षिप्य गन्धपुष्पाक्षतान्यपि निक्षिप्य सम्पूर्य चक्रिकादियुक्ते मूलं शान्तिं वा तन्मन्त्रस्मरणं स्मरन्नावाहनादि विधाय सकृदिष्ट्वाभिमन्त्र्य तेन प्लावनं विदध्यात्। एवं स्नानेऽपि। मन्त्रोच्चारणन्तु विशेषः मार्जनीये तु विधिवत् पीठपूजादि कार्यमिति। अथवा अग्रत इति काल उक्तः। चतुश्शुध्यनुष्ठानात् प्रागेवेति मुखमण्डपादौ देशे साधनचतुष्टयं प्रथमं सम्पाद्यान्तः प्रविश्य तेन क्षालनादि विदध्यादित्यभिप्रायः।

दक्षिणोत्तरतः कुर्यात् क्रमात् पदचतुष्टयम्।
तेषु वा क्षालनीयादिचतुर्द्रव्याणि कल्पयेत्।।
चतुरश्रं चतुष्कोष्टं कृत्वाग्न्यादिपदेषु वा।
पञ्चकस्य पदेष्वैन्द्र्यादिषु वा मध्यमं विना।।

इति। तूष्णीमिति। इह प्रथमत इति निर्देशौचित्यात्तत इत्यध्याह्रियते। प्रथमतः स्नपने तद्बिम्बं दर्भादिभिः तूष्णीं संघृष्य संक्षाल्य ततः द्वितीयसलिलैरमन्त्रत आप्लाव्य च ततस्तृतीयसलिलैश्शान्तिं स्मरन् मन्त्रत आप्लाव्य च ततः तुरीयैर्विधिवत् कूर्चाग्रैः प्रमार्ज्य च देवमभ्यर्चयेदिति। अत्र ल्यबन्तानां देवमभ्यर्चयेदिति सम्बन्धः[7]। स्नपने इति च सर्वत्रानुवर्तते। प्रयोगधर्मवदिह पूजाधर्मोऽवबोद्धव्यः। क्षालने तावत् तूष्णीं पीठं सकृदिष्ट्वा तूष्णीन्निवेद्य व्यापकाद्यपि कृत्वार्घ्यादि दत्त्वा तू[8]ष्णीं क्षालनं कृत्वा

---

1. 'त्त्वानि मू'
2. 'स्थ
3. 'लं 'क पाठः।
4. 'स्त्रेण प्रो 'च पाठः।
5. 'ष्णीं संपू 'च पाठः।
6. 'मग्र' क, 'मधो' घ पाठः।
7. 'न्धः। इति। स्न' क पाठः।
8. 'ष्णीं स 'क पाठः।

तूष्णीं सकृदिष्ट्वा तूष्[1]णीन्निवेद्य सकृत्तथेष्ट्वावसानीयार्घ्यं समर्प्य तूष्णीमेव व्यापकादि विदध्यात्। प्लावने मन्त्रस्मरणं विशेषः। स्नाने मन्त्रमात्रोच्चारणम्। मार्जने तु प्रसिद्धरीत्या पूजा स्यात्। किन्तु नित्यपूजावन्न्यासोपचारविस्तारो न कार्यः। तदुक्तं–'धारान्ते पूजयेद्देव'मिति। शान्तिं स्मरन् संस्नाप्येति प्रतिपात्तिरुक्ता। स्नपनसमये तदुदकगतशान्तिचिद्व्याप्तिं बिम्बे तद्दोषप्रशमनीं स्मरेदिति प्रदर्शनार्थमेतत् क्षालनादिष्वप्यविशेषादिति। द्वितीयसलिलैरिति द्वितीयोपदिष्टसलिलैः एवं तृतीयसलिलैस्तुरीय[2]सलिलैरिति[3] प्रमार्ज्य चेति चतुर्भिर्मूर्तिपैस्सह पुण्याहप्रसिद्धैर्मन्त्रैः प्रमार्ज्य शेषेण पूजितमन्त्रैः स्नपनमुक्तम्। अथ यदाग्रत इति काल उक्तः तदोपदेशक्रमेणैव प्रयोगः। प्रथमत इति पीठपूजातोऽपि पूर्वमिति प्लावने कृत एव पीठपूजापीत्यर्थः। अत एव स्नपने संस्[4]नाप्येति वचनम्।।13।।

The priest proficient in mantras shall place four pots in front of the idol in locations like Agnikoṇa (southeast), Nirtikoṇa (southwest), Vāyukoṇa (northwest) and Īśānakoṇa (northeast). In all the pots Kūrca - twisted Darbhā grass with a knot at the top shall be put along with other objects. In the first, Darbhā mud from pit, barks of milky trees and water with Akṣata, Gandha and Pushpa may be placed. In the second Akṣata, Aṣṭagandha and flowers shall be put. In the third Gandha, Puṣpa, Akṣata, gold and fruit are to be put. In the fourth Gandha, Pushpa, Akṣata, gold and fruit are to be placed. All these pots located at different places may be sanctified invoking the presence of god using Mūlamantra. (12)

Thereafter the main idol shall be rubbed and splashed with water along with Pītha in which it is installed. The items of the first pot are to be used in purifying the idol. The materials from the second pot shall also be used in washing and rubbing the idol. The materials from the third pot are to used along with the mantra "Śanno" etc. The materials from the fourth pot are to be used in sprinkling the idol, its altar etc. The rest of the water shall be poured on the idol (ritual with the four pot full of materials is called Catuḥśuddhi- purification with four items). (13)

आप्यैश्च पावमानैश्च होतृभिश्चेह मार्जनम्।
कुर्वीत सर्वदेवेषु ब्रह्मभिश्चापि शूलिनि।।14।।

विमर्शिनी

इह मार्जने सर्वदेवेषु आप्यैः 'आपो हि ष्ठे'त्यादिभिः, पावमानैः 'स्वादिष्ठये'त्यादिभिः होतृभिः 'चित्तिस्स्रुगा'दिभिश्च मार्जनं कुर्वीत। शूलिनि एतैः पञ्चभिर्ब्रह्मभिश्चापि।।14।।

विवरणम्

इदानीं दोषभूयस्त्वे चतुश्शुद्धिषु विशेषमाह–[5]दोषे भूयसीति। मतिमानित्यनेनैतत् सूचितम्। पृथक्

1. 'ष्णीमेव निवे' घ.च पाठः।
2. 'यैरि' घ. च पाठः।
3. 'ति। विधिवत् प्र' घ. च पाठः।
4. 'स्थ' क पाठः।
5. अधिकपाठमवलम्ब्य प्रवृत्तेयं व्याख्या।

पात्रेषु मुष्टिमृत्त्वक्सम्पादनं प्रत्येकं त्रिधा विभक्तेषु तूष्णींनरसिंहबीजसुदर्शनैः [1]पूजनाभिमन्त्रणमिति सर्वं सूचितम्। आकरः क्षेत्रं क्ष्माभृत् पर्वतः। अहार्यवारं पर्वतसंख्यावारम्। सप्तवारमिति यावत्। प्रथम[2]मुष्ट्या तूष्णीं सप्तवारमुद्घृष्य द्वितियमुष्ट्या तथा क्ष्रौंबीजेन तृतीयमुष्ट्या तथा सुदर्शनेन चोद्घृष्य तत्पात्रतोयेन क्षालयेत्। एवं मृद्भिस्त्वग्भिरपीति। शर्वादाविति। शिवस्कन्दगणपतिषु।।

पूर्णमिति। प्रोक्तनयेन पूर्णं महत् पात्रं शान्त्युपनिषन्मूलैरिष्ट्वेत्यन्वयः। साक्षतगन्धपुष्प-सलिलैर्न्यक्कुर्चकञ्चेति प्रागुक्ता प्रक्रिया। शन्नोदेवीरिति शान्तिमन्त्रः पञ्चोपनिषदः पञ्चतत्त्वानि शिवे तु पञ्चब्रह्माणि अमन्त्रमिति पूर्ववदनुच्चारणम्। तैरेवेति। अतः पात्रान्तरेण तैरेवाणुभिर्वसुशतं स्नपयेदित्यन्वयः। अत इत्युक्तविधान्महतः पात्रादित्यर्थः। पञ्चमीनिर्देशादाहृत्याहृत्य स्नपयेदिति लभ्यते। तैरिति शान्त्युपनिषन्मूलग्रहणं प्रोक्षेदित्यत्रात इत्यनुषङ्गः। पूर्ववदित्यर्थः। तैरिति शान्त्युपनिषन्मूलैः। क्रमविदित्यस्यायमभिप्रायः। प्रथमं शान्त्युपनिषन्मूलैः पुनः पुण्याहपठितक्रमेणाब्लिङ्गाभिः पावमानीभिः शुद्ध्यायुष्मतीभिरपि पूनश्चित्तिस्रुगादिभिर[3]वसानेऽपि शान्त्युपनिषन्मूल[4]मन्त्रैः प्रोक्ष्य तैश्शेषेण स्नपयेदिति।।14।।

Here in this, in respect of all gods mantras of Āpya (Āpohiṣṭhā etc.), Pavamāna(Svādiṣṭhaye etc.) and Hotr (Cittisruk etc.) are to be used. In the case of Śiva along with these Pañcabrahma mantra is also to be used. (14)

ऐशान्यां धान्यराशौ [5]हरिति सुमहिते [6]योगपीठे कटाहं
लौहं संसाद्य संस्कृत्य च तदनु समुत्तानितेऽधोग्रकूर्चम्।
विन्यस्यापूर्य वारा नव[7]पटपरिपूतेन मन्त्री जलेऽस्मिन्
विन्यस्येन्मत्स्ययुग्मं कमठयुगमपि स्वर्णदुर्वर्णक्लृप्ते।।15।।

विमर्शिनी

चतुश्शुद्ध्यनन्तरमेव धारां कुर्यादित्याह-ऐशान्यामिति। देवस्य ऐशान्यां हरिति दिशि धान्यराशौ सुमहिते पूजिते योगपीठे लौहं लोहमयं कटाहं संसाद्य संस्कृत्य तदनु समुत्तानिते अधोऽग्रकूर्चं विन्यस्य नवपटपरिपूतेन नवीनवस्त्रगालितेन वारा जलेनापूर्यास्मिन् जले स्वर्णदुर्वर्णक्लृप्ते सुवर्णेन रजतेन च क्लृप्ते मत्स्ययुग्मं कमठयुगमपि विन्यस्येत्।।15।।

विवरणम्

अथ धारां प्रस्तैति-ऐशान्यामिति। हरिच्छब्दो दिग्वचनः। स्वस्तिकेऽष्टदले वा पीठक्लृप्तिः। स्वे

---

1. 'ज पूजनादिभिः म' क पाठः।
2. 'मं' च पाठः।
3. 'रप्यव' क पाठः।
4. 'लैः प्रा' घ. च पाठः।
5. 'दिशि महितमहाया' ख पाठः।
6. 'विष्टरे स्वे क' क. ग. घ पाठः।
7. 'ववमलपटिगालितेनोदकेऽस्मिन्' ख पाठः।

विष्टर इति। वरुणमात्रपूजायां वारुणं पीठमन्यत्र तत्तत् पीठमिति भावः। संस्कृत्य चेत्यस्त्रप्रोक्षणादिसंस्कारा उक्ताः। नवपटपरिपू[1]तेन वारेति। नववस्त्रेण तस्मिन्नेव वा पात्रान्तरे वा गालितेन जलेनेत्यर्थः। मन्त्रीति वारुणमन्त्रविदिति पात्रेऽपि वारुणपूजनमुक्तम्। वक्ष्यति च वारुणमन्त्रपात्रमिति मत्स्ययुग्मं मत्स्यमिथुनं, कमठयुग्मं कूर्ममिथुनं, स्वर्णदुर्वर्णक्लृप्ते इति मिथुनद्वयविशेषणम्। द्विवचनं सुवर्णकृतं मत्स्यद्वयं रजतकृतं कूर्मद्वयम्। यद्वा सुवर्णकृतं तयोः पुरुषद्वयं रजतकृतं तयोः स्त्रीद्वयमिति वार्थाः।।15।।

The priest shall, inside the sanctum at the north east corner place a Kaṭāha - a big metallic pan over the paddy where the altar is sanctified. That big vessel is to be purified and filled up with water, sifted through a fresh cloth. In it shall be put golden replicas of a couple of fishes and a pair of tortoise made of silver. (15)

पद्मिनीं ससुमनोमृणालिनीं न्यस्य तत्र वरुणं सतीर्थकम्।
प्रार्च्य देवमपि सन्निधाप्य तत्संस्पृशन् जपतु वारुणादिकम्।।16।।

विमर्शिनी

तत्र ससुमनोमृणालिनीं पुष्पपत्रमृणालवतीं पद्मिनीं न्यस्य सतीर्थकं वरुणमावाह्य प्रार्च्य देवमपि सन्निधाप्य सम्पूज्य तत् पात्रं संस्पृशन् मन्त्री पञ्चवारुणादिमन्त्रज्ञः वारुणादिकम् अवते हेलः 'उदुत्तमं वरुण' 'इमं मे वरुण' 'तत्त्वायामि' 'त्वन्नो अग्ने' इति पञ्चवारुणम् आदिशब्देन 'प्रसुव आप' इत्यादि सूक्तंः च जपतु।।16।।

विवरणम्

पद्मिनी पद्ममेव। ससुमनोमृणालिनीं पुष्पमृणालसंयुक्तां कन्दोपलक्षणमेतत्। जलाधिवासोक्तैव पूजा स्यात्। देवमपि सन्निधाप्येति सन्निधापनमात्रमुक्तम्। यद्वात्रापि संक्षेपेण[2] एव पूजेष्यते। वारुणादिकमिति पञ्चवारूणपञ्चतत्त्वमूलाद्यभिमन्त्रणमुक्तम्। तदुक्तं–

अब्लिङ्गैर्वारुणीभिश्च हिरण्यवर्णाभिरेव च।
यजुष्पवित्रसावित्रि ब्रह्मव्याहृतिभिः क्रमात्।।

इति।।16।।

In that pan holding water may be put lotus with stalks and leaves and Gaṅgā and Varuṇa may be invoked along with the god to sanctify the same. (16)

पालाशादित्रिपदकलितं लोहजं हेमरन्ध्रं
धारापात्रं स्नपनसमयेऽधोग्रकूर्चं प्रकल्प्य।
पादानिष्ट्वा प्रणवलिपिभिस्तेन पात्रं च कूर्चं
चास्मिन् पात्रे न्य[3]सतु च पूनर्गन्धपुष्पाक्षतानि।।17।।

---

1. पूरिते क.।
2. 'ण पू' घ. च. पाठः।
3. 'क्षिपतु' क. ग. घ पाठः।

विमर्शिनी

पुनर्देवस्य पीठपूजापूर्वमावाह्य स्नपनसमय पालाशादित्रिपदकलितं पालाशादियाज्ञिकवृक्ष-क्लृप्तपादत्रयधृतं लोहजं लोहेन निर्मितं हेमरन्धं हेम्ना कल्पितरन्ध्रप्रदेशं धारापात्रमधोग्रकूर्चं च प्रकल्प्य प्रणवलिपिभिः 'अं नमः 'उं नमः' मं नमः' इति पादानिष्ट्वा पात्रं कूर्चं चेष्ट्वास्मिन् पात्रे गन्धपुष्पाक्षतानि च न्यसतु।।17।।

विवरणम्

पालाशादित्रिपदकलितं पालाशैर्वा क्षीरवृक्ष[1]शकलैर्वा त्रिभिः पादैः कलितं बद्धं प्रकल्प्येत्यर्थात् प्रतिमोपरिकल्पनं लभ्यते पलाशादिकृतेन सरन्ध्रेण पात्रान्तरेणार्थाद्धारापात्रमुक्तं भवति। स्नपनसमय इति। कयहपूजानन्तरं पीठपूजावाहनादि विधाय स्नानसमय इत्यर्थः। प्रणवलिपिभिरिति प्रणवाशै[2]रं उं मं इत्येतैः तेन पात्रञ्चेति। प्रणवेन पादपात्राणामस्त्रप्रोक्षणादिकमर्थसिद्धम्। कूर्चञ्चेति। तेन प्रणवेनेत्यर्थः। क्षिपतु चेति। कलशपूरणोक्तरीत्या जीवमन्त्रयुतेन मूलेनेति भावः।।17।।

The priest shall enter the sanctum and perform rituals up to the time of the bathing of the deity. Now a copper vessel with a golden tube to drain the water may be placed in a tripod made of the milky trees or of Palāśa with its head downwards. A Kūrca of Darbhā grass may also be placed in it. Using the letters of the Praṇava the vessel may be sanctified. In the vessel, Gandha, Pushpa, and Akṣata shall be put. (17)

पात्राद् वार्यथ वारुणादधिदरं कृ[3]त्वाञ्चितेनामुना
तत् पात्रं परिपूर्य मूलमनूना तच्छेषतोयैरपि।
तत्कूर्चाग्रविनिर्गतामविरलां धारां समापातये-
दर्चामूर्धनि याममात्रमभिजप्यैतान् मनूस्तन्मनाः।।18।।

विमर्शिनी

वारुणात् पात्रात् अधिदरं शङ्खे वारि कृत्वा अञ्चितेन पूजितेनामुना मूलमनुना तच्छेषतोयैरपि तत्पात्रं परिपूर्य अर्चामूर्धनि प्रतिमाया मूर्ध्नि याममात्रं कालम् एतान् वक्ष्यमाणान् मन्त्रानभिजप्य तन्मना भूत्वा तत्कूर्चाग्रविनिर्गतां तत्कूर्चाग्रात् स्यन्दमानां धाराविरलामविच्छिन्नां समापातयेत्।।1 8।।

विवरणम्

अधिदरं हृत्वेति। दरः शङ्खः तस्मिन् पात्रान्तरे[4]णाहृत्येर्थः। मूलमनुनाञ्चितेनेत्यावाह्य पूजनमुक्तम्। पूरणेऽपि मूलमन्त्रः कलशपूरणोक्त एव वा। तच्छेषतोयैरपीति। कयहतः पात्रान्तरेणाहृतैरपि सह पूरणमुक्तम्। अविरलामनल्पाम्। एतान्मनूनभिजप्येति वक्ष्यमाणमन्त्राभिप्रायम्। तन्मना इति धारायां प्रतिपत्तिरुक्ता[5]।18।।

---

1. 'क्षजैर्वा घ. च पाठः।
2. 'रेव उ' च पाठः।
3. 'हृ' ख पाठः।
4. 'णेत्यर्थः' क पाठः।
5. 'क्ता..नि' घ. च पाठः।

From the pot sanctified to Varuṇa water may be drained in to the conch placed in the front of the deity along with Akṣata and grass. Chanting Mūlamantra the pot to which a drain is attached shall be filled up. That water may be allowed to be drained over the head of the idol for about three hours duration. The water may be allowed to be dropped through the tip of the Kūrca- the knotted Darbhā grass- continuously without break. (18)

मन्त्रान् पञ्च निजान् जपेयुरभितः पात्रं स्पृशन्तो द्विजाः
गा[1]यत्रीं दशतारकां सकलवेदादीन् स्वकीयान्यपि।
सूक्तादीनि सपावमानपुरुषाम्नायान्ति[2]कानि क्रमा-
ज्जप्या वाखिलसंहितात्र कथितान्याद्यन्तजप्यानि च।।19।।

विमर्शिनी

तत्काले अभितः परितः उपविश्य पात्रं दर्भैः स्पृशन्तो द्विजाः पूर्वं निजान्[3] वक्ष्यमाणान् पञ्च मन्त्रान् जपेयुः। दशतारकां गायत्रीं दशप्रणवगायत्रीमित्यर्थः। सकलवेदादीन् ऋग्यजुस्सामाथर्वणादीन् स्वकीयानि वैष्णवादीनि सूक्तादीन्यपि सपावमानपुरुषाम्नायान्तिकानि। पावमानं 'स्वादिष्ठा'दिकम्। पुरुषसूक्तं 'सहस्रशीर्षादि'कम्। आम्नायान्तिकं 'वात आवात्वा'दिकम्। अथवा अखिलसंहिता क्रमाज्जप्या। अत्र तथाचेत् कथितानि सर्वाणि आद्यन्तजप्यानि स्युः।।19।।

विवरणम्

निजान् पञ्च मन्त्रानिति पञ्चतत्त्वानि शिवे पञ्चब्रह्माणि। अभित इति। बिम्बं परितः। द्विजा इति गुरुर्मूतिपाश्च। दोषगौरवे यथालाभमन्ये च वेदविद इत्यर्थः। सावित्रीं दशतारकामिति। दशप्रणवागायत्रीं स्वकीयान्यपि सूक्तादी[4]नीति। स्वकीयसूक्ता[5]दीन्तुत्तरश्लोके वक्ष्यते। आदिशब्देन स्वकीयानुवाकादि-ग्रहणम्। सपावमानपुरुषाम्नायादिकादीनीति। पावमानं त्रिषु वेदेष्वपि प्रसिद्धम्। आदिशब्देन श्रीसूक्तशिवसङ्कल्पादिग्रहणम्। जप्या वाखिलसंहितेति दोषभूयस्त्वाभिप्रायम्। तदा विशेषमाह-अत्र कथितान्याद्यन्तजप्यानि चेति। प्रथमं पञ्चतत्त्वदशप्रणवगायत्रीवेदादिनिजसूक्तानि ,संहिताभागशः पुरुषसूक्तादीनि पञ्चतत्त्वान्तमिति भावः।।19।।

Brahmins sitting around the idol and touching the vessel containing the sanctified water for draining shall chant Pañcatattva mantra of the particular deity (Pañcabrahma in the case of Śiva), as well as Praṇava , Daśapranava, Sūryagāyatrī and some hymns from all the four Vedas. They may chant the hymns prescribed for their own domestic rituals in full. (19)

---

1. 'सावित्रीम' इति मूलकोशपाठः।
2. 'दि' ख पाठः।
3. 'न् प' क. ख. ग. ख च पाठः।
4. 'नि स्व'
5. 'क्तान्यु' क पाठः।

रुद्रे कद्रुद्रपूर्वं स्वभुवि पुनरतोदेवपूर्वं द्वयं त-
च्छार्ङ्गीशे यातऊत्यादिकमिदमुभयं चार्यके तारकारौ।
अग्निर्होता[1]दिकं स्वं प्रजपतु गणपेऽथो गणानांपदाद्यं
रुद्रोक्तं च द्वयेऽस्मिन् महिषजिति सजातादिकं वैष्णवं च।।20।।

विमर्शिनी

स्वस्वसूक्तान्याह-रुद्र इति। रुद्रे कद्रुद्रपूर्वं 'कद्रुद्राय प्रचेतसः' इत्यादिकं प्रजपतु। स्वभुवि विष्णौ 'अतो देवा' इत्यादिकं, शार्ङ्गीशे तद् द्वयं 'कद्रुद्रा'दिकम् 'अतो देवा'दिकं च, आर्यके यातऊत्यादिकं 'या त ऊतिरवमे'त्यादिकम्, इदमुभयं रौद्रं वैष्णवं च, तारकारौ 'अग्निर्होता नो अध्वर' इत्यादिकम्, अथो गणपे गणानांपदाद्यम्, अस्मिन् द्वये स्कन्दे गणपे च रुद्रोक्तं च, महिषजिति सजातादिकं 'जातवेदस' इत्यादिकं वैष्णवं च प्रजपतु।।20।।

विवरणम्

स्वभुवीति। विष्णौ। द्वयेऽस्मिन्निति स्कन्दे गणपतौ च। सुसमाप्येति व्यापकादिकमुक्तम्।।20।।

In chanting the mantras for Rudra the following six are prescribed. (1) "Kadrudrāya" (2) "Imā Rudrāya" (3) "A Te Pitar" (4) "Tamustuhi" (5) "Imā rudrāya sthira "and (6) "Tryambakam yajāmahe".

For Viṣṇu the mantras are (1) "Āto devāḥ" (2) "Viṣṇor nu" (3) "Samvā karman" (4) "Paro matraya"
For Śaṅkaranārāyaṇa mantras of both Śiva and Viṣṇu are ordained. For Śāstā above mentioned ones in addition to "yā tam uti". For Subrahmaṇya "Agnir hota no". For Gaṇeśa the mantra "Gaṇānām tva". For Śāstā and Subrahmaṇya, Rudrasūkta may also be chanted. For Durga the Mantra "Jāta vedase" and hymn of Viṣṇu are ordained. (20)

यामावसाने सुसमाप्य धारां देवं यथाविध्यभिपूजयेत।
न चालयेद् वारुणमत्र पात्रं दिनत्रये यत्र करोति धाराम्।।21।।

विमर्शिनी

यामावसाने त्रिपादसहितत्रिनाडिकावसाने धारां सुसमाप्य देवं यथाविध्यभिपूजयेत। यथाविधीत्यनेन तदानीमेव पूजायाः योग्यतेत्यभिप्रायः। यत्र दिनत्रये धारां करोति, तत्र वारुणं पात्रं न चालयेत्। एतेन दिनत्रये धारा कर्तव्या, आपत्पक्षे त्वेकदिनमित्यपि सूचितम्।।21।।

विवरणम्

दिनत्रय इति च दोषभूयस्त्वाभिप्रायम्। यत्र शुद्धौ दिनत्रये धारां करोति गुरुः तत्रेत्यर्थः।।21।।

At the end of the Yāma the draining may be completed and the vessel may be relieved after offering oblation and waving of lights before the idol

1. 'त्रा' क पाठः।

some more oblations be given. This may be continued for three days without the change of vessel holding water sanctified for Varuṇa. (21)

औध्र्वाह्निके पर्युषिताम्बु हृत्वा
कृत्वान्यदिष्ट्वा प्रकरोतु शेषम्।
वारे तृतीये वरुणं च देवे
प्रोद्वास्य तत्पूजनमादधीत।।22।।

विमर्शिनी

औध्र्वाह्निके अनन्तरदिवसगतायां[1] धारायां पर्युषिताम्बु अतिक्रान्तदिवसगतं जलं हृत्वा त्यक्त्वा अन्यच्छुद्धजलं कृत्वा सम्पाद्य इष्ट्वा तीर्थवरुणादिकमिष्ट्वा शेषं प्रकरोतु। तृतीये वारे दिवसे धारावसाने वरु[2]णं देवं च देवे प्रोद्वास्य तत्पूजनं धारापूजनम् आदधीत।।22।।

विवरणम्

तदा च कटाहपूजायामस्ति विशेष [3]इत्याह-**औध्र्वाह्निक इति**। शुद्धवस्त्रमार्जनेनैतत् परिह्रियते। कृत्वान्यदिति। पूर्वोक्तवत्तत्र जलं गालयित्वेत्यर्थः। इष्ट्वेति पीठपूजावर[4]णपूजादि सर्वमुक्तम् इति[5]। अत्र सामान्यतो दोषे चतुर्भिर्मूर्तिपैस्सह एकदिने धारा, दोषभूयस्त्वे तु पुनरष्टभिर्द्वादशभिर्वा सह संहितया दिनत्रयेऽपि धारेति भेद उक्तः।।22।।

When the drawing of water is required on the second and third days the water collected on the previous day has to be changed. Fresh water has to be sanctified chanting the names of Gaṅgā and Varuṇa with mantras. On the third day after completion of the draining the holy water may be reckoned as removed. Now light may be waved and fresh clothes be offered to god. (22)

पात्रे पीठसमर्चनादिमहिते न्यक्कूर्चके स्वाणुभि-
र्गोमूत्रप्रमुखानि पञ्च परिमीयायोज्य गव्यान्यथ।
तानि ब्रह्ममथा विलोड्य मपरेणाभ्यर्च्य मूलाणुना
गन्धोदं च तथावगाहविधये सम्पूज्य संसाधयेत्।।23।।

विमर्शिनी

अवगाहविधिमाह-पात्र इति। अथावगाहविधये पीठसमर्चनादिमहिते पीठपूजापात्रशोधनतत्पूजादिके न्यक्कूर्चके अधःकूर्चयुक्ते पात्रे स्वाणुभिः स्वस्वमन्त्रैः गोमूत्रप्रमुखानि पञ्च गव्यानि परिमीयायोज्य

---

1. 'यां च प' ख पाठः।
2. 'ण' ङ पाठः।
3. 'त्याह्नि' क पाठः।
4. 'रु' क पाठः।
5. 'ति। सा' च पाठः।

परिमाणेन योजयित्वा ब्रह्ममथा पालाशेन मथनसाधनेन तान्यालोड्य एकीकृत्य मपरेण प्रणवेनाभ्यर्च्यापरस्मिन् पात्रे मूलाणुना[1]ष्टगन्धोदकं चाभ्यर्च्य संसाधयेद् वस्त्रेणाच्छाद्याधिवास्य रक्षेत्।।23।।

विवरणम्

अथावगाहं प्रस्तौति–पात्र इति। पीठसमर्चनादिमहित इति। पीठपू[2]जास्त्रप्रोक्षणादयः पात्रपूजा उत्तानीकरणादय इत्येतत् सर्वमुक्तम्। स्वाणुभिरिति गोमूत्रादीनामेव वक्ष्यमाणैर्मनुभिः। परिमीयायोज्येति। तस्मिन्नेव वा परिमाणमपि। यद्वा पात्रान्तरेषु परिमीय संशोध्य तस्मिन् योजनम्। तानि मपरेण ब्रह्ममथा विलोड्येत्यन्वयः। मपरः प्रणवः। ब्रह्ममथेति तृतीया। पालाशेन मथनसाधनेनेत्यर्थः। सर्वत्रास्त्रप्रोक्षणादिकमर्थसिद्धम्। गन्धोदञ्च तथा सम्पूज्येति। पात्रान्तरे[3] पीठपूजादिपूर्वकमिति भावः। संसाधयेदिति मूलाभिमन्त्रणमुक्तम्।।23।।

For the ceremony called Avagāha - plunging the idol in water - an altar may be prepared spreading paddy over which two pots may be placed head down. After purifying the pots items like urine of cow, Pañcagavya etc. may be collected in specific proportions. They may be collected in a conch chanting the Mūlamantra and invoking worship. They may be put aside covering them with fresh clothes. (23)

गोमूत्रं निजवाञ्छया परिमितं मूत्रार्धकं गोमयं
क्षीरं सप्तगुणं दधि त्रिगुणितं गोमूत्रमात्रं घृतम्।
प्राहुस्तत्सवितुर्वरेण्यमिति गन्धद्वारपूर्वं तथा–
प्यायस्वेति दधीति तेज इति गोमूत्रादिमन्त्रान् क्रमात्।।24।।

विमर्शिनी

तेषां परिमाणं मन्त्रं चाह–गोमूत्रमिति। तत्र गोमूत्रं निजवाञ्छया परिमितं स्यात्। मूत्रार्धकं गोमूत्रार्धकं गोमयं स्यात्। गोमूत्रात् सप्तगुणं क्षीरं स्यात्। गोमूत्रात् त्रिगुणितं दधि स्यात्। गोमूत्रमात्रं तत्तुल्यं च घृतं स्यात्। गोमूत्रादिमन्त्रान् क्रमात् 'तत् सवितुर्वरेण्यमि'ति, गन्धद्वारपूर्वं 'गन्धद्वारां दुराधर्षाम्' इत्यादि, तथाच 'आप्यायस्वे'ति, 'दधिक्राव्ण इति, तेजोऽसी'ति आचार्या आहुः।।24।।

विवरणम्

दधीति। दधिक्राव्णः तेज इति। तेजोऽसि तेजः।।24।।

In preparing this the urine of the cow limited to ones own desire. But cow dung may be added half of its quantity. Milk may be seven times of urine, curd may be seven times more and ghee restricted to the quantity of urine. The mantras required are (1) "Tat savitur vareṇyam "(2)

1. 'ना पुष्पग क पाठः।
2. 'जा उत्ता' घ पाठः।
3. 'रेण पी' क पाठः।

"Gandhadvāram "-for water mixed with cow dung. (3) "Āpyāyava" for milk (4) "Dadhikrāvṇa "for curd and (5) "Tejosi "for ghee are respectively ordained. (24)

देवे पुनः स्नपनकर्मणि कर्मठोऽथ
ब्रह्मद्रुमादिकृतपञ्जरमाकलय्य।
संवेष्ट्य बिम्बमपि साधु सदर्भवस्त्रै-
र्गव्यैः प्रपूर्य तनुयादवगाहकर्म।।25।।

विमर्शिनी

अथ कर्मठः कर्मणि कुशलो गुरुः स्नपनकर्मणि पीठपूजादिस्नानकाले प्राप्ते देवे ब्रह्मद्रुमादिकृतपञ्जरं पलाशादियाज्ञिकैर्वृक्षैः कृतं पञ्जरम् आकलय्य निश्छिद्रं सन्धयित्वा बिम्बमपि सदर्भवस्त्रैः साधु संवेष्ट्य गव्यैः प्रपूर्यावगाहकर्म तनुयात्।।25।।

विवरणम्

कर्मठः समुचितकर्मकुशलः। अनेन पञ्जरबन्धग[1]कौशलं तत्पीठविवरे मा[2]षपिष्टलेपनं तत्कौशलमवमोकसमये तत्कौशलमिति सर्वमुक्तम्। साध्विति गव्यैः प्रपूर्येति नीराजनपूर्वकं धारोक्तनयेन तत्र शङ्खेन गव्यं सिक्त्वा शेषपूरणमुक्तम्।।25।।

The priest proficient in rituals after extending the worship of the idol up to the time of its bathing shall prepare a nest with the branches of trees used for sacrificial purposes. This may be placed around the idol with a plank on which the flour of black gram may be anointed. The idol may be bound with Darbha grass mixed with Pañcagavya up to its neck to cover it before taking it up for the ceremony of plunging into water. (25)

धारावदत्र परिजप्य मनूंश्च विप्रै-
स्तद्गव्यजातमपनीय सुगन्धतोयैः।
अन्तेऽवगाह्य परिशोध्य समस्तमेतद्
देवं यथोक्तविधिना परिपूजयेच्च।।26।।

विमर्शिनी

अत्र च विप्रैः सह धारावद् धारायामिव मनून् परिजप्य तद्गव्यजातमपनीय त्यक्त्वान्ते सुगन्धतोयैरवगाह्य एतत् समस्तं परिशोध्य यथोक्तविधिना देवं परिपूजयेच्च।।26।।

विवरणम्

धारावदिति। धारायां यावद्भिर्मूर्तिपादिभिस्सह यज्जपः कृतस्तावद्भिस्सह तज्जप इह कार्य इत्यर्थः। तद् गव्यजातमपनीयेति। यामान्ते तदुद्वासनव्यापकादिपूर्वकं माषलेपच्छिद्रादिभिस्तत्

1. 'गतकौ'
2. 'रे पि' क पाठः।

सर्वमवस्नव्येत्यर्थः। कृत्स्नगव्यपरिहाराभिप्रायेण गव्यजातमिति जातग्रहणम्। अन्ते सुगन्धतोयैरवगाह्येति। गव्यक्षालनार्थतया तदङ्गमेतदतो न पृथक् पूजा स्यात्तत्कालदशमांशश्चैतदवगाहकाल इत्येतदन्तग्रहणेन सूचितम्। समस्तमेतत् परिशोध्येति। तदुद्वासनव्यापकादिकमपि विधाय पञ्जरविकलनादिपूर्वकं तत्परिवेष्टनवस्त्रादिकमपनीयाभिषिच्येत्यर्थः।।26।।

Here also Brahmins should be engaged to chant relevant mantras as in the case of Dhārā - the pouring of water over the idol. After removing the Pañcagavya from the nest and offering Pāyasa as oblation lights may be waved. Pasting the nest with the flour of black gram and plunging the idol in Aṣṭagandhajala the idol should be dipped to the chant of mantras by Brāhmins. The idol may be cleansed with pure water removing the anointments and worshipped with usual offerings. (26)

तारं नादं शरलिपि महाव्योमविद्यादि पञ्च-
ब्रह्म श्रीरुद्रकमपि शिवे गाह्यमाने जपेयुः।
सम्पातं संस्पृशतु च शतं ब्रह्मभिस्तत्र सर्पि-
र्हुत्वा चत्वार्यहिशतमघोरेण च द्रव्यकाणि।।27।।

विनर्शिनी

तत्र शिवे गाह्यमाने अवगाह्यमाने तारं, नादं प्रासादं, शरलिपि पञ्चाक्षरं, महाव्योमविद्या महाव्योमव्यापिचतुश्शताक्षरी। आदिशब्देन दशाक्षर्यादिकमुच्यते। पञ्चब्रह्म सद्योजातादीनि प्रसिद्धानि, श्रीरुद्रं च प्रसिद्धम्, एतानि मूर्तिपाः पात्रं स्पृशन्तो जपेयुः। तत्र शिवेऽग्रतोऽग्निमाधायाग्निमुखावसाने पञ्चभिर्ब्रह्मभिः शतं सर्पिः, अधोरेण अहिशतम् अष्टोत्तरं शतं चत्वारि द्रव्यकाणि च हुत्वा तदानीं तत्सम्पातं संस्पृशतु च।।27।।

विवरणम्

अत्र शिवेऽवगाहजपे विशेषं दर्शयति-तारन्नादमिति। नादःप्रासादः। शरलिपि पञ्चाक्षरम्। महाव्योमव्यापिविद्या व्योमव्यापिमालामन्त्रः आदिग्रहणं तदङ्गाद्यर्थम्। [1]गाह्यमाने अवगाह्यमामे। अत्र यामस्तु श्रीरुद्रवृत्या पूरणीयः। यद्वा पावमान्यादिजपोऽपीष्यत एव सम्पातं संस्पृशतु चेति। तदङ्गतयाधिवासहोमे तत्सम्पातस्पर्शनमुक्तम्। वैष्णवेऽप्येतत्स्यादिति केचिदिच्छन्ति तदुक्तम्।।27।।

While the idol of Śiva is taken up for plunging the mantras to be used are (1) Praṇava (2) Prasādamantra (3) Pañcākṣara (4) Mahrvyomavyāpi (5) Alpavyomavyāpi (6) Pañcabrahman and (7) Śrīrudra in addition to those prescribed for Dhārā. For Śiva 108 Āhutis may be made in sacrificial fire specially prepared for it. For Pūrṇāhuti, Aghoramantra is needed. The sacrifice of Sviṣṭakṛd is essential. The leftovers of these may be splashed inside of the nest prepared for Avagāha. (27)

---

1. 'ग्रा' क पाठः।

व्यस्तैः समस्तैरपि पञ्चगव्यैर्गन्धोदनिष्ठैः सुगरिष्ठदोषे।
कार्योऽवगाहः क्रमशो दिनेषु तत्सेकमात्रेण च तल्लघिम्नि।।28।।

विमर्शिनी

सुगरिष्ठदोषे सुतरां गुरुते दोषे दिनेषु एकैकदिनेष्वपि व्यस्तैः पृथग्भूतैः समस्तैर्युक्तैश्च पञ्चगव्यैः गन्धोदनिष्ठैः गन्धोदावसानैः क्रमशोऽवगाहः कार्यः। तल्लघिम्नि तस्य दोषस्य लघुतायां तत्सेकमात्रेण पञ्चगव्याभिषेकमात्रेणालम्।।28।।

विवरणम्

अथ दोषभूयस्त्वे विशेषमाह–**व्यस्तैरिति**। गन्धोदनिष्ठैरिति। गोमूत्राद्येकैकावगाहान्ते गन्धोदकावगाह उक्तः। सुगरिष्ठदोष इति। एतत्पुरस्तादुक्तम्। दिनेषु क्रमश इति। प्रथमदिने गोमूत्रेण द्वितीयदिने गोमयोदकेनेत्येवं प्रकारेणेत्यर्थः। तत्सेकमात्रेण च तल्लघिम्नीति। अलमिति शेषः। यदा सप्तशुद्धिमात्रादिकमेव कार्यं तदा पात्रे पञ्चगव्यं सम्पूज्य तेनाभिषिञ्चेदिति भावः। गन्धोदकेन क्षालनमिहाप्यर्थाल्लभ्यते इति।।28।।

If the pollution is of a serious kind, each and every item of Pañcagavya is to be used for several days taking a minimum of five days. At the end of the day the idol may be dipped in Aṣṭagandhajala. If the fault is not serious a simple pouring of Pañcagavya on the idol alone is needed. (28)

न्यक्कूर्चानर्चितैकासनसमधिगतान् पञ्च कुम्भान् क्रमेण
प्रापूर्येशादिसूक्तैः स्मरजिति सकलेष्वेव वा पञ्चतत्त्वैः।
तैरेवेष्ट्वा ध्रुवैकीकृत इह निजमूलाणुनावाह्य देवं
साङ्गीकृत्यार्चयित्वा विधिवदथ पृथङ् मन्त्रयेच्च स्वम[1]न्त्रैः।।29।।

विमर्शिनी

सप्तमीं शुद्धिमाह–**न्यक्कूर्चानिति**। अर्चितैकासनसमधिगतान् अर्चित एकस्मिन्नेव पीठे स्थितान् न्यक्कूर्चान् अधःकूर्चान् पञ्च कुम्भान् स्मरजिति ईशादिसूक्तैः 'ईशानः सर्वविद्यानामि'त्यादिभिर्मन्त्रैर्वा मध्यादिक्रमेण, सकलेषु सप्तस्वपि देवेषु पञ्चतत्त्वैरेव वा प्रापूर्य तैरेवेष्ट्वा ध्रुवैकीकृते प्रणवेनैकीकृत इह निजमूलाणुना देवमावाह्य साङ्गीकृत्य विधिवदर्चयित्वाथ स्वस्वमन्त्रैः पृथङ् मन्त्रयेत् जपेच्च।।29।।

विवरणम्

इदानीं अभिषेकमाह–न्यक्कूर्चानिति।

प्रागुदग्भिश्चतुस्सूत्रैः क्षेत्रे नवपदे कृतम्।
मृष्ट्वा कोणपदान्यत्र मण्डले पञ्चकं यजेत्।।

---

1. 'न्त्रैः। दिश्यैश्यां धान्यपीठे कुशयुजि कलशान् पञ्च हेमाश्मगर्भान् गन्धादिभः संप्रपूर्यार्णकमलयजनाद् येषु कृत्वोक्तमन्त्रैः। सर्वैरावाह्य साङ्गीकरणयजनकृत्तानथाभ्यर्च्य तेषामेकैकेनाभिषिच्यार्चयतु महति दोषे कुमध्यादिभिस्तम्।। पी' क पाठः।

धान्यपीठकल्पनादिकं प्रसिद्धम्। तत्रैकमेव सर्वानुगतं पीठमिष्ट्वा तत्र पञ्च कुम्भान् संसाद्य संस्कृत्याधोऽग्रं कूर्चं निक्षिप्य मध्यादिक्रमेण पञ्चतत्त्वैः पूरयेत्। शिवे त्वीशानादिपञ्चब्रह्मभिः पूरयेत्। शैवेऽपि पञ्चतत्त्वैर्वेति विकल्पः। यद्वा प्रणवमूलद्वयगायत्रीसावित्रीभिर्वा, स्कन्द इत्याद्यपि सूचितम्। तैरेवेष्ट्वेति। पूरणमन्त्रैरेव तत्क्रमेणावाह्य सकलीकृत्य पूजयेत्। इह प्रणवेनाङ्गक्लृप्तिः। यद्वा प्रणवादिपञ्चपदैस्सर्वत्र पञ्चाङ्गानि कल्प्या पञ्चब्रह्मणां त्वङ्गानि कर्मशेषे वक्ष्यामः। प्रणवेनेकीकरणं मूलार्चनार्थम्। विधिवदर्चयित्वेति। निवेद्यादिकमुक्तम्। अथ स्वमन्त्रैः पृथङ्मन्त्रयेच्चेति। प्रणवेन पृथग्विभाव्य [1]स्वमन्त्रैरभ्यर्च्याभिमन्त्रणमुक्तम्।।29।।

In respect of the expiatory ceremony related to all the seven deities five swastika diagrams of powder may be drawn- four in all sides and one in the centre in which paddy is to be spread before the pots are placed. Each of the five pots need to be sanctified and Kūrcas to be placed in it head down (with its tip pointed downwards). In filling up the pots with water Pañcatattva mantra is required to be chanted and offering of flowers. are needed. The pots are to be filled up with water collected in conches. With mental worship the five divine powers of the pot may be made into one by invocation. After the rituals these pots may be kept covered with fresh clothes after chanting Pañcatattva. (29)

पीठार्चनादिस्नपनावसानं कृत्वाथ मध्यादिघटैः क्रमेण।
स्वपञ्चमन्त्रैरभिषिच्य देवं तन्न्यासपूर्वं परिपूजयेच्च।।30।।

विमर्शिनी

अथ देवस्य पीठार्चनादिस्नपनावसानं कृत्वा स्वस्वपञ्चमन्त्रैर्मध्यादिघटैः क्रमेण देवमभिषिच्य तन्न्यासपूर्वं पञ्चतत्त्वन्यासादिपूर्वं यथा भवति तथा परिपूजयेच्च।।30।।

विवरणम्

स्वपञ्चमन्त्रैरिति येन येन यो यः कलशः पूजितस्तेनतेनेत्यर्थः।।30।।

The priest entering the sanctum shall perform worship of the altar and idol with Pancatattva. Water may be poured on the idol from these five pots beginning with, the central one. After the waving of lights, the idol shall be kept covered with clothes. (30)

कृत्वा शुद्धिमिहावगाहचरमां तत्संस्थतत्त्वव्रजं
संहृत्य प्रविलाप्य चात्मनि परस्मिन् धारणाभिस्ततः।
बिम्बं साधु विशोध्य तात्त्विकमयं प्रोद्भाव्य दिव्यं वपु-
र्मन्त्राध्वप्रसमिद्धमेभिरभिषिञ्चेद् वा [2]घटैः पञ्चभिः।।31।।

1. 'स' क पाठः।
2. टैर्दोषवित्।।
पुण्याहमुक्तविधिना सहमूर्तिपालो बिम्बे विधाय महितेन सगव्यकेन।

विमर्शिनी

दोषाधिक्ये विशेषमाह-**कृत्वेति**। इहावगाहचरमां शुद्धिं कृत्वा तत्संस्थतत्त्वव्रजं तद्बिम्बस्थिततत्त्वसमूहमधिवासपटलोक्तक्रमेण संहृत्य परस्मिन्नात्मनि प्रविलाप्य ततो धारणाभिर्बिम्बं साधु उक्तक्रमेण विशोध्य तात्त्विकमयं तत्रैवोक्तक्रमेण तत्त्वस्वरूपं दिव्यं वपुः प्रोद्भाव्य प्रकर्षणोद्भूतं

राज्यक्षतेन सुविकीर्य च पञ्चमन्त्रैः शेषेण वोक्षतु किरत्वपि सर्वतोऽत्र।।
कुर्याद् दोषे महति तु पुनः प्रोक्षणं मृष्टलिप्ते
शं नो वार्भि सशुचिभिरिमा गन्धवार्भिः समुक्षेत्।
प्रासादान्तर्बहिरपि तथा सर्वतः पञ्चतत्त्वै-
र्गव्यैश्चास्त्रेण विकिरतु राज्यक्षतैश्चाथ मन्त्री।।
कृत्वा भद्रकमत्र संरचितपीठे रत्नगर्भे महा-
कुम्भे पौरुषसूक्तशुद्धजलपूर्णे स्विष्टवर्णाम्बुजे।
मूलेन प्रयजेद्धरिं विधिवदाधारेषु विष्णुं महा-
विष्णुं मन्त्रविदर्चयेदथ सदा विष्णुं त्रितत्त्वान्वयात्।।
अस्त्रेण वर्धनीं तद्वामत इष्ट्वा हुतं विधाय ततः।
सम्पातशान्तितोयं तयोर्निषिच्याभिमन्त्रयेतापि।।
पुंविष्णोर्मनुभिर्जुहोत्वथ च चित्तिस्रुक्सप्तहात्राचतु-
ष्षड्ढोत्राज्यमथेषुतत्त्वजितसावित्र्याख्यभूरादिभिः
मन्त्री हंस इति त्रिमूलजिनवर्णैर्मूलतः खादिरी-
र्व्राह्मीर्वा सघृतान्नलाजतिलराजीश्चाष्टयुक्तं शतम्।।
बिम्बेऽर्कवर्णबिससूत्रजकौतुकाढ्ये कुम्भे गुहे तु समिदादिहुतान्ततोऽत्र।
वेदाणुमात्रकृतवास्तुहुताज्यभाजि सम्पातशेषत उपस्पृशतु त्रिमूलैः।।
प्रातः स्विष्टासनावाहितविभुविहिताध्यादिरिष्ट्वा परीवा-
राढ्यं तं कुम्भमत्रानयतु करकधारापथेनाथ मन्त्री
तेन प्रोक्ष्याभिषिच्यार्चयतु च शमणोरित्यदश्शेषतोऽन्त-
र्धाम्नः प्रोक्षेद् बहिश्चावृतिगणमणुभिः स्वैरितीत्थं हरौ स्यात्।।
कृत्वा स्वस्तिकभद्रकं त्विह महाकुम्भं हरेः पञ्चर-
त्नाढ्यं ब्रह्मभिरन्तरष्ट परिकुम्भान् दिक्षु चापूरयेत्।
मन्त्री घोरकलाणुभिर्यजतु तैर्मन्त्रैर्यथाहं सुधीः
सम्पातं हुतकृत् सशान्त्युकमिष्ट्वासिच्य मन्त्रान् जपेत्।।
मध्याशास्वीशपूर्वैर्जुहुयुरिह समित्पायसव्रीहिलाजान्
व्याशासु त्र्यम्बकाद्येन च सहतिलराजीफलानाज्यनिष्ठान्।
प्रत्येकं चाष्टयुक्तं शतमिह समिधो ब्रह्मसालोद्भवाः स्युः
पश्चात् प्रसादसंस्थं प्रयजतु विधिवत् कर्मवित्तं च देवम्।।
सद्यो वोतापरेद्युर्विधिवदुपचिते पीठ आवाह्य देवं
स्नानान्तं प्राप्य संस्नापयतु मनुविदेनं महाकुम्भतोयैः।
पूजाशेषं च कुर्यादथ तदुपघटैरष्टमूर्त्यादि सर्वं
संस्नाप्यावस्रुतेनायतनभुवमपि प्रोक्ष्य रक्षेदितीशे।।
कृत्वा षड्दलमण्डलं शिखिमुखद्रव्याढ्यमत्रेपुजे कौमारं क. ग घ. पाठः।

कारयित्वा मन्त्राध्वप्रसमिद्धं मूलमन्त्रावाहनषडध्वन्यासादिभिः प्रकर्षेण सन्दीप्तं तम् एभिः पञ्चभिर्घटैरभिषिञ्चेत्। वेति समुच्चयार्थः।।31।।

विवरणम्

दोषभूयस्त्वे विशेषमाह-**दिश्[1]यैश्यामिति**। हेमाश्मगर्भानिति। सुवर्णरत्नानि निक्षिप्येत्यर्थः। अर्णकमलयजनादीति लिपिपङ्कजपूजा मूर्तिभावेनेति सर्वमुक्तम्। सर्वैरुक्तमन्त्रैरिति। मध्यकुम्भे पुरुषादिचतुर्मन्त्रपुरस्कृतेन परमेष्ठिमन्त्रेण पूर्वकुम्भे[2] विश्वादित्रयपरमेष्ठिपुरस्कृतेन पुरुषमन्त्रेणेत्येवं प्रक्रियावाहनादिकं विवक्षितम्। पुनर्मूलेन पूजा स्यात्। तेषामेकैकेनेति। निजनिजतत्त्वमन्त्रेणेत्यर्थः। महति दोष इति। एतदस्माभिः प्रागुक्तम्।।

इदानीं समाधिशुद्धिं दर्शयति-**कृत्वा शुद्धिमिति**। तत्संस्थतत्त्वव्रजमिति। ध्यानाधिवासोक्तरीत्या विस्तारेण भूतादिसंहार उक्तः। अत एव विलाप्य चात्मनि परस्मिन्नित्यमप्यभिहितम्। कार्यं कार्यं कारणे कारणे संहरन् सर्वमपि द्वादशान्तवर्तिनि परमात्मनि विलापयेदिति। साध्विति नाभ्यादिषु वह्निमण्डलादिकल्पनमित्याद्युक्तम्। तात्त्विकमयमिति। तत्त्वव्रजं सृष्ट्वाब्दवृद्ध्यादिविधानमुक्तम्। मन्त्राध्वप्रसमिद्धमिति। लिपिभावनापीठन्यासादिपूर्वकं मन्त्रभावनाषडध्वन्यासा इत्येतत् सर्वमुक्तम्। पुनः पीठपूजादिकृत्वाभिषेचनं, तदुक्तम्-पीठार्चनादिस्नपनावसानमिति। दोष[3]विदिति। दोषभेदे विद्वान्। एतच्चास्माभिः प्रागुक्तम्।।31।।

If the blemishes that need expiations are of a serious nature, the following acts are to be done before pouring the water from the five pots. After the Bimbaśuddhi up to Avagāha the priest shall enter the sanctum and transfer the divinity to himself by invocation from the idol. After doing away with Tattvas like Pṛthvi, the god may be conceived as possessing a divine form. The acts to be followed are- Prāṇāyāma, Aṇḍabheda, Lipiprāṇāyāma, Pīṭhanyāsa and Ṣaḍadhvanyāsa. Now the idol is in perfect form full of divine power. It is then that the five pots are to be emptied on the idol. (31)

पुण्याहावधि शुद्धिरेवमखिले कार्या गुहे वाग्रतः
कौमारं कलशं पुरोवदभिपूर्यावाह्य चार्घ्यादिदः।
पुण्याहं स्नपने विधाय परिपूर्याच्छेषताऽभ्यर्चयेद्
गव्यं तत्सविधे निधाय विकिरं चास्त्रेण संसाधयेत्।।32।।

विमर्शिनी

अखिले देवे एवमुक्तप्रकारेण शुद्धिः पुण्याहावधि पुण्याहप्रोक्षणमवसाने यथा भवति तथा कार्या। गुहे दोषाधिक्ये महाकुम्भप्रोक्षणं कुर्यादित्याह गुहे वेत्यादिना। अत्राग्रतो मार्जानादिभिः शोधिते स्थले षड्दलं मण्डलमालिख्य विरचिते पीठे 'पीठान्ते ब्रह्माणमित्याद्युक्तप्रकारेण ब्रह्मादिभिः साकं पीठपूजां

1. दिश्यैश्यामित्याधिकपाठमाश्रित्य प्रवृत्तेयं व्याख्या।
2. म्भे पर क पाठः।
3. 'षभेद 'क पाठः।

कृत्वा कोमारं कुमारदेवत्यं कलशं निधाय यथोक्तक्रमेण संशोध्योत्तानीकृत्य पुरोवद्धिरण्मयान् पद्मगजशिखिशक्तिवज्रान् निधायाभिपूर्य लिपिपङ्कजमिष्ट्वात्र स्कन्दमावाह्यार्घ्यादिदः अर्घ्याद्युपहारदो भूत्वा स्नपने स्तपनकाले कलशस्य पुण्याहं विधाय अप्च्छेषतः पुण्याहजलशेषेण च परिपूर्य परिवारपूजायां वज्रादेः प्रागि[1]त्यादिभिः सह पुरोवदभ्यर्चयेत्। तत्सविधे तस्योदग्भागस्थस्वस्तिकयोर्गव्यं विकिरं च निधायास्त्रेणाभ्यर्च्य संसाधयेत्।।32।।

विवरणम्

इदानीं बिम्बपुण्याहमाह-**पुण्याहमिति**। उक्तविधिनेति मार्जनोक्तन्यायेनेत्यर्थः। अयं प्रयोगः। देवाग्रतः पात्रे शान्त्युदकं तत्सन्निधौ पात्रद्वये पञ्चगव्यं सर्षपाक्षतञ्च संसाध्य पुनः पीठपूजापूर्वकमावाहनादि कृत्वा स्नपनसमये प्रोक्षणादि कुर्यादिति। शेषेण वेति। पुण्याहशेषेण गव्यशेषेण सर्वत्र प्रोक्षणं सर्षपाक्षतशेषेण विकिरणं चोक्तम्। अत्र गव्यादिकर्मणि शेषविनियोगे वा विकल्पोऽवगन्तव्यः।।

दोषभूयस्त्वे विशेषं जलसम्प्रोक्षणाख्यं प्रस्तौति-**कुयाद्दोष** इति। कुर्याद्दोषे महति[2] तु पुनः प्रोक्षणमित्युद्देशः। शेष एतद्विवरणं मृष्टलिप्त इति प्रासादान्तर्बहिरपि तथा सर्वत इत्यस्य विशेषणम्। मार्जनमुपलेपनञ्चैतल्लौकिकमेव। 'शं नो देवी'रिति सशुचिभिर्जलैः 'इमा आपः' इति गन्धजलैश्च समुक्षणं कार्यम्। पञ्चतत्त्वैर्गव्यैश्चेति। समुक्षेदित्यनुकर्षः। मन्त्रीति शुद्धजलगन्धजलादीनामस्त्रप्रोक्षणादि सर्वं सूचितम्। एतावत् सर्वं साधारणं विशेषानुपादानात्। स्कन्दे गव्यविकिरौ प्रोक्षणानन्तरमिति विशेषः। वक्ष्यति च प्रोक्ष्य च गव्योक्षा[3] विकिरार्पणं चेति।।

कृत्वा भद्रकमित्यादि वैष्णवम्। संरचितपठि इति। शालिवस्त्रादिभिरिति शेषः रत्नगर्भ इति रत्नहिरण्यन्यास उक्तः। पौरुषसूक्तशुद्धजलपूर्णे इति। शङ्खे जलं सम्पाद्य पुरुषसूक्तमूलादिकमुच्चार्य पूरयेदित्यर्थः। विधिवदिति कृत्स्ना पूजोक्ता। मन्त्रविदिति। मन्त्रप्रयोगक्लृप्तिं विद्वानित्यर्थः। त्रितत्त्वान्वयादिति। अयमिह प्रयोगः मूलाधारहृदयभ्रूमध्येषु पद्मं सम्पूज्य 'ओं अं नमः परायात्मतत्त्वात्मने विष्णवे नमः इत्यादिमन्त्रैस्त्रिभिरावाहनन्यायेनावाहनादि कृत्वा पूजयेदिति।।

तयोरिति[4] महाकुम्भे वर्धन्यां च।।

तत्र हुतक्लृप्तिं दर्शयति-पुंविष्णोस्स्वणुभिरिति। 'सहस्रशीर्षे'ति षोडशभिः, 'विष्णोर्नुक'मिति षड्भिः, 'चित्तिःस्रुक्', महाहविर्होता', पृथिवी[5] होता' सूर्यन्ते', पञ्चतत्वैः, 'जितन्ते' 'तत्सवितुः', 'व्याहृतिभिः, हंसश्शुचिषद् षडक्षरेणाष्टाक्षरेण, द्वादशाक्षरेण, विष्णुगायत्र्या, चाज्यं हुत्वा पूर्णाहुतिं विधाय मूलेन समिदादि षड्द्रव्यं जुहुयात्। पञ्चद्रव्यपक्षे घृतं हविराद्यङ्गमेवेति द्रष्टव्यम्।।

द्वयोस्सम्पातशान्तितोयन्निषिच्येति यदुक्तं तत्रापि विशेषं दर्शयेति-**बिम्ब** इति। अयमिह प्रयोगः। कलशपूजानन्तरमन्तःप्रविश्य पीठपूजापूर्वकमावाहनादि कृत्वा द्वादशाक्षरेण पद्मसूत्रकृतं कौतुकं बद्ध्वा

---

1. 'गादित्या 'ख. ग. घ. च पाठः।
2. 'ति पु' क पाठः।
3. क्षामपीति अर्पयेति',
4. ति व' क पाठः।
5. वी न्ते' क पाठः।

कारयित्वा मन्त्राध्वप्रसमिद्धं मूलमन्त्रावाहनषडध्वन्यासादिभिः प्रकर्षेण सन्दीप्तं तम् एभिः पञ्चभिर्घटैरभिषिञ्चेत्। वेति समुच्चयार्थः।।31।।

विवरणम्

दोषभूयस्त्वे विशेषमाह-**दिश्[1]यैश्यामिति**। हेमाश्मगर्भानिति। सुवर्णरत्नानि निक्षिप्येत्यर्थः। अर्णकमलयजनादीति लिपिपङ्कजपूजा मूर्तिभावेनेति सर्वमुक्तम्। सर्वैरुक्तमन्त्रैरिति। मध्यकुम्भे पुरुषादिचतुर्मन्त्रपुरस्कृतेन परमेष्ठिमन्त्रेण पूर्वकुम्भे[2] विश्वादित्रयपरमेष्ठिपुरस्कृतेन पुरुषमन्त्रेणेत्येवं प्रक्रियावाहनादिकं विवक्षितम्। पुनर्मूलेन पूजा स्यात्। तेषामेकैकेनेति। निजनिजतत्त्वमन्त्रेणेत्यर्थः। महति दोष इति। एतदस्माभिः प्रागुक्तम्।।

इदानीं समाधिशुद्धिं दर्शयति-**कृत्वा शुद्धिमिति**। तत्संस्थतत्त्वव्रजमिति। ध्यानाधिवासोक्तरीत्या विस्तारेण भूतादिसंहार उक्तः। अत एव विलाप्य चात्मनि परस्मिन्नित्यमप्यभिहितम्। कार्यं कार्यं कारणे कारणे संहरन् सर्वमपि द्वादशान्तवर्तिनि परमात्मनि विलापयेदिति। साध्विति नाभ्यादिषु वह्निमण्डलादिकल्पनमित्याद्युक्तम्। तात्त्विकमयमिति। तत्त्वव्रजं सृष्ट्वाब्दवृद्ध्यादिविधानमुक्तम्। मन्त्राध्वप्रसमिद्धमिति। लिपिभावनापीठन्यासादिपूर्वकं मन्त्रभावनाषडध्वन्यासा इत्येतत् सर्वमुक्तम्। पुनः पीठपूजादिकृत्वाभिषेचनं, तदुक्तम्-पीठार्चनादिस्नपनावसानमिति। दोष[3]विदिति। दोषभेदे विद्वान्। एतच्चास्माभिः प्रागुक्तम्।।31।।

If the blemishes that need expiations are of a serious nature, the following acts are to be done before pouring the water from the five pots. After the Bimbaśuddhi up to Avagāha the priest shall enter the sanctum and transfer the divinity to himself by invocation from the idol. After doing away with Tattvas like Pṛthvi, the god may be conceived as possessing a divine form. The acts to be followed are- Prāṇāyāma, Aṇḍabheda, Lipiprāṇāyāma, Pīṭhanyāsa and Ṣaḍadhvanyāsa. Now the idol is in perfect form full of divine power. It is then that the five pots are to be emptied on the idol. (31)

पुण्याहावधि शुद्धिरेवमखिले कार्या गुहे वाग्रतः
कौमारं कलशं पुरोवदभिपूर्यावाह्य चार्घ्यादिदः।
पुण्याहं स्नपने विधाय परिपूर्याच्छेषताऽभ्यर्चयेद्
गव्यं तत्सविधे निधाय विकिरं चास्त्रेण संसाधयेत्।।32।।

विमर्शिनी

अखिले देवे एवमुक्तप्रकारेण शुद्धिः पुण्याहावधि पुण्याहप्रोक्षणमवसाने यथा भवति तथा कार्या। गुहे दोषाधिक्ये महाकुम्भप्रोक्षणं कुर्यादित्याह गुहे वेत्यादिना। अत्राग्रतो मार्जानादिभिः शोधिते स्थले षड्दलं मण्डलमालिख्य विरचिते पीठे 'पीठान्ते ब्रह्माणमित्याद्युक्तप्रकारेण ब्रह्मादिभिः साकं पीठपूजां

1. दिश्यैश्यामित्याधिकपाठमाश्रित्य प्रवृत्तेयं व्याख्या।
2. म्भे पर क पाठः।
3. 'षभेद 'क पाठः।

कृत्वा कोमारं कुमारदेवत्यं कलशं निधाय यथोक्तक्रमेण संशोध्योत्तानीकृत्य पुरोवद्धिरण्मयान् पद्मगजशिखिशक्तिवज्रान् निधायाभिपूर्य लिपिपङ्कजमिष्ट्वात्र स्कन्दमावाह्यार्घ्यादिदः अर्घ्याद्युपहारदो भूत्वा स्नपने स्तपनकाले कलशस्य पुण्याहं विधाय अप्च्छेषतः पुण्याहजलशेषेण च परिपूर्य परिवारपूजायां वज्रादेः प्रागि[1]त्यादिभिः सह पुरोवदभ्यर्चयेत्। तत्सविधे तस्योदग्भागस्थस्वस्तिकयोर्गव्यं विकिरं च निधायास्त्रेणाभ्यर्च्य संसाधयेत्।।32।।

विवरणम्

इदानीं बिम्बपुण्याहमाह–**पुण्याहमिति**। उक्तविधिनेति मार्जनोक्तन्यायेनेत्यर्थः। अयं प्रयोगः। देवाग्रतः पात्रे शान्त्युदकं तत्सन्निधौ पात्रद्वये पञ्चगव्यं सर्षपाक्षतञ्च संसाध्य पुनः पीठपूजापूर्वकमावाहनादि कृत्वा स्नपनसमये प्रोक्षणादि कुर्यादिति। शेषेण वेति। पुण्याहशेषेण गव्यशेषेण सर्वत्र प्रोक्षणं सर्षपाक्षतशेषेण विकिरणं चोक्तम्। अत्र गव्यादिकर्मणि शेषविनियोगे वा विकल्पोऽवगन्तव्यः।।

दोषभूयस्त्वे विशेषं जलसम्प्रोक्षणाख्यं प्रस्तौति–**कुयाद्दोष** इति। कुर्याद्दोषे महति[2] तु पुनः प्रोक्षणमित्युद्देशः। शेष एतद्विवरणं मृष्टलिप्त इति प्रासादान्तर्बहिरपि तथा सर्वत इत्यस्य विशेषणम्। मार्जनमुपलेपनञ्चैतल्लैकिकमेव। 'शं नो देवी'रिति सशुचिभिर्जलैः 'इमा आपः' इति गन्धजलैश्च समुक्षणं कार्यम्। पञ्चतत्त्वैर्गव्यैश्चेति। समुक्षेदित्यनुकर्षः। मन्त्रीति शुद्धजलगन्धजलादीनामस्त्रप्रोक्षणादि सर्वं सूचितम्। एतावत् सर्वं साधारणं विशेषानुपादानात्। स्कन्दे गव्यविकिरौ प्रोक्षणानन्तरमिति विशेषः। वक्ष्यति च प्रोक्ष्य च गव्योक्षा[3] विकिरार्पणं चेति।।

कृत्वा भद्रकमित्यादि वैष्णवम्। संरचितपठि इति। शालिवस्त्रादिभिरिति शेषः रत्नगर्भ इति रत्नहिरण्यन्यास उक्तः। पौरुषसूक्तशुद्धजलपूर्णे इति। शङ्खे जलं सम्पाद्य पुरुषसूक्तमूलादिकमुच्चार्य पूरयेदित्यर्थः। विधिवदिति कृत्स्ना पूजोक्ता। मन्त्रविदिति। मन्त्रप्रयोगक्लृप्तिं विद्वानित्यर्थः। त्रितत्त्वान्वयादिति। अयमिह प्रयोगः मूलाधारहृदयभ्रूमध्येषु पद्मं सम्पूज्य 'ओं अं नमः परायात्मतत्त्वात्मने विष्णवे नमः इत्यादिमन्त्रैस्त्रिभिरावाहनन्यायेनावाहनादि कृत्वा पूजयेदिति।।

तयोरिति[4] महाकुम्भे वर्धन्यां च।।

तत्र हुतक्लृप्तिं दर्शयति–पुंविष्णोस्स्वणुभिरिति। 'सहस्रशीर्षे'ति षोडशभिः, 'विष्णोर्नुक'मिति षड्भिः, 'चित्तिःस्रुक्', महाहविर्होता', पृथिवी[5] होता' सूर्यन्ते', पञ्चतत्वैः, 'जितन्ते' 'तत्सवितुः', 'व्याहृतिभिः, हंसश्शुचिषद् षडक्षरेणाष्टाक्षरेण, द्वादशाक्षरेण, विष्णुगायत्र्या, चाज्यं हुत्वा पूर्णाहुतिं विधाय मूलेन समिदादि षड्द्रव्यं जुहुयात्। पञ्चद्रव्यपक्षे घृतं हविराद्यङ्गमेवेति द्रष्टव्यम्।।

द्वयोस्सम्पातशान्तितोयन्निषिच्येति यदुक्तं तत्रापि विशेषं दर्शयेति–**बिम्ब** इति। अयमिह प्रयोगः। कलशपूजानन्तरमन्तःप्रविश्य पीठपूजापूर्वकमावाहनादि कृत्वा द्वादशाक्षरेण पद्मसूत्रकृतं कौतुकं बद्ध्वा

---

1. 'गादित्या 'ख. ग. घ. च पाठः।
2. 'ति प्' क पाठः।
3. क्षामपीति अर्पयेति',
4. ति व' क पाठः।
5. वी न्ते' क पाठः।

तत्र सम्पातस्पर्शनं विधाय महाकुम्भवर्धन्योरपि तत्कृत्वा पुनः प्रासादेऽपि सम्पातस्पर्शनं कर्तव्यम्। तत्रायं विशेषः। तत्रैशेऽग्निमाधायाग्निमुखं कृत्वा पक्वं वास्तोष्पते ते प्रतिमनुयुगलेनेत्याद्युक्तरीत्या व्याहृतिपर्यन्तं हुत्वा पूर्णां कृत्वा स्विष्टकृदादिशेषं समाप्य तत्सम्पातं प्रासाद[1]न्तस्तलोद्देशे संस्पृश्य पुनरेव प्रकृत[2]सम्पातस्पर्शनमिति। वेदाणुमात्रेति वेदमन्त्रैरेवात्र होमः स्यान्न चतुर्द्रव्यदूर्वाहोमोऽपीति भावः।।

प्रातरिति। सा निशा प्रतिष्ठोक्तवदुत्सवेन नेतव्येत्यपि गम्यते। स्विष्ट आसन आवाहिताय विभवे विहितोऽर्घ्यादिर्येनेति समासः। परीव[3]राढ्यं तमिष्ट्वेति। पुनराचमनीयं दत्त्वा परिवारप्रसरणं कृत्वा तैरावृतं देवं सम्पूज्य स्नानं दद्यादिति भावः। करकधारापथेन कुम्भमत्रानयत्विति। ब्रह्मकलशानयनरीत्येति भावः। अथ मन्त्री तेन प्रोक्ष्याभिषिच्यार्चयतु चेति। नीराजनादिपूर्वकं तेन पुण्याहमन्त्रवित्प्रोक्ष्य हुतमन्त्रान् 'शं नो देवीरणोरणीयानि'ति च जपन्नभिषिच्य व्यापकादि कृत्वा पूजां विदध्यादित्यर्थः। अदश्शेषत इति। अमुष्य शेषेणेत्यर्थः। पू[4]जावसानेऽभिषेकशेषेण गर्भगृहनाडीमुखमण्डपान्तर्मण्डलादिस्थलं 'शं नो देवीरणोरणीया'निति ज[5]पन् प्रोक्षेत्। तत्राष्टमूर्त्यादि सर्वं निजनिजमन्त्रैः प्रोक्षेदिति भावः। इति।।

अथ शैवमुच्यते-**कृत्वा स्वस्तिकभद्रकन्त्वित्यादि**। पञ्चब्रह्मभि[6]र्मध्यकगतं महाकुम्भ शङ्खेन पूरयेत्। प्रागाद्यष्टपरिकलशानघोरमन्त्रस्य कलांशैरष्टभिः क्रमेण पूरयेत्। मन्त्रीति पूरणमन्त्रप्रयोगक्लृप्तिं विद्वानित्यर्थः। यद्वावाहनमन्त्रप्रयोगक्लृप्तिं विद्वानिति।।

हुतक्लृप्तिं दर्शयति-**मध्याशास्विति**। व्याशास्विति विदिशः। कर्मविदिति होमविधानविदित्यर्थः।।

सद्यो वेति। कलशपूजानन्तरमेव वेत्यर्थः। उतापरेद्युकन्निशाशेषमुत्सवेन नीत्वा तद्दिने प्रातर्वेत्यर्थः। उपचिते पूजिते इति।।

अथ स्कान्दमुच्यते-**कृत्वा षड्दलमण्डलमित्यादि**। पुरोवदभिपूर्येति। तत्सविध इति। तत्सन्निधौ। वामत स्वस्तिकद्वयं विधाय तत्रेत्यर्थः। संसाधयेदिति पूजाभिमन्त्रणमुक्तम्। अस्त्रप्रोक्षणादि त्वर्थसिद्धम्।।32।।

For all the gods expiation up to Puṇyāha is to be carried out. In respect of Subrahmaṇya after filling up the pot rubbing of the idol and sanctification of Kaumārakalāsa placed in a diagram of eight petalled lotus is needed. Puṇyāha is to be chanted and sprinkled on the pot. Pañcagavya is to be placed on both left and right of the pot. Divinities on the four quarters and those on the four corners are to be worshipped with mantras related to them. (32)

---

1. 'दे',
2. 'तं' घ. च पाठः।
3. 'रि' क पाठः।
4. 'जाभिधाने' च पाठः।
5. 'जलं प्रो',
6. 'भिर्मुग्धक' क पाठः।

विकिरमिह व्रीहियवं तिलतण्डुलमाषसर्षपं च तथा।
दूर्वादर्भकुशाग्रं तुलसीदलनलिनकेसरं चाहुः।।33।।

विमर्शिनी

तत्रत्यं विकिरद्रव्यमाह-**विकिरमिति**। इह व्रीहियवं तिलतण्डुल[1]माषसर्षपं च तथा दूर्वादर्भकुशाग्रं दूर्वादर्भकुशानामग्राणि तुलसीदलं पद्मकेसरं च विकिरमाहुः।।33।।

In this respect- the Vikira- the materials to be strewn about are eleven in number as follows (1) paddy (2) yava (3) sesamum (4)rice (5)black gram (6) mustard (7)Dūrvā- the green grass (8)tips of darbhā (9) tips of Kuśa (10) Tulasī and (11) Kesara - the filament of lotus flower. (33)

आद्यं रौद्रं घटमभिमृशन्तो निजं शाकुनं च
स्वस्तिश्रीदैवतमपि जपेयुः शमाद्यं नृसंज्ञम्।
सूक्तं यस्मिन्प्रभृतिकमथो वातआद्यं द्विमूलं
साङ्गं गायत्र्यणुमपि तथा षड्द्विषण्णामतारान्।।34।।

विमर्शिनी

अथो मूर्तिपाः घटमभिमृशन्तः स्पृष्टवन्तः आद्यम् 'अग्निमील' इत्याद्यं सूक्तं।, रौद्रं 'कद्रुद्राये'त्याद्यं, श्रीरुद्रं च, निजम् 'अग्निर्होता नो अध्वर' इत्याद्यं शाकुनं 'कनिक्रददि'त्याद्यं, स्वस्तिश्रीदैवतं 'स्वस्ति नो मिमीता'मित्याद्यं 'हिरण्यवर्णा'मित्याद्यं च, शमाद्यं 'शं न इन्द्राग्नी' इत्याद्यं, नृसंज्ञं पुरुषसूक्तं, 'यस्मिन् प्रभृतिकं' 'यस्मिन् वृक्षे सुपलाश' इत्याद्यं, वात आद्यं 'वात आवात्वि'त्याद्यं, साङ्गम् अङ्गसहितं द्विमूलं मूलमन्त्रद्वयं, गायत्र्यणुमपि, षड्द्विषण्णामतारान् षण्मन्त्रान् द्वादशनाममन्त्रान् प्रणवं च जपेयुः।।34।।

विवरणम्

आद्यं वेदादिसूक्तमनुवाकं वा। निजम् 'अग्निर्होता न' इति कौमारसूक्तम्। शमाद्यं 'शं न इन्द्रग्निी'ति। सूक्तं। नृसंज्ञं पुरुषसूक्तम्। यस्मिन्[2] प्रमृतिकं यस्मिन् वृक्ष इत्यन्यत् कौम[3]ारसूक्तम्। वात आद्यं वेदापवर्गं षड्द्विषण्णामतारान् षण्मन्त्रान् द्वादशनाममन्त्रान् प्रणवं च जपेयुः।।34।।

The priest and his assistant shall sprinkle sacred water and chant Vedic hymns, Rudrasūkta and Kumārasūkta, Śakunasūkta,Swastisūkta, Samnosūkta, Śrisukta and Nṛsamjñasūkta in this connection. The god being Subrahmanya, Skandagāyatrī, Ṣaṇmantra and Dvādaśa hymns along with Praṇava may also be chanted. (34)

स्नाने तत्कलशेन देवमभिषिच्याब्लिङ्गमूलाह्वयै-
स्तच्छेषेण कुशद्विजद्रुमशमीशाखाग्रकैः प्रोक्ष्य च।

---

1. 'लं' क पाठः।
2. 'न् वृ' क पाठः।
3. 'कु' च पाठः।

गव्योक्षां विकिरार्पणं च सुविधायैतत्त्रिशेषार्पणं
कृत्वा तत्परिषत्सु शेषभुजि चाथो देवमभ्यर्चयेत्।।35।।

विमर्शिनी

अथान्तर्गत्वा पीठपूजापुरस्सरं देवमावाह्य स्नाने स्नानकाले तत्कलशेनाभिषिच्य तच्छेषेण कुशद्विजद्रुमशमीशाखाग्रकैः कुशपलाशशम्यग्रैः अब्लिङ्गमूलाह्वयैः 'आपो हिष्ठा'दिभिर्मूलाभ्यां षण्णामभिर्द्वादशनामभिश्च प्रोक्ष्य तथास्त्रमन्त्रेण गव्योक्षां विकिरार्पणं च सुविधाय तत्परिषत्स्वपि एतत्त्रिशेषार्पणं कलशजलगव्यविकिरैरर्पणं कृत्वा शेषभुजि धूर्तसेनेऽपि कृत्वाथो देवमभ्यर्चयेत्।।35।।

विवरणम्

स्नान इति। देवे पीठपूजापूर्वकमावाहनादि कृत्वा स्तपनसमय इत्यर्थः। अब्लिङ्गमूलाह्वयैरिति। पुण्याहमन्त्रैर्मूलद्वयेन षण्णामभिर्द्वादशानामभिश्चेत्यर्थः। गव्यविकिरयोरस्त्रमन्त्रः। शेषभुजि चेति। तत्र समाप्तिः सूचिता। स्थलेऽपि सर्वत्र प्रोक्षणाद्युचितमेव। अथो देवमभ्यर्चयेदिति प्रकृतपूजा परिसमापनमुक्तम् इति।।35।।

Once the god is to be bathed with pot full of sanctified water, Praṇava, Puṇyāha and Mūlamantra are to be chanted. While sprinkling the water the priest shall take in his hand Kuśa grass, twigs of Palāśa and twigs of holy grass. Pañcagavya is also to be splashed on the idol using these twigs and things are to be scattered. Attendants, Nirmālyadhāri and other guards are to be properly attended to before the god is finally worshipped in full measure. (35)

निमित्तवित्ताद्युपपत्तिक्लृ[1]तपारायणाढ्यं प्रविधाय चैवम्।
सामान्यशुद्धिं विदधीत तत्तद्दोषोपशान्त्यै विहितं हुतं च।।36।।

विमर्शिनी

निमित्तवित्ताद्युपपत्तिक्लृप्तपाषारायणाढ्यं निमित्तस्यार्थस्य, आदिशब्देन कालदेशादेरप्युपपत्त्या कल्पितेन वेदत्रयजपपारायणेनाढ्यं परिपूर्णं यथा भवति तथा सामान्यशुद्धिमेवं विधाय तत्तद्दोषोपशान्त्यै विहितं हुतं च विदधीत।।36।।

विवरणम्

अथेदानीं शुद्धिप्रकरणं सविशेषमुपसंहरन् प्रायश्चित्तप्रकरणमारभते निमित्तवित्ताद्युपपत्तिक्लृत्प्येति। निमित्तानां वित्तस्य देशकालादीनाञ्चोपपत्या या क्षालनादीनां क्लृप्तिरिहैतावत् कार्यमिति नियमस्तयेत्यर्थः। यद्यपि निमित्तोपपत्तिवशादेव साक्षान्नियमः किन्तु वित्ताल्पत्वे बहुदिनधारादिदुष्करमेवेति वित्तादिवशादपि स्यान्नियमः। पारायणाढ्यमिति समन्ताद्वेदोद्घोषणं, विशेषोऽप्युक्तः धारायां पूजाविधानात्ततः प्रभृत्येतत् प्रवृत्तिः। निमित्तादिवशान्नियमोऽत्रापि तुल्य एव। सामान्यशुद्धिमिति प्रायश्चित्तानि

1. 'प्त्या' क पाठः।

सामान्योत्पात[1]ाद्‌भुतादिभेदतो भिन्नानि शुद्धयस्तु तेषु सामान्यभूता इति भावः। अत एवोक्तं तत्तद्दोषोपशान्त्यै विहितमिति।।36।।

Considering the seriousness of the blemishes, the financial position of the owner and the situation of the space and time expiations like Catuḥśuddhi and Bimbasuddhi are to be carried out in the proper way. (36)

अर्धेन्दुरूपे दिशि दक्षिणस्यां सुरालयस्यारचितेऽग्निकुण्डे।
महेशविष्णवीशगुहप्रभेशविघ्नेश्वरेषु प्रथमं जुहोतु।।37।।

विमर्शिनी

तत्र शङ्करप्रोक्तादीन् होमान् विधत्ते–महेशविष्णवीशगुहप्रभेशविघ्नेश्वरेषु पञ्चसु देवेषु प्रथमं प्रायश्चित्तादिहोमेभ्यः पूर्वं सुरालयस्य प्रासादस्य दक्षिणस्यां दिशि अर्धेन्दुरूपे अर्धचन्द्राकारेणारचितेऽग्निकुण्डे जुहोतु।।37।।

विवरणम्

प्रथमं जुहोत्विति। अत्रायमभिप्रायः। शिवादिषु तावदयमेव प्रायश्चित्तहोमः। दोषभूयस्त्वे तु तदनन्तरं प्रागुक्तहोमोऽपि स्यादिति। दुर्गायामपि समानमेतन्।।37।।

Before initiating the sacrifices of expiation in respect of Śiva, Śankaranārāyaṇa, Subrahmaṇya, Śāstā and Gaṇesa, towards the right side of the sanctum a sacrificial pit with the shape of a crescent may be prepared and rites be carried out. (37)

वज्राणूल्लिखितेऽस्त्रमन्त्रविहितोक्षेऽत्राञ्चिते विष्टरे
स्थाणौ सेशहरौ सवामभुवनेश्यावाह्य चेष्ट्वानया।
सद्यात्तेशसुजप्तघोरमहिताजक्षिप्तहृत्पूजिते
पञ्चाग्नौ शिववामघोरनृशिवैः कुर्यात् क्रमेण क्रिया[2]ः।।38।।

विमर्शिनी

तत्र शङ्करप्रोक्ताख्यस्य होमस्य पूर्वोक्तादग्निजननाद् विशेषमाह–**वज्राणूल्लिखित** इति। सेशहरौ स्थाणौ वज्राणूल्लिखिते द्वादशपटले वक्ष्यमाणः प्रणवद्वयमध्यगतो हुंफट्कारो वज्रमन्त्रः तेनोल्लेखने कृते अस्त्रमन्त्रविहितोक्षे अस्त्रमन्त्रेण विहिता उक्षा उक्षणं यत्र अत्र अञ्चिते पूजिते विष्टरे पीठे सवामभुवनेश्या वामदेवयुक्तया भुवनेश्वर्या आवाह्य अनया भुवनेश्वर्या च सद्यात्तेशसुजप्तघोरमहिताजक्षिप्तहृत्पूजिते सद्योजातेनात्ते गृहीते ईशानेन सुतरां जप्ते अघोरेण पूजिते अजेन सद्योजातेन निक्षिप्ते प्रासादहृदयेन पूजिते चाग्नौ शिववामघोरनृशिवैः ईशानवामदेवाघोरतत्पुरुषेशानैः क्रमेण गर्भाधानपुंसवनसीमन्त-जातकर्मनामकरणाख्याः पञ्च क्रियाः कुर्यात्।।38।।

---

1. 'ताद् भूता' क पाठः।
2. 'याः।। भी' ख पाठः।

विवरणम्

सद्यात्तेति सद्येनादाय नाभौ निधाय तत्संस्कारानन्तरमीशानेनाभिमन्त्र्याघोरेण सम्पूज्य सद्येनायतन आधाय प्रासादहृदयेन पूजयेदिति। शिव ईशानः पञ्च क्रिया इति नामावसानाः।।38।।

For Śiva and Śaṅkaranārāyaṇa using the Astramantra, Varāhamantra and Bhuvaneśvarī mantra invocation of the deities are to be made. Thereafter the five ritualistic actions may be initiated using the mantras of Īśāna, Vāmadeva, Aghora, Tatpuruṣa and again Aghora. The five actions contemplated are Garbhādhānam (conception) Pumsavana (a ritual to cause the birth of a son) Sīmantonnayana (parting line of hair), Jātakarma (ceremony at the birth of a child) and Nāmakaraṇa (the naming ceremony). (38)

प्रारभ्य तत्राग्निमुखं निजोक्तनीत्यास्य पार्श्वे कलशं प्रपूज्य।
पक्वं च पञ्चप्रणवादिनास्येनाहृत्य पूजामनुभिश्च सर्पिः।।39।।

भीमाजाह्वयवामवक्त्रमनुभिः सौदुम्बरीमार्गजा-
ज्यान्नान्यष्टसहस्रकं वसुशतं पुंसा तिलान् सर्षपान्।
मुद्गव्रीहियवान् घृताक्तनवदूर्वाग्राष्टसाहस्र-
मप्येतेनाष्टशतं जुहोतु दधिमध्वाज्यानि जुंसाणुना।।40।।

विमर्शिनी

तत्र शङ्करप्रोक्ते निजोक्तनीत्या स्वगृह्योक्तक्रमेणाग्निमुखं प्रारभ्य परिधिस्थापनात् पूर्वं तत्पार्श्वदेशे कलशं प्रपूज्य परिधिस्थापनाद्यनन्तरं पञ्चप्रणवादिना आस्येन तत्पुरुषेण पक्वं पूजामनुभिः सर्पिश्चाहृत्य भीमाजाह्वयवामवक्त्रमनुभिः अघोरसद्योजातवामदेवतत्पुरुषमन्त्रैः सौदुम्बरीमार्गजाज्यान्नानि उदुम्बरापामार्गघृतहवींषि प्रत्येकमष्टसहस्रं जुहोतु। तिलान् सर्षपान् मुद्गव्रीहियवांश्च पुंसा तत्पुरुषेण वसुशतमष्टोत्तरशतं च जुहोतु। घृताक्तनवदूर्वाग्राष्टसाहस्रं घृताक्तानां नवीनानां दूर्वात्रिकाणाम् अष्टोत्तरं सहस्रमपि एतेन तत्पुरुषेण जुहोतु। दधिमध्वाज्यानि प्रत्येकमष्टशतं जुंसाणुना मृत्युंजयमन्त्रेण च जुहोतु।। 39-40।।

विवरणम्

एतेनेति। पुंसा दधिमध्वाज्यान्यष्टशतमित्यन्वयः।।40।।

Having started the rite of Agnimukha according to ones own domestic practice, towards the right of the sacrificial pit a Pītha is to be arranged on a Svastika diagram. Using Pañcapraṇava and Tatpuruṣa fruits are to be offered along with articles like ghee etc. For homa the materials are as follows. Using the Aghora mantra, Ficus Racemosa and chanting Sadyojāta, roots of Achyranthes aspera, with Vāmadevamantra ghee and with Tatpuruṣamantra havis-cooked rice may be put on the sacrificial pyre 1008 times each. With Tatpuruṣa mantra sesamum, mustard, Phaseolus Mungo,

paddy and Yava 108 times. Again using Tatpuruṣa mantra the tips of Durva grass be put in the fire 1008 times. Using Mṛtyuñjaya mantra ghee and havis are to be poured 108 times. Thereafter the sacrifice called Sviṣṭakṛt may be performed. The leftovers of these items may be kept apart as Sampāta in a pot. (39-40)

आज्यं प्राग्वज्जनितदहनेऽत्र प्रधानाति कृत्वा
षड्भिः षड्विंशतिपरिमितैः स्वाह्वयैश्च प्रभेशे।
षण्मूलाणुद्वितयजिनवर्णाणुमिर्बाहुलेये
षड्द्वन्द्वाख्यामनुभिरपि भूरादिमन्त्रैश्च हुत्वा।।41।।
बैल्वीरार्येऽत्र नैपीः शरभुवि समिधोऽथ द्वयोराज्यमन्त्रं
षण्मन्त्रैर्लाजराजीयवतिलमपि हुत्वा शतं द्व्युत्तरं तु।
आज्यं क्षीरं दधि क्षौद्रमपि वसुशतं व्याहृतीभिः क्रमेण
त्रिस्वाद्वक्तास्त्रिसाहस्त्रकमपि जुहुयात् जुंसमन्त्रेण दूर्वाः।।42।।

विमर्शिनी

अत्र रेवन्तप्रोक्तस्कन्दप्रोक्तयोर्होमयोः प्राग्वद् अष्टक्रियाभिर्जनितदहने प्रधानादि पक्वहोमादि-पूजामन्त्रहोमान्तं कृत्वा प्रभेशे द्वादशे पटले वक्ष्यमाणैः षड्भिः षडविंशतिपरिमितैश्च स्वाह्वयैः स्वनामभिः 'ओं रेवन्ताय स्वाहा' इत्यादिभिः, बाहुलेये स्कन्दे षण्मूलाणुद्वितयजिनवर्णाणुभिः षण्मन्त्रैः मूलमन्त्रद्वयेन गायत्र्या च षड्द्वन्द्वाख्यामनुभिः द्वादशनाममन्त्रैरपि भूरादिमन्त्रैरपि व्याहृतिभिश्चाज्यं हुत्वा, आर्ये बैल्वीः समिधः, शरभुवि नैपीः कदम्बोद्भवाश्च समिधः। अथ द्वयोः आर्यस्कन्दयोः आज्यमन्त्रं लाजराजीयवतिलमपि समिदादिसप्तद्रव्यं षण्मन्त्रैः स्वस्वषण्मन्त्रैः सप्तदशकृत्वः आवर्तितैः द्व्युत्तरं शतं हुत्वा आज्यं क्षीरं दधि क्षौद्रमपि व्याहृतीभिश्चतसृभिः क्रमेण वसुशतमष्टोत्तरशतं त्रिस्वाद्वक्ताः त्रिमधुरसिक्ता दूर्वाश्च जुंसमन्त्रेण मृत्युञ्जयेन त्रिसाहस्रमपि जुहुयात्।।41-42।।

विवरणम्

षट्शब्देन षण्णामग्रहणम्। षट्द्वन्द्वाख्यामनुभिरिति द्वादशनामानि।।41।।

षण्मन्त्रैः इति। षण्णां सप्तदशावृत्त्या द्व्युत्तरशतसंख्यासिद्धिः।।42।।

For the Proktahoma of Śāstā the aforesaid eight actions are to be initiated first and sacrificial fire is to be kindled. Ghee is to be poured using Revanta mantra and chanting of 26 synonyms of god. For Subrahmaṇya all the above mantra in addition to Bhūrādimantra is needed for pouring ghee. Other hymns required are Sanatkumāra, Mūlamantra, Gāyatri, twelve synonyms of Skanda etc. For Śāstā the Samit to be put in fire is Bilva and for Subrahmaṇya is Neepa (the Kadamba tree). For both the materials for oblations are (1) ghee (2) cooked rice (3) parched rice (4) mustard,(5) yava (6)sesamum. Other items are ghee milk, curd and honey. These are to be put 108 times. Dūrvā grass dipped in Trimadhura may be put in the fire

3000 times. This is to end with the Sviṣṭakṛt homa and the leftovers are to be kept apart as Sampāta in a pot. (41-42)

षण्मन्त्रैर्धूतमेकशो वसुशतं वैतैरधीवासगं
द्रव्यं बिल्वसमिद्घृतादिकमपूपान्तेऽत्र वा लड्डुकम्।
भूराद्यैः क्रमशो दधिस्तनजमध्वाज्यं गणानामृचा
गौलं चाष्टशतं जुहोतु गणपे गव्यं च मूलाणुना।।43।।

विमर्शिनी

गणपे पूजामन्त्रहोमान्ते षण्मन्त्रैरेकशो वा वसुशतम् अष्टोत्तरशतं वा प्रथमं घृतं जुहोतु। पुनरेतैः षण्मन्त्रैः अधीवासगम् अधिवासगतं बिल्वसमिद्घृतादिकं बिल्वसमिदाज्यचरुलाजपृथुक-लड्डुकापूपशष्कुल्याज्यानि नव द्रव्याणि। अत्र विघ्नप्रोक्ते अपूपान्ते वा लड्डुकाष्टशतं च जुहोतु। पृथुकादिनामान्युक्तानि। पुनर्भूराद्यैः क्रमशो दधिस्तनजमध्वाज्यं दधिक्षीरमध्वाज्यानि चाष्टशतं जुहोतु। गणानामृचा गौलं च, मूलाणुना गव्यं चाष्टशतं जुहोतु। अत्र गव्यशब्देन घृतमेवोच्यते इति केचिदाहुः। तथा क्रियासारे वैघ्ने–

विघ्नगायत्रिया पक्वं षण्मन्त्रैर्जुहुयाद् घृतम्।
अष्टोत्तरशतं भूयः समिदादीनि होमयेत्।।
पूर्णाहुतिं तु मूलेन सर्वत्रैव ददेत् पृथक्।
बैल्वास्तु समिधः प्रोक्ता हुनेदष्टोत्तरं शतम्।।
समिदाज्यचरून् लाजान् पृथुकापूपलड्डुकान्।
क्रमाद् वै शष्कुलीनाज्यं व्याहृतीभिरतः परम्।।
पृथक् पृथक् समस्ताभिरन्त्यमष्टशतं पृथक्।
दधि क्षीरं मधु घृतं गणानां त्वेत्यृचा गुलम्।।
मूलेनाष्टोत्तरशतं गव्यं होमं समापयेत्।।

इति।।43।।

विवरणम्

षण्मन्त्रैरिति वसुशतं वेति अष्टोत्तरसहस्रं वेति विकल्पोऽवबोद्धव्यः। पूर्वत्र शतं व्युत्तरं त्वित्यत्राप्येवमिष्यते। द्व्युत्तरसहस्रं वा त्रिसहस्रं वेति। अत्रापूपान्ते वा लड्डुकमिति। अधिवासे हि तावत् समित्सर्पिषी अन्नलाजपृथुकाख्यान् लड्डुकापूपकान् शष्कुल्याज्यमिति द्रव्यनवकमुक्तम्। इह तु तथा वा अपूपलड्डुकेत्येवं वा क्रम इत्यर्थः। गव्यञ्चेति। अष्टशतमित्यनुकृष्यते।।43।।

For the sacrifice related to Gaṇesa after the kindling of fire Ṣaṇimantra is to be used 18 or 108 times for putting materials in the fire. The items are Bilva, ghee, havis (cooked rice), parched rice, bruised and dried rice, sesamum, cake with molasses, rice cake and ghee. These materials shall be put 108 times in the fire. The mantra "Gaṇānāmtvā" is to be chanted. After completion of the Sviṣṭakrt homa the Sampāta may be kept apart in a pot. (43)

विश्वद्रव्यैरिति शिवशिवश्रीशयोः स्कन्दशास्त्रो-
रेकन्यूनैर्द्विरदवदने द्व्युत्तरैश्चापि [1]देवम्।
हुत्वा मन्त्रैर्हवनविहितैः स्नापयेत् तद्घटादिभ-
स्तत्र स्थानाद्यधिगतमहोत्पातदोषोपशान्त्यै।।44।।

विमर्शिनी

शिवशिवश्रीशयोः विश्वद्रव्यैः त्रयोदशद्रव्यैः स्कन्दशास्त्रोः एकन्यूनैः द्वादशद्रव्यैः, द्विरदवदने द्व्युत्तरैः पञ्चदशद्रव्यैश्चापि हुत्वा होमं कृत्वा हवनविहितैः होमार्थमुक्तैर्मन्त्रैः तद्घटादिभः तत्तद्धोमकलशजलैः तत्र तत्र स्थानाद्यधिगतमहोत्पातदोषोपशान्त्यै स्थानादौ संभूतानां 'क्षेत्रे मृतिर्जननमि'त्याद्युक्तानां महोत्पातदोषाणामुपशान्त्यै देवं स्नापयेत्।।44।।

विवरणम्

विश्वद्रव्यैस्त्रयोदशद्रव्यैः। अदसीयेनेति एतदीयेन मन्त्रीति हुतमन्त्रजप उक्तः।।44।।

For Siva and Sankaranarayana the aforesaid 13 items are to be offered in fire. While for Subrahmanya and Śāstā one less each. For Ganapati the number of materials is 15. After such sacrifice the pot full of materials are required to be poured in the idol in order to expiate the blemishes caused by reasons like death, birth etc., in the temple campus. (44)

अथाग्रतोऽग्निं प्रजनय्य कुण्डे
तत्पार्श्वदेशे कलशं प्रपूज्य।
कुर्यात् कृशानौ परिधानपक्व-
होमार्चनामन्त्रहुतिक्रियाद्यम्।।45।।

विमर्शिनी

प्रायश्चित्तहोमं वक्ति–अथाग्रत इति। अथ देवस्याग्रतः कुण्डेऽग्निं यथोक्तक्रमेण प्रजनय्य तत्पार्श्वदेशे कलशं च प्रपूज्य कृशानौ परिधानपक्वहोमार्चनामन्त्रहुतिक्रियाद्यां परिधिस्थापनादिपक्वहोमपूजा-मन्त्रहोमपूर्णाहुतीः कुर्यात्।।45।।

विवरणम्

तत्र प्रथमं सामान्योत्पातविषये प्रायश्चित्तमभिधत्ते–तत्राग्रतोऽग्निमित्यादि। परिधानं परिधिनिधानम्। पक्वमग्न्यलङ्करणपीठपूजादिपूर्वकं स्वकाले प[2]क्वहोमः, अर्चनाम[3]न्त्रहुतिक्रियापूजामन्त्रैराज्यहोमः। आदिशब्देन पूर्णाहुत्याद्यवशेषः उक्तः।।45।।

For expiatory sacrifice the priest shall kindle fire in a pit in front of the

---

1. 'होमं। कृत्वा संस्नापयतु कलशेनादसीयेन देवं मन्त्री पातादिमृतिजननस्तेनवेगादिकेषु'।। क पाठः।
2. 'ञ्च'
3. 'न्त्रा'

shrine. Placing pots near it is to be sanctified. The fire has to be bordered before items are put . Now fruits and other materials are to be put as oblations along with the chanting of mantra. (45)

मन्त्रैः पञ्चकचोदितैस्त्रिगुणसाहस्रं घृतं साष्टकं
साहस्रं समिदाज्यशालितिललाजानां पृथङ् मूलतः।
भूराद्यैर्जुहुयात् पलाशसमिधोऽथ द्वादशोर्ध्वं शतं
सावित्र्याष्टशतं सदुग्धदधिमध्वाज्यानि चान्ते पृथक्॥46॥

विमर्शिनी

पञ्चकचोदितैः पञ्चकाभिषेके कथितैर्मन्त्रैः त्रिगुणसाहस्रं स्वस्वपञ्चमन्त्रैः षट्छतावृत्त्या त्रिसहस्रं घृतं जुहुयात्। समिदाज्यशालीतिललाजानां पञ्चानां द्रव्याणां साष्टकं साहस्रं पृथगष्टोत्तरसहस्रं मूलतो जुहुयात्। अथ पलाशसमिधः भूराद्यैरष्टविंशत्यावर्तितैश्चतुर्भिर्मन्त्रैः द्वादशोर्ध्वं शतं च, पुनरन्ते सदुग्धदधिमध्वाज्यानि चत्वारि सावित्र्या 'तत्सवितुरि'त्याद्यया पृथगष्टशतं जुहुयात्॥46॥

विवरणम्

पञ्चकचोदितैरिति। सर्वेषु निजनिज[1]पञ्चतत्त्वैः शिवे पञ्चब्रह्मभिरित्यर्थः। पञ्चभिः षट्च्छतहोमे त्रिसहस्रसंख्या स्यात्। मूलतस्साष्टकं साहस्रमिति योजना। चतुर्व्याहृतिभिरष्टाविंशतिहोमे द्वादशोत्तरशतं लभ्यते। सावित्र्येति शुद्धसावित्री गृह्यते॥46॥

With the mantra indicated in connection with Pañcābhiṣeka ghee may be poured in the fire 3000 times. Then with Mūlamantra items like Samit, ghee, paddy, sesamum and parched rice 1008 times each. Then with Bhūrādi mantra 112 twigs of Palāśa are to be put into the sacrificial fire. At the end using Sūryagāyatrī curd, honey and ghee shall be put 108 times each. (46)

एकत्रेति समन्ततोऽस्य चतसृष्वाशासु चाष्टासु वा
तद्वद्राशिषु वा विहृत्य दहनं कुण्डेषु तन्मत्रतः।
तत्तद्दोषबलाबलानुसरणाद्धुत्वा समुक्तक्रमात्
तत्सम्पातघटैर्गुरुः स्नपितयेद् देवं च मध्यादिभिः॥47॥

विमर्शिनी

तत्तद्दोषबलाबलानुसरणात् तस्य तस्य दोषस्य दौर्बल्यप्राबल्यानुसारेण इत्येकत्र कुण्डे वास्य कुण्डस्य समन्ततः चतसृष्वष्टास्वाशास्वपि वा तद्वद्राशिषु मेषादिद्वादशराशिगतस्थानेषु वा कुण्डेषु दहनमग्निं तन्मन्त्रतः विहरणोक्तमन्त्रैर्विहृत्य गुरुमूर्तिपाः समुक्तक्रमात् हुत्वा गुरुरेव मध्यादिभिस्तत्सम्पातघटैर्देवं स्नपितयेत्॥47॥

---

1. 'जत' क पाठः।

विवरणम्

राशिषु वेति। मेषादिक्रमेण विह[1]रणाभिषेकौ भवतः। तन्मन्त्रत इति। तत्तद् दोषबलाबलानुसरणादिति।

प्रायश्चित्तं त्रिवर्गज्ञस्नपने त्वधमेऽधमम्।
मध्यमे मध्यमं कुर्यात् सर्वेषूत्तम उत्तमम्।।

इति। त्रिवर्गज्ञः स्नपनानां प्रायश्चित्तानाञ्चाधमादिवर्गत्रयाभिज्ञ इति। तदुक्तं–

'चत्वारो मूर्तिपा हीने मध्येऽष्टौ द्वादशोत्तमे।'

इति। मन्त्री स्नपितयेदिति हुतमन्त्रान् जपन् देवं स्नपितं कुर्यादित्यर्थः। मध्यादिभिरिति क्रमेणैव स्नपनमुक्तम्।।47।।

Thus expiatory sacrifice can be done in a single pit or in several pits around the shrine depending upon the seriousness of the blemish. There can be one pit each in the eight corners depending upon the zodiacal sign. Fire shall be kindled with suitable hymns. After collecting the sacrificial pots the water beginning with the central shall be poured on the idol as expiation. (47)

ब्र[2]ाह्मी मूलविभावसौ परिहुताशेष्वब्धिसङ्ख्येषु चेत्
क्षीर्युत्थाष्टसु चेत् पलाशखदिराश्वत्थोत्थिता प्लक्षजा।
प्रागादिक्रमतः समिद् वटभवा बैल्वी तथौदुम्बरी
काश्मर्यप्यखिलेषु वा द्विजभवा सैवार्कसङ्ख्येषु चेत्।।48।।

विमर्शिनी

मूलविभावसौ मध्यकुण्डस्थाग्नौ **ब्राह्मी** पालाशी समित्। **परिहुताशेषु** परितः स्थितेष्वग्निषु **अब्धिसंख्येषु** चतुस्संख्येषु **चेत् क्षीर्युत्था** स्वस्वतोरणक्रमेण क्षीरवृक्षोद्भवा समित्। **परिहुताशेष्वष्टसु चेत् पलाशखदिराश्वत्थोत्थिता** पलाशोत्थिता खदिरोत्थिता अश्वत्थोत्थिता च **प्लक्षजा वटभवा बैल्वी औदुम्बरी काश्मर्यपि प्रागादिक्रमतः** समित्। **अखिलेष्वपि** परितः स्थितेषु चतुर्ष्वष्टसु च **द्विजभवा** पालाशी वा। **अर्कसंख्येषु** द्वादशसु **चेत् सैव** पालाश्येव समित् स्यात्।।48।।

विवरणम्

[3]**ता वा स्वतोरणभुवोऽथवेति** योजनीयम्। निजनिजतोरणक्रमेणैव दिक्कुण्डक्रमोऽपि द्रष्टव्यः। तथेति पलाशसमिद्विकल्पानुकर्षणार्थ[4]:।।48।।

---

1. 'क' क्र पाठः।
2. 'ब्रह्मद्रुजास्तु समिधो गुरुकुण्डहोम्यास्ता वा स्वतोरणभुवोऽथ चतुर्दिशासु। ईशाधिवासविहिताश्च तथाष्टदिक्षु पालाश्य एव दहनेषु पुनर्दिषट्सु। पत' क. ख ग. पाठः।
3. 'ब्रह्मद्रुजास्तु' इति पाठमनुसृत्येयं व्याख्या।
4. 'र्थः।। दुर्गा' क पाठः।

In the central sacrificial pit the Samit shall be Palāśa while in the others the ones from the four milky trees are enjoined in a particular order like (1) Palāśa (2) Khadira (3) Aśvattha(Ficus Religiosa (4) Plakṣa (Ficus Venosa) (5) Nyagroda (Ficus Indica) (6) Bilva (7)Audumbari (Ficus Racemosa) (8) Kāśmarī. It could very well be Palāśa in all the eight localities especially when the sacrificial pits are twelve in number. (48)

पतनादिषु दोषेषु प्रकरोतु हरौ हरे च हुतमेवम्।
शिवशार्ङ्गिण्युभयं वै शेषेष्वपि कैश्चिदिष्यते कुहचित्।।49।।

विमर्शिनी

पतनादिषु 'बिम्बस्य पातचलनादिरि' त्याद्युक्तेषु दोषेषु सत्सु हरौ हरे च एवं हुतं होमं प्रकरोतु। शिवशार्ङ्गिणि उभयं द्विविधं होमं प्रकरोतु। शेषेषु देवेषु कुहचिद् विघ्नादिष्वपि कैश्चिदिष्यते।।49।।

विवरणम्

पतनादिष्विति। बिम्बस्य पातचलनादिरित्याद्युक्तेषु। मृतिजननस्तेनवेशादिकेष्विति। वै शेषेष्वपि कैश्चित् कुहचिदिष्यते इति। दुर्गायां गणपतौ शास्तरि चेत्यर्थः।।49।।

If the blemish happens to be the falling of the idol for Viṣṇu and Śiva similar sacrificial rites are a must. For Śaṅkaranārayaṇa there could be two types of sacrifices. For all other gods similar sacrificial rites are necessary. (49)

प्रासादस्य त्रिकोणं शशिदिशि यमदिश्यर्धचन्द्राभमेतत्
कुण्डं चाधाय वह्निं पृथगथ जनयित्वा समुक्तक्रमेण।
होमं कुर्यात् कुमार्या हरिवरुणदिशाश्चापि तुर्यश्रवृत्ते
कुण्डे दोषे गरिष्ठे चरतु हवनकर्मोत्तरैन्द्रादिक्लृप्त्या।।50।।

विमर्शिनी

दुर्गायां प्रायश्चित्तहोमविशेषमाह-**प्रासादस्येति।** (कुमार्यां) प्रासादस्य शशिदिशि उत्तरभागे त्रिकोणं कुण्[1]डं, यमदिशि दक्षिणभागेऽर्धचन्द्राभम् एतत् प्रस्तुतं कुण्डं चाधाय समुक्तक्रमेण सप्तक्रियाभिर्वह्निं पृथग् जनयित्वाथ होमं कुर्यात्। होममिति जातावेकवचनम्। दोषे गरिष्ठे गुरुतरे सति हरिवरुणदिशोः प्राक्पश्चिमदिशोश्चापि तुर्यश्रवृत्ते चतुरश्रे वृत्ते चापि कुण्डे तद्वदग्निं पृथग् जनयित्वा उत्तरैन्द्रादिक्लृप्त्या हवनकर्म होमं चरतु। तत्र उत्तरैन्द्रादिक्लृप्त्येति उत्तरप्राग्दक्षिणपश्चिमदिक्क्रमेणेति केचिद्, उत्तरदक्षिणप्राक्पश्चिमदिक्क्रमेणेति केचिदाहुः।।50।।

विवरणम्

दुर्गायां प्रायश्चित्तान्तरमाह-**प्रासादस्येति।** चकारो भिन्नक्रमः। अर्धचन्द्राभञ्च कुण्डमिति। आधायेति। विरचय्येत्यर्थः। समुक्तक्रमेणेति मण्डपसंस्कृताविति शेषः। हरिशब्देनेन्द्रग्रहणं कुण्डे इति द्विवचनम्।

---

1. 'ण्डद्वयं चा' ङ पाठः।

अपि चेत्याधाय पृथगग्निञ्जनयित्वेत्येतदनुकर्षणार्थः। उत्तरादिक्रमेणेति। द्विकुण्डयोगे उदग्दक्षिणत इति, चतुष्कुण्डयोगे उदक् प्राक् दक्षिणतः पश्चादिति च क्रमेणेत्यर्थः।।50।।

In the matter of expiation in the case of Durgā towards the northern direction of the shrine a sacrificial pit of the shape of a triangle and on the south side another pit of the shape of a crescent may be made. After performing the domestic rituals from Garbhādhāna (conception), Cuḍākarma (first hair cut) fire is to be kindled. If the blemish is more serious a pit of square shape shall be made in east and another of the shape of circle may be made in the west. Each is to be kindled with fire from the eastern direction onwards. (50)

हुत्वात्र प्रथमं दिगुत्तरशतं दुर्गाभिराज्यं ततो
जाताद्यैर्निजमूलतश्च पृतनाद्यैश्च त्रिभिर्व्युत्क्रमात्।
मन्त्रैरष्टशतं हुनेत् खदिरविप्राश्वत्थकप्लक्षजा
नैयग्रोधमयूरबिल्वसमिधः सौदुम्बरीः साञ्जलीः।।51।।

विमर्शिनी

अत्र होमे प्रथमं दुर्गाभिः 'जातवेदस' इत्यादिभिः पञ्चभिर्दुगाभिः दिगुत्तरशतं द्वाविंशत्यावृत्त्या दशोत्तरशतमाज्यं हुत्वा ततो जाताद्यैः 'जातवेदस' इत्याद्यैः पञ्चभिः, निजमूलतः पृतनाद्यैः 'पृतनाजितमि'त्याद्यैः व्युत्क्रमात् त्रिभिः 'पृतनाजितं' 'विश्वानि ना' 'अग्ने त्वं पारये'ति त्रिभिः एवं नवभिर्मन्त्रैः खदिरविप्राश्वत्थकप्लक्षजाः नैयग्रोधमयूरबिल्वसमिधः सौदुम्बरीः साञ्जलीश्च नव समिधः क्रमेणाष्टशतं हुनेत्।।51।।

विवरणम्

दिगुत्तरशतमिति। दशाधिकं शतम्। पञ्चानां द्वाविंशत्यावृत्तावेतत्संख्यालाभः। जाताद्यैरिति। 'जातवेदस' इत्याद्यैः क्रमेण पञ्चभिः। व्युत्क्रमादिति। 'पृतनाजितं', 'विश्वानि नो ', 'अग्ने त्व' मित्येभिः।।51।।

For the homa the first item is ghee 108 times using the Pañcadurgā hymns starting with "Jātavedasa"etc. The items for putting into the fire are (1) Khadira (2) Palāśa (3) Aśvattha (4) Udumbara (5) Vāṭa (6) Añjali- a sensitive plant (7) Bilva (8)Ficus Racemosa (9) Māyura (Achyranthes aspera). Each of them is to be put in the fire 108 times. (51)

तिलसर्षपनीवारान् मूलेन दधिमाक्षिकम्।
आज्यं च मृत्युञ्जयतो जुहुयात् तावदन्ततः।।52।।

विमर्शिनी

पुनः तिलसर्षपनीवारान् मूलेन, दधिमाक्षिकमाज्यं च मृत्युञ्जयतश्च अन्ततः अवसाने तावद् अष्टशतं जुहुयात्। तत्कलशैरपि तामभिषिञ्चेदित्यपि सिद्धं भवति।।52।।

विवरणम्

मृत्युञ्जयतो दधिमाक्षिकमाज्यञ्चेति अन्वयः। तावदिति। तिलादीनां सर्वेषां अष्टाधिक-शतसंख्योक्ता।।52।।

With the Mūlamantra sesamum, mustard and bamboo rice (wild rice) are to be put with the chant of Mrtyuñjaya mantra and honey and ghee shall be poured 108 times each. (52)

प्रासादं परितो विहृत्य गुरुकुण्डादग्निमग्राहितात्
कुर्युः शान्तिहुतानि पञ्च नव वाथाग्रेऽखिलान्येव वा।
स्कन्दे द्वादशवासराद्यहरहस्तत्स्नानपूजादिभि-
र्त्र्यावृत्त्यैकदिनेऽथवात्र च घटाः कार्याः पृथक् कर्मसु।।53।।

विमर्शिनी

अथ स्कन्दे अग्राहितात् पुरोभागे स्थितात् गुरुकुण्डाज्जनितमग्निं प्रासादं परितः प्रासादस्य परितश्चतसृषु दिक्ष्वष्टासु दिक्षु वा कुण्डेषु विहृत्य गुरुमूर्तिपाः पञ्च नव वा शान्तिहुतानि शान्त्याह्वयानि हवनानि कुर्युः। अखिलान्यपि हुतानि अग्र एव वा कुर्युः। एतान् होमांस्तु द्वाद्वशवासरादिनियमेनाहरहः तत्स्नानपूजादिभिः कुर्युः। अथवा आपत्पक्षेऽपि एकदिनेऽपि त्र्यावृत्त्या त्रिकृत्वः कुर्युः। आपत्पक्षे कर्मसु त्रिष्वपि पृथक् घटाः कार्याः, पृथगेव होमाः कलशाभिषेकाश्च कार्या इत्यर्थः।।53।।

विवरणम्

स्कन्दे होमान्तरमाह-**प्रासादमिति**। पञ्चेति। गुरुकुण्डे प्राग्दक्षिणादिकुण्डेषु च। नव वेति। गुरुकुण्डे प्रागाग्नेयादिकुण्डेषु चेत्यवगन्तव्यम्। अग्र एव वाखिलानीति। प्रासादस्य समन्ताद्धोम उक्तः। यद्वा प्रासादाग्रतो मण्डपं विधाय तत्रैव पञ्च होमा नव होमा वेति विकल्प्यते। द्वादशवासरा[1]दीति। त्रिदिनावधीत्यभिप्रयते। त्र्यावृत्त्यैकदिनेऽथवेति जघन्यपक्ष उक्तः। अत्र चेति। त्र्यावृत्तिपक्षे। कर्मस्वि[2]ति। होमेषु पातादिमृतिजननस्तेनवेशादिकेष्वित्येतदिहापि समानम् इति।।53।।

For the expiation of Subrahmaṇya fire may be distributed from the main sacrificial pit to the ones in the four or eight directions and five or nine attending priests shall perform the sacrifice. If it is for twelve continuous days the pot full of water may be poured on the idol on concluding the rites and worship shall be done. If it is an emergency it can be done thrice a day. But potfuls of water may be separately sanctified and used for bathing the idol. (53)

अष्टोर्ध्वं समिधः शतं सकलनाम्ना बीजनाम्ना चरुं
गोसर्पिर्महतात्र सर्षपतिलान् बीजाणुना जुह्वतु।

---

1. 'दि',
2. 'स्थि' क पाठः।

मध्ये दिक्षु विदिक्षु नीपवटजाः सोदुम्बराश्वत्थजाः
प्लक्षब्रह्ममधूकजाश्च समिधो जम्बूकपित्थोत्थिताः ।।54।।

विमर्शिनी

अत्र होमे सकलनाम्ना सकलाभिधानमन्त्रेण समिधः (अष्टोर्ध्व शतं) जुह्वतु। बीजनाम्ना बीजाभिधानमन्त्रेण चरुं जुह्वतु। महता महन्मन्त्रेण गोसर्पिः। गोसर्पिरित्यनेन गवामाज्यमेव सर्वकर्मणि ग्राह्यमित्युक्तं भवति। सर्षपतिलान् सर्षपान् तिलांश्च बीजाणुना पूर्वोक्तेन बीजमन्त्रेण जुह्वतु। अत्र मध्ये दिक्षु विदिक्षु च क्रमात् नीपजाः वटजाः उदुम्बरजाः अश्वत्थजाः प्लक्षजाः ब्रह्मजाः मधूकजाः जम्बूत्थिताः कपित्थोत्थिताश्च समिधः स्युः।।54।।

Using the Bijamantra oblations shall be put in the fire after chanting the mantra 108 times. The articles for the consumption are the following eight (1) Kadamba (2)Vaṭa (3)Udumbara (4) Aśvattha (5)Plakṣa (6) Palāśa (7) Madhūka (8) Kapittha. These are for the corners. Mustard and sesamum shall be put 108 times with Bījamantra. (54)

शान्तिहोममथ शर्वदिशि[1] श्रुत्यश्रकुण्डजनितात्महुताशे।
आदधीत सकलेष्विह पक्वेज्याणुहुत्यवधिकर्म पुरोवत्।।55।।

विमर्शिनी

अथ सकलेषु शर्वदिशि ईशकोणे श्रुत्यश्रकुण्डजनितात्महुताशे चतुरश्रकुण्डजनितस्वस्वाग्नौ शान्तिहोममादधीत। इह पक्वेज्याणुहुत्यवधिकर्म पक्वहोमपूजामन्त्रहोमान्तं कर्म पुरोवत् पूर्ववदादधीत।।55।।

विवरणम्

सामान्योत्पातेषु प्रायश्चित्तमुक्तम्। इदानीमद्भुतेष्वाह-**शान्तिहोममथेति**।।55।।

For all deities Śāntihoma could be done in the north east corner where a sacrificial pit may be prepared and fire kindled. Fruits and other articles can be deposited in fire with the chant of mantra. (55)

सर्पिः स्वोपनिषद्द्विषड्वसुजिनार्णाणूपचारैर्नृसू-
क्तोत्थाभिर्जिनवारमृग्भिरपि हुत्वाज्यान्तरालेषु तैः।
विष्णौ मार्गभवामृताः सहसहैन्द्रीभद्रिकाः साञ्जली-
दूर्वासर्षपशालिकान् यवतिलान्नं चोक्तसङ्ख्यं हुनेत्।।56।।

विमर्शिनी

विष्णौ स्वोपनिषद्द्विषड्वसुजिनार्णाणूपचारैः स्वोपनिषदः स्वस्य पञ्चतत्त्वानि, द्विषडर्णं द्वाद्वशाक्षरं, वस्वर्णमष्टाक्षरं, जिनार्णं गायत्री, उपचारो 'जितं त' इति एतैर्नवभिर्मन्त्रैः, पुनर्नृसूक्तोत्थाभिः

---

1. 'शायां क्लृप्तक्' क. ख. ग पाठः।

पुरुषसूक्तभवाभिः षोडशभिः ऋग्भिः, इति पञ्चविंशत्या मन्त्रैः जिनवारं जिनाश्चतुर्विंशतिः तावद्वारं सर्पिः प्रथमं हुत्वा तैरेव मन्त्रैः आज्यान्तरालेषु मार्गभवामृताः अपामार्गसमिधोऽमृतलतोद्भवाश्च, सहसहैन्द्रीभद्रिकाः सहाभिः सहिता ऐन्द्रीभद्रिकाः सहाः, ऐन्द्रीः, भद्रिकाश्च, साञ्जलीः अञ्जलिभिः सहिताः अञ्जलीश्च, दूर्वासर्षपशालिकान् दूर्वाः, सर्षपान् शालींश्च, यवतिलान्नं च यवांस्तिलान्, अन्नं च एतानि द्वादशद्रव्याणि उक्तसंख्यं चतुर्विंशतिवारं हुनेत्।।56।।

विवरणम्

सर्पिरिति। अयमिह प्रयोगः। पञ्चतत्त्वानि द्वादशाक्षरमष्टाक्षरं गायत्री जितन्तः पुरुषसूक्तस्य षोडश ऋच इति पञ्चविंशति मन्त्राः। एतैश्चतुर्विंशतिवारमाज्यं प्रथमं जुहुयात्। मन्त्रभेदेषु च पूर्णाहुतिं तत एतैर्मन्त्रैराज्यमपामार्गमाज्यममृता इत्यादि क्रमेण हविराज्यमिति यावत् पञ्चविंशति द्रव्याणि क्रमेण जुहुयात्। द्रव्यभेदेषु च पूर्णाहुतिरिति। दोषभूयस्त्वे संख्या वर्धते। तदुक्तं–

"चतुर्विंशतिशो हुत्वा शतशो वा सहस्रशः।"

इति। अत्र सहस्रसंख्यायां पञ्चकुण्डेषु द्विद्विशतवारं होमः स्यात्।।56।।

For the Śāntihoma in relation to Viṣṇu the nine mantras- Pañcatattva, Dvādaśākṣara, Aṣṭākṣara, Gāyatri and Upacāra are to be used. Nṛsūkta and Puruṣasūkta are also to be chanted while offering materials in fire. The 12 items to be used are (1) Mayūra (Achyranthes aspera) (2)Amṛta (3) Sahasaha (Cacalia rotundifolia (3) Aindrī (Cissus pedata) (5) Bhadra (6) Anjali- a sensitive plant (7) Dūrvā (8) mustard (9) paddy (10)yava (11) sesamum (12)Havis. All of them have to be put twelve times each, Finally Sviṣṭakṭṛt homa is also needed. (56)

गायत्र्या निजया पयोद्रुसमिदाज्यान्नानि दूर्वा मधु-
क्षीराज्यस्नपिता वसूत्तरशतं लाजाः सराजीतिलाः।
होतव्या यवशालिसक्तुघृतयुक्ता धूर्जटौ ते समि-
त्सर्पिर्मध्यगदौर्व्यकास्तिलयवव्यत्यासिनश्चेषुजे ।।57।।

विमर्शिनी

धूर्जटौ शिवे पयोद्रुसमिदाज्यान्नानि पयोद्रुमाः क्षीरवृक्षाः प्लक्षोदुम्बरवटाश्वत्थक्रमगताः तेषां समिधः, आज्यमन्नं च, पुनः मधुक्षीराज्यस्नपिताः त्रिमधुरसिक्ता दूर्वाः। अत्र सर्वत्र त्रिमधुरोक्तौ मधुक्षीराज्यान्येवेत्यप्यनेनोक्तं भवति। लाजाः, सराजीतिलाः सर्षपास्तिलाश्च, यवशालिसक्तुघृतयुक्ताः यवाः शालयः सक्तवो घृतं च एते चतुर्दश निजया गायत्र्या तत्पुरुषेण वसूत्तरशतमष्टाधिकं शतं होतव्याः। इषुजे त एव समित्सर्पिर्मध्यगदौर्व्यकाः समित् दूर्वा सर्पिः क्रमात् तिलयवव्यत्यासिनः तिलयवव्यत्यासयुक्ता यवतिलक्रमेणेत्यर्थः। स्कन्दे त्वेतत्क्रमेण स्वगायत्र्यैवाष्टशतं चतुर्दश द्रव्याणि होतव्यानीत्यर्थः।।57।।

विवरणम्

पयोद्रुसमिच्छब्देन तोरणक्रमोऽपि परिगृहीतः। समित्सर्पिर्मध्यगदौर्व्यका इति। पयोद्रुसमिधस्त्रिमधुराक्तदूर्वा आज्यमित्ययं क्रम उक्तः।।57।।

For the Śāntihoma of Śiva, the following 14 objects are to be offered in the sacrificial, fire, with the Gāyatri and Tatpuruṣamantra (1) Plakṣa (2) Ficus Racemosa (3) Ficus Indica (4) Ficus Religiosa (5) ghee (6) Havis (7) Dūrvā gram anointed with honey ,milk and ghee (8) parched rice (9) mustard (10) sesamum (11) yava (12) paddy (13) fried rice and(14) ghee.

For Subrahmaṇya all these fourteen are applicable. Only the sequence of putting them in the fire is changed.

All these are to be put 108 times chanting Skandagāyatrimantra. (57)

विघ्नेशे हवनं गिरीशवदिदं प्रायोऽत्र लाजादिकं
षट्कं स्वोदितमेव शास्तरि पुनः साहस्रमष्टाधिकम्।
गायत्र्यैव तिलान् घृतं च जुहुयाद् यागाणुना केवलं
तावत् सुम्भरिपौ घृतं हरिहरे द्व्युक्तं पृथक् प्राचरेत्[1] ।।58।।

विमर्शिनी

विघ्नेशे इदं हवनं प्रायो गिरीशवत् शिवोक्तवत्। अत्र तु लाजादिकं षट्कं स्वोदितमेव लाजपृथुकलड्डुकापूपशष्कुल्याज्यानि। शास्तरि पुनर्गायत्र्यैव तिलान् घृतं च पृथगष्टाधिकं साहस्रं जुहुयात्। सुम्भरिपौ वक्ष्यमाणेन यागाणुना केवलं घृतं तावदष्टसाहस्रं जुहुयात्। हरिहरे द्व्युक्तं शैवोक्तं वैष्णवोक्तं च पृथगुभयत्राचरेत्।।58।।

विवरणम्

लाजादिकं षट्कं स्वोदितमेवेति। लाजपृथुकलड्डुकापूपशष्कुल्याज्यानीत्यर्थः। हरिहरे द्व्युक्तं पृथक् प्राचरेदिति।।58।।

For Gaṇeśa, Śāstā, Śaṅkaranārāyana and Durgā the items for Śāntihoma

---

1. 'त्।।
पूर्वोदितेषु दहनादिषु घोरसत्त्वैः क्षेत्रे श्रितेऽनवघृतावपि निष्क्रियायाः।
हुत्वेति संस्नपितयेत् कलशेन शेषेणोक्षेच्च तत्र मनुविन्मधुसम्भवादौ।।
कुर्याद् वान्यां तु शान्तिं शिवहरिति यतः स्वस्तिदाः पक्वमाज्यं
वास्तोर्वास्तोश्च हुत्वाशमिति च पुनरिन्द्राग्न्यृचाथो कयानः।
तद्वत् को अद्य मन्त्री भवतमिति ततश्शाकुनस्वस्तिवास्तों
मन्त्रैः पञ्चाणुभिर्दैर्गमनुभिरनलेशं पृथग् व्याहृतीभिः।।
गायत्र्या द्विजसमिदन्नलाजराजीर्हुत्वाज्यान्तरिततया तिलान् यवांश्च।
मुद्गांश्चाहितबलिरन्नशेषतोऽग्रे शान्त्याग्रे स्नपयतु तद् घटेन देवम्।।
सर्वेषु निष्कृतिहुतेषु गरिष्ठदोषे शान्त्यम्बुसम्पतितशेषमवस्रुताम्भः।
गव्यं समस्तमथ सर्वहुतावशेषं पात्रेषु षट्सु हुतभस्म च सन्निधाय।।
स्वास्त्रेण तानि परिपूज्य समूर्तिपालस्तेनाभिमन्त्र्य सहसाष्टसहस्रवारम्।
तैर्मृष्टलिप्तसनिमित्तभुवि क्रमेण प्रोक्ष्यास्त्रतो यजतु चाष्टदले तदस्त्रम्।।
श्रीनारा' क.ग.घ. पाठः।

are as follows. For Gaṇeśa and Śiva they are almost similar. The items are almost similar for Śāsta and Durgā. The sequence alone is changed with slight modification. Mantras also differ as also the number of oblations. Śaiva and Vaiṣṇava homas are to be performed in different sacrificial pits. (58)

[1]अत्र दोषभूयस्त्वे होमवृद्धिरिष्यते। तदुक्तं-**मधुसम्भवादाविति**। यत्र मधुवल्मीकादि-सम्भवस्तत्रेत्यर्थः।।

शान्तिहोमान्तरमाह-**कुर्याद्वेति**। शिवहरीती[2]ति। ऐशानदिशि। यतः स्वस्तिदाः पक्वमिति। 'यत इन्द्र भयामहे', 'स्वस्तिदा विशस्पति'रिति युगलेन पक्वमित्यर्थः। वास्तोर्वास्तोश्चेति। 'वास्तोष्पते प्रतिजानीहि', 'वास्तोष्पते शग्मया ', 'शं नो देवी', 'इन्द्राग्नी रोचना', 'कयानश्चित्र' 'को अ[3]द्य युङ्क्ते ', 'भवतन्नस्समनसा', 'कनिक्रदत्', सूक्तद्वयं, स्वस्तिसूक्तं, 'वास्तोष्पते ध्रुवा', गृह्य भ[4]यं वास्तोष्पते प्रतरणोऽमीवहा पञ्चाणवश्शैवे। पञ्चब्रह्माण्यन्येषु पञ्चतत्त्वानि पञ्चदुर्गाः 'शं न इन्द्राग्नी'सूक्तं व्याहृतिचतुष्टयमिति सम्भूय वा सप्ततिर्मन्त्राः ततः पूर्णाहुतिः।।

आज्यान्तरिततयेति। यथा अग्नेरग्रे अन्नशेषेण शान्त्या अहितबलिरित्यन्वयः। स्विष्टकृदवदाने कृते बल्यर्थं हविरुद्धृत्य स्विष्टकृति हुत्वेऽग्निपूर्वभागे स्थण्डिलं दर्भान् विकीर्य तत्र 'शं नो देवी' रित्यनया सम्पूज्य तयैव तेनोद्धृतहविषा बलिं हरेदित्याशयः।।

हुत्वेति तत्तदुदितक्रमतोऽभिषिच्य
तं तं तदीयकलशेन यजेच्च देवम्।
श्वस्पर्शनादिविषये सकलेष्वथैश्यां
दिश्येव शान्तिहवनं तनुयादथैतत्।।59।।

विमर्शिनी

इति तत्तदुदितक्रमतः तत्र तत्र हुत्वा तदीयेन तदीयेन च कलशेन तं तं देवमभिषिच्य यजेच्च। अत्र चशब्देनापरः शान्तिहोमोऽपि सूचितः। तथा पाशुपते-

"यत इन्द्रादिमन्त्राभ्यां पक्वं द्वाभ्यां तु होमयेत्।"

'यत इन्द्र भयामहे', 'स्वस्तिदा विशस्पतिरि'ति मन्त्रद्वयेन पक्वं होमयेदित्यर्थः।

"वास्तोष्पते वास्तोष्पते शन्नो देवीरभीत्यृचा।।"

'वास्तोष्पते प्रतिजानीहि', 'वास्तोष्पते शग्मया', 'शं नो देवीरभिष्टये।'

इन्द्राग्नीरोचना भूयः कयानश्चित्र इत्यपि।
को अद्य युङ्क्तेति हुत्वा भवतन्न इति क्रमात्।।

1. 'पूर्वोदितेष' इत्याद्यधिकपाठमाश्रित्येयं व्याख्या।
2. 'तीशा' क पाठः।
3. 'आ' च पाठः।
4. 'अ' च पाठः।

षड्भिः कनिक्रदाद्यैस्तु भूयः स्वस्त्यादि चाष्टभिः।।
वास्तोष्पते ध्रुवाद्यैस्तु षड्भिर्जातादिपञ्चभिः।

जातादीति सद्योजातादिभिरित्यर्थः।

जातवेदादिभिस्तावच्छन्नवर्गैश्च पौरुषैः।
व्याहृतीभिः क्रमाद्धुत्वा सम्पातविधिना घृतम्।।
ततो ब्रह्मसमिच्चान्नलाजसिद्धार्थकांस्तिलान्।
यवान् मुद्गान् क्रमादेतैः पृथगाज्यान्तरे हुनेत्।।
पुंसा चतुर्दशद्रव्यैरष्टोत्तरशतं पृथक्।
होमं समाप्य तस्याग्रे शमीपर्णेषु दापयेत्।।
हुतशेषं विधानेन शन्नोदेवीरिति ब्रुवन्।
हुतमन्त्रैश्च संस्नाप्य सम्पातकलशेन तम्।।
प्रोक्षयित्वा च तत्स्थानं दक्षिणां गां प्रदापयेत्।

इति।

महद्बहुषु चोग्रेषु निमित्तेषूभयं स्मृतम्।
अल्पेष्व[1]न्यतमं वापि प्रायश्चित्तमथानयोः।।

इति। अथ सकलेषु श्वस्पर्शनादिविषये श्वचोरस्प[2]र्शनादिनिमित्तेऽपि ऐश्यां दिश्येव एतदपि शान्तिहवनं तनुयात्। अत्र पूर्वं पञ्चगव्यावगाहानन्तरं

"शुद्धादिभस्त्वग्रसैर्गन्धैस्तीर्थतोयैश्च शोधयेत्।"

इत्युक्तप्र[3]कारेण शोधयित्वा प्रायश्चित्तशान्तिहोमाद्यनन्तरमेतच्छान्तिहोमं कुर्यात्।।59।।

Thus performing sacrifices the respective deities should be splashed with sanctified water from the pots before worshipping him. In the case of the pollution due to the touch of a dog the sacrifice can be done in the southeast corner where a pit is to be made. (59)

श्रीनारायणसूक्तजैर्मनुमितैर्मन्त्रैरिहैकैकशः
श्रीसूक्तप्रभवैस्त्रिपञ्चभिरतोदेवेति षड्भिस्तथा।
नासत्षोडशभिर्द्विसप्तदशकेनांहोमुचां संसमि-
त्पूर्वैरब्ध्यणुभिः सभद्रचरणैः सारायिपञ्चाणुभिः।।60।।
गायत्र्या निजया स्वपञ्चमनुभिश्चाहुत्य सर्पिः क्रमात्
पश्चात् साष्टशतं जुहोतु समिधोऽश्वत्थोत्थिताः खादिरीः।

---

1. 'ष्वेकत' ख. घ. च पाठः।
2. 'र्शादि ख. घ. पाठः।
3. 'क्रमेण' ख. घ. ङ. च. पाठः।

प्लाक्षीर्ब्रह्ममयीः सपाटलवटोद्भूताः स्वमूलाणुना
होमान्ते कलशेन देवमदसीयेनापि सिक्त्वा यजेत्।।61।।

विमर्शिनी

इह होमे पूजामन्त्रहोमानन्तरं श्रीनारायणसूक्तजैर्मनुमितैश्चतुर्दशमन्त्रैः, श्रीसूक्तप्रभवैः त्रिपञ्चभिः पञ्चदशमन्त्रैः, 'अतो देवे'ति षड्भिः, तथा नासत्षोडशभिः 'नासदासीदि'त्यादिषोडशमन्त्रैः, पुनंरहोमुचां द्विसप्तदशकेन चतुस्त्रिंशता, संसमित्पूर्वैः 'संसमिदि'त्यादिभिः अब्ध्यणुभिश्चतुर्मन्त्रैः, सभद्रचरणैः 'भद्रं नो अपी'त्यादिपादयुक्तैरेतैः, सारायिपञ्चाणुभिः 'आरायिकाण' इत्यादिपञ्चमन्त्रैर्युक्तैरेतैः, निजगायत्र्या, स्वपञ्चमनुभिः स्वस्वपञ्चतत्त्वैश्च इत्येकाधिकशतमन्त्रैरेकैकशः क्रमात् सर्पिराहुत्य पश्चात् अश्वत्थोत्थिताः खादिरीः प्लाक्षीः ब्रह्ममयीः, सपाटलवटोद्भूताः, एताः षट् समिधः स्वमूलाणुनाष्टशतं जुहोतु। होमान्ते अदसीयेन अमुष्मात् सम्भूतेन कलशेन देवमपि सिक्त्वा यजेत्।।60-61।।

In the Śāntihoma to expiate for the pollution caused by the touch of the dog etc., several mantras may be chanted in the sacrifice. They are noted as 12 mantras from Śrīnārāyaṇasūkta, 15 mantras from Śrisūkta, 6 mantras beginning with "ato devah", 16 mantras from "Nāsadāsīt" as also other hymns hinted at in the stanza.. A total of 101 mantras are indicated. The items to be offered in the fire are (1) Nyaggrodha (2)Khadira (3) Plakṣa (4) Palāśa (5) Paṭola and (6) Aśvattha. At the time of bathing water sanctified by the sacrificial pots may be used. (60-61)

देवाग्रे प्रजनय्य वह्निमथ तत्पार्श्वेऽष्टप[1]त्रेऽम्बुजे
पीठराधि[2]पुरस्सरेण विधिना संपूर्य कुम्भं गुरुः।
तत्त्वावाहननिष्ठमत्र सुविधायावाह्य मूलणुना
साङ्गीकृत्य यजेत तं हुतवहे कुर्यात् परिध्यादि च।।62।।

विमर्शिनी

अथ तत्त्वहोममाह-देवाग्र इति। अथ गुरुः स्वयं देवाग्रे देवस्याग्रगतमण्डपे चतुरश्रकुण्डे वह्निं प्रजनय्य तत्पार्श्वे अष्टपत्रेम्बुजे पीठराधिपुरस्सरं पीठपूजापूर्वं विधिना ब्रह्मकलशोक्तप्रकारेण कुम्भं सम्पूर्य तत्त्वावाहननिष्ठं तत्त्वावाहनपर्यन्तं कर्म सुविधायात्र मूलाणुनावाह्य साङ्गीकृत्य तं देवं कलशस्थं यजेत। हुतवहेऽग्नौ परिध्यादि परिधिस्थापनादि च कुर्यात्।।62।।

विवरणम्

अथ तत्तवहोममभिधत्तेदेवाग्र इति। तत्त्वावाहननिष्ठमत्र सुविधायेति। ब्रह्मकलशोक्तप्रकारेणेति भावः।।62।।

For Tattvahoma the priest shall kindle fire in a sacrificial altar prepared

---

1. 'त्रा'ग पाठः।
2. 'द्धि' ख., 'ति' ग पाठः।

in front of the idol. The altar should be square shaped and near it a diagram of lotus with eight petals in which a pot bound by thread shall be put head down. Later with proper rites the pot may be filled up with water. Rites from Lipipaṅkaja up to Tattvāvāhana are to be done. Invocation is to be by Mūlamantra and the fire shall be sanctified before worshipping the deity conceived as occupying the pot. (62)

पूजामन्त्रहुतान्तमत्र सुविधायापीतिरी[1]त्याखिलै-
स्तत्त्वैराज्यहुतिं विधाय मनुबिम्बेऽन्तः समायोज्य च।
सम्पातं परिकल्प्य विश्वविलयं भूयः सिसृक्षार्थना-
पूर्वं प्राप्य बहिः स्वमूलमनुनाष्टाज्याहुतिं चाचरेत्।।63।।

विमर्शिनी

अत्रापि पूजामन्त्रहुतान्तं सुविधाय स्वैः स्वैरखिलैस्तत्त्वैरपीति रीत्या संहारक्रमेणाज्यहुतिं विधायान्तर्गत्वा मनुबिम्बे तत्त्वैर्मन्त्रैः संहारक्रमेण (सम्पातं) समायोज्य विश्वविलयं सर्वतत्त्वानां लयं परिकल्प्य भूयः सिसृक्षार्थनापूर्वं सृष्टिविधानाय देवं प्रार्थ्य नाडीसन्धानकृद् बहिरग्निसमीपं स्वमूलमनुनाष्टाज्याहुतिं चाचरेत्।।63।।

विवरणम्

अपीतिरीतिः संहारप्रकारः। वक्ष्यति च पुरः कोप[2]तत्त्वेन तद्वत्यशेष इत्यादि। अन्तर्मनुबिम्बे समायोज्य चेति। प्रासादान्तरभ्येत्य पीठमिष्ट्वा देवामावाह्य तत्त्वन्यासादि विधाय पुनराचमनीयान्तं समर्प्य संहारक्रमेण सम्पातस्पर्शनं कृत्वा तथा पुष्पाराधनमाचरेदिति भावः। विश्वविलयं परिकल्प्येति न केवलं बिम्बशरीरमात्रविलयमपि तु प्राकारान्तर्व्याप्तिविलापनेन सकलावरणप्रासादमूर्त्यादिविलापनमपि भावनीयमित्यभिप्रायः। एतत्प्रक्रिया च ध्यानसङ्कोचतोऽवधारणीया। सिसृक्षार्थनापूर्वमिति। क्रियाविशेषणों[3] मूलपूर्वकं तत्त्वसृष्ट्यर्थमनुज्ञां देहीति प्रार्थनामन्त्रः। नाडीसन्धानाद्यपि भावनीयम्। स्वमूलमनुनेति। अयं सम्मुखीकरणहोमः। वक्ष्यति च-'तत्कर्म साम्मुख्यदा' इति।।63।।

Here Pīṭhapuja, Mūrtipujā and Ājyāhuti etc., may be performed. The priest shall enter the sanctum and perform Samhāra and Pūrṇāhuti, may be carried out. Kopatattva, Prāṇatattva and Pāñcatattva may be carried out ending with Jīvatattva. In the case of Śiva-it is Śivatattva and for Subrahmaṇya Kṣetrajñatattva are to be initiated. Permission for Srsti is to be sought by the priest. (63)

सृष्टिक्रमात् स्वाखिलतत्त्वमन्त्रै-
राज्यं यथाशक्ति पृथग् जुहोतु।

---

1. 'त्येकशस्त' इति मूलकोशपाठः।
2. 'तत्त्वौ तद्वत्य',
3. 'णं मू' क पाठः।

हुत्वाथ मूलेन समिद्घृतादि-
द्रव्याणि होमं सुसमापयेच्च ।।64।।

विमर्शिनी

स्वाखिलतत्त्वमन्त्रैः स्वस्य स्वस्याखिलैस्तत्त्वमन्त्रैर्यथाशक्तिसंख्यमाज्यं पृथक् पृथक् (सृष्टिक्रमात्) जुहोतु। यथाशक्तीत्यनेन शिवे स्वानुरूपात् पञ्चतत्त्वैर्होमश्च सूचितः। अथ मूलेन समिद्घृतादिद्रव्याणि चत्वारि हुत्वा होमं सुसमापयेच्च ।।64।।

विवरणम्

यथाशक्तीत्यष्टवारमष्टाविंशतिवारमित्याद्यभिप्रायम्। शिवे त्वन्ते पञ्चतत्त्वैरुद्घातावत्त्या होम इष्यते। तत्त्वहोमसमये प्रतिपत्तिस्तूत्तरपटलेऽवगन्तव्यः। समिद्घृतादिद्रव्याणीति। चतुर्द्रव्याणि वा स्वस्वाधि[1]वासहोमोक्तद्रव्याणि वा गृह्यन्ते ।।64।।

In the order of creation all Tattvamantras are to be initiated according to ones ability. After performing sacrifice with Mūlamantra articles like Samit and ghee shall be put in to the sacrificial fire. (64)

सम्पातं प्रसमर्प्य वह्निगतचैतन्यं समुद्वास्य त-
त्कुम्भे तं प्रतिजप्य साधितसमग्रात्मोदयं भावयेत्।
पीठेज्यादिविधानतः स्नपितयेत् संशुद्धतत्त्वोन्मिष-
त्स्वाङ्गं तत्कलशेन देवमथ तद्विन्यासपूर्वं यजेत् ।।65।।

विमर्शिनी

सम्पातं तत्कुम्भे प्रसमर्प्य वह्निगतचैतन्यं च समुद्वास्य तान् मन्त्रान् प्रतिजप्य तं देवं साधितसमग्रात्मोदयं साधितः सम्पादितः समग्रः सम्पूर्णः आत्मनः देवस्योदयः प्रादुर्भावो यस्मिन् कलशे तं तथा भावयेत्। अथ पीठेज्यादिविधानतः (तत्कलशेन) स्नपितयेत् स्नपितं कुर्यात्। संशुद्धतत्त्वोन्मिषत्स्वाङ्गं सम्यक् शुद्धैस्तत्त्वैः प्रकारीभवत्स्वाङ्गयुक्तं। देवं तद्विन्यासपूर्वं तत्त्वन्यासादिकं पूर्वं यथा भवति तथा यजेच्च ।।65।।

विवरणम्

तं प्रतिजप्येति। तत्त्वकलशं तत्त्वमन्त्रै[2]रभिमन्त्र्येत्यर्थः। साधितसमग्रात्मोदयं भावयेदिति। साधितः समग्रस्यात्मन उदयो यत्रेति समासः। तत्त्वहोमेन तत्कलशदेवात्मनः समग्रतयोदयो हि सम्पादितस्तं तथावस्थितमनुसन्दधीतेत्यर्थः। पीठेज्यादिविधानत इत्यावाहनतत्त्वन्यासादिकमुक्तम्। संशुद्धतत्त्वोन्मिषत्स्वाङ्गं देवं तत्कलशेन स्नपितयेदिति योज्यम्। संशुद्धतत्त्वोन्मिषत्स्वाङ्गमिति स्नपनकालोचितं विशेषणम्। तत्त्वकलशाभिषेके प्रतिपत्तिरनेनोक्ता। तद्विन्यासपूर्वमिति सद्यस्तत्त्वन्यासोऽपि प्राकृतसंहारन्यासाधिक[3]तया त्रिपञ्चादिवारं कर्तव्य इत्यर्थः ।।65।।

---

1. 'धी' क पाठः।
2. 'न्त्रैरित्य'
3. 'कृ' क पाठः।

The Sampāta- the leftovers collected in a pot from the sacrificial oblations shall be poured in to the sacred fire and invoking the Caitanya- the power of divinity - into the pot and chanting Vāruṇa mantra touching the pot the priest shall get prepared to bathe the idol. The priest shall enter the sanctum for sometime and then get out to make arrangements for instrumental accompaniments. Thereafter he shall pour the water over the idol thrice. Finally he is to perform a complete ritualistic worship called Saparivārapūjā- with all ingredients of ritualistic concepts. (65)

प्रागुक्तक्लृप्त्या कलशान् यथार्हं
सम्पूर्य सम्पूज्य ततोऽभिषिच्य।
सम्पूजयेद् देवमवस्तुतेन
सम्प्रोक्ष्य कुर्यात् परिषद्बलिं च[1] ।।66।।

---

1. 'च।। सवत्सां गां दाहादिषु गुरुरुपाहूय शान्त्याख्ययेष्ट्वा
प्रदायास्यै दूर्वा तदहनि पयः पद्मपत्रेऽथ दुह्यात्।
सुमृत्पात्रे त्वातप्य घृतमपि कुर्याद् दधीति द्वितीये
तृतीये तु क्षीरं शकृदपि च गोमूत्रमप्यादधीत।।
स्वमन्त्रैराज्यान्तान्यधिकमलपत्रेष्वधः कूर्चपत्रे-
ष्वमून्याधायेष्ट्वा विधिवदपरस्मिन्नथायोज्य तानि।
मथित्वा तारेणामहितमभिमन्त्र्येषुमन्त्रैः सहस्रं
स्थलं प्रोक्षेद् दग्धं निखिलमनुना क्षालयेच्चैव बिम्बम्।।
खननादि ततः करोतु शुद्धोदकपूरेण तु पूरणं पुरोऽत्र।
चरतूदितगव्यशोधनं प्रागथवा प्लावनकं स्थलोक्षणं च।।
लेपादौ त्विष्टपीठे न्यसतु ससहा भद्रा निशा राजिदूर्वा-
क्षीरित्वक्पिष्टमग्रे शरमनुभिरधः कूर्चापात्रेऽस्त्रतो वा।
तद्वत् प्राच्यं प्रसाध्य प्रतिकृतिममुना स्नानकाले त्रिसप्ता-
वृत्योद्धृष्याथवोल्लिप्य यजतु च पुरः सेकतोऽन्यत् पुरोवत्।।
क्षीरित्वगद्भिरभिषिच्य च पिप्पलत्वङ्नागाब्जकेसरसहानिजगन्धलक्ष्मीः।
तेन स्वपञ्चमनुभिस्तु यथोक्तक्लृप्त्या सिद्धेन वा समनुलिम्पतु देशिकेशः।।
श्वस्पर्शनादिविषये सकलेषु शुद्धाप्त्वगन्धतीर्थसलिलैरपि चावगाहः।
गव्यावगाहमनुकार्य इहापि शर्व्यां दिश्येव शान्तिहवनं तनुयादथैतत्।।
श्वसृगालादिप्रसवे तूष्णीमतिनीय तत्र दिवसानि।
त्रीण्यथ तत् स्पर्शनवत् कुर्यात् सकलं विशेषज्ञः।।
चोरकार्वन्त्यजैः स्पृष्टे बिम्बे च ब्रह्महादिभिः।
राज्यादिलिप्ते क्षुद्राणुपूजिते चोक्तशुद्धिकृत्।।
कृत्वैश्यां हुतभुङ्मुखादि दश होत्राज्यं सहस्रावरं
सावित्र्या च तिलान् स्वमूलमनुना तावत्समित्सर्पिषी।
सर्पिस्तु द्विषडर्णतो मुररिपौ होमावसाने पुन-
स्तत्सम्पातघटेन देवमभिषिच्याभ्यर्चयेत् कल्पवित्।।

विमर्शिनी

ततः प्रागुक्तक्लृप्त्या कलशपटलोक्तप्रकारेण (कलशान्) यथार्हं यथायोग्यं सम्पूर्य सम्पूज्य देवमभिषिच्य सम्पूजयेत्। अवस्रुतेन सर्वत्र प्रोक्ष्य परिषद्बलिं च कुर्यात्।।66।।

विवरणम्

इदानीं द्रव्यकलशाभिषेकं दर्शयति-**प्रागुक्तक्लृप्त्येति**। स्नपनपटलोक्त प्रकारेण। यथार्हमिति निमित्तवित्ताद्यौचित्येन। उक्तं च-' निमित्तवित्ताद्युपपत्तिभेदित 'मिति। तत्रैवं निमित्तभेदात् कलशभेदः।

देवधाम्नि नृपश्वादिमृतौ नृश्वादिजन्मनि।
चोरशूद्राब्रह्महादिप्रवेशे चोत्तमं भवेत्।।

इति। स्नपनमिति शेषः। चोरशूद्रायाः प्रवेशश्चोराकारेण शूद्रस्त्रिय[1]ाः प्रवेशः। ब्रह्महादयो महापातकिनः इह बिम्बपीठोपहतौ[2] गर्भगृहोपहतौ नाडीगृहमुखमण्डपाद्युपहतौ चोत्तमत्रयं क्रमेण स्यात्। प्राङ्कणे चेन्मध्यमव[3]र्गः बहिश्चाधमवर्गः प्राकारबहिस्तु सन्निधौ शुद्धिमात्रमित्यर्थाल्लभ्यते। गोपुरसूत्रादिषु मरणादौ विशेषः स्यादिति-

चण्डालश्वपचावेश उत्तमावृत्तिरिष्यते।
कारूणां चोरनृपविट्स्त्रियोरपि तु मध्यमम्।।

इति। उत्तमावृत्तिरुत्तमस्नपनस्य त्रिपञ्चाहाद्यावृत्तिः। प्राङ्कणादिषु पूर्ववदेव। यद्वा प्राङ्कण उत्तमं बहिर्मध्यमाधममिति भेदः। कारवस्तक्षादि सप्त कर्माराः तेषां प्रवेशे मध्यमो वर्गः। तथा चोराकारेण क्षत्रियस्त्रिया वैश्यस्त्रियाः प्रवेशेऽपि भवति। प्राङ्कणे त्वधमं बहिश्शुद्धिमात्रमिति।

चोरविट्च्छूद्रयोर्भक्तकारूणां ब्राह्मणी च या।
चोरा वन्मीकमध्वादौ विण्मूत्रादिषु चाधमम्।।

इति[4]। चोरवैश्यस्य चोरशुद्रस्य च देवधाम्नि प्रवेशेऽधमवर्गः। भक्तास्तत्तद्देव न्यस्तधियः केवलकारुतो भक्तकारूणां स्यात् भेद इति। या चोरा ब्राह्मणी तस्याश्च प्रवेश इति योज्यम्। विण्मूत्रादिषु चेति। येषां देवधाम्नि प्रवेशोऽनुज्ञातो ब्राह्मणादीनां तेषामेतद्ग्रहणं प्राङ्कणे तु शुद्धिमात्रम्। शूद्रादीनां विण्मूत्रा[5]दिसम्भवे प्रासादे मध्यमादिवर्गः, प्राङ्कणेऽधमादिर्वा इत्यूह्यमिति।

भूसङ्गेह स्यादिह शङ्कुसूत्रभङ्गादिषु स्वास्रत आज्यहोमः।
तत्कर्षणे साष्टशतादिसङ्ख्यं युगादिभङ्गादिषु मूलतो वा।।
वर्षैस्त्रिभिः कर्षणमिष्टकोपधैकेन गर्भो दिवसैर्द्विषड्भिः।
आवर्त्यतां शान्तिहुतं च कुर्यात् तदेव वर्षेण गृहे प्रवृत्ते।।
स्यात् स्थानशुद्धिर्मृतिसम्भवादौ सशान्तिहोमोऽपि यथोपपत्ति।
स्वनिष्कृतिः श्वप्रसवादिदोषे गृहे प्रवृत्तेष्वखिलेषु चापि।। नष्टेषु क ग. घ. पाठः।

1. 'याः ब',
2. 'तौ ना' क पाठः।
3. 'र्गः प्रा'
4. 'ति। चोरशू' क पाठः।
5. 'त्रस' च पाठः।

वर्णसङ्करविप्रस्य सवर्णां यश्च सव्रजेत्।
अस्नातस्य च शूद्रस्य प्रवेशेऽष्टाधिकं शतम्।।

इति। वर्णसङ्कीर्णस्य क्षत्रियादेरुत्तरो वर्गोऽर्थात् स्यात्। सवर्णां यश्च सव्रजेत् इति[1]। विप्र इति शेषः। तस्याप्यष्टाधिकं शतमिति। क्षत्रियादिगामिनस्तु न्यूनं, तथा सवर्णानामिति क्षत्रियादेरपि। क्षत्रियादेर्ब्राह्मण्या[2]दिगामितायामधिकमिति। अस्नातस्य शूद्रस्येति। यः शूद्रः स्नानेन शुद्धिमियात् न तत्स्पृष्टावपरस्य शूद्रस्य स्नानार्हता तस्य प्रवेशेऽप्यष्टाधिकं शतमिति। शूद्रमात्रे तु ततो न्यूनं रजकनापितादेः प्रवेशे त्वधमवर्गः। कारुप्रवेशे मध्यमवर्गविधानादिति।

नृपे नवकमस्नाते वैश्ये सप्तकृतिर्भवेत्।
विप्रे च पञ्चगव्यं स्यात् चोरविप्रे तु षोडश।।

इति। अस्नातक्षत्रियस्य प्रवेशे नवकं सप्तकृतिरेकोनपञ्चाशत्। विप्रस्य त्वस्नातस्य प्रवेशे सप्तशुद्ध्यनन्तरं विधिवत् पूजितेन पञ्चगव्यकलशेन स्नपनमिति। षोडशेति केवलसप्तदशद्रव्यपरिग्रहः 'सूतकाद् ; द्विगुणं शाव'मिति स्थिते शावाशौचिनः शूद्रस्य प्रवेशे मध्यमवर्गः। वैश्यस्य त्वष्टाधिकं शतमित्यादि। यस्य त्वशुचेः स्पर्शेऽन्योऽपि स्नानार्हस्तस्य शूद्रादेरप्येष एव न्याय इति। पञ्चविंशतिद्रव्यवर्गवत्तदनु[3]क्तौ सप्तदशद्रव्येऽपि वर्गास्त्रयः स्युरिति। अवस्रुतेन प्रोक्ष्येति। सर्वेषां कलशानामवस्रावं तत्तदभिषेकविधावेकस्मिन् कलशेऽवस्रावयेदिति।।66।।

[4]एवं तावत् सकलोपहतिषु सामान्यतः प्र[5]तिक्रिया उक्ताः। इदानीं कासुचिदुपहतिषु प्रतिक्रियाविशेषा वक्तव्याः। तत्र प्रथमं तावद्दहनादिषु स्थानशुद्धौ विशेषमाचष्टे-**सवत्सामिति**। शान्त्याख्ययेति। 'ओं शान्ते आगच्छ', 'ओं शान्त्यै नमः' इति च मन्त्रः। सुमृत्पात्रे त्वातप्येति। घटादौ कृत्वा पक्त्वा तक्रासेकलक्षणमातञ्चनं कृत्वा तृतीयदिने मथनकाले प्राप्ते मथित्वा नवनीतमादाय घृतं कुर्यादित्यर्थः। दधीति द्वितीयदिवस इति शेषः। सवत्सां गामित्युक्तनीत्येत्यर्थः। तृतीये त्विति दिवसे। सवत्सां गामित्यु[6]क्तनीत्यैवेति।।

स्वमन्त्रैरिति। तदुक्तं-प्राहुस्तत्सवितुर्वरेण्यमित्यादि। अधिकमलपत्रेष्विति अधिगतानि कमलपत्राणि येष्विति समासः। अयमिह प्रयोगः। प्रासाददक्षिणदेश उपविश्यात्मनः सकलीकरणादि विधाय स्थण्डिले दर्भान्निक्षिप्य पञ्च पात्राणि न्याग्विलानि निधाय सम्प्रोक्ष्योत्तानीकृत्य तेषु प[7]द्मपत्राण्य-वधायाधोकू[8]र्च[9]ान्निक्षिप्य सावित्र्यादिमनुभिरमूनि गोमूत्रादीनि क्रमेण तेष्वाधाय शोषणादि कृत्वा संपूज्य

1. 'ति शे',
2. 'णा' क पाठः।
3. 'सवत्सा'मित्याद्यधिकपाठमाश्रित्येयं व्याख्या।
4. 'श' क. च पाठः।
5. 'प्रक्रि' घ पाठः।
6. 'त्याद्युक्त',
7. 'पञ्च पात्राण्य',
8. 'धोग्नं कू',
9. 'र्च' क पाठः।

पुनः स्वस्तिकधान्यपीठेऽपरं पात्रं निधाय पीठपूजादि कृत्वा पद्मपत्रमवधायाधोग्रकूर्चं निक्षिप्य तानि गव्यानि तस्मिन्नायोज्य प्रणवेन मथित्वा पञ्चतत्त्वैर्मूलेन चावाह्य संपूज्य तैरभिमन्त्रयेतेति।।

खननादीति। खननं हरणं दाह इति त्रयं कृत्वा प्रथम[1]मुदकप्रवाहेण पूरणं विधाय यामे गते गोमूत्रविप्रपादोदकपूरणादिशेषं कुर्यात्। पुरोऽत्रेति। प्रथम[2]मधिकं पूरणं स्यादत्रेत्यर्थः। चरत्विति। अयमर्थः। दग्धे स्थाने खननादित्रयमुदकपूरणं च कृत्वा प्रासादशुद्ध्यनन्तरं बिम्बेऽपि क्षालनं विधाय यथोदितपञ्चगव्येन बिम्[3]बं संक्षाल्य शेषेण तत्स्थाने प्रोक्ष्य पुनः स्थाने प्लुतयतु। पशुमूत्रब्रह्मपादोदगव्यैरित्युक्तं प्लावनादिशुद्धिविशेषं कृत्वा बिम्बेऽपि प्लावनस्नानादिशेषं विदध्यादिति।।

अथ बिम्बे विण्मूत्रलेपादिसम्भवे बिम्बशुद्धिषु विशेषमाचष्टे–लेपादौ त्विति। बिम्ब[4]ावगाह-नानन्तरमग्र[5]तः स्वस्तिकधान्यपीठे पात्रसादनपीठपूजादि विधाय तस्मिन्नधोग्रं कूर्चं निक्षिप्य लेपनीयमाधाय संस्कृत्य पूजयित्वाभिमन्त्रयेत। बिम्बेऽपि स्नानान्तं कृत्वानेन त्र्यावृत्त्या सप्तावृत्त्यैकविंशत्या-वृत्त्योद्घर्षणमुल्लेपनं वा सपीठे विधाय व्यापकादि कृत्वा पूजाशेषं कुर्यात्। पुरः सेकत इति। पञ्चकाभिषेकतोऽर्वागित्यर्थः। समाधिशुद्धिसम्भवे ततोऽप्यर्वागेतदिति।

लेपान्तरमाह–**क्षीरित्वग्भिरिति**। पिप्पलत्वगादिद्रव्याणां क्षीरित्वक्कषायजलेन पेषणं कृत्वा लेपनीयम्। पिष्टमुत्पादनीयम्। निजगन्धशब्देन स्वस्वगन्ध[6]द्रव्यग्रहणम्।।

अथ श्वस्पर्शनादिसम्भवे बिम्बशुद्धिषु प्रायश्चित्तेषु च विशेषमाह–**श्वस्पर्शनादिविषय** इति। प्रसिद्धावगाहानन्तरं शुद्धजलादिभिरप्यवगाहं कृत्वा पञ्चकादि कुर्यात्।।

[7]**'द्विसप्तदशकेनांहोमुचामिति**। 'अग्नेर्मन्वे' इति द्वाविंशतिः। ('यावामिन्द्रा वरुणा' इति चत्वारः।)'योवामिन्द्रावरुणे'त्यष्टौ। एवं सम्भूय चतुस्त्रिंशतेत्यर्थः। सभद्रचरणैरिति 'भद्रं न' इति पादमन्त्र उक्तः। साष्टशतमिति दोषगौरवे साष्टसहस्रमपि कार्यमिति द्रष्टव्यम्।।

श्वादिप्रसवेऽपि विशेषं दर्शयति–**श्वसृगालादिप्रसव** इति। विशेषज्ञ इति।।

अथ यद्यपि चोरप्रवेशादिविषयेऽपि निष्कृतिरुक्ता पाताभिमृतिजनन–स्तेनवेशादिकेष्विति। त[8]थापि चोरादिस्पर्शे तु विशेषतरशान्तिमाह–चोरेति। कारवस्तक्षादयः।।

कल्पविदिति। स्कन्दादिषु सर्पिषो द्वितीयमूलं योज्यमिति सूचितम्।।[9]

एवं तावत् प्रधानस्य बिम्बस्योपहतौ प्रतिक्रियोक्ता। अथेदानीं तदङ्गानां भूम्यादीनामुपहतौ

---

1. 'मगतप्र',
2. 'मतिक्तं',
3. 'म्वं क्षा' क पाठः।
4. 'म्बे',
5. 'ग्रे स्व' ख च पाठः।
6. 'न्धग्र' क पाठः।
7. 'श्रीनारायणसूक्त'मित्यादेरियं व्याख्या।
8. 'य' घ पाठः।
9. इत ऊर्ध्वमापटलान्तं घ. च. मातृकयोर्न दृश्यते व्याख्या।

प्रतिक्रियोच्यते-**भूसङ्ग्रहे स्यादित्यादि**। भूपरिग्रहवेलायां शङ्कुभङ्गः सूत्रभङ्गः शङ्कुनतिर्भूम्यामनावेशः कुभङ्ग इत्यादय उत्पाताः, तेषु सम्भूतेषु सर्वदेवेषु निजनिजास्त्रेणाष्टोत्तरशतादिप्रसिद्धसंख्यया तत्तद्दोषानुरूपेणाज्यहोमः। होमन्यायन्तु वक्ष्यति' सतारकव्याहृतिपीठमन्त्रैरि' त्यादि। शंक्वादरकर्मकल्यत्वे-ऽन्यदुत्पादनीयमिति। तत्कर्षणे युगादिभङ्गादिष्विति तस्या भूमेः कर्षणे युगहलादीनां भङ्गो वृषपातशयनादिरिति. बीजानामप्ररोहः फलानुत्पत्तिः खातदीर्णतो निधिकलशभङ्ग इत्यादयोऽप्युत्पतेयुरिति।।

वर्षैस्त्रिभिः कर्षणमिति। आवर्त्यतामिति सर्वत्र सम्बध्यते। सकृत् कर्षणे कृते सति प्रासादस्त्रिषु वर्षेष्वपि नारभ्येत तदा पुनरपि कर्षणं कार्यम्। तत एव प्रासाद आरब्धव्य इति। एकेनेष्टकोपधेति। एकेन वर्षेणेष्टकोपधानमावर्तनीयम्। इष्टका अप्यपराः कार्याः 'इति, शान्तिहुतिश्च कार्येति। कर्षणादिषु सर्वत्रावृत्तौ पञ्चतृतैवे(?)घोरेण शान्तिहोमोऽपि कार्य इत्यर्थः। तदेवेति। प्रासादे प्रवृत्तेऽप्युपेक्षायामेकेन वर्षेण शान्तिहुतं पुनश्शेषप्रवृत्तिरिति स्यात्।।

स्थानशुद्धिरिति। सम्भवो जननं यदिह परिगृहीतायां भूमौ मनुजपश्वादीनां मरणजननं विण्मूत्रासृक्पातादिर्वा स्यात् तदा खननहरणादिरूपा स्थानशुद्धिः कार्या। सशान्तिहोमेति। शान्तिहोमेऽपि स्थानशुद्ध्यनन्तरं कार्य इत्यर्थः। यथोपपत्तीति। कर्षणे कृते शान्तिहुते संख्या वर्धते इति। स्वनिष्कृतिरिति श्वसृगालप्रसवमरणादिषु स्थानशुद्धिं कृत्वा प्रागुक्तं च शान्तिं कुर्यात्। यथोपपत्तीत्यनुवर्तते। तेन त(मु?दु)चितसंख्या लभ्यते। गृह इति। यदि प्रासादान्तरं स्यात् तदा सर्वेषु अपि प्रागुक्तनिमित्तेषु सम्भवत्सुस्थानशुद्धिं विधाय दोषानुसारेण शान्तिहोमं प्रायश्चित्तहुतं वा कुर्यात्। यथोपपत्तीत्येतदिहाप्यनुवर्तनीयम् इति।।

As detailed earlier the pots may be filled up with suitable substances and poured on the idol. With the remaining part the priest shall sprinkle the guardian deities and offer oblation to the attendants. (66)

इति प्रतिष्ठापितमन्त्रबिम्बके
विशोधनं किञ्चन सम्प्रदर्शितम्।
अथाङ्कुरादेश्च तदङ्गभावतः
प्रवर्तितस्योपहतौ तदुच्यते।।67।।

विमर्शिनी

इति उक्तप्रकारेण प्रतिष्ठापितमन्त्रबिम्बके भूपरिग्रहादितीर्थस्नानपर्यन्तैः कर्मभिः सम्यक् स्थिरीकृत्य स्थापिते मन्त्रमये बिम्बे उत्पातेषु सत्सु विशोधनं विविधं शोधनं किञ्चन किञ्चिन्मात्रं सम्प्रदर्शितम्। निमित्तानां शोधनानां च बाहुविध्यात्र[1]ः सकलं प्रतिपादयितुमशक्यमेव। अत्र प्रासादादिस्थाने दग्धे सति शान्तिनाम्ना पयस्विनीं सवत्सां धेनुमाहूय दूर्वादिकं तस्यै दत्त्वा 'शान्त्यै नमः' इत्यनेनेष्ट्वा पद्मपत्रे पयो दुहेत्। 'तत्क्षीरं नवीने मृत्पात्रे प्रताप्य तक्रेण च योजयित्वा दधिभूतं तत् पलाशदण्डेन निर्मथ्य नवनीतमाहृत्य तत् प्रताप्याज्यमाहरेत्। अपरेद्युस्तथा तामेव गां तत्पूजापुरस्सरं पद्मपत्रे दुग्ध्वा तथातप्य दधि चाहरेत्। तृतीयेऽह्नि गोमूत्रं गोमयं क्षीरं च तथैव पद्मपत्रेष्वानीय पृथक् पृथगधःकूर्चेषु पद्मपत्रेषु

1. 'न' घ. ङ. च पाठः।

संस्थाप्य पञ्चमन्त्रैः सम्पूज्य पुनरपरस्मिन् पद्मपत्रे गोमूत्रादिक्रमेण स्वस्वमन्त्रैः संयोज्य प्रणवेन मथित्वा सम्पूज्याष्टसहस्रं स्वस्वपञ्चतत्त्वानि संजप्य तेन दग्धस्थानं सर्वं संप्रोक्ष्य प्रतिमां चाभिषिच्य भस्मादिकं त्यक्त्वा शुद्धजलैराप्लाव्य खननादिविधिं कुर्यात्। तथाच विष्णुसंहितायां–

दाहे पयस्वतीं धेनुं शान्तिनाम्ना समाह्वयेत्।
दूर्वादिकं निवेद्येष्ट्वा पद्मपत्रे पयो दुहेत्।।
आतप्य दधि निर्मथ्य तत्संस्कृत्याज्यमाहरेत्।
अपरेद्युस्तथा दुग्ध्वा दधि चैवं प्रकल्पयेत्।।
तृतीयेऽह्नि शकृन्मूत्रं क्षीरं चैवं तथाहरेत्।
पद्मपत्रेषु सम्पूज्य क्रमान्मूत्रादिपञ्चकम्।।
पञ्चमन्त्रैस्तु संयोज्य मथित्वा प्रणवेन च।
सम्पूज्याष्टसहस्रं तु पञ्चोपनिषदो जपेत्।।
तेन संप्रोक्ष्य सर्वत्र स्नापयेत् प्रतिमां ततः।
हृत्वा भस्मादिकं तोयैः प्लावयित्वा समन्ततः।।
गोनिवासादि कर्तव्यं प्रायश्चित्तं यथाक्रमम्।

इति। यद्यपि सामान्यशोधनानि सामान्यप्रायश्चित्तहवनानि चात्रोक्तान्येव। तथापि एतदादीनां शोधनानामनुक्तत्वाद् विशोधनं किञ्चन सम्प्रदर्शितमित्यभिहितम्। अथ तदङ्गभावतः तस्य प्रतिष्ठाकर्मणो–ऽङ्गतया प्रवर्तितस्य सम्पादितस्याङ्कुरादेः उपहतौ विनाशादिदोषे प्राप्ते तत्प्रायश्चित्तमुच्यते।। 67।।

Thus I have shown the mode of expiation with regard to the idol installed in the temple. Now when blemishes occur in regard to the materials for worship such as seeds etc., the expiations are going to be narrated. (67)

नष्टेषु दुष्टेष्वथ[1]वोप्तबीजेषूप्त्वा स्वपात्रेष्वप[2]रेषु वाथ।
विशुद्धया स्वीयचिता सुयोज्य मूलाणुनावाह्य समर्चयेच्च।।68।।

विमर्शिनी

तत्र बीजाङ्कुराणामुपहतौ प्रायश्चित्तमाह–**नष्टेष्विति** अथ यथाकालं यथोक्तविधिनोप्तबीजेषु कृतवापेषु बीजेषु सत्सु केनचिद्धेतुना नष्टेषु अथ[3]वा केनचिद्धेतुना दुष्टेषु तत्र नष्टेषु चेत् स्वपात्रेषु वा दुष्टेषु चेदपरेषु वा यथायोगम् उप्त्वा वापं कृत्वा विशुद्धया स्वीयचिता स्वचैतन्येन सुयोज्य मूलाणुनावाह्य समर्चयेच्च। अत्रायं प्रकारः–बीजानि केवलं नष्टान्येव चेत् तत्पात्रेष्वेव तद्बीजशिष्टैर्वापं कृत्वा तत्प्रायश्चित्तं कुर्यात्। अशुद्धियुक्तानि चेत् तद्गतचैतन्यमादर्शे हेम्नि वा समुद्वास्य दोषसम्पर्कितं सर्वं त्यक्त्वा स्नात्वा शोधिततत्स्थान एव पूर्ववत् सर्वं द्रव्यान्तरेण सम्पाद्य तथा वापं कृत्वा संक्रामितचैतन्ये वस्तुनि यथावसरं सप्तशुद्धिः कृत्वा तच्चैतन्यमायोज्यानन्तरवक्ष्यमाणं प्रायश्चित्तं कृत्वा तत्सम्पातं तत्र समर्प्य मूलाणुनावाह्य समर्चयेच्चेति।। 68।।

1. 'पि' ग. घ पाठः।
2. 'खिलेषु' क. ग. घ पाठः।
3. 'पिवा के' क. ख. घ पाठः।

विवरणम्

नष्टेष्विति। सभ्यात् सुवर्णादावुद्वास्य तत्सर्वं त्यक्त्वा पुनः पूर्ववत् समुत्पाद्य पीठपूजां कृत्वा तत्र सुव.....दितिचितिं(?) प्रतिसंक्रमय्य पुनरावाहनादिकं कुर्यात्। अपरेषु वेति। पात्रदोषे पात्रान्तरोत्पादोऽपि कार्य इत्यर्थः। विशुद्धयेति। बीजानामुपहतौ सुवर्णोद्वासितचितास्सप्तशुद्धयोऽपि कार्या इत्यर्थः।। 68।।

When the seed sown happens to be lost or appears to be defective before or after sowing, they shall be taken away. Seeds may be replaced with fresh ones invoking Puṇyāha mantra and ritualistic worship. (68)

तत्र त्र्यहात् प्राङ् निजबीजवापं
समाचरेत् तण्डुलवापमूर्ध्वम्।
हुत्वेषुतत्त्वैरिषुवर्गसङ्ख्यं
पृथग् घृतं तत्र समर्पयेच्च।।69।।

विमर्शिनी

त[1]त्रोपहतौ त्र्यहात् अहस्त्रयात् प्राक् अर्वाक् चेद् निजबीजवापं निजनिजानां बीजानां वापं समाचरेत्। तत ऊर्ध्वं चेत् तण्डुलवापं पालिकादिषु तण्डुलेन वापम् आचरेत्। पुनस्तत्प्रायाशिचत्तमाह[2]–हुत्वेति। इषुतत्त्वैः पञ्चतत्त्वैः पृथग् इषुवर्गसंख्यं पञ्चविंशतिसख्यं घृतं हुत्वा तत्र बीजेषु समर्पयेच्च।। 69।।

Before the ceremony of Adhivasa, seeds shall be sown three days before the required date. If there is no such period they maybe simply drenched in water before being sown. Pañcatattva may be chanted during the action including the shower of ghee. (69)

सतारकव्याहृतिपीठमन्त्रः
स्वमूलमन्त्राष्टघृताभिरुद्धः।
अत्राखिलो होमविधिः समुक्तः
पूजामनुव्याहृतितारनिष्ठः ।। 70।।

विमर्शिनी

अत्रत्यानां तत्तदङ्गप्रायश्चित्तानां नियममाह–**सतारेति**। अत्र बीजाङ्कुराद्यङ्ग सम्बन्धिनि प्रायश्चित्तेऽखिलो होमविधिर्रेव कर्तव्यः। कथं, तस्य तस्य पुरतः स्थण्डिलं कृत्वा यथोक्तक्रमेणाग्निमाधायाज्यसंस्कारं कृत्वा पीठपूजापूर्वं मूलेन देवमावाह्य सम्पूज्य होमः कर्तव्यः। स तु होमः सतारकव्याहृतिपीठमन्त्रः प्रथमं प्रणवव्याहृतिपीठमन्त्रहोमैर्युक्तः, स्वमूलमन्त्राष्टघृताभिरुद्धः तत्र तत्र विधीयमानः प्रायश्चित्तहोमः स्वस्वमूलमन्त्राष्टावृत्तिघृतहोमपुटितो भवति। पूजामनुव्याहृतितारनिष्ठः पूजामन्त्रव्याहृतिप्रणवहोमावसानश्च भवति। एवं कृत्वा समाप्य तत्तत्सम्पातं तत्र तत्र समर्पयेदिति।। 70।।

---

1. 'अ' ङ पाठः।
2. 'होमे इ' क. ख. ग. घ. च पाठः।

विवरणम्

सतारकव्याहृतिपीठमन्त्र इति प्रणवादिभिराज्यहोम उक्तः। एवं पूजामनुव्याहृतितारनिष्ट इति। अत्रार्थादग्नौ विधिवत् पूजापि गम्यते।।70।।

In all sacrifices connected with expiations fire shall be kindled and altar may be sprinkled with water and cleansed before worship. Mūlamantra, Pīṭhamantra, Ājyāhuti and Pūjāmantras are required to be chanted for the completion of the sacrifice. The Caitanya - the spirit of the fire may be invoked in to a vessel and be kept aside. (70)

बीजेष्वरूढेषु पूनश्च वाप-
मिच्छन्ति निष्कृत्युदितं हुतं च।
श्यामेषु तिर्यक्प्रसृतेषु चैवं
केचित्, परे निष्कृतिहोममात्रम्।।71।।

विमर्शिनी

केचिदत्र बीजेष्वरूढषु अङ्कुररहितेषु पुनर्वापं निष्कृत्युदितं प्रायश्चित्तार्थमुक्तं हुतं चेच्छन्ति। श्यामेषु श्यामवर्णेष्वङ्कुरेषु तिर्यक्प्रसृतेषु तिर्यगेव प्रसृतेष्वपि एवं पुनर्वापं प्रायश्चित्तं चेच्छन्ति। परे तु पुनर्निष्कृतिहोममात्रं न पुनर्वापमिच्छन्ति।।71।।

Some prefer to sow seeds again when the earlier ,ones fail to grow. But the expiation is needed in this case also. If in the case the sprouts are blackened or destroyed seeds are to be sown again according to some authorities. (71)

बलिग्रहद्रव्यविपर्यये त
ल्लोपेऽपि मूलाष्टशताज्यहोमम्।
कुर्याद् यथार्हं च बलिं करोतु
तथा सपर्यासवनात्ययेऽपि[1]।।72।।

विमर्शिनी

बलिग्रहद्रव्यविपर्यये बलिदेवतानां बलिद्रव्याणां वा व्यत्यासे, तल्लोपे बलेरभावेऽपि मूलाष्टशताज्यहोमं कुर्यात्। यथार्हं स्वस्वयोग्यं च बलिं करोतु। सपर्यासवनात्यये त्रिषु कालेष्वप्यु[2]क्तलक्षणपूजाकालातिपातेऽपि तथा मूलाष्टशताज्यहोमं करोतु।।72।।

---

1. 'पि।। विम्बं प्रागुदवासतोऽशुचि यदि प्रक्षाल्य पुण्याहकं
कुर्याद् द्रव्यघटाभिषेकमुदवासं चोदवासे यदि।
पश्चाच्चेत्रिजशुद्धिशान्तिहवनं स्वद्रव्यकुम्भाभिषे-
काढ्यं स्थापनतो नवीकरणमेव त्वाभिषेकाद् बुधः।। न-'ग. घ पाठः।
2. 'क्ष' क. ख. घ. च पाठः।

विवरणम्

तथा सपर्यासवनात्ययेऽपीति। सवनपूजानां कर्तव्यानां तत्तत्सवनादिपातेऽपीति बीजाङ्कुर-पूजाविषये।।72।।

If there occurs any untoward mistake in the selection of materials for oblation or any lapse in putting it in fire or distributing for manes Mūlamantra is to be chanted 108 times with the pouring of ghee in the fire. In the case of change of fixed time also such expiation is needed. (72)

नन्द्यादितत्तन्मनुना ध्वजोपघाते घृतं साष्टशतं जुहोतु।
कुर्वीत शर्वे क्षुरिकाणुनैवं तदन्यतोऽस्त्रेण च वस्त्रदाहे।।73।।

विमर्शिनी

ध्वजोपघाते ध्वजानां विनाशे नन्द्यादितत्तन्मनुना तत्तद्ध्वजदेवतामन्त्रेण साष्टशतं घृतं जुहोतु। शर्वे वस्त्रदाहे वक्ष्यमाणेन क्षुरिकाणुना, तदन्यतः तदन्यदेवेषु अस्त्रेण च एवमष्टशतं घृतहोमं कुर्वीत।।73।।

विवरणम्

[1]**बिम्बं प्रागिति।** यदि तावत् बिम्बपरिगृहीते सति जलाधिवासतोऽर्वाक्तस्योपहतिः स्यात् तदा बिम्बपरिग्रहसमये यथा क्षालनपर्यन्ता शुद्धिः कृता तथा शुद्धिं विधाय पुण्याहं कुर्यात्। उदवास(तो) यदीति अशुचीत्यनुषङ्गः। तदा च क्षारजलत्वाच्चण्डालपतिताद्युपहतत्वाज्जलाशयस्याशुद्धौ तदधिवासित-स्याशौचम्। यद्वा तदधिवासकाले चण्डालपतितादिभिः स्नानादिकरणादिति। पूर्ववत् क्षालनमिहापि कार्यम्। पश्चाच्चेदिति। जलाशयादुद्धारे कृते सत्यर्वाक् प्रतिष्ठातो यद्यशुचिः स्यादित्यर्थः। निजशुद्धिशब्देन उदवासानन्तरविहिता प्रायश्चित्तविहिता वा शुद्धिर्विवक्ष्यते। स्थापनतः पश्चाच्चेदशुचित्यनुषङ्गः। बुधशब्देन नवीकरणप्रक्रियानन्तरपटले भविष्यति।।

In the case of damage to flagstaff or other pillars or get polluted, 108 times chanting of mantras along with the pouring of ghee is needed. They should be made afresh even in the case of burning or damaging the cloth of the flag. Astramantra is required in such case. For Śiva the mantra is called Kṣurikā. (73)

प्रपूरित[2]द्वारघटोपघाते तत्स्थानसंस्थं परिपूर्य चान्यम्।
तत्सिद्धतोयेन परेण वेष्ट्वा स्वास्[3]त्रोत्थसम्पातमिहार्पयेच्च[4]।।74।।

---

1. अधिकपाठमाश्रित्येयं व्याख्या।
2. 'ताशेषध क. ग. घ पाठः।
3. 'स्त्राणुस' इति मूलकोशपाठः।
4. 'च्च।।
   मिन्दाहुतिश्चापि सजीवनिद्राब्रह्माख्यकुम्भेशघटेपघाते।
   निरम्बुरेकादिषु मूलमन्त्राभिमन्त्रितापूरितमर्चयेच्च।।
   पातादिश्चक्रिकादीनां यदि स्यात् तद् यथापुरम्।
   कृत्वान्यद् वा बुधः कुर्यान्मूलमन्त्राभिमन्त्रणम्।।

विमर्शिनी

प्रपूरितद्वारघटेपघाते द्वारघटेद्वासनात् प्राग् विनाशे सति तत्स्थानसंस्थमन्यं घटं तत्सिद्धतोयेन भिन्नघटात् तोयं लभ्यते चेत् तेन, न लभ्यते चेत् परेण जलेन परिपूर्य इष्ट्वा इह स्वास्त्रोत्थसम्पातं स्वास्त्राष्टशतघृतहोमसम्पातमर्पयेच्च।।74।।

विवरणम्

प्रपूरिताशेषघटोपघात इति। बिम्बशुद्धिकलशेषु द्वारतोरणविघ्नेश्वरादिकलशेषु वास्तुनिष्कृत्यादिकलशेषु द्रव्यकलशेष्वपीत्यर्थः। तत्स्थानसंस्थमन्यं तत्सिद्धतोयेन परेण वा परिपूर्येति योज्यम्। कलशभङ्गतावत् तत्रापरं कुम्भं निधाय भज्यमानकलशोदकेन पूरणं मण्डूकादिपाततोऽशूचावन्येनोदकेन पूरणं किन्तु तदा सुवर्णादावुद्वास्य तच्छुद्धिं प्रागुक्तवत् कृत्वा प्रपूरितकुम्भे सङ्क्रमयितव्यम्।।74।।

If a pot is broken it shall be replaced with another transferring its contents or filling it up with fresh water is required. The water that remaining in the broken jar also can be used to fill up the new jar. Here again pouring of ghee is needed as a part of the sacrificial ritual. (74)

सामान्यजातदहनापदि भस्म हृत्वा
त्रिर्गोशकृद्गुलिकयायतनं विशोध्य।
कृत्वाग्निमष्टगुणितेरितसंस्क्रियाभि-
सङ्ख्यं सुधीर्ध्रुवघृताहवनं विधाय।।75।।

हुत्वा चतुर्ग्रहघृतं विधिवन्मनस्व-
त्याज्यं स्त्रुवेण च[1] सभूःप्रभृतीषुतत्त्वैः।
आवाह्य मूलमनुना परिपूज्य मूले-
नास्त्रेण चाष्टशतमाज्यहुतिं विदध्यात्।।76।।

विमर्शिनी

अथाग्निनाशादिप्रायश्चित्तमाह-**सामान्येति**। सामान्यजातदहनापदि सामान्येन प्रायश्चित्तहोमाद्यर्थमुत्पादितस्याग्नेर्विनाशे सति तत्रस्थं भस्म हृत्वा त्यक्त्वा तदायतनं तत्कुण्डान्तर्भागं गोशकृद्गुलिकया गोमयपिण्डेन त्रिस्त्रिधा विशोध्याग्निं कृत्वा निक्षिप्य अष्टगुणितेरितसंस्क्रियाभिसंख्यम् अष्टभिर्गुणिता प्राक्प्रोक्ता संस्कारसंख्या यथा भवति तथा ध्रुवघृताहवनं तारेण घृतहोमं सुधीः गर्भाधानादिसंस्कारविशेषज्ञो गुरुः विधाय मनस्वत्या 'मनोज्योतिरि'त्यनेन विधिवत् चतुर्ग्रहघृतं चतुरवदानेन परिगृहीतमाज्यं स्रुचा हुत्वा सभूःप्रभृतीषुतत्त्वैः भूरादिभिः पञ्चतत्त्वैश्च स्त्रुवेण च हुत्वा मूलमनुनावाह्य परिपूज्य पूनर्मूलेनास्त्रेण चाष्टशतमाज्य[2] हुतिं विदध्यात्।।75-76।।

ध्वजतोरणमङ्गलादि चेत् स्यात् स्खलितोल्लङ्घितभिन्नदग्धमत्र।
निजशान्तिहुतं चरेद् विभेदेऽप्यशुचिस्पृश्यपि चापरं च कल्प्यम्।। -सा' क. ग. घ पाठः।

1. 'सहभूः' क. ग. घ पाठः।
2. 'ज्या' ग. ङ पाठः।

विवरणम्

[1]**ब्रह्माख्येति** सकलब्रह्मकलशाभिप्रायम्। तत्त्वकलशस्याप्ययमेव न्यायः। यद्वाख्यशब्देनैतदभिहितं द्रष्टव्यम्। निरम्बुरेकादिष्विति। क्षरणविस्मरणादिवशाज्जनाभावे जलस्य रेचने क्षरणे द्रव्यकलशेषु पुनरुक्तपूरणाभावे चेत्यर्थः। अत्र स एव कुम्भो भवति। चकारो होमोपलक्षणार्थः।।

चक्रिकादीनामिति चक्रिकाकूर्चपल्लववाससामत्र कृतानां ग्रहणम्। पातादिः पतनभङ्गविस्मरणादिः। अन्यद्वेति। पूर्वस्याकर्मकल्यत्व इति भावः। वक्ष्यति च–विभेदेऽप्यशुचिस्पृश्यतीति।।

मङ्गलादीति। आदिशब्देन रत्नादिग्रहणम्।।

सामान्यजातदहनापदीति। सामान्यपदमग्निपदेन योजनीयम्। जातपदं चाग्निविशेणम्। सर्वेषामधिवासतत्त्वप्रायश्चिताद्यग्निनां जातानां विनाशे सतीत्यर्थः। अत्रावह्येति वक्ष्यमाणत्वात् प्रागावाहितचितमभिदेवतात्मकमायतने निष्कलं विभाव्य भस्मापनयनमित्यवबोद्धव्यम्। सुधीरिति। जननान्तरं होममध्ये वैतत्सम्भवस्तत्र होममध्यकृतपरिधि परिस्तरणाज्यहविरादिषु तथास्थितेष्वे-वाग्निराधातव्यः। कृत्वाग्निमिति। तत्र कुण्डेऽग्निमाधायेत्यर्थः। ततः सप्ताष्टौ षोडश पञ्चैव वा यावन्तो गर्भाधानादि-संस्का(राः) तत्र पूर्वं कृताः। तत् प्रत्येकमष्टगुणितात् प्रणवेन (जि?जु)ह्वत् कुर्यात्। तत्र सप्तसु षट्पञ्चाशदष्टसु चतुःषष्टिरित्याद्यूह्यम्। उक्तावाह्य(?) मूलेनावाह्येति। प्रागायतने विभावितस्याधानार्थमेतत्। जाताग्नेर्विनाशमात्र एतदुत्तम्।।75–76।।

If the fire kindled in the sacrificial pit is extinguished due to some reason the pit may be cleaned taking away the ashes already deposited. Using a ball made of cow dung the pit may be rubbed thrice before fresh fire is kindled in it. Thereafter the fresh fire may be kindled with tinder. According to the number of domestic rituals already done, the pit may be poured with ghee taking the same in a ladle. Mantras are also required in this act including Pañcatattva. Ghee may be poured 108 times to make sure that the fire is blazing. (75-76)

दुष्टाग्निं मुकुरोदरे प्रतिफलय्य क्षालनाद्याः क्रियाः
कृत्वोद्वास्य ततोऽन्यतो हुतवहं सन्त्यज्य भस्मादिभिः।
आलिप्यात्र विभावसुं विधिवदुत्पाद्येष्टपीठस्थत-
न्मूर्तौ पूर्वचितिं प्रणीय सकलं नाशोक्तवत् प्राचरेत्।।77।।

विमर्शिनी

दुष्टाग्निम् अग्निरशुद्धो भवति चेत् तमग्निं मुकुरोदरे आदर्शान्तर्भागे प्रतिफलय्य संक्रमय्य क्षालनाद्याः क्रियाः सप्तशुद्धीः कृत्वा ततोऽन्यतः आदर्शहिरण्यादावुद्वास्याशुद्धस्थलगतैर्भस्मादिभिः सह तं हुतवहमग्निं सन्त्यज्य गोमयजलेनालिप्यात्र विभावसुमग्निं विधिवत् पूर्ववदेवोत्पाद्य जनयित्वा इष्टपीठस्थतन्मूर्तौ पीठपूजानन्तरं मूर्तिकल्पनायां कृतायां पूर्वचितिं शुद्धामादर्शादिषु स्थितां तत्र प्रणीय योजयित्वा नाशोक्तवत् 'मनस्वत्या' चतुर्ग्रहघृतहोमादिकं सकलं प्राचरेत्।।77।।

---
1. अधिकपाठमाश्रित्येयं व्याख्या।

विवरणम्

अथ सतोरेऽशुद्धावित्याह-**दुष्टाग्निमिति**। मुकुरं दर्पणं। उद्वास्य तत इति। सुवर्णादाविति भावः। विधिवदुत्पाद्येत्यायतनकरणम्। गर्भाधानादियथोक्तसंस्कारा इत्यादि। तदुक्तं-सकलं नाशोक्तवदिति। मनस्वत्यादिकमुक्तम्। नात्रार्थात् पुनरावाहनमिष्यते। यदा पुनरायतनस्यापि जलसंस्पर्शनादिवशात् बाधः तदा ततः स्थानादुद्वास्यायतनं कृत्वोक्तवदग्निमुत्पाद्य तत्र संक्रमणीयम्। (त)दाप्यशुद्धौ शुद्धयोऽपि कार्या इति।। 77।।

If the sacrificial fire gets polluted it should be got reflected in a mirror and acts of cleaning with water etc. may be performed on the mirror. The power or spirit of the fire may then be transferred to gold by invocations. Now the pit may be cleared by taking away the ashes and tinder before fresh fire is kindled properly. The spirit transferred to gold may again be invoked back in to the fire blazing in the pit and worship shall be made. In the place of oblation sacrificial tinder may be offered. (77)

अशुचौ शुचौ त्रिमनुनेत्यथाग्नये-
पवमानपावकशुचिप्रभेदिना ।
स्रुवतः स्रुचा सचतुराज्यया हुनेद्
विधिवत् तदृग्भिरथवा यथाबलम्।। 78।।

विमर्शिनी

अशुद्धौ विशेषमाह-**अशुचाविति**। शूचावग्नौ अशुचौ अशुद्धे अथ अग्निनाशोक्तप्रायश्चित्तानन्तरम् अग्नयेपवमानपावकशुचिप्रभेदिना 'अग्नये पवमानाय स्वाहा' 'अग्नये पावकाय स्वाहा' 'अग्नये शुचये स्वाहा' इति भेदत्रययुक्तेन त्रिमनुना मनुत्रयेण यथाबलम् अशुद्धेर्बलाबलवशात् स्रुवतो वा सचतुराज्यया चतुर्गृहीतघृतयुक्तया स्रुचा वा हुनेत्। अथवा तदृग्भिः 'अग्न आयुंषि पवसे', 'अग्ने पवस्व','अग्ने पावकरोचिषा', 'स नः', 'पावकदीदिवः','अग्निः शुचिव्रततमः', 'उदग्ने शुचयस्तव' इति द्वौ द्वौ मन्त्रावुक्त्वा विधिवत् तिष्ठन् पूर्णां हुनेत्।।78।।

विवरणम्

अशुचौ शुचाविति। शुचिरग्निः। यदाग्नेरशुद्धिमात्रं नोद्वासनाद्युचितः यथा तदेयं निष्कृतिः स्यात्। यदा द्वारि 'अग्न आयूंषि', 'अग्ने पवस्व', 'अग्ने पावक', 'स नः पावक' इति, 'अग्निः शुचिव्रततमः', 'उदग्ने शुचयः' इतिवदिति क(लो?लिशो)क्तवदेवेत्यर्थः।।78।।

If in the course of a sacrifice the fire gets polluted it can be rectified by chanting the mantra in which following words occur- Pavamāna, Pāvaka, Śuci. Thus Agnaye, Pavamānāya, Agnaye Pāvakāya etc. may be cited. Ghee from the ladle is also to be poured. (78)

प्रागाद्याशाहुताशापदि सपदि निधायाग्निमाचार्यकुण्डा-
दाज्ये सिद्धेऽत्र हुत्वा समिधमपि चतुस्सङ्गृहीतं स्रुचाज्यम्।

तत्तद्दिक्चोदितेनाहितशिखिनि हुनेत् पञ्चहोत्रादिकेन
स्वीयेऽपादानवह्नौ स्रुवहुतिदशकं चैकहोत्रादिमन्त्रैः ।।79।।

विमर्शिनी

प्रागाद्याशाहुताशापदि अधिवासप्रायश्चित्तादिहोमेषु दिक्षु विहृतानामग्नीनां नाशे सपदि तदानीमेव भस्मादित्यागा(न)न्तरं गोशकृद्गुलिकयायतने शुद्धे सति आचार्यकुण्डादग्निं पुरोवन्निधाय आहितशिखिनि निक्षिप्ताग्नौ आज्ये सिद्धे सति अत्रैकां समिधमपि हुत्वा चतुस्सङ्गृहीतमाज्यं स्रुचा तत्तद्दिक्चोदितेन पञ्चहोत्रादिकेन मन्त्रेण हुनेत्। आचार्यः स्वीयेऽपादानवह्नौ स्वकुण्डस्थाग्नौ एकहोत्रादिमन्त्रैः 'ब्राह्मण एको होता', 'अग्निर्द्विहोता', 'पृथ्वी त्रिहोता', 'अन्तरिक्षश्चतुर्होता', 'वायुः पञ्चहोता', 'चन्द्रमाष्षड्ढोता', 'अ[1]न्नं सप्तहोता', 'द्यौरष्टहोता', 'आदित्यो नवहोता', 'प्रजापतिर्दशहोता' इत्येभिर्दशभिः स्रुवहुतिदशकं च हुनेत्।।79।।

विवरणम्

एवमेकाग्नौ सर्वगुक्तमथानेकाग्निषु विशषमाह–प्रागाद्याशाहुताशापदीति। अधिवासहोमे प्रायश्चित्तहोमे च दिक्ष्वग्निसम्भवः। आपद् विनाशः। सपदीति। सद्य एव। निधायाग्निमिति। भस्म हृत्वा गोमयगुलिकयायतनमिहापि शोधनीयम्। आज्ये सिद्ध इति। होममध्ये चेत् पूर्वसिद्धमाज्यं भवति। अन्यदा त्वाज्यमेतदर्थमेव संस्कर्तव्यमिति। आहितशिखिनीत्याहितेऽग्नौ। तस्मिन् दिक्कुण्डाग्नाविति यावत्। स्वीयेऽपादानवह्नावित्येवं निर्देश उपपत्तिसूचनार्थः। अयमभिप्रायः।।79।।

If the fire is got extinguished in the sacrificial pits located in the eastern direction onwards the pit may be cleaned by removing the ashes by rubbing with balls of cow dung. Thereafter fire from the central sacrificial pit may be used to kindle fresh fire in that pit with usual rituals that are prescribed. Here again several mantras are required and tinder is to supplement for oblations. The priest shall chant a series of ten mantras to kindle the main pit. The mantras from "Brahmaṇe ekahotā "up to" Prajāpatir daśahotā" are to be chanted making them the required ten. (79)

प्राग्याम्यसौम्यदिक्षु स्युः पञ्चचतुष्षडादिहोतारः।
प्रत्यग्विदिक्षु विहिता मनस्वती च क्रमेण तन्मन्त्राः।।80।।

विमर्शिनी

प्राग्याम्यसौम्यदिक्षु पूर्वदक्षिणोत्तरदिक्षु क्रमात् पञ्चचतुष्षडादिहोतारः पञ्चहोता चतुर्होता षड्ढोता च। प्रत्यग्विदिक्षु च प्रत्यग्भागे कोणेषु च। मनस्वती च तन्मन्त्रा विहिताः। पञ्चहोत्रादीनां मन्त्रान् वक्ष्यति।।80।।

विवरणम्

प्रत्यग्विदिक्ष्विति। पश्चिमकुण्डे च विदिक्षु चेत्यर्थः।।80।।

---

1. 'ग्नि' क पाठः।

The mantras are required for the different directions numbering four and corners of the same number. They are indicated in the commentary till "Agnirhotā" (80)

करोतु सावान्तरपूर्णमष्टशः
स्रुवाहुतिं व्याहृतिपञ्चतत्त्वकैः।
प्रणीतवह्नावथ मूलपावके
स्वमूलमन्त्रेण शतं च साष्टकम्।।81।।

विमर्शिनी

अथ प्रणीतवह्नौ निक्षिप्ताग्नौ व्याहृतिपञ्चतत्त्वकैः नवभिर्मन्त्रैः सावान्तरपूर्णम् अन्तरान्तरा स्वस्वपूर्णाहुत्या संयु[1]तमष्टशः स्रुवाहुतिं करोतु। मूलपावके आचार्यकुण्डे स्वमूलमन्त्रेण साष्टकमष्ट[2]सहितं शतं च स्रुवाहुतीः करोतु।।81।।

Once fire is put in to the pit again after the loss of the original, priest shall kindle it with the pouring of ghee to the accompaniment of the mantras. 108 times such acts are needed chanting Mūlamantra (81)

नष्टे मूलविभावसौ वसुपदिक्कुण्डान्निधायाखिलं
तस्मिन्नष्टगुणेष्टसंस्कृतिहुतिं तन्निष्कृतिं चोक्तवत्।
कृत्वोदग्दहनं प्रणीय विनिधायास्मिन् स्वनाशोदितं
कुर्यान्निष्कृतिकर्म मूलदहने तद्वद् दशात्माहुतिम्।।82।।

विमर्शिनी

मूलविभावसौ आचार्यकुण्डस्थाग्नौ नष्टे सति वसुपदिक्कुण्डाद् उत्तरदिग्गतात् कुण्डाद् अखिलमग्निं तस्मिन् आचार्यकुण्डे निधाय अष्टगुणेष्टसंस्कृतिहुतिं स्वस्वसंस्कारसंख्याष्टगुणसंख्याहुतिम् उक्तवत् पूर्वोक्तप्रकारेण तन्निष्कृतिं सामान्यनाशप्रायश्चित्तं च कृत्वा उदग्दहनम् उदक्कुण्डेऽग्निं प्रणीय नीत्वा निधायास्मिन् कुण्डे स्वनाशोदितं निष्कृतिकर्म विधिवत् कुर्यात्। मूलदहने तद्वत् तदुक्तप्रकारेण एकहोत्रादिमन्त्रैर्दशात्माहुतिं च कुर्यात्।।82।।

विवरणम्

नष्टे मूलविभावसाविति। वसुपदिक्च्छब्देनोत्तरदिगुच्यते। अखिलं कृत्स्नं भस्माङ्गारजातम्। इष्टसंस्कृतिशब्देन षट्सप्तादि तदुक्तसंस्कारग्रहणम्।।82।।

In case there is the loss of fire in the main sacrificial pit kept by the priest it should be cleaned by removing the ashes and rubbing it clear by the balls of cow dung. The fire from the northern pit is to be transferred into it. Thereafter it may be split up into eight to be distributed to the ones

---

1. 'सहितं' ख. घ. ङ पाठः।
2. 'ष्टकस' ख. घ. च पाठः।

in the region. All rites required are to be performed with the chant of Mūnamantra especially adding the ten mantras prescribed earlier from Ekahotā to daśahotā. (82)

नष्टेऽस्मिन् दहनद्वये विधिवदुत्पाद्य[1] स्वकुण्डेऽनलं
चित्तिस्त्रुक्प्रमुखैः पृथक् चतुरवत्ताज्यं स्त्रुचा होतृभिः।
षड्भिः स्त्रुसर्पिरपि वेण दशमन्त्रैरेकहोत्रादिभि-
र्भूराद्यैश्च पृथक् चतुर्ग्रहघृतं भङ्क्त्वाष्टधात्राहुनेत्।।83।।

विमर्शिनी

अथास्मिन् दहनद्वये आचार्यकुण्डोदक्कुण्डस्थाग्निद्वये नष्टे सति विधिवदाचार्यः स्वकुण्डेऽनलमुत्पाद्य चित्तिस्त्रुक्प्रमुखैः षड्भिर्होतृभिः पृथक् चतुरवत्ताज्यं स्त्रुचाहुनेत्। पुनरेकहोत्रादिभिर्दशभिर्मन्त्रैः सर्पिः स्त्रुवेणापि हुनेत्। अत्रोभयस्यापि नाशे भूराद्यैश्चतुर्भिश्चतुर्ग्रहघृतं पृथगष्टधा भङ्क्त्वाष्टधा मन्त्रं चोक्त्वा आहुनेत्।।83।।

विवरणम्

नष्टेऽस्मिन्निति। आद्यकुण्डमाचार्यकुण्डम्। षट्भिर्होतृभिरिति सम्बन्धः। भूराद्यैश्चेति।।83।।

If in the case both the fire in the central pit and that of the northern pit are lost together, the priest shall create fresh fire in his own altar in the proper way. The assistance of six Hotrs can be sought in this connection to chant mantras like "cittisruk" and the above mentioned ten mantras beginning with "ekahotā". Each assistant will have to pronounce his mantra separately. (83)

प्रत्येकं शरतत्त्वकश्चतुरवत्ताज्यं विभज्याष्टधा
हुत्वात्राजुहुयात् स्त्रुवाहुतिशतं मूलेन चाष्टाधिकम्।
नीत्वा सौम्यविभावसुं विधिवदाधायामुतो निष्कृतिं
तन्त्राशाभिहितां दशात्महवनं मूलानले चाचरेत्।।84।।

विमर्शिनी

पुनः शरतत्त्वैः पञ्चतत्त्वैः प्रत्येकं चतुरवत्ताज्यं तथा विभज्य हुत्वा अत्रैवाष्टाधिकं स्त्रुवाहुतिशतं मूलेनाजु[2]हुयात्। पुनरमुतोऽस्मात् कुण्डात् सौम्यविभावसुम् उदक्कुण्डेऽग्निं नीत्वा तन्त्राशाभिहितां तन्त्राशे विहितां निष्कृतिं विधिवदाधाय मूलानले एकहोत्रादिमन्त्रैर्दशात्महवनं चाचरेत्।।84।।

विवरणम्

अमुतो नीत्येति। आचार्यकुण्डादित्यर्थः।।84।।

The ghee preserved in the ladle shall be divided into eight parts and

1. 'द्याद्यकु' क.ग. घ पाठः।
2. 'ज्यं जुहु' क पाठः।

each shall be poured with 108 chants of Mūlamantra. Then the fire from the central pit shall be transferred to the one in the north with necessary expiations. He shall also chant the ten mantras from Ekahotā for expiating the loss of sacrificial fire. (84)

दशचतुरक्षरपूर्वौ पञ्चषडाद्यौ च सप्तपूर्वश्च।
वागाद्यश्च षडेते होतारः संस्मृताः क्रमेण स्युः।।85।।

विमर्शिनी

षण्णां होतॄणां संज्ञाः क्रमेण कथयति-दशेति। दशचतुरक्षरपूर्वौ दशहोता चतुर्होता च, पञ्चषडाद्यौ च पञ्चहोता षड्ढोता च, सप्तपूर्वश्च सप्तहोता च, वागाद्यश्च वाग्घोता च, एते षट् क्रमेण होतारः संस्मृताः।।85।।

विवरणम्

षड्ढोतॄन् दर्शयति-दशचतुरक्षरपूर्वावित्यादि। दशहोता चतुर्होतेत्याद्याख्या।।85।।

There are six Hotrs called respectively as (1) Daśahotā (2) Caturhotā (3) Pañcahotā (4) Ṣaḍhotā (5) Saptahotā and (6) Vāghotā. (85)

चित्तिः स्रुक् पृथिवीहोताग्निर्होता ततश्च सूर्यन्ते।
तदनु महाहविराद्यो वागाद्यः स्युर्वशादिहोतारः।।86।।

विमर्शिनी

होतॄणां मन्त्रान् क्रमेण कथयति-चित्तिः स्रुगिति। एते दशादिहोतारः। चित्तिः स्रुगिति दशहोता, पृथिवीहोतेति चतुर्होता, अग्निर्होतेति पञ्चहोता, सूर्यन्त इति षड्ढोता, महाहविरित्याद्यः सप्तहोता, वागाद्यो वाग्घोता, इति विभागः।।86।।

The mantras to be used by these six hotrs are indicated as follows-

For Daśahotā- Cittisruk, Catuhotā-Privthihotā, Pañcahotā-Agnirhotā Ṣaḍhotā- Suryanta etc., Saptahotā-Mahāhavi etc., Vāghota- Vāgādya etc. (86)

प्रासाददक्षिणदिगाद्युदिताग्निनाशे-
ऽप्युत्पाद्य तं स्वहरिदुक्तचतुर्ग्रहाद्यम्।
कुर्वीत वैवमथ तत्त्वहुताशनादि-
नाशेऽखिलं गुरुकृशानुविनाशवच्च[1]।।87।।

विमर्शिनी

प्रासाददक्षिणदिगाद्युदिताग्निनाशे प्रासादस्यापि दक्षिणादिदिग्विभागे-नोत्पादितानामग्नीनां नाशे तमग्निं सामान्यनाशोक्तक्रमेणोत्पाद्य एवं स्वहरिदुक्तचतुर्ग्रहाद्यं स्वस्वदिगुक्तहोत्रा चतुर्ग्रहघृतहोमाद्यं कुर्वीत।

1. 'च्च।।
कल्पोक्तवत् सति जुहोतु मिथोऽग्निसंसर्गादाविहातिविह्वतिप्रभृतेर्यथार्हम्।
ङेन्ताख्यया स्रुवहुतिं निजमन्त्रतो वा पूर्णं स्रुवाष्टहुतिमप्यथ मूलतश्च।। म' क. म. घ. पाठः।

वा अथवा सामान्या[1]ग्निनाशवदेव कुर्वीत। अथ तत्त्वहुताशनादिनाशे तत्त्वहोमादिप्रधानाग्नेर्नाशे दोषयुक्ते च गुरुकृशानुविनाशवद् आचार्यकुण्डस्थाग्निनाशवद् अखिलं प्रायश्चित्तं कुर्वीत।।87।।

विवरणम्

स्वहरिदुक्तचतुर्ग्रहाद्यमिति। यथा दक्षिणदिशि चतुर्होत्यादि। इति तत्त्वहोमाग्नेर्दिक्समवायाभावा(दा)चार्यकुण्डवन्न्यायः।।87।।

If the sacrificial fire is got extinguished from pits located to the southern region of the shrine onwards fresh fire is to be kindled by the priest properly and distributed to the location with usual ingredients to kindle them like ghee, tinder etc. For the total loss of fire great expiations are called for as in the case with Ācāryakuṇḍa- the main pit. (87)

[2]कल्पोक्तवदिति। ङेन्ताख्ययेति। 'अग्नये विपचये स्वाहे'ति। वि निजमन्त्रतो वेति।।[3]

मनोज्योतिरयाश्चाग्ने यदस्मिन् स्वस्तिनोऽपि च।
मिन्दाद्वयं व्याहृतयश्चोक्ताः स्युः सर्वनिष्क्रियाः।।88।।

विमर्शिनी

प्रायश्चित्तेऽपरिज्ञाते सर्वप्रायश्चित्तं पूर्वैरुक्तं विमृशति–**मनोज्योतिरिति।** 'मनो ज्योतिः', 'अयाश्चाग्ने 'यदस्मिन् कर्म[4]णः', 'स्वस्ति नः', मिन्दाहुतिद्वयं व्याहृतयश्च दशैताः सर्वनिष्क्रियाश्चोक्ताः।।88।।

The following mantras stand for all kinds of expiations. (1) Manojyotis (2) Ayaścāgne (3) Yadasmin (4) Svasti na and(5) Yanma Ātmanaḥ. (88)

कृष्णलाविंशतिमितं जातरूपं द्विजोत्तमे।
दत्तं स्यात् सर्वदोषेषु प्रायश्चित्तमनुत्तमम्।।89।।

विमर्शिनी

अथ प्रायश्चित्तानामूनातिरेकपरिहराय ब्राह्मणतर्पणादिकमपि कार्यमित्याह–**कृष्णलेति।** कृष्णलाविंशतिमितं कृष्णला गुञ्जाफलं तद्विंशतिमितं जातरूपं हिरण्यं द्विजोत्तमे वैदिकविषयं तान्त्रिकविषयं च प्रायश्चित्तविधानज्ञे ब्राह्मणे दत्तं सर्वदोषेष्वनुत्तमं प्रायश्चित्तं स्यात्।।89।।

For all the blemishes the presentation of gold of the size of Kṛṣṇala (Gunga Abrus precatorius also called the speckled seed) is enough expiation without a parallel. (89)

क्रियामध्येऽन्तरा गच्छेद् यदि तत्र मनस्वतीम्।
जुहोतु सर्वयज्ञं वा तत्तद्दोषोपपत्तितः।।90।।

---

1. 'न्ययाग्नि क. ख. घ. च. पाठः
2. कल्पोक्तवदित्यधिकपाठमाश्रित्य प्रवृत्तेयं व्याख्या।
3. इत ऊर्ध्वमापटलान्तं न दृश्यते व्याख्येयम्।
4. 'णि' क पाठः।

विमर्शिनी

अथान्तरागमने प्रायश्चित्तविशेषमाह-**क्रियामध्य** इति। यत्र कुत्रचित् क्रियामध्ये यः कश्चिदन्तरा मध्ये गच्छेद् यदि तत्र मनस्वतीं जुहोतु। अथवा तद्गौरवे सर्वयज्ञं जुहोतु। पञ्चदुर्गामनस्वतीत्याहुतिभिःपूर्णाहुतिः सर्वयज्ञमित्युच्यते।।90।।

If somebody passes through the sacrificial procedures like inadvertent crossing of man and animals (like cat) between the fire and priest there the mantra "Manasvati" may be used for pouring ghee into the fire as expiation of all similar obstacles. (90)

स्नानाय क्लृप्तकलशेऽशुचितां प्रपन्ने
स्वर्णेऽमुना समभिषिच्य विशोध्य तत्स्थम्।
चैतन्यमन्यकलशे सुविशोधितैत-
तस्थानस्थिते समधिरोप्य यथाविधीष्ट्वा।।91।।
स्वैः पञ्चतत्त्वमनुभिः पृथगष्टवारं
सर्पिः स्रुवेण चतुरात्तघृतं स्रुचा च।
हुत्वाष्टधा पृथगथाष्टशतं स्वमूले-
नास्त्रेण चार्प्य घृतमत्र जपेच्च तावत्।।92।।

विमर्शिनी

अथ कलशानामशुद्धिसंभवादौ प्रायश्चित्तमाह-**स्नानायेति**। स्नानाय देवाभिषेचनाय क्लृप्तकलशे पूजिते कलशे अशुचितामशुद्धतां प्रपन्ने प्राप्ते अमुना कलशेन स्वर्णेऽभिषिच्य विशोध्य सप्तशुद्धीः कृत्वा तत्स्थं चैतन्यं सुविशोधितैतत्स्थानस्थिते तत्त्यागपूर्वं तत्स्थानं संशोध्य तत्रैव पूरितान्यकलशे समधिरोप्य संयोज्य यथाविधीष्ट्वा यथायोगं तत्पुरतःस्थाग्नौ वाधिवासकुण्डस्थाग्नौ वा स्वैः पञ्चतत्त्वमनुभिः पृथक् पृथक् अष्टवारं सर्पिः स्रुवेण वा स्रुचा (वा) चतुरात्तघृतं पृथगष्टधा हुत्वाथ स्वमूलेन स्वेनास्त्रेण चाष्टशतं घृतं च हुत्वा सम्पातं कलश आर्प्य संस्पृश्य तावत् जपेच्च। अथ तेन यथाविध्यभिषिञ्चेत्।।91-92।।

If the sacrificial water kept apart for the bathing ceremony is polluted the water may be transferred to a golden pot and the priest shall come back after taking the bath himself. The divinity of the pot may be purified with Puṇyāha. The lotus put there previously may be replaced with fresh ones. After invoking divinity the water again may be shifted to the first one for propitiation. (91)

In the sacrificial pit Samit may be put along with the chanting of the Pañcatattva mantra of the respective god. The ghee kept in the ladle may be split up into eight parts and poured separately. 108 chanting of Astramantra is required for this Pūrṇāhuti. Once the sacrifice is over the leftovers may be kept apart in a pit and it may be sanctified by the chanting of mantras. (92)

भिन्ने घटेऽन्यं प्रविधाय तत्र तच्छेषयुक्तान्यजलैः प्रपूर्य।
इष्ट्वा स्रुवाज्याहुतिमुक्तनीत्या विधाय शेषं विधिमादधीत।।93।।

विमर्शिनी

घटे कलशे भिन्ने सति अन्यं कलशमत्र प्रविधाय तत्र कलशे तच्छेषयुक्तान्यजलैः भिन्नस्य कलशस्य जलं लभ्यते चेत् तच्छेषजलयुक्तान्यजलैः प्रपूर्येष्ट्वा उक्तनीत्या पञ्चतत्त्वहोमाद्युक्तनीत्या स्रुवाज्याहुतिं विधाय शेषं विधिमादधीत।।93।।

If a jar is broken another may be substituted and propitiated. The water remaining in the broken jar may be used along with fresh water to fill up the new pot. Invocation and other rites are due for divinity after which it may be used for bathing the god installed. (93)

विज्ञापिते वा कलशाधिवासे
तदेकदेशस्नपने कृते वा।
उपाहतिश्चेत् कलशे च मन्त्र-
बिम्बे च तन्निष्कृतिमादधीत।।94।।

विमर्शिनी

कलशाधिवासे देवाय विज्ञापिते वा तदेकदेशस्नपने कृते कलशाभिषेकमध्ये वा उपाहतिर्विरोधश्चेत् कलशे मन्त्रबिम्बे च तन्निष्कृतिं तत्प्रायश्चित्तसम्पातस्पर्शनमादधीत।।94।।

Once the pot is sanctified with an invocation to the god, or partly used for bathing if in the case it gets polluted then expiations shall be made both in the pot as well as on the idol. (94)

दुष्टे वा बलिकौतुके निपतिते वात्रैव संशोध्य त-
त्प्रायश्चित्तहुतिं स्वपञ्चमनुमूलास्त्रादिभिर्युक्तितः।
कृत्वा कर्म समाप्य मूलमनुबिम्बे योजयित्वा तत-
स्तत्तद्दोषबलाबलानुसरणात् कुर्याद् गुरुर्निष्कृतिम्।।95।।

विमर्शिनी

अथ बलिकौतुकादीनामशुद्ध्यादिसम्भवे प्रायश्चित्तमाह—**दुष्टे वेति**। बलिकौतुके बल्यर्थं नीयमाने कर्मबिम्बे दुष्टेऽशुद्धे वा निपतिते वा अत्रैव स्थले तन्निधाय संशोध्य सप्तशुद्धीः कृत्वा स्वपञ्चमनुमूलास्त्रादिभिः पूर्वोक्तैर्युक्तितो यथाबलं तत्प्रायश्चित्त[1]हुतिं कृत्वा बलिकौतुके सम्पातं संस्पृश्य शेषं कर्म समाप्यान्तरेत्य मूलमनुबिम्बे योजयित्वा ततो गुरुः परापरदोषविशेषज्ञः तत्तद्दोषबलाबलानुसरणाद् निष्कृतिं कुर्यात्।।95।।

If the Karmabimba- movable idol- is polluted or dropped in the ground then and there Puṇyāha may be made to purify it in addition to expiating

1. 'त्ता' क. ङ पाठः

rites like Saptaśuddhi. A Prāyaścitta homa is to be performed in the spot and the rites completed before taking it in to the sanctum. The priest shall transfer the divinity from the portable idol to the permanent idol installed there. He shall perform expiatory rites on the original idol depending upon the gravity of pollution. (95)

भग्ने पथि प्रस्थितकर्मबिम्बे
देवं समायोज्य ततोऽन्यबिम्बे।
निष्कृत्य शेषं सुसमाप्य मूले
नीत्याचरेन्निष्कृतिकर्म सम्यक्॥96॥

विमर्शिनी

प्रस्थितकर्मबिम्बे बल्यर्थं तीर्थस्ना[1]नाद्यर्थं वा प्रस्थापिते कर्मबिम्बे पथि मार्गे भग्ने सति ततोऽन्यबिम्बे देवं समायोज्य निष्कृत्य सप्तशुद्ध्यनन्तरं स्वस्वपञ्चतत्त्वहोमाद्युवतं। प्रायश्चित्तं कृत्वा शेषं विधिं सुसमाप्य[2] प्रकृतकर्मशेषं विधिवत्[3] कृत्वा मूलबिम्बे नीत्वा तत्र निष्कृतिकर्म सम्यक् उत्तमविधानेनाचरेत्॥96॥

If the idol taken for procession in the Mahābhiṣeka ceremony is fallen down and broken, or lost in waters of lake a new idol shall be made to replace it. God may be transferred into another idol, mirror or golden pot by invocation. Thereafter performing the usual ceremonies needed for the divinity it can be used for the completion of the ceremony of bathing after the festival. Again the divinity may be transferred to the original idol installed in the temple. Thereafter expiatory rites beginning with purification of the shrine may be carried out in full measure. (96)

भूरादिमन्त्रोक्तचतुर्गृहीतं[4] मनस्वतीपूर्वदशाहुतिश्च।
स्वपञ्चतत्त्वोदितसास्त्रमूलाहुतिद्विजेज्यादिरिहापि योज्याः[5]॥97॥

विमर्शिनी

इहापि निष्कृतौ पूर्वोक्तप्रकारेण भूरादिमन्त्रोक्तचतुर्गृहीतं 'भूराद्यैश्च पृथक् चतुर्ग्रहघृतं भङ्क्त्वाष्टधात्राहुनेत्' इत्युक्तादिकं, मनस्वतीपूर्वदशाहुतिश्च 'मनोज्योतिः','अयाश्चाग्ने' इत्युक्तं सर्वप्रायश्चित्तं,स्वपञ्चतत्त्वोदितसास्त्रमूलाहुतिद्विजेज्यादिः स्वस्वपञ्चतत्त्वैरष्टाष्टहोमः स्वास्त्रेण स्वमूलेन चाष्टशतहोमो ब्राह्मणतर्पणादिरपि योज्याः युक्तितः कार्याः॥97॥

In this matter of expiation the offerings of oblation mentioned earlier

1. 'स्था' ख. घ. च पाठः।
2. 'प्य कृ' क. ख. घ. च पाठः।
3. 'यथाव' ख. घ. ङ.च पाठः।
4. 'त'इति मूलकोशपाठः।
5. 'ज्यं' ग पाठः।

like "Bhūrādi" "Manojyotis" "Ayaścāgne "etc; as also ten Āhutis mentioned like Eka etc; could very well be applied. Pancatattva of the respective deity, Astramantra, Mūlāhuti etc; shall also be resorted to in this connection. (97)

अभिहितामिह निष्कृतिमाचरेदनुदितास्वपि कर्मविपत्तिषु।
समनुचिन्त्य दुरिष्टबलाबलं त्वनुगुणं प्रकृतेर्विकृतेरपि।।98।।

विमर्शिनी

उक्तान्यपि प्रायश्चित्तानि अनुक्तेष्वप्यतिदिश्य कुर्यादित्याह–**अभिहितामिति**। अनुदितासु अनुक्तासु कर्मविपत्तिषु कर्मविनाशेषु प्रकृतेर्विकृतेरपि अस्य दोषस्येदं प्रायश्चित्तमिति स्थिरीकृतं प्रकृतिः, अस्मिन् दोषे किं कर्तव्यमिति विचारो विकृतिः, तयोर्द्वयोरपि दुरिष्टबलाबलं दोषस्य तारतम्यं समनुचिन्त्य युक्तिज्ञैराचार्यैः सह सम्यग् विचिन्त्य तु विशेषतः अनुगुणं प्रायश्चित्तं यथा भवति तथा इहाभिहितामुक्तामेव निष्कृतिमाचरेत्।।98।।

For such pollution not mentioned here also suitable ones may be applied depending upon the nature of the blemish. Expiations are necessary for all unseen faults also. (98)

अर्चास्थानविशुद्धीः काश्चन गुरुशिक्षितास्त्ववोचाम।
अर्चकतत्साधनयोः काश्चन ताश्च ब्रवीमि विदिता याः।।99।।

विमर्शिनी

अर्चास्थानविशुद्धीः प्रतिमायाः स्थानस्य च विशेषयुक्ताः शुद्धीः गुरुशिक्षिताः गुरुभिरुपदिष्टाः यास्ताः काश्चनावोचाम उक्तवन्तो वयम्। अर्चकतत्साधनयोः पूजकस्य पूजासाधनस्य च याः काश्चन शुद्धीः मया विदिताः अवधृतास्ताश्च ब्रवीम्यहम्।।99।।

I have enumerated the remedies for omissions and commissions as given to me by the instructions of my preceptor. Faults of priests, materials for worship and impurities are also being enunciated here by me. (99)

काये स्नानाचमनमथ विष्णोत्वमित्यादिजापो
वाचि स्वान्ते भगवदभिमर्शश्च सामान्यतः स्यात्।
कृच्छ्रं चान्द्रायणमपि घृतब्रह्मकूर्चाशनादि-
श्चोक्ता मन्वादिभिरिह विशुद्धिर्गरिष्ठे तु दोषे।।100।।

विमर्शिनी

अर्चकशुद्धिमाह–काय इति। काये देहे स्नानाचमनं स्नानमाचमनं च सामान्यतः शुद्धिःस्यात्। वाचि अभाष्यं प्रति वाग्विसर्गे विष्णोत्वमित्यादिजापः, स्वान्ते मनसि ग्राम्यचिन्तासम्भवे भगवदभिमर्शः भगवद्ध्यानं च सामान्यशुद्धिः स्यात्। गरिष्ठे गुरुतरे दोषे सति इह मन्वादिभिः स्मृतिकोविदैः कृच्छ्रं सान्तपनादिकं, चान्द्रायणं, घृतब्रह्मकूर्चाशनादिश्च घृतप्राशनं ब्रह्मकूर्चाशनादिश्च विशुद्धि-र्विशेषशुद्धिरुक्ता।।100।।

For the impurity caused over the body of the priest the general expiations

shall be bathing and ceremonial sipping of the water; for the blemish of words the chanting of hymns "Viṣṇoh tvam"etc.. If the fault is mental then expiation shall be devotion to god with concentration. For greater sin Kṛcchra, Cāndrāyana, consumption of ghee etc., can be the atonement suggested by authorities like Manu. (100)

देहे महाभूतविलायनादिः प्रत्याहृतिः स्यादखिलाक्षकेषु।
देहिन्यथ स्वोन्नयमानसेज्ये विशेषशुद्धिर्विहितार्चनादौ ।।101।।

विमर्शिनी

अथार्चनादौ देहे महाभूतविलायनादिः भूतसंहारः शोषणादिश्च, अखिलेषु चक्षुरादिष्विन्द्रियेषू प्रत्याहृतिः विषयेभ्यो निवृत्त्यान्तर्मुखतापादनं, देहिनि जीवे स्वोन्नयमानसेज्यो स्वोन्नयः स्वस्य जीवस्य उन्नयो द्वादशान्तस्थपरमात्मनि योजनं मानसपूजा तं हृदयकमले संस्थाप्य पञ्चभूतात्मकैरुपहारैरर्चनम्, एषा [1]देहात्मनोर्विशेषशुद्धिर्विहिता।।101।।

If in the course of worship the body gets polluted Bhūtasamhāra, Śoṣaṇa and Lipinyāsa are advised as atonements. For the blemish in regard to the sense organs concentration of the mind through Prāṇāyāma is advised. Mānasapūjā is the right way. (101)

शुद्धिस्तक्षणदाहभस्मकमृजानिर्णेजनं दारुमृ-
त्तेजस्तन्तुमये तथोत्पवनदर्भोद्योतने सर्पिषी।
ताम्रेऽम्लोदमृजा शकृज्जलमृजा दुर्वर्णशङ्खादिके
वस्त्रे क्षारजलोक्षणं रविकरस्पर्शश्च पट्टांशुके।।102।।

विमर्शिनी

पूजासाधनशुद्धिमाह-शुद्धिरिति। दारुमृत्तेजस्तन्तुमये दारवे मृण्मये स्वर्णादिमये तन्तुमये च वस्तुनि क्रमेण तक्षणदाहभस्मकमृजा[2]निर्णेजनं दारवे तक्षणं, मृण्मये दाहः, तेजोमये भस्मजलाभ्यां मार्जनं, तन्तुमये निर्णेजनं क्षालनं शुद्धिः स्यात्। तथा सर्पिषि उत्पवनदर्भोद्द्योतने गालनं, दर्भगताग्निनोद्द्योतनं च, ताम्रे ताम्रमये वस्तुनि अम्लोदमृजा अम्लजलाभ्यां मार्जनं, दुर्वर्णशङ्खादिके रजतशङ्खादौ शकृज्जलमृजा गोमयजलाभ्यां मार्जनं, वस्त्रे क्षारजलोक्षणं, पट्टांशुके रविकरस्पर्शश्च शुद्धिः स्यात्।।102।।

If a wooden object is at fault the simple touch of the chisel of the carpenter is the atonement. Vessels of mud can be purified by burning while metallic objects like gold can be purified by dipping into water mixed with sacred ash. Objects of cloth, thread could be washed and dried. In ghee it is advisable to throw lighted Kuśa grass on it. Copper, conch etc., could be purified in water mixed with cow dung. Clothes could be purified by sprinkling water mixed with salty materials. A silken material can be purified by drying it in the sun. (102)

1. 'दोषात्म' क पाठः।
2. 'जा हि नि' क ख.घ. च पाठः।

धान्ये शूर्पपरिभ्रमस्तदवधातौ तण्डुले लेपग-
न्धापायः सकले समित्कुसुमदर्भाद्येषु सम्प्रोक्षणम्।
पुण्याहं सलिलाशये शिखिशिखोद्द्योतश्च रात्र्यां क्षितौ
कर्षोल्लेखनविप्रभोजनमथास्त्राणूक्षणं वाखिले।।103।।

विमर्शिनी

धान्ये व्रीह्यादौ शूर्पपरिभ्रमः, तण्डुले तदवधातौ शूर्पपरिभ्रमणमवहननं च शुद्धिः स्यात्। सकले वस्तुनि लेपगन्धापायः मलादेर्लेपापायो गन्धापायश्च शुद्धिर्विहिता। समित्कुसुमदर्भाद्येषु सम्प्रोक्षणं, सलिलाशये तटाकादौ पुण्याहं पुण्याहप्रोक्षणं, रात्र्यां रात्र्यास्तमोमयत्वात् शिखिशिखोद्द्योतः अग्निज्वालयोद्द्योतेनं शुद्धिः। क्षितौ कर्षोल्लेखनविप्रभोजनं कर्षणम् उल्लेखनं विप्रभोजनं च यथावकाशं शुद्धिः। अथवा वस्तुन्यत्र्याणूक्षणं शुद्धिः स्यात्।।103।।

When grains get polluted it could be purified by scattering with a winnowing basket. In the case of rice a second husking is advised. Removing the odour from the objects is a way of purification. Flowers, fruits grain etc. could be purified by sprinkling clean water. Puṇyāhajala may be sprinkled to purify well, pond etc. Darkness could be removed by lighting a torch. Earth could be purified by digging and ploughing as well as feeding the Brāhmins with sumptuous food. Simple chanting of mantras is enough for trivial blemishes. (103)

अजुगुप्सितरूपा चेदुपहतिरखिलेषु साधनीयैवम्।
तच्छुद्धिरन्यथा चेत् त्यागः श्रेयानकुप्यतोऽन्येषु।।104।।

विमर्शिनी

अखिलेषु वस्तुषु उपहतिः अशुद्धिः अजुगुप्सितरूपा चेत् उद्वेगो न जायते यदि एवमुक्तप्रकारेण तच्छुद्धिस्तस्य तस्य शुद्धिः साधनीया। अन्यथा चेत् जुगुप्सा जायते अकुप्यतः मणिहिरण्यादेरन्येषु वस्तुषु तेषां त्याग एव श्रेयान्।।104।।

All objects could be purified by the above mentioned methods if they are not disgusting. If the blemish is very serious things excepting food, gold and silver may be thrown out. (104)

उक्तेष्वनुक्तेष्वपि चोपघाते-
ष्वालोच्य तज्ज्ञैः सह साधकेन्द्रः।
श्रुतिस्मृतिन्यायपरैः प्रकुर्यात्
तन्निष्क्रियां पुष्कलता तथैव।।105।।

विमर्शिनी

उक्तेष्वनुक्तेषु चोपघातेषु दोषेषु सत्सु साधकेन्द्रः स्वयं साधकश्रेष्ठः सन्नपि श्रुतिस्मृतिन्यायपरैः

श्रुतेर्वैदिककर्मणः स्मृतेः स्मार्तकर्मणः न्यायस्याचारस्य च : तात्पर्ययुक्तैस्तज्ज्ञैः सहालोच्य विविच्य तन्निष्क्रियां तत्तन्निष्कृतिं कुर्यात्। तथैव तथा भवति चेदेव पुष्कलता परिपूर्णता स्यात्।।105।।

If in the case of fault regarding things spoken here or left out it is better to consult reliable authorities in such matters. People well versed in Vedas, Smṛtis and other juridical texts could be consulted to get judged in the right manner. (105)

इति तन्त्रसमुच्चये श्रुतार्चा-
क्रमगुप्त्यै रविजन्मसम्प्रणीते।
प्रकटोदितनिष्क्रियाकलापः
पटलोऽभूद् दशमोऽपि संप्रपूर्णः।।106।।

विमर्शिनी


पटलमुपसंहरति-इतीति। इति उक्तप्रकारेण श्रुतार्चाक्रमगुप्त्यै गुरुमुखाच्छ्रुतस्य पूजाक्रमस्य गुप्त्यै अविस्मरणाय रविजन्मसंप्रणीते रविपुत्रेण नारायणेन विरचिते तन्त्रसमुच्चये तन्नाम्नि ग्रन्थे दशमः पटलोऽपि संप्रपूर्णोऽभूत्। कथंभूतः, प्रकटोदितनिष्क्रियाकलापः प्रकटेन व्यक्तेनोक्तो निष्क्रियाणां प्रायश्चित्तानां कलापः समूहो यस्मिन् सः।।106।।

Thus in the Tantrasamuccaya composed by the son of Ravi, the tenth Paṭala dealing with specific blemishes and their atonements is concluded. (106)

इति तन्त्रसमुच्चयविमर्शिन्यां दशमः पटलः।।



अथ एकादशः पटलः



आकल्पान्तस्थास्नुभावेन भक्त्या
देवस्यैवं सम्प्रतिष्ठापितस्य।
प्रासादादिस्वाङ्गजीर्तिर्यदि स्या-
दुद्धृत्यातस्तं नवाङ्गीकरोतु।।1।।

विमर्शिनी

एवं दोषेषु सत्सु प्रायश्चित्तमभिहि[1]तम्। तत्र कालादिवशात् प्रासादादीन्यङ्गानि जीर्यन्ते चेत् तत्परिहाराय एकादशेन पटलेन जीर्णोद्धारं वदन् आदौ तस्योद्देशं करोति–**आकल्पान्तेति**। भक्त्या हेतुना आकल्पान्तस्थास्नुभावेन प्रलयकालपर्यन्तं स्थिरतया स्थितिबुद्ध्या एवमुक्तप्रकारेण सम्प्रतिष्ठापितस्य देवस्य प्रासादादिस्वाङ्गजीर्तिः प्रासादबिम्बादीनां स्वाङ्गानां श्लथनं यदि स्याद् अतो जीर्णादङ्गादुद्धृत्य तं देवं नवाङ्गीकरोतु प्रत्यग्रावयवं करोतु।।1।।

विवरणम्

एवं सान्निध्यस्य प्रतिबन्धे सम्भवति तस्य शुद्धिरभिहिता यत्र[2] तु शुद्धावाधीयमानायामपि तदवस्थ एव प्रतिबन्धस्तत्र यत्नान्तरमपि विधेयम्। तत्प्रतिपादनार्थमारभते–**आकल्पान्तस्थास्नुभावेनेति**। कल्पान्तो नाम प्रलयकालः। यत्र देवस्सकला निजकार्यमूर्तिरपि संहरिष्यति। मर्यादायामाकारः। स्थास्नुः स्थितिशीलः। कृतस्तथा भावेने स प्रतिष्ठापितोऽवगत इति चेत्–

"यावदत्र जगन्नाथो बिम्बमाश्रित्य तिष्ठति।"

इति प्रतिष्ठासमय एव निवेदनात् तत्र चावधेर्देवेच्छाधीनतावगमात्। तथा च मन्त्रः–

यावच्चन्द्रश्च सूर्यश्च यावत्तिष्ठति मेदिनी।
तावत्त्वयात्र लोकेश स्थातव्यं सर्वदा विभो।।

इति। एवमिति प्रागुक्तभूपरिग्रहादितीर्थस्नानपर्यन्तप्रकारानुवादः। प्रासादादिः प्रासादो बिम्बं तच्छेषभूतपीठादिकं च तस्य स्वाङ्गस्य स्वशरीरस्य स्थूलसूक्ष्मभेदेन प्राक्प्रतिपादितस्य सतो जीर्तिः कालवशाद्वाभिघातादिवशाद्वा यदि स्यादिति। यो नाम प्रतिबन्धः पुनरपि तदवस्थ एवेति तदीयं निमित्तमनेनाभिहितम्। तमत उद्धृत्य नवांगीकरोत्वित्य[3]न्वयः। नवं प्रथमप्रतिष्ठासिद्धमिवाङ्गं स्थूलं सूक्ष्मं

---

1. 'तम्। ये त'क पाठः।
2. 'त्र यत्र शु' क पाठः।
3. 'त्यर्थःन' क पाठः।

वा यथायोगं यस्य स नवाङ्गः तत्समुचितव्यापारेणेत्यर्थाल्लभ्यते। तं देवं तस्माजीर्णात् स्थूलात् सूक्ष्माद्वाङ्गादुद्धृत्य तदेवं समुचितव्यापारेण नवं कृत्वा पुनस्तत्सम्बन्धेन देवं प्राग्वदवस्थितं कुर्यादित्यर्थः।।1।।

If the god who is installed with devotion to shed divinity and blessing till the end of the Kalpa happens to in a dilapidated condition with damage to the idol in respect of sanctum or limbs, may be replaced with a new one. (1)

निष्क्रामणेन विधिनात्र तदन्तरङ्गे
वैकल्यभाजि वितनोतु यथापुरं तत्।
सङ्कोचनेन बहिरङ्गविपद्यदश्च
निष्क्रामणेन चिरकालचिकीर्षितं चेत्।।2।।

विमर्शिनी

अत्र जीर्णोद्धारे तदन्तरङ्गे बिम्बादौ वैकल्यभाजि विकलाङ्गतां प्राप्ते निष्क्रामणेन प्रासादाद् निर्यापनेन विधिना तदङ्गाद् देवमुद्धृत्य तदङ्गाद् यथापुरं पूर्ववदेव वितनोतु विरचय्य स्थापयतु। बहिरङ्गविपदि प्रासादादौ वैकल्यं प्राप्ते संकोचनेन परिवारांस्तत्त्वानि च संहृत्य हृदयकमले योजयित्वा तन्मुकुलविधिना यथापुरं वितनोतु। अदः बहिरङ्गं चिरकालचिकीर्षितं चेत् चिरेणैव कालेन तदङ्गं क्रियते चेत् निष्क्रामणेन तद् यथापुरं वितनोतु।।2।।

विवरणम्

जीर्णोद्धारस्य भेदं वदंस्तस्य विषयमपि दर्शयति–**निष्क्रमणेन विधिनेति**। विधिर्जीर्णोद्धार-लक्षणमनुष्ठानम्। वैकल्यभाजि तदन्तरङ्ग इति। जीर्णे तस्यान्तरङ्गभूते स्वाङ्गे प्रतिमापीठादावित्यर्थः। बहिरङ्गविपदि प्रासादो बहिरङ्गभूतं स्वाङ्गं तस्य विपदपि जीर्णतैव। चिरकालचिकीर्षितं चेददः बहिरङ्गभूतं स्वाङ्गं स्यात् तदा निष्क्रामणेनैव विधिना यथापुरं वितनोत्वित्यनुषङ्गः।।2।।

If the damage is to the idol of the god it shall be renovated and made in its earlier state. If the damage is to the shrine the idol may have to be shifted to a temporary abode considering the delay for repair. (2)

बालालयादिसहितं कलशैककार्यं
चेति द्विधात्र खलु निष्क्रमणं स्मरन्ति।
सङ्कोचनं स्वविभवस्वनिगूहनं स्या-
न्निष्क्रामणक्रममिह प्रथमं ब्रवीमि।।3।।

विमर्शिनी

अत्र खलु जीर्णोद्धारे बालालयादिसहितं बालालयोऽल्पगृहं तेन सहितं, कलशैककार्यम् एकेन कलशेनैव निर्वर्त्य चेति द्विधा द्विप्रकारेण निष्क्रमणं स्याद् बिम्बादुद्वास्य बहिःप्रापणं स्मरन्ति विद्वांसः। सकोचनं तु स्वविभवस्वनिगूहनं स्वस्य विभवस्य तत्त्वरूपेण परिवाररूपेण च व्याप्तेः स्वस्मिन्नेव निगूहनं हृदयकमल एव गोपनं स्यात्। इह प्रथममहं निष्क्रामणक्रमं ब्रवीमि।।3।।

विवरणम्

अधुना निष्क्रामणरूपस्य जीर्णोद्धारभेदस्यापि भेदमसम्मोहाय दर्शयति–**बालालयादिसहितमिति।** बालबिम्बादिरादिशब्दार्थः। ननु बालबिम्बजीवकलशसम्बन्धे जीर्णोद्धारपदार्थोऽयुक्तो न तु सङ्कोचने तत्राह–सङ्कोचनं स्वविभवस्वनिगूहनं स्यादिति। स्व[1]स्य विभवस्य प्रासादपुरुषद्वाःस्थादिपरिषत्प्रभृतिरूपस्य स्व[2]स्मिन् निगूहनमाकृष्यावस्थापनं बहिरङ्गजीर्तौ हि तस्माज्जीर्णात्तत्समाविष्टस्यांशस्याजीर्णेऽन्तरङ्गभूते बिम्ब एव बालबिम्बजीवकलशयोरिवोद्धारात् सङ्कोचनमपि जीर्णोद्धारभेद एव स्यादित्यर्थः।।3।।

In the matter of transference of divine power from the original one it can be to the Bālālayam- the temporary shelter- or using the potfuls of sanctified water in to which the transfer of divinity can be done. In what is called Sankocana- the power of divinity is to be transferred to one's own body. Here the first item, the transference to Bālālaya to facilitate renovation is taken up. (3)

मूलालयादक्षिणभागसंस्थं तत्सम्मुखं बालगृहं विधाप्य।
समण्डपं शिल्पिभिरल्पबिम्बं प्रकल्पयल्लौहिकमाङ्घ्रिपं वा।।4।।

विमर्शिनी

तत्र मूलालयादक्षिणभागसंस्थं मूलप्रासादस्याग्रतो वामभागस्थितं तत्संमुखं मूलप्रासादाभिमुखं समण्डपं तत्पुरोभागस्थितेशमण्डपेन च सहितं बालगृहल्पगृहं शिल्पिभिः विधाप्य कारयित्वा लौहिकं लोहमयम् आङ्घ्रिपं दारवं वाल्पबिम्बं प्रकल्पयेत्।।4।।

विवरणम्

मूलालयादक्षिणभागसंस्थमिति। दक्षिणशब्देन प्राजापत्यो दैविकश्च देशविशषस्तन्त्रेण गृह्यते। [3]तद्विरुद्धश्चादक्षिणो भागः। एतदर्थमेवात्रोत्तरवामशब्दानुपादनम्। तत्सम्मुखं मूलप्रासादस्य तत्प्रतिदिग्गतयोनिपरिग्रहेणाभिमुखम्। समण्डपमित्यधिवासमण्डपमावश्यकतमत्वादभिप्रेतम्। अङ्घ्रिपो वृक्षः तद्विकार आङ्घ्रिपम्।।4।।

Causing the construction of a temporary shelter to the left side of the original sanctum by architects with pavilion in front facing it, an idol may be got prepared in metal or wood with proper proportion. (4)

अत्राप्यङ्कुररोपणं प्रथमतः कृत्वा गृहीत्वा नवं
बिम्बं वार्यधिवास्य बालनिलयं संशोध्य तन्मण्डपम्।
संस्कृत्योदकतोऽल्पबिम्बमुपनीय स्नापयित्वा पुन-
स्तत्तद्बिम्बघटैः प्रणीय शय[4]नीये शाययेद् देशिकः।।5।।

---

1. 'स्व'च पाठः।
2. 'त'क पाठः।
3. 'तत्तद्वि' क पाठः।
4. 'ने संवेशयेत्' ख पाठः।

विमर्शिनी

अथ देशिकः अल्पगृहाल्पमण्डपाल्पप्रतिमादीनां लक्षणज्ञो गुरुः अत्रापि कर्मणि प्रथमतः पूर्वं बालालयोदग्भागस्यगृहे सप्ताहादिकालेऽङ्कुरारोपणं कृत्वा नवं बिम्बम् अल्पबिम्बं गृहित्वा वारि जलेऽधिवास्य बालनिलयमल्पगृहं संशोध्य यथाक्रमं प्रासादशुद्धिं कृत्वा तन्मण्डपं बालालयाग्रगतं मण्डपं संस्कृत्य उदकतो जलात् अल्पबिम्बमुपनीय तत्तद्बिम्बघटैः तस्य तस्य देवस्योक्तैर्बिम्बशुद्धिकलशैः स्नापयित्वा पुनः शयनीये तन्मण्डपस्थशय्यायां प्रणीय शाययेत् यथोक्तविधिनाधिवासं कुर्यात्।।5।।

विवरणम्

प्रथमतः कृत्वेति। प्रथम[1]प्रतिष्ठोक्तरीत्या बालबिम्बाधिवासदिवससमुचिते सप्तमादिदिवसे बालगृहसमुचितबीजाङ्कुरमण्डपेऽङ्कुरारोपणं कुर्यादित्यर्थः।।5।।

The preceptor shall first perform the sowing of seeds in this connection in a corner to the north. Then the new idol shall be taken up for submerging in water. Now the temporary shelter as well as the shrine may be purified including the pavilion. After bathing the idol with sanctified water from the pots arranged for the purpose, it shall be placed in a couch in a lying position. (5)

तत्र त्रिसूत्राकलनादि मूलप्रासादशुद्धिं विधिवद् विधाय।
प्रक्षालनाद्याश्च यथार्हकालं कुर्वीत मूलप्रतिमाविशुद्धीः।।6।।

विमर्शिनी

तत्र पुनर्यथार्हकालं त्रिसूत्राकलनादि तन्तुवेष्टनमारभ्य मूलप्रासादशुद्धिं विधिवत् यथोक्तप्रकारेण विधाय प्रक्षालनाद्याः सप्त मूलप्रतिमाविशुद्धीः कुर्वीत।।6।।

विवरणम्

विधिवदिति। जीर्णताया एव शुद्धिनिमित्तत्वादपि शुद्धिरादरेण कर्तव्येत्यभिप्रायः।।6।।

After binding the shrine with thread and garland in three strings according to the rituals the original idol shall be sanctified washing with water at the proper time. (6)

संस्नाप्य देवमथ निष्कृतितत्त्वहोम-
सम्पातसिद्धकलशै कलशैः परैश्च।
प्राच्यं प्रसाद्य परिषत्सु बलिं विकीर्य
प्रार्थ्यारभेत सुसमीहितक[2]र्म मन्त्री।।7।।

---

1. 'मत प्र'क पाठः।
2. रे.'र्म सम्यक्।' ख पाठः।

विमर्शिनी

अथ मन्त्री प्रायश्चित्तपटलोक्तविधिज्ञो गुरुः निष्कृतितत्त्वहोमसंपातसिद्धकलशैः प्रायश्चित्त-होमादिभिः सिद्धैः संपातकलशैः तत्त्वहोमसंपातकलशेन च देवं संस्नाप्य पुनः परैः स्वस्वोक्तद्रव्यकलशैश्च संस्नाप्य प्रार्च्य विशेषतः पूजां कृत्वा प्रसाद्य परिषत्सु परिवारेषु भूतबलिं च विकीर्य वक्ष्यमाणरीत्या प्रार्थ्य सुसमीहितकर्म सङ्कल्पितं निष्क्रामणं कर्म सावधानं प्रारभेत।।7।।

विवरणम्

निष्कृतिहोमास्तत्त्वहोमश्च निष्कृतितत्त्वहोमाः। परैश्चकलशैरिति। द्रव्यकलशैरपीत्यर्थः। प्रार्च्येति। यत्र पूजायां द्रव्यकलशाभिषेकः कृतस्तच्छेष उक्तः। यद्वा विधिवदिति सर्वत्र सम्बध्यते। तेन त्रिदिनं पञ्चदिनं वा पूजाबली कृत्वा तन्दते प्रार्थनमपि सान्निध्यविशेषापेक्षया सिद्धं भवति। प्रार्थनमन्त्रस्तु "शृण्वन्तु देवतास्सर्वाः" इत्यादिर्वक्ष्यते। समीहितशब्दोऽभीसिप्तपर्यायः। चिकीर्षितं निष्क्रमणकर्मेत्यर्थः।।7।।

After conducting the expiatory sacrifices the priest shall pour the contents of the pots in which the leftovers are preserved as also that of other supplementary jars over the idol .The attendants shall also be propitiated. Thereafter he may seek the permission by pleasing the divinities before initiating the proper rites. (7)

मूलालयाग्राहितमण्डपस्थे कुण्डे समुत्पाद्य कृपीटयोनिम्।
तत्पार्श्वदेशे कलशं प्रपूर्य कुर्याद् गुरुः संहृतितत्त्वहोमम्।।8।।

विमर्शिनी

पुनर्गुरुः स्वयमवहितो भूत्वा मूलालयाग्राहितमण्डपस्थे मूलप्रासादस्याग्रमण्डपस्थिते कुण्डे कृपीटयोनिमग्निं समुत्पाद्याग्निमुखं कृत्वा परिधिस्थापनात् पूर्वं तत्पार्श्वदेशे कलशं यथोक्तरीत्या प्रपूर्य संपूज्य परिधिस्थापनादिपूर्वं संहृतितत्त्वहोमं संहारार्थं तत्त्वहोमं कुर्यात्।।8।।

विवरणम्

तत्र प्रथमं तावत् संहारतत्त्वहोममाह–**मूलालये**त्यादिना। कृपीटयोनिरग्निः। तत्पार्श्वदेशे कलशं प्रपूर्येति। तत्प्रकारस्तु सृष्टितत्त्वहोम एव प्राक् प्रतिपादितः।।8।।

Thereafter the preceptor shall perform the Samhṛtitattva homa after kindling fire in the sacrificial pit prepared in front of the main shrine. He shall also sanctify the jar placed beside the pit. (8)

सम्पातमस्मिन् प्रसमर्प्य कुम्भे पूजामनुद्रव्यहुतिप्रसिद्धम्।
सृष्टिक्रमेणाखिलतत्त्वमन्त्रैः सकृत् सकृत् सर्पिरथो जुहोतु।।9।।

विमर्शिनी

तत्क्रियाक्रममाह–**सम्पातमिति**। अस्मिंस्तत्त्वमये कुम्भे पूजामनुद्रव्यहुतिप्रसिद्धं पूजामन्त्रहोमात्

प्राप्तं तदनन्तरमेव द्रव्यहोमं च कृत्वा तत्र सिद्धं च संपातं प्रसमर्प्य अथो अखिलतत्त्वमन्त्रैः सृष्टिक्रमेण सकृत् सकृत् सर्पिर्जुहोतु।।9।।

विवरणम्

पूजामनुद्रव्यहुतिप्रसिद्धं प्रणवव्याहृतिपीठप्रणवोपचारमूलाङ्गपरिवारमन्त्राज्यहोमसिद्धं समिदादिद्रव्यहोमसिद्धं च।।9।।

Collecting and depositing the leftovers of the sacrifice in this pot he shall propitiate it with rituals in the order of Sṛṣṭi- generation by pouring ghee little by little. (9)

गत्वा गर्भगृहं समिष्टनिजपीठे देवमास्थाप्य तं
तत्त्वन्यासपुरस्सरं सकलितं कृत्वा समभ्यर्च्य च।
तत्सम्पातघृतं समर्प्य परिपूर्णं भावयित्वा ततः
संहारानुमतिं विकीर्य कुसुमं सम्प्रार्थयेत् साञ्जलिः।।10।।

विमर्शिनी

ततो गर्भगृहं गत्वा समिष्टनिजपीठे पीठपूजानन्तरं देवमास्थाप्य आवाह्य तत्त्वन्यासपुरस्सरं तत्त्वन्यासादिभिः तं देवं सकलितं कृत्वा समभ्यर्च्य तत्सम्पातघृतं च समर्प्य तं निखिलैः परिवारैर्निखिलैस्तत्त्वैश्च परिपूर्णं भावयित्वा ततः कुसुमं विकीर्य साञ्जलिः अञ्जलिमुद्राबन्धपूर्वं संहारानुमतिं संहारार्थमनुज्ञां देवं प्रार्थयेत्।।10।।

विवरणम्

देवमास्थाप्येत्यावाहनमुक्तम्। तत्सम्पातघृतं समनन्तरोक्तसृष्टितत्त्वमन्त्राहुतिसिद्धं समर्पणञ्च तत्तत्तत्त्वस्थाने क्रमेण कार्यम्। परिपूर्णं भावयित्वेति। सर्वतो देहे सकलतत्त्वसामग्र्युदयेन पूर्णमत एव परितो महासालपर्यन्तं च सकलपर्षदादिलक्षणसामग्र्युदयेन पूर्णमित्यर्थः।।10।।

Thereafter the preceptor shall enter the sanctum and putting the idol on its pedestal, worship may be initiated from Tattvanyāsa onwards. Now the leftovers of the rites may be kept apart and anointed in the limbs of god who is conceived as possessing all powers. After showering flowers in worship he shall seek the permission of the deity for the ceremonial rite called Samhāra-contraction. (10)

लब्धाज्ञो गृहमूर्तिकुण्डकलशार्चोदर्चिरम्भश्चितां
नाडीयोगकृते ध्रुवेण कुसुमं दत्त्वा समेत्यानलम्।
कृत्वा तत्र हुताशने च कलशे चैवं प्रसूनाञ्जलिं
मूलेनाष्ट घृताहुतीर्वितनुयात् तत्कर्मसांमुख्यदाः।।11।।

विमर्शिनी

ततो लब्ध्वाज्ञः गृहीतानुज्ञो भूत्वा नाडीसन्धानं कुर्यात्। तत्परिपाटीमाह–गृहेत्यादिना।

गृहमूर्तिकुण्डकलशार्चोदर्चिरम्भश्चितां प्रासादमूर्तेः कुण्डस्य कलशस्य च क्रमात् प्रतिमाया अग्नेर्जलस्य च तेषां चैतन्यायां च नाडीयोगकृते तत्त्रितयस्य नाडीनां योगार्थं प्रथमं देवाय ध्रुवेण प्लुतप्रणवेन कुसुमं त्रिशो दत्त्वा अनलं कुण्डस्थाग्निसमीपं समेत्य तत्र हुताशने अग्नौ च कलशे च एवं प्लुतप्रणवेन त्रित्रिवारं प्रसूनाञ्जलिं कृत्वा एवं नाडीसन्धानानन्तरं पुनर्मूलेन तत्कर्मसांमुख्यदाः तस्य संहारकर्मण आभिमुख्यदानायाष्ट घृताहुतीर्वितनुयात्।।11।।

विवरणम्

गृहमूर्तिकुण्डकलशार्चोदर्चिरम्भश्चितां गृहमूर्तिः प्रासादः उदर्चिरग्निः प्रासादकुण्डकलशस्थायिनां बिम्बाग्निजलरूपाणां देवानामित्यर्थः। नाडीयोगकृते ध्रुवेण कुसुमं दत्त्वेति। कृ[1]त्स्नक्षेत्रव्याप्तिमतः स्वव्याप्त्यारोपितसकलप[2]रिषदादिदेवतानिचयस्य प्रासादान्तर[3]वतिष्ठमानस्य बिम्बाभिमानिनो देवस्येडापिङ्गलासुषुम्नाख्यनाडीनां कुण्डकलशस्थाग्निजलाभिमानिदेवनाडीभिः सन्धानमनुसन्दधानो देवे[4] पुष्पाञ्जलिं प्रणवेन त्रिमात्रात्मकेन कुर्यादित्यर्थः। एवमग्नौ कलशे चार्थोऽवगन्तव्यः। तत्कर्मसाम्मुख्यदा इति। तदिति प्रक्रियमाणस्संहारो गृह्यते। संहारकर्मणि साम्मुख्यमाभिमुख्यं बिम्बाभिमानिनो देवस्य कालमूर्त्यात्मना स्वेन क्रियमाणे संहारकर्मण्यानुकूल्यमिति यावत्। तत्प्रयच्छन्ति प्रयुञ्जत इति तथोक्ताः। स्वारोपितसकलदेवतानिचयस्य[5] देवस्य नाडीद्वाराग्निगतदेवतादात्म्येनावस्थानं कल्पयन्नि-त्यभिप्रायः।।11।।

Having received the permission of the deity he shall invite the essence of the pots of sacrifice and prowess of the idol. A complete ritualistic worship is to be initiated. Getting out of the sanctum he shall kindle sacrificial fire in three places in front of sanctum and offer flowers to the accompaniments of mantras. This is to make the god ready for the Samhāra action. (11)

क्षेत्राधिपादिप्रतिहारकान्तैर्निर्माल्यधार्यादिगुरूत्तमान्तैः ।
हुत्वैकशः पूर्वमथो यथाशक्त्यावृत्य सर्पिर्जुहुयादमीभिः।।12।।

विमर्शिनी

ततः क्षेत्राधिपादिप्रतिहारकान्तैः क्षेत्रपालमारभ्य संहारक्रमेण द्वाःस्थपर्यन्तैर्बलिपरिवारमन्त्रैः पुनर्निर्माल्यधार्यादिगुरूत्तमान्तैः स्वस्वनिर्माल्यधारिणमारभ्य संहारक्रमेण स्थितैः परिवारमन्त्रैः समष्टिमारभ्य प्रतिलोमस्थितैः गुरुपर्यन्तैः पीठमन्त्रैश्च एकशः सकृत् सर्पिर्हुत्वा अथो अमीभिः वक्ष्यमाणैर्मन्त्रैर्यथाशक्ति अष्टशतादिसंख्यमावृत्य सर्पिर्जुहोतु।।12।।

विवरणम्

इदानीमग्न्युपाधिद्वारा सर्वसंहारं वदन् प्रथमं बहिरङ्गत्व[6]ात् प्रतिष्ठासमये तत्तत्स्थानेषु कल्पितानां

1. 'तु क्षे क पाठः।
2. 'पर्षदां'
3. 'रे'
4. 'वं' क पाठः।
5. 'स्य' ना
6. 'त्वप्र'

दिशाहोमादिभिः प्रतिष्ठापितानां च बलिपरिवाराणां स्वव्यापके देवचैतन्ये संहारमाह- क्षेत्राधिपादि-प्रतिहारकान्तैरिति। प्रतिहारकशब्दो द्वाःस्थपर्यायः। अथ पूजापरिवाराणां पीठशक्तीनां चाह- निर्माल्यधार्यादिगुरूत्तमान्तैरिति। अथ देवदेहगतानामाधिवासतत्त्वहोमादिभिर्विभावितानां तत्त्वानां यत्नतसंहारमुद्दिशतिःअथो यथाशक्त्यावृत्य सर्पिर्जुहुयादमीभिरिति।।12।।

Beginning from Kṣetrapāla in the order of the particular doorkeeper using Śrībhūtabalimantra and from Nirmālyadhāri to the ones near preceptor with Parivāramantra, one should offer ghee in the sacrificial fire up to 108 times at a minimum. (12)

पुरः कोपतत्त्वेन तद्वत्यशेषे
ततः क्ष्मादिकाव्यक्तपर्यन्ततत्त्वैः।
कृशान्वादिहृत्पुण्डरीकावसानै-
र्विशेषान्वितैः स्वैर्हुनेच्चेषुत[1]त्त्वैः।।13।।

विमर्शिनी

ततः तद्वति कोपतत्त्ववति विष्ण्वादौ पुरः आदौ कोपतत्त्वेन, अशेषे सर्वदेवेषु ततः क्ष्मादिकाव्यक्तपर्यन्ततत्त्वैः पृथिवीतत्त्वादिप्रकृत्याख्यप्राणपर्यन्तश्चतुर्विंशतितत्त्वैः शिवे तु शक्तितत्त्वान्तैः पञ्चत्रिंशत्तत्त्वैः, पुनः सर्वेषु कृशान्वादिहृत्पुण्डरीकावसानैः अग्निमण्डलसोममण्डल-सूर्यमण्डलहृत्पुण्डरीकैः, पुनर्विशेषान्वितैः द्वादशे पटले वक्ष्यमाणविशेषयुक्तैः स्वैः स्वैः इषुतत्त्वैः पञ्चतत्त्वैश्च हुनेत्।।13।।

विवरणम्

विवृणोति-**पुरःकोपतत्त्वेन तद्वतीत्यादिना**। तद्वति विष्णुहरिहरादौ। ततः अशेष इति क्रमः। क्ष्मा पृथिवी, अव्यक्तमुपोत्तमं तत्त्वं, कृशानुर्वह्निमण्डलम्।।13।।

पञ्चतत्त्वानां विशेषान् पुर्यष्टकप्राणसंहारसिद्धये दर्शयति-[2]सर्वाद्यादिषु तत्त्वकेष्विति। सर्वादीनीह[3] सर्वनिवृतिपूर्वाणि। यथादेवतं तत्त्वानि तान्यादयो येषां तानि सर्वाद्यादीनि प्रातिलोम्येनावस्थितेषु निजनिजेषु पञ्चतत्त्वेष्विति यावत्। निजास्तत्तत्तत्त्वन्धिनो मूर्तयो नारायणसद्योजातादयः। गन्धादिभिस्तेषां तत्त्वानामेव सम्बन्धिभिस्तन्मात्रैरुल्लसितमायान्तं स्वरूपपदं वदेत्। गन्धतन्मात्रस्वरूपायेत्यादिकमित्यर्थः। ङेन्त आत्मा तदन्तास्समानपूर्वका निजास्तत्[4]तत्त्वसम्बन्धिनः प्राणाः समानात्मने नम इत्यादिकमुक्तम्।।

---

1. 'त्वैः।।
सर्वाद्यादिषु तत्त्वकेषु निजमूर्त्यन्तेषु गन्धादित
तन्मात्रोल्लसितस्वरूपपदमादायान्तमन्ते पुनः।
ङेन्तात्मान्तसमानपूर्वकनिजप्राणान् नमोन्तान् वदे
देवं संहृतिपञ्चतत्वमनवः प्रोक्ता विशेषान्विताः।। जी' ख. पाठः।
2. अधिकपाठमवलम्ब्य प्रवृत्तेयं व्याख्या।
3. 'नि स'
4. 'तत्त्व' क पाठः।

In the matter of offering of oblations of ghee for Viṣṇu, Durgā and Śaṅkaranārāyaṇa the act is to begin with the conception of Kopatattva. For all other deities it is to begin with Prthvitattva to Prāṇatattva, but for Śiva it is up to Saktitattva. For all gods from Vahnimaṇḍala to Hṛtpuṇḍarīka the specific Pañcatattva of the god is to be used along with Pūrṇāhuti in between, before ghee is offered in general. (13)

जीवेन सर्वेषु शिवेऽन्तिमेन शिवेन चैतत्परमीक्रियायै।
[1]यथोक्तसङ्ख्यावसितौ जुहोतु पूर्णाहुतिं च प्रतितत्त्वमत्र।। 14।।

विमर्शिनी

पुनः एतत्परमीक्रियायै एतस्य देवस्य परत्वप्राप्तये सर्वेषु देवेषु जीवेन जीवनतत्त्वेन शिवे अन्तिमेन शिवत्त्वेन च जुहोतु। यथोक्तसंख्यावसितौ उक्तानां संख्यानामवसाने प्रतितत्त्वं तत्त्वे तत्त्वे च यथोक्तपूर्णाहुतिं च जुहोतु।। 14।।

विवरणम्

अधुना चरमत्तत्त्वहोममाह–**जीवेन सर्वेष्विति**। सर्वेषु जीवतत्त्वमन्त्रेण शिवे शिवतत्त्वमन्त्रेण च जुहोतु। अन्तिमेनेति विशेषणं तस्य संहारो नावकल्पत इति प्रतिपादनार्थम्। तर्हि किमर्थं होमः तत्राह–एतत् परमीक्रियायै इति। एतस्य चरमतत्त्वस्य क्रियादिशक्त्युपसंहारेण परभावसिद्धय इत्यर्थः।। 14।।

For the completion of the Samhāratattva homa mentioned here. Jīvatattva is required for all deities, though for Śiva the last one shall be Śivatattva. In between the several tattvas, Pūrṇāhuti shall be performed. (14)

सर्वत्र सङ्ख्याष्टशतं समुक्ताथाष्टोत्तरा विंशतिरष्ट वात्र।
जुहोतु शर्वे निजपञ्चतत्त्वैरुद्घातवृत्त्यैकश एव वान्यैः।। 15।।

विमर्शिनी

अथ अत्र सर्वत्र तत्त्वेषु अष्टशतं वा अष्टोत्तरा विंशतिर्वा अष्ट वा संख्या समुक्ता। शिवे निजपञ्चत्त्वैः उद्घातवृत्त्या जुहोतु। उद्घाता वृत्तिर्नाम ऊर्ध्वोर्ध्वं हननेन ह्रासेनावृत्तिः। तत्र प्रथमेन तत्त्वेन पञ्चविंशत्यधिकं शतं, द्वितीयेन शतं, तृतीयेन पञ्चसप्ततिः, चतुर्थेन पञ्चाशत्, पञ्चमेन पञ्चविंशतिरित्यादि-संख्याविभागेनेत्यर्थः। अन्यैः पञ्चविंशत्तत्त्वैः एकैकश एव वा जुहोतु।। 15।।

विवरणम्

यथाशक्त्यावृत्त्योति यदुक्तं तदभिप्रायमाह–**सर्वत्र संख्येति**। उद्घातवृत्तिरुद्घातानुगुणा वृत्तिः, यथा प्रथमेन पञ्चगुणं द्वितीयेन चतुर्गुणं तृतीयेन त्रिगुणं चतुर्थेन द्विगुणं शान्त्यतीततत्त्वेनैकगुणमिति।। 15।।

In all cases it is ordained that 108 times of offering is required. Or it can be 28 times each on eight occasions. For Siva his Pañcatattva is required. All other tattvas are required to be chanted only once. (15)

---

1. 'जुहोतु सङ्ख्यावसितौ यथोक्तपू' इति मूलकोशपाठः।

सूत्रच्छिदाकर्मणि हुंफडन्तान्युक्तानि तत्त्वानि न चापरत्र।
तथैव निष्क्रामणकर्मवर्जं विशेषवत्त्वं न च पञ्चसूक्तम्।।16।।

विमर्शिनी

सूत्रच्छिदाकर्मणि सूत्रच्छेदो नामायतनाद् बिम्बस्योद्धारः तत्र होमादौ योजनीयानि तत्त्वानि हुंफडन्तान्येवोक्तानि। अपरत्र सूत्रच्छेदेन विना निष्क्रमादौ न हुंफडन्तत्वमुक्तम्। तथैव निष्क्रामणकर्मवर्जं निष्क्रामणकर्मणोऽन्यत्र पञ्चसु तत्त्वेषु विशेषवत्त्वं विशेषयोजनं च नोक्तम्।।16।।

विवरणम्

तत्त्वमन्त्रेष्वेवापरं विशेषं दर्शयंस्तस्य विषयमपि दर्शयति-**सूत्राच्छिदाकर्मणि** सूत्रं नामेह सकलतत्त्वेषु मूलप्रकृतितयानुस्यूतं मायासूत्रं गृह्यते। तद्धि सर्वतत्त्वसंहारपूर्वकं तत्स्थे जीवे बालबिम्बजीव-कलशयोर्निष्क्रमितेऽपि मूलबिम्बं न परिजहाति। यदा पुनर्मूलबिम्बमपि भङ्गगर्भादिसम्भवात् परित्यजनीयं स्यात् तदा मायासूत्रमपि तस्मानिरनुशयं जीवेन सह निष्क्रमणीयम्। तदर्थं सूत्रस्य तत्तत्तत्त्वसूत्रसंहारे तेन तेन सह छेदः सूत्रच्छेदः तदर्थं कर्म निष्क्रामणं सूत्रच्छिदाकर्म। न चापरत्रेत्यवधारणं प्रमादपरिहारार्थं, बिम्बापरित्यागे सङ्कोचे वा मा भूत् प्रमाद इति भावः। पञ्चसु तत्त्वेषु यदिह विशेषवत्वमुक्तं तन्निष्क्रामणवर्जमपरत्र तथैव न भवतीत्यर्थः। अयमपि प्रमादपरिहारार्थम्।।16।।

In the act called Sūtraccheda- shifting of idol from place to another, installation of another idol in the place of original etc., the mantra shall end with "hum phat". If no such change is involved this mantra need not be used. In the Sañkocakriyā there is no need for special Pañcatattva if no change of place is involved. (16)

कनिक्रदत्स्वस्तिसमुत्थमन्त्रैः सकृत् सकृन्निष्क्रमणे जुहोतु।
सूत्रच्छिदायां च चतुर्गृहीतं वास्तोष्पतेप्रत्यृगणुद्वयेन[1]।।17।।

विमर्शिनी

निष्क्रमणे तु कनिक्रदत्स्वस्तिमुत्थमन्त्रैः 'कनिक्रदज्जनुषम्' इत्यादिमन्त्रैः 'स्वस्ति नो मिमीताम्' इत्यादिमन्त्रैश्च सकृत् सकृत् सर्पिर्जुहोतु। सूत्रच्छिदायां सूत्रच्छेदनिमित्ते वास्तोष्पतेप्रत्युगणुद्वयेन 'वास्तोष्पते प्रतिजानीहि' 'वास्तोष्पते शग्मया' इति मन्त्राभ्यां चतुर्गृहीतं चतुर्गहीतपूर्णाहुतिं च जुहोतु।।17।।

---

1. 'न।।
होमं समाप्य कलशे ग्रसमर्प्य तत्त्वसम्पातसर्पिरितरद्वितयं सुरक्षेत्।
अग्रे निधाय दहनं कलशं च पार्श्वं संपूज्य तस्य तनुयादथ शान्तिहोमम्।।
साविञ्याष्ठसहस्रमत्र जुहुयाद् दूर्वास्त्रिमध्वाप्लुता
भूराद्यैरपि वा पयोद्रुसमिधः संपातमेतद्घटे।
सिक्त्वाज्यं निजपञ्चतत्त्वमनुभिर्हुत्वाष्टशस्तद्भवं
सम्पातं परिरक्ष्य वह्निगतचैतन्यं घटे योजयेत्।।
तेनाभिषिच्य विधिवत् प्रयजेच्च देवमुद्वास्य तत्त्वकलशे चितिमग्निसंस्थाम्।
उद्वास्य चिन्मयतया परिकल्प्य नीत्वा देवाग्रतो न्यसतु तं सुसमिष्टपीठे।। निर्गत्य' ख.पाठः।

विवरणम्

सूत्रच्छिदायां चतुर्गृहीतञ्चेत्यन्वय:। द्वयेनेति वचनं द्वाभ्यां सहैक एव होम इति द्योतनार्थम्।।17।।

[1]**होमं समाप्येति**। स्विष्टकृतादिसामान्यन्यायेनेत्यर्थ:। इतरद्वितयं यात्राहुतिसम्पातं वास्तोष्पतिहोमसम्पातं च। अथ शान्तिहोममाह-अग्रे निधायेत्यादिना। तस्य पार्श्वे कलशं सम्पूज्येत्यन्वय:।।

भूराद्यैरपि वा पयोद्रुसमिध इति विकल्प:। पयोद्रुमाश्च तोरणक्रमेण ग्राह्या:।।

शान्तिकलशाभिषेकमाह-तेनेति। कलशस्थबिम्बस्थयोर्देवयो: पूर्वमेव नाडीसन्धानस्य कृतत्वात्तन्मार्गेण बिम्बप्राप्त्यनुसन्धानं कृत्वा पूजनं कार्यम्। विधिवदिति। जीवोद्वासने कृते पश्चाद्वा कलशविनियोग इत्यभिप्राय:। तत्त्वहोमशेषमाह-उद्वास्येति। उद्वासनं सर्वतत्त्वैरपि यथोक्तनयेन व्युत्क्रमेण पठि[2]तै: पादादिमूर्धान्तं व्यापय्य हृदये परिसमापनम्। देवाग्रतो नीत्वेत्यन्वय:।।

In the act of Niṣkrāmaṇa- taking out the idol from the sanctum the mantra for the special sacrifice shall be the six hymns starting with "Kanikrad" and another five beginning with "Svasti no". In the change of idol- Sūtraccheda, the two mantras beginning with "Vāstoṣpate"are needed to be chanted while offering oblations in the fire. (17)

गत्वा गर्भगृहं विधाय परमान्नप्रीणनाद्यं विभो-
स्तद्धोमं सुसमाप्य तत्त्वकलशे सम्पातपातादिकम्।
कृत्वा स्वस्तिकविष्टरेऽन्तरुपनीय[3] स्थापयेदग्रतो
यात्राद्याहुतिसाधिताज्ययुगलं चास्थाप्य रक्षेत् क्वचित्।।18।।

विमर्शिनी

एवं कृत्वा गर्भगृहं गत्वा विभोर्देवस्य परमान्नप्रीणनाद्यं पायसं निवेद्य तत्कुण्डस्थाग्नावेव पूजाहोमं विधायान्तर्गत्वा निवेद्यविसर्जनं कृत्वा प्रसाद्य प्रसन्नपूजानन्तरं बहिरागत्य तद्धोमं स्विष्टकृद्धोमादिना सुसमाप्य तत्वकलशे सम्पातपातादिकं सम्पातस्पर्शाग्न्युद्वासनादिकं कृत्वा अन्त: देवस्याग्रत: स्वस्तिकविष्टरे पूजितपीठे स्वस्तिके तत्त्वकलशमुपनीय स्थापयेत्। यात्राद्याहुतिसाधिताज्ययुगलं च 'कनिक्रदा'दिहोमसाधितं 'वास्तोष्पति'होमसाधितं च संपातं क्वचित् प्रदेशे आस्थाप्य रक्षेत्।।18।।

The priest after entering the sanctum sanctorum shall after propitiating the god with worship and offering special Pūjas get out of it. He shall put a portion of offering in the sacrificial pit in front and keep the leftovers in a pat called Tattvakalaśa where Agni Caitanya is to be invoked. Thereafter taking the Tattvakalaśa and placing it in the Svastika diagram in front of the idol keep it apart The leftovers may be taken inside the sanctum for preservation. (18)

---

1. अधिकपाठमाश्रित्येयं व्याख्या
2. 'ति' घ पाठ:।
3. 'या' इति मूनकोशपाठ:।

निर्गत्य विप्रान् विदुषः समूह्य प्रसाद्य हेमादिसमर्पणेन।
देवं च तत्तन्मनुना प्रणम्य कृताञ्जलिः कर्म निवेदयेत।।19।।

विमर्शिनी

पुनर्निर्गत्य विदुषः प्राज्ञान् विप्रान् समूह्य अग्रमण्डपे समूहीकृत्य हेमादिसमर्पणेन सुवर्णादिदानेन प्रसाद्य तत्तन्मनुना स्वस्वोक्तमन्त्रेण देवं च प्रणम्य तत्र कृताञ्जलिः स्थित्वा तच्चिकीर्षितं कर्म निवेदयेत।।19।।

विवरणम्

तत्र होमशेषेऽपि सम्प्रति संहारांगतया लोकसम्मतिं कर्तव्यां तावद्दर्शयति[1]निर्गत्येति। तत्तन्मनुनेति।।19।।

Then getting out of the sanctum the priest shall offer the Brāhmins sitting in the front in a pavilion, presentation of gold and cloth. Thereafter with the respective mantra he shall announce with folded hands as to what is intended by him after a circumambulation and prostration of the idol. (19)

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः।।20।।

नमः शिवाय साम्बाय सगणाय ससूनवे।
प्रधानपुरुषेशाय सृष्टिस्थित्यन्तहेतवे।।21।।

पूजाबिम्बमिदं विष्णोः स्थापितं पूर्वसूरिभिः।
अनेन दूषणेनाद्य दूषितं चेह वर्तते।।22।।

दुष्टबिम्बस्य चोद्धारः कर्तव्य इति शासनम्।
आगमस्य वयं कर्तुं व्यवसायमुपास्महे।।23।।

अ[2]त्रेदं यदि कर्तव्यमागमार्थतया भवेत्।
भवन्तो नोऽनुजानन्तु भवेमाज्ञाकरा वयम्।।24।।

इति।।

विमर्शिनी

प्रणामादौ विहितान् मन्त्रान् लिखति-नम इत्यादि।।20-24।।

विवरणम्

नमो ब्रह्मण्येति वैष्णवे मन्त्रः।।20।।

नमः शिवायेति शैवे।।21।।

---

1. 'ति-त' क पाठः।
2. 'त'ख. पाठः।

पूजाबिम्बमित्यादि निवेदनमन्त्रः।।22।।

Namaskāra mantra in respect of Viṣṇu installed is stated as "Namo brahmaṇyadevāya" etc. For Śiva it is like "namaśśivāya" etc. There are three mantras addressing the Brāhmins given as (1) Pūjābimbam etc. (2) Duṣṭabimbasya etc. (3) Atredam yadi etc. (20-24)

आद्योऽजितेऽणुः प्रणतौ द्वितीय-
स्त्र्यक्षे स्वमूलादिरतःपरेषु।
विज्ञापनेऽन्यत् त्रितयं हरौ तत्
परेषु किञ्चिद्भिदुराद्यपादम्।।25।।

विमर्शिनी

उक्तानां स्तोत्रमन्त्राणां विभागमाह-आद्य इति। एषु मन्त्रेष्वाद्यो 'नमो ब्रह्मण्यदेवाय' इत्याद्योऽजिते प्रणतौ नमस्कारे अणुः। द्वितीयो 'नमः शिवाय' इत्याद्यस्त्र्यक्षे प्रणतावणुः। अतः परेषु शिवनारायणादिषु स्वमूलादिरणुः। अन्यत् त्रितयं 'पूजाबिम्बमिदम्' इत्यादिपद्यत्रयं हरौ विषये ब्राह्मणेभ्यो विज्ञापनेऽणुः स्यात्। परेषु देवेषु किञ्चिद्भिदुराद्यपादं 'पूजालिङ्गमिदं शम्भोः' इत्यादिभेदिताद्यपादं तदेव त्रयम्।।25।।

विवरणम्

तदेतद्दर्शयति-आद्योऽजितेऽणुरिति।।25।।

The mantra is in respect of Viṣṇu, the second one is with regard to Śiva. For Śaṅkaranārāyaṇa etc., the Mūlamantra is to be used. The pūja mantras may appropriately changed with regard to the respective deities like "śambhoḥ", "devyāḥ" "śāstuḥ" etc. (25)

क्रियतामिति तैः समीरिते सुविमृश्यागमशासनं मुहुः।
अथ विश्वजनावबोधकं वचनं चागमिकं निवेदयेत्।।26।।

अथ तैः विप्रैः आगमशासनम् आगमानां नियोगं विमृश्य मुहुर्मुहुः क्रियतामिति निस्सन्दिग्धं समीरिते सत्यथ विश्वजनावबोधकं सामान्यजनप्रबोधकम् आगमिकम् आगमोक्तं वचनं च निवेदयेत्।।26।।

विवरणम्

विद्वत्सम्मत्यनन्तरं लौकिकसम्मतिमाह-अथ विश्वजनावबोधकमिति।।26।।

Once the Brāhmins proclaim that it can be done, the priest shall proceed to pronounce in such a way that people around shall understand the purpose. (26)

यथैव देवपूजायां विनियुक्तमनिन्दितम्।
द्रव्यं पुष्पादिकं पश्चान्निर्माल्यमिति निन्द्यते।।27।।
एवं बिम्बमदुष्टं यत् पूजायां विनियुज्यते।
तदेव दूषितं पश्चान्निर्माल्यमिति निन्द्यते।।28।।

तस्माद् दुष्टमिदं बिम्बं भवद्भिर्मुक्तसंशयैः।
निर्माल्यबुद्ध्या त्यक्तव्यमिति शास्त्रस्य शासनम्।।29।।

इति।।

विमर्शिनी

तान्याह–यथैव देवपूजायामित्यादि।।27-29।।

As in the case of regular worships flower etc., once used are considered as Nirmālya. Thus the idol with out blemish will be considered Nirmālya, once it is replaced and rejected. Hence you may reject the idol which is replaced as Nirmālya. This is how authorities have proclaimed. (27-29)

संवावदूकेषु जनेषु कर्तॄन् कियन्तमित्याद्यणुनानुयुज्य।
कालावधिं तद्गतदेवताभ्यो देवाय चैवं विनिवेदयेच्च।।30।।

विमर्शिनी

संवावदुकेषु तस्मिन् कर्मणि संवदनशीलेषु जनेषु सत्सु कर्तॄन् प्रति 'कियन्तं कालम्'इत्याद्यणुना कालावधिमनुयुज्य पृष्ट्वा तद्गतदेवताभ्यः तत्क्षेत्रस्थितदेवताभ्यः एवं 'श्रृण्वन्तु' इत्याद्यणुना, देवाय 'भगवन् वास्त्वभिनवम्'इत्यादिना च निवेदयेत्।।30।।

विवरणम्

अथ कालपरिमाणावधारणमाह–**संवावदूकेष्विति**। परिवारानुज्ञापनमिदानीमपि कार्यम्।।30।।

The priest shall consult the people concerned who are interested in the renovation as to how much period is permitted using the mantra "kiyantam kālam'. Then the priest shall inform the deities like "Śṛṇvantu" and address the main god "bhagavan" etc. (30)

कियन्तं कालमत्रेशः प्रवासवसतिं वसेत्।
मासादूर्ध्वं द्वादशाब्दादर्वाक् कालावधिः स्मृतः।।31।।
नार्वागूर्ध्वं क्लेशवासं वासुदेवोऽनुमन्यते।।
श्रृण्वन्तु देवताः सर्वाः प्रासादमिमाश्रिताः।
यदुच्यमानमस्माभिरनुगृह्णन्तु तेन नः।।32।।
पूर्वैः पूर्वं कृतमिदं देवालयमसारवत्।
प्राप्तं कालवशाद् भूयो वयं तत् कर्तुमुद्यताः।।33।।
कालेनैतावता भूयः प्रासादेऽस्मिन् पुनर्नवे।
स्[1]थापयामो वयं सत्यं तदनुज्ञातुमर्हथ।।34।।

1. 'प्रा' क. पाठः।

भगवन्! वास्त्वभिनवं बिम्बं वा तव शोभनम्।
कारयिष्यन्ति ते भक्तास्तदनुज्ञातुमर्हसि।।35।।
क्लेशवासस्त्वया देव! रोचनीयोऽल्पके गृहे।
यावन्नवं शुभं कृत्वा पुनः संस्थापयामहे।।36।।
जीर्णं बिम्बमिदं देव! सर्वदोषावहं नृणाम्।
अस्योद्धारे कृते शान्तिरित्येवं भाषितं त्वया।।37।।
तत् त्वयाधिष्ठितं देव! उद्धरामि तवाज्ञया।
तदुपक्रान्तमस्माभिस्तदनुज्ञातुमर्हसि ।।38।।

इति।।

विमर्शिनी

त्रिविधं मन्त्रं पठति–**कियन्तमित्यादि**।।31–38।।

विवरणम्

इदानीं देवानुमतिमाह–**भगवन्निति**।।35।।

(1) "kiyantam kālam "is addressed to the owners and administrators of the temple.

(2) "Śṛṇvantu" is to the attendant deities.

(3) Reporting that the temple built earlier is now damaged.

(4) With this much time we hope to renovate it.

(5) Oh God a new idol is being prepared.

(6) You may have to put up with difficulties in the temporary pavilion or shrine.

(7) This dol is really dilapidated and needs replacement.

(8) Hence we are renovating it for which your permission is being sought. (31-38)

एते तु विष्णुविषये प्रा[1]यो मन्त्राः परेष्वमी।
कार्याः स्वस्वागमाद्याप्तस्वविशेषपदान्विताः।।39।।

एते तु मन्त्राः प्रायो (विष्णु)विषये भवन्ति। परेषु देवेष्वमी मन्त्राः स्वस्वागमाद्याप्त-स्वविशेषपदान्विताः स्वेषु स्वेष्वागमेषूक्तस्वस्वविशेषशब्देनान्विताः (कार्याः)। तत्र तत्र शिवादिदेवप्रासादबिम्बादीनां शब्दा यथायोगं योजनीया इत्यर्थः।।39।।

The mantras indicated here are generally with reference to Viṣṇu. In

---

1. 'मन्त्राः प्रायः प' ख. पाठः।

the case of other deities the names of particular deity as given in Āgama may be substituted. (39)

देवं समिष्टसरसीरुहमात्रपीठे
सङ्कल्प्य सन्निहितमप्ययतत्त्वतारैः।
उद्व्याप्य तत्त्वकलशेन ततोऽभिषिच्यो-
द्व्याप्य प्रकल्पयतु केवलचिन्मयं तम्।।40।।

विमर्शिनी

पुनरन्तर्गत्वा समिष्टसरसीरुहमात्रपीठे केवलं 'पद्माय नमः' इत्येव पूजिते पीठे देवं सन्निहितं सङ्कल्प्य अप्ययतत्त्वतारैः प्रतिलोमतत्त्वैर्मूलेन प्रणवेन चोद्व्याप्य संहारक्रमेण त्रिर्व्यापय्य ततस्तत्त्वकलशेन तैरेव मन्त्रैरभिषिच्य तैरेवोद्व्यप्य तं केवलचिन्मयं प्रकल्पयतु।।40।।

विवरणम्

लब्धानुमतेस्तत्त्वकलशाभिषेकमाह-देवमिति। सन्निहितं संकल्प्येत्यावाहनमुक्तम्। अप्ययतत्त्वतारैरुद्व्यप्येति। संहारक्रमेण पठितैस्सर्वैरपि तत्त्वैरन्ते प्रणवेन च प्राग्वत् संहारव्यापकं कृत्वेत्यर्थः। ततस्तत्त्वकलशेनाभिषिच्येति। संहारक्रमेण सर्वे मन्त्रा जप्याः।।40।।

The priest entering the sanctum shall invoke the god in the lotus stool with respective mantras. For bimba and kalaśa it is Samhāra homa using Praṇava and Mūlamantra. After pouring sanctified water on the idol he shall, following Samhārakrama propitiate Kṣetrapāla up to his own preceptor. Here use of Samhāratattva and Praṇava are to be used and the god may be conceived as Cinmaya- supreme spirit. (40)

अग्रे निषद्य प्रणवेन नाडीयुक्त्यैत्य देवाभिदया स्थितः सन्।
सजाग्रदाद्यात्मदशादिभिन्नहारालयाद्यात्मदलाग्रकाद्यम् ।।41।।
ध्यात्वा क्रमात् क्षेत्रमिदं गृहार्चाहृदम्बुरुट्कर्णिकमब्जयुग्मम्।
तारेण तेजस्तडिद्राभमन्तरास्तूपिकं व्याप्य च मूलचक्रात्।।42।।
विकीर्य पुष्पाञ्जलिमादिनाथ प्लुतेन विष्वग् विषुवत्सरण्या।
प्रसार्य संव्याप्तमिदं बहिष्ठप्राकारनिष्ठं परिकल्प्य तेन।।43।।
ग्रस्तं समस्तं परिवारजातं जालेन मीनानिव संविभाव्य।
पुष्पाञ्जलिं संहृतिमुद्रयात्र कुर्वन् समाहृत्य ततः क्रमेण।।44।।
सप्तोर्मिपञ्चाम्बुधिमात्रतारैरामध्यहारापदमान्तहारम् ।
आनीय चान्तर्गतमण्डलान्तं प्रासादनिष्ठं च नयेत् दशाभिः।।45।।

विमर्शिनी

ततो ध्यानसङ्कोचनमाह-अग्रे निषद्येति। देवस्याग्रे निषद्य नाडीयुक्त्या नाडीयोगेन एत्य देवं मनसा

गत्वा प्रणवेन देवाभिदया देवेनैकीभूतः स्थितः सन् इदं क्षेत्रं महामर्यादापर्यन्तं स्थानमब्जयुग्मं ध्यात्वा। कथमित्याकाङ्क्षायामाह–सजाग्रदाद्येत्यादि। सजाग्रदाद्यात्मदशादिभिन्नहारालयाद्यात्मदलाग्रकाद्यं जाग्रदाद्याः जाग्रत्स्वप्नसुषुप्तितुरीयाख्या दशाः अवस्थाः ताभिः सहिताः सजाग्रदाद्याः तत्स्वरूपाः सजाग्रदाद्यात्मानः तत्स्वरूपैरवस्थादिभिरन्यैश्च चतुर्विधैर्वर्गैः भिन्नाः संभिन्नाः युक्ताः हारालयाद्याः हाराद्याः आलयाद्याश्च, हाराद्याः बाह्यहारामध्यहारान्तहारान्तर्मण्डलानि आलयाद्याः प्रासादगर्भगृहपीठप्रतिमाश्च, हारालयाद्यात्मानो हारालयाद्यस्वरूपाः ते दलाग्रकाद्या ययोरब्जयोः, दलाग्रकाद्याः दलाग्रदलदलसन्धिकेसराः, तदब्जद्वयं हृदम्बुरुट्कर्णिकं क्रमात् प्रासादकर्णिकं प्रतिमाहृदयकर्णिकं च एवं पद्मद्वयं ध्यात्वा, अन्तः सुषुम्नायां मूलचक्रात् मूलाधारादारभ्य आस्तूपिकं द्वादशान्तात्मस्तूपिकाग्रपर्यन्तं तडिदाभं विद्युदाकारं तेजः तारेण प्लुतप्रणवेन व्याप्य व्यापय्य, अथ प्लुतेनादिना प्रणवेन पुष्पाञ्जलिं विकीर्य विषुवत्सरण्या सुषुम्नानाड्या संव्याप्तमिदं तेजः विष्वक् परितः प्रसार्य, इदं बहिष्ठप्राकारनिष्ठं महामर्यादापर्यन्तं संव्याप्तं परिकल्प्य, तेन तेजसा समस्तं परिवारजातं परिवारसमूहं जालेन मीनानिव ग्रस्तं कबलीकृतं संविभाव्य, संहृतिमुद्रया पुष्पाञ्जलिं कुर्वन्, ततः तस्मात् तस्मादवधेस्तत्र तत्र स्थाने क्रमेण समाहृत्य संहृत्य संहारक्रमे विशेषं दर्शयति–सप्तेति। सप्तोर्मिपञ्चाम्बुधिमात्रतारैः सप्तषट्पञ्चचतुर्मात्रप्रणवैः आमध्यहारापदं मध्यहारापर्यन्तम् आन्तहारम् अन्तहारापर्यन्तम् अन्तर्गतमण्डलान्तम् अष्टमूर्तिनिलयपर्यन्तं प्रासादनिष्ठं चानीय, दशाभिरवस्थाभिः सह परिवारान् नयेत् प्रापयेत्। तत्र सप्तमात्रप्रणवेन संहृतिमुद्रया पुष्पाञ्जलिं कुर्वन् महामर्यादाया आरभ्य मध्यहारापर्यन्तं स्थितान् परिवारांस्तेजसा संगृह्य जाग्रदवस्थया सहानीय तत्पर्यन्तमानयेत्[1]। तथा तस्मात् षण्मात्रप्रणवेन पुष्पाञ्जलिं कुर्वन् स्वप्नावस्थया सह अन्तहारापर्यन्तं च, तथा पञ्चमात्रप्रणवचतुर्मात्रप्रणवाभ्यां च अन्तर्मण्डलान्तं प्रासादपर्यन्तं च क्रमेणानयेत्।।41–45।।

विवरणम्

समाधिसङ्कोचनमाह–**अग्रे** निषद्येत्यादिना। देवस्याग्रतो बद्धपद्मासन उपविश्यात्मनो देवस्य च नाडीसन्धानं कृत्वा नाडीसरण्या देवस्यान्तर्गत्वा देवाभेदेन स्थितो भूत्वेदं क्षेत्रमब्जयुग्मं ध्यायेत्। जाग्रदादय आत्मानः स्वरूपाणि यासां ताः जाग्रदाद्यात्मानो दशाः ताभिः सह वर्तत इति सजाग्रदाद्यात्मदशाः। आदिः प्रणवः तेन भिन्ना हारालयादयः बाह्यहारादयः प्रासादादयश्च आत्मानो यस्य तादृशं दलाग्रकाद्यं यस्याब्जयुग्मस्य तत्तथोक्तम्।।41।।

गृहं प्रासादः अर्चाया हृद्म्बुरुट् हृदयपुण्डरीकं ते कर्णिके यस्येति समासः। बाह्यकमलस्य तावत् बाह्यहारा दलाग्रं मध्यहारा दलसन्धिरन्तहारा दलान्यन्तर्मण्डलं केसराः ते च जाग्रत्स्वप्नसुषुप्ति-तुरीयावस्थास्थाना[2]नि प्रासादः कर्णिका आभ्यन्तरस्य तु प्रासादो गर्भगृहं पीठं बिम्बं च तथा भवन्ति। बिम्बगतं हृदयं कर्णिका। हृदयमपि पुनस्तृतीयं कमलमित्यर्थः। तारेण तेजः मूलचक्रात् आस्तूपिक-मन्तर्व्याप्येत्यन्वयः। देवस्य मूलाधारादारभ्य सुषुम्नामार्गेणोर्ध्वं प्रसरत् प्रासादलक्षणस्थूल-शरीरशिवात्मकस्तूपिकाग्रपर्यन्तं विद्युन्मालासङ्काशमविच्छिन्नं चैतन्यलक्षणं तेजः स्मृत्वेत्यर्थः।।42।।

विषुवत्सरणिः सैव मध्यमनाडी ततः प्लुतं प्रणवमुच्चरन्नास्तूपिकाग्रात् तदेव तेजो विषूचीनतया

---

1. 'त्।। पुनः त्रिव्ये' क. ग. पाठः।
2. 'नं प्रा'।

द्वितीयपद्मदलाग्रपर्यन्तं परितः प्रसारयन् कुसुमनिकरं परितो विकिरेत्। ततस्तेन सर्वान्तरेण तेजसा क्षेत्रविभागाष्टकनिविष्टसमस्तदेवतानां अन्तर्बहिर्व्याप्नुवता तदेव समस्तं देवताजातम् उपसङ्ग्रहशक्त्या ग्रस्तमनुसन्दधीत।।43-44।।

समाहरणप्रकारं विवृणोति-**सप्तोर्मीति**। षडूर्मयः दशाभिः स्थूलजाग्रदादिचतुरवस्थाभिः सहेत्यर्थः।।45।।

Closing the door of the sanctum and sitting in front of it the priest shall chant Praṇava thrice and imagine the unification of Iḍa vein of the idol and his own Piṅgalā vein. Again after chanting the Praṇava thrice he shall conceive the unification of the Piṅgalā vein of the god and his own Iḍa vein. Then chanting Praṇava four times he shall conceive the unification of the Suṣumnā veins of both god and his own. Thereby he shall imagine as having entered the heart of god through the Suṣumnā vein. He shall conceive the temple campus up to the boundary called Mahāmaryādā- the outer enclosure as two lotus flowers. The temple may be imagined as having five conditions of Jāgrat (awakened state)

Swapna (reclining state), Suṣupta(sleeping state), Turīya (the fourth state), Turyātīta (over and above the fourth state) as also the five boundaries or enclosures like Bāhyahāra (external) and Madhyahāra (the central enclosure). Both may be taken as two different lotus flowers. For the lotus of Prāsāda-shrine, there is the heart called the idol, Karṇikā, Pītha, Kesara, Garbhagṛha, Dalamūla, corridor and Dalāgra. For the Pañcaprākāra conceived as Lotus Prāsāda (sanctum) Karṇikā, Antarmandala,Kesara, Antahāra, Dalamūla. The structure for the rows of lamps called Dīpamālā (which is third prākāra of the Pañcaprākāra system), Dalamadhya, Bāhyāprākāra and Dalāgra. Now the priest shall shower flowers from the Ādhāracakra of the idol through Suṣumnā vein up to three top of Stūpi as though streaks of lightning. This effulgence spread through the Suṣumnā vein may be conceived as pervading the campus. All attendant deities may be conceived as snared in the net like fishes. In the effulgence all are imagined as engulfed. Thereafter the showering of flowers as part of the worship may be done. Conceiving as contraction of the whole up to the Antahāra the inner circle using the symbol of Samhṛti Mudrā the process involved is like this. With the chant of Praṇava for seven times the effulgence is contracted up to the location where the rows of lamp are situated along with the state of Jāgrat and Parivāra devatās- attendant deities. Then chanting Praṇava six times and performing worship in the form of contraction of effulgence from Swapna state to Antahāra. Then chanting Praṇava five times contraction may be effected up to the state of Suṣupti- the effulgence here is contracted up to the abode of Dikpāla- the guardian deities. Then with the chant of Praṇava four times by way of contraction

the effulgence is brought to Turiyā state. In this effulgence is contracted from the place of Digpāla up to the Prasāda which forms the Karṇikā. In these acts of contractions offering of flowers as part of propitiation is necessary. (41-45)

त्रिद्व्येकमात्रप्रणवैर्नयेत् त-
दागर्भमापीठमथाणुबिम्बम्।
आकृष्य बिम्बात् तदपीतितत्त्व-
तारैश्चिदात्मन्यखिलं तदन्तः।।46।।

विमर्शिनी

पुनः त्रिद्व्येकमात्रप्रणवैः त्रिमात्रप्रणवेन प्रासादाद् आगर्भं गर्भगृहपर्यन्तं द्विमात्रप्रणवेन तस्माद् आपीठं पीठपर्यन्तम, एकमात्रप्रणवेन तस्माद् आणुबिम्बं मन्त्रबिम्बपर्यन्तं चावस्थाभिः सहाकृष्य कबलीकृतपरिवारं तत् तेजो नयेत्। पुनर्बिम्बाद् अपीतितत्त्वतारैः प्रतिलोमतत्त्वैस्तारेण च तदखिलं तेजोभूतं तदन्तः बिम्बस्यान्तर्ग(त?ते) चिदात्मनि चैतन्यमये नयेत्।।46।।

विवरणम्

आणुबिम्बमिति छेदः। तदखिलमपीतितत्त्वं तारैराकृष्य तदन्तश्चिदात्मनीत्यन्वयः। नयेदित्यनुषज्यते। संहारक्रमेण तत्त्वैरन्ते प्रणवेन च संहारमुद्रया पुष्पाञ्जलिं कुर्वन् बिम्बाविष्टं तत्सर्वं तदीयहृदयकमलवर्तिनि जीवलक्षणे तेजस्युपसंहरेदित्यर्थः।।46।।

Thereafter with three times chanting of Praṇava the Caitanya already contracted along with Parivaras may be brought in to the enclosure of Garbhagṛha. Then with two times chant the Caitanya already enclosed in the Garbhagṛha may be contracted into the altar and idol. Thereafter that Caitanya is to be restricted with the Samhāratattva Praṇava into the idol alone. Conceiving the god as supreme soul the priest shall withdraw into himself. (46)

तत्कर्मकालप्रतिबोधनान्ते तत्रोपविष्टः सुसमाहितात्मा।
समाधिसङ्कोचनमुक्तनीत्या निर्वर्त्य तस्मिन् सकलं सुयोज्य।।47।।
त[1]द् बिम्बकुम्भावपृथक् पृथक् च व्याप्याभिषिच्याप्ययतत्त्वतारैः।
तत्तत्त्वकुम्भेन पुनश्च तैस्[2]तद् व्याप्याहरेद् वा प्रतिमाहृदब्जे।।48।।

विमर्शिनी

तत्र क्रियाक्रमे पक्षभेदं दर्शयति–तत्कर्मेति। तत्कर्मकालप्रतिबोधनान्ते तस्य कर्मणस्तस्य कालस्य च देवं प्रति विज्ञापनानन्तरं तत्र बिम्बाग्रतः उपविष्टः सुसमाहितात्मा सुतरां समाहितमना भूत्वा उक्तनीत्या

---

1. 'त् कुम्भबिम्बाव' क. पाठः।
2. 'तद्वद्'ख., 'तैश्चोह्याप्या' ग. पाठः।

उक्तमार्गेण समाधिसंकोचनं ध्यानसंकोचनं निर्वर्त्य कृत्वा तस्मिन् तत् सकलं परिवारतत्त्वादिकं सुयोज्य सुतरां योजयित्वा बिम्बकुम्भौ बिम्बतत्त्वकलशौ अपृथक् ऐकात्म्येन पृथक् च व्यस्तात्मतया च प्रणवेन व्याप्य अप्ययतत्त्वतारैः प्रतिलोमतत्त्वैस्तारेण तत्तत्त्वकुम्भेनाभिषिच्य पुनश्च तैस्तत्त्वतारैः प्रातिलोम्येन व्याप्य तत्तेजः (प्रतिमाहृदब्जे) आहरेद्वा।।47-48।।

विवरणम्

प्रकारान्तरमाह-**तत्कर्मेति**। तयोः कर्मकालयोः प्र(ति)बोधनं 'भगवन् वास्त्वभिनवम्' इत्येतत् तदनन्तरमेव समाधिसंकोचनेन कृत्स्नां विभूतिं बिम्बं उपसंहृतं विभाव्य यथोक्तं तत्त्वकलशाभिषेकं कृत्वा बिम्ब उपसंहृतं प्राग्वद् हृत्पुण्डरीकपुटे संहृतं भावयेत्।।47-48।।

After the culmination of Dhyānasaṅkoca having taken the sacrificial pot inside the sanctum and worship, the priest shall sit before the idol and perform rituals closing the door. He shall sit with concentration of the mind and invoke the presence of supreme power into the idol with the Parivāratattva together and separately. The idol is to be bathed with sanctified water from the pot. From Kṣetrapāla to one's own preceptor propitiation is to be made in the Samhāra way with the Praṇava chant three times. All the aspects of the supreme power shall be infused into the heart of the idol by the process of contraction. (47-48)

तत्तद्विभूत्या बहिरङ्गतोऽन्तरङ्गादपीतिक्रमतो विकृष्य।
संयोज्य बिम्बस्थचिदात्मनीमं[1] चिन्मात्रमाकल्प्य निरेतु चातः।।49।।

विमर्शिनी

इतिक्रमतः पक्षयोरन्यतरक्रमेण बहिरङ्गात् प्राकारादिप्रासादपर्यन्ताद् अन्तरङ्गात् प्रासादादिप्रतिमाहृदयान्ताच्च तत्तद्विभूत्या तत्तदैश्वर्यांशेन सह विकृष्य आकृष्य बिम्बस्थचिदात्मनि बिम्बहृत्कमलस्थचैतन्ये संयोज्य इमं देवं चिन्मात्रमाकल्प्य अतः अस्मात् स्वयं निरेतु निर्गच्छतु पृथग्भूतो भवतु।।49।।

विवरणम्

तत्तद्विभूत्येत्युपसंहारः।।49।।

Having enjoined divinity from Pañcaprākāra to the Prāsāda (from outer wall to the inner structure) and from Prāsāda to Pratimāhṛdaya (from shrine to the inner part where idol is located) the Caitanya- the supreme power - the god may be conceived as such. Thereafter the priest shall dissociate himself with the required mantra. (49)

कृत्वाग्रतः स्वस्तिकक्लृप्तशालीदर्भाग्रकूर्चऽर्चितयोगपीठे।
सुसंस्कृतं लोहमयं सकूर्चं घटं सदूर्वाक्षतकाञ्चनाद्यम्।।50।।

---

1. 'मं प्रकल्पयेत् केवलमात्मरूपम्।।' ख. पाठः।

आपूरितं [1]पूतजलेन सावकाशं समिष्टार्णसरोरुहाद्यम्।
सम्प्रार्थ्य[2] देवं मनुबिम्बके तत्सम्पातयुग्मं प्रसमर्पयेच्च।।51।।

विमर्शिनी

पुनरग्रतो देवस्याग्रभागे स्वस्तिकक्लृप्तशालीदर्भाग्रकुर्चे स्वस्तिकादिभिः क्लृप्ते पीठे अर्चितयोगपीठे तत्र सुसंस्कृतं यथोक्तक्रमेण संस्कृतं लोहमयं घटं कृत्वा सकू(र्चकं?र्चं) कूर्चसहितं सदूर्वाक्षतकाञ्चनाद्यं दूर्वाक्षतकाञ्चननवरत्नादिसनाथं च कृत्वा पूतजलेन गालनतीर्थाद्यर्चनेन च शुद्धजले[3]न मानसपूरणानन्तरं सावकाशमूध्वार्धपर्यन्तं पूरितं च कृत्वा पुनः समिष्टार्णसरोरुहाद्यं संपूजितलिपिपङ्कजं कृतमूर्तिकलावाहनाद्यं च कृत्वा देवं 'नमस्ते सर्वलोकेश' इत्यादिवक्ष्यमाणमन्त्रेण संप्रार्थ्य मनुबिम्बके तत्संपातयुग्मं कनिक्रदत्स्वस्त्यादिहुतजातं वास्तोष्पतिहुताज्जातं च संपातद्वयं प्रसमर्पयेच्च।।50-51।।

विवरणम्

संक्रमणक्रमं दर्शयति-**संप्रार्थ्य देव**मिति। सम्पातयुग्मं प्राग् रक्षितं यात्राहुतिवास्तोष्पतिहोमसम्पातम्। प्रसमर्पणं हृदये कार्यम्।।51।।

Making a Svastika design in front of the god using paddy and worshipping it as the altar a metallic pot made of gold or silver may be put upside down. Then after performing acts of drying and nyasa of Kūrca and Navaratna-nine precious jewels -as also Dūrvā grass. Akṣata and flowers the pot may be filled up with sacred water from a trough almost full. Performing worship like Lipipaṅkaja and praying to the god "Namaste"etc. the potful of material may be splashed over the idol with mantras. The act may be concluded with the waving of light along with the invocation to Sthūla-Sūkṣma and Parā forces (subtle, gross and supreme power) (50-51)

स्थूलं च सूक्ष्मं च परं च रूपमावाहयेद् व्युत्क्रम[4]तोऽणुबिम्बात्।
सर्वत्र गायत्र्यणुमूलतारैर्वैतेर्जिनार्णांशकृतोपचारैः।।52।।
हरौ वसुद्वादशवर्णतारैः षडर्णनादप्रणवैर्हरे च।
आवाहयेद् वेति पृथक् स्वमूलन्यासान्तमाधाय यजेच्च किञ्चित्[5]।।53।।

विमर्शिनी

ततः सर्वत्र देवेषु गायत्र्यणुमूलतारैः स्वस्वगायत्र्या स्वस्वमूलेन तारेण च क्रमात् स्थूलं सूक्ष्मं परं

---

1. 'शुद्धज' ख. पाठः।
2. 'र्थ्यमेव' ग. पाठः।
3. 'न शुद्धेन मा' क. ग. पाठः।
4. 'तश्च वि' इति मूलकोशपाठः।
5. 'त्।।
प्रणवाद्यन्तरुद्वैस्तु विन्दुनादान्तदीपितैः।
पञ्चब्रह्मभिरेवेशेऽत्रावाहनविधिं नयेत्।। -य' क. पाठः।

च रूपमणुबिम्बाद् व्युत्क्रमतः उद्वासनारूपेण कलशे आवाहयेत्। जिनार्णांशकृतोपचारैः स्थूलावाहने गायत्रीस्थाने स्वस्वोपचारैर्वा हरौ वसुद्वादशवर्णतारैः अष्टाक्षरद्वादशाक्षरप्रणवैर्वा हरे षडर्णनादप्रणवैः षडक्षरप्रासादप्रणवैर्वा इति स्थूलसूक्ष्मपराणि रूपाणि चावाहयेत्। पृथक् पृथक् स्वमूलन्यासान्त स्वस्वमूलमन्त्रन्यासपश्चिमं कर्माधाय किञ्चित् किञ्चित् स्वमूलेन यजेच्च।।52-53।।

विवरणम्

व्युत्क्रमतश्चेति। पूर्वं क्रमेण पुन(स्त?स्तू)त्क्रमेणेत्यर्थः। जिनार्णांशकृतोपचारैरेतैर्वेत्यन्वयः।।52।।

नादः प्रासादः। इति शब्दः क्रमोत्क्रमपरामर्शार्थः। पृथगिति तत्तदावाहनानन्तरम्।।53।।

From the idol the forces of gross, subtle and supreme may be invoked with the chanting of Gāyatrī mantra or those relating to the particular deity. For Viṣṇu the mantra shall be Aṣṭākatara, Dvādasākṣara and Praṇava. For Śiva it'is Ṣaḍakṣara and Prāsāda mantra. These mantras are to be used to invoke power up to the needs of the sacrifice. (52-53)

यथापुरं वारि दरे प्रपूर्य तेन स्वमूलाणुसमर्चितेन।
तत्त्वान्युदित्वा हृदयारविन्दाद्धुतक्रमेणाणुपराणि पञ्च।।54।।
द्विधापि तान्यन्वितचेतनानि नीत्वा कमप्यात्मपदं पदादेः।
आवाह्य तस्मात् कलशस्थमूर्तौ संयोज्य सर्वं विधिवद् विदध्यात्।।55।।

प्रणवाद्यन्तरुद्धैस्तु बिन्दुनादान्तदीपितैः।
पञ्चब्रह्मभिरेवेशेऽत्रावाहनविधिं नयेत्।।56।।

प्राणाणुविन्यासविवर्जमात्महृत्पङ्कजान्मन्त्रमहोऽभिवाह्य।
साङ्गीक्रियाद्यं प्रविधाय किञ्चिदिष्ट्वा निवेद्य प्रधिनोतु देवम्।।57।।

विमर्शिनी

जीवोद्वासनप्रकारस्तु गुरूपदेशादेव ग्राह्य इति मत्वा तस्य सूत्रमात्रं प्रकाशयति–**यथापुरमिति**। यथापुरं यथा पुरा जीवावाहनकाले तथा वारि जलं दरे शङ्खे प्रपूर्य स्वमूलाणुसमर्चितेन तेन जलेन प्रतिमाया हृदयारविन्दाद् आवाह्य कलशस्थमूर्तौ संयोज्य प्राणाणुविन्यासविवर्जं प्राणन्यासं मुक्त्वा सर्वं कर्म विधिवद् विदध्यादिति योजना। हुतक्रमेणेति तत्त्वहोमक्रमेण क्षेत्रपालादिकं निर्माल्यधार्यादिकं चोदित्वा उक्त्वा। तत्त्वानि सर्वाणि तत्त्वानि त्वणुपराणि अणुर्मूलं परे ऊर्ध्वे भवन्ति येषां तान्यणुपराणि। अणोः पराण्यप्यणुपराणि। मूलपुटितपञ्चतत्त्वान्युदित्वेत्यर्थः। तान्यपि द्विधा च सृष्टिसंहारक्रमेण अन्वितचेतनानि। प्राणापानेत्यादिमन्त्रशेषः सूचितः। कं जलं पदादेः पादद्वयमारभ्य। पदादेरित्यनेनैव पादयोरादिरिति मूलाधारोऽप्युक्तः। तस्मादात्मपदं नीत्वा[1]। आ आत्मपदं द्वादशान्तरस्थपरमात्मपदपर्यन्तं नीत्वेत्यर्थः। मूलाधारहृदयभ्रूमध्यान्यप्यात्मपदान्येवेति त्रिस्थानादप्यावाहनं सूचितम्। ईशे तु अत्र कर्मणि बिन्दुनादान्तदीपितैः बिन्दुना नादेन तदन्ताभ्यां शक्तिशान्ताभ्यां च दीपितैः प्रकाशितैः एवंभूतैः

1. 'त्वा। आत्म' ङ. च. पाठः।

प्रणवाद्यन्तरुद्धैः प्रणवैराद्यन्तरुद्धैः पञ्चब्रह्मभिरेव पञ्चब्रह्मसहितैः पञ्चतत्त्वैरेवावाहनविधिं नयेत्। तत आत्महृत्पङ्कजात् स्वहृदयपद्मात् मन्त्रमहः मन्त्रमयं तेजः भ्रूलत आवाह्य साङ्गीक्रियाद्यं सकलोपकरणाद्यं प्रविधाय किञ्चिदिष्ट्वा निवेद्य तत्रस्थं देवं प्रधिनोतु प्रीणातु।।54-57।।

विवरणम्

दरे यथापुरं वारि प्रपूर्य तस्मादावाह्य तेन कलशस्थ[1]मूर्तौ संयोज्येत्यन्वयः। कलशोक्तन्यायेन शङ्खे जलं संस्कृत्य बिम्बात् जीवं तस्मिन्नावाह्य तेन वारिणा तज्जीवं कलशस्थितायां मूर्तौ संक्रामयेदित्यर्थः। स्वमूलाणुस[2]मर्चितेनेति पूरणानन्तरं मूलेन पूजनमुक्तम्। आहृदयारविन्दात् इत्याकारः प्रश्लिष्टो द्रष्टव्यः। पदादेराहृदयारविन्दात् कं नीत्वेत्यन्वयः। कं मूलसमर्चितं तच्छङ्खस्थं जलं हुतक्रमेण, तत्त्वान्युदित्वेति हृत्पर्यन्तोन्नयने जप उक्तः। तानि पञ्च तत्त्वान्यणुपराण्यन्वितचेतनानि द्विधापीत्यन्वयः तानीति हुतक्रमविशेषणार्थः। अपिशब्द उदित्वेत्यनुकर्षणार्थः। अणुर्मूलमन्त्रः तस्मात्पराण्यणुपराणि अणुः परो येषां तान्यप्यणुपराणि। मूलमन्त्रपुटितानीति यावत्। अन्वितचेतनानि जीवतत्त्वसहितानि द्विधा सृष्टिमार्गेण संहारमार्गेण च हृदयपुटस्थे जले सत्येवं पञ्चतत्त्वानि वदेदित्यभिप्रायः। आत्मपदमपीत्यन्वयः। ततो द्वादशान्तपर्यन्तमपि सुषुम्नामार्गेण नीत्वेत्यर्थः। पुनस्तस्मादावाह्येति सम्बन्धनीयम्।।54-55।।

प्राणाणुविन्यासविवर्जं सर्वं विधिवद्विधायेत्यन्वयः।।56।।

After filling up the conch with water as detailed earlier, chanting the Mūlamantra as required, it may be placed at the feet of the idol to the chanting of mantras prescribed for Tattvahoma. Both in Sṛṣtikrama and Samhārakrama the mantra is to be used for raising up the power from foot up to the heart of the idol. Thereafter the supreme power may be invoked into the water of the conch for ceremonial purposes.

Śiva Pañcabrahmamantra is required for invocation along with the Śaivāṣṭākṣara hymns. Thereafter worship may be performed with Praṇava and offerings be made to god to please him. (54-57)

सुवाससाच्छाद्य सदर्भदाम्ना समर्प्य यात्राहुतिजाज्यशेषम्।
उत्थाप्य चोत्तिष्ठमनुप्रजापी सोष्णीषमूर्धोद्धृतजीवकुम्भः।।58।।

निर्गत्य पर्येत्य च शाकुनाद्यैः प्रासादमेतल्लघुमण्डपं च।
अन्तर्यथाविध्युपनीय शय्यामारोप्य मूलेन समर्च्य रक्षेत्[3]।।59।।

विमर्शिनी

पुनः सुवाससा अहतवस्त्रेण सदर्भदाम्ना दर्भदामयुक्तेनाच्छाद्य यात्राहुतिजाज्यशेषं कनिक्रदादिहुत-संपातशेषं समर्प्य उत्तिष्ठमनुप्रजापी कलशमुत्थाप्य सोष्णीषमूर्धा उष्णीषबन्धमूर्धा भूत्वा उद्धृतजीवकुम्भं

---

1. 'स्व'
2. 'र्पि' क. पाठः।
3. 'त।। अथोज्जि' ख. पाठः।

शिरस्यधिरोप्य तस्मान्निर्गत्य शाकुनाद्यैः कनिक्रदत्स्वस्त्यादि जपन् प्रासादं पर्येत्य प्रदक्षिणीकृत्य एतल्लघुमण्डपम् अल्पमण्डपं च पर्येत्य मण्डपस्य प्रधानद्वारेण यथाविधि अर्घ्यदानपूर्वम् अन्तरुपनीय शय्यामारोप्य मूलेन समर्च्य रक्षेत्।।58-59।।

विवरणम्

शाकुनाद्यैर्निर्गत्य प्रासादमेतल्लघुमण्डपं च पर्ये(त्ये)त्यन्वयः। यथाविध्यन्तरुपनीयेति। मूलबिम्बोदितन्यायपरिग्रहार्थः।।59।।

Covering the pot with fresh cloth and placing a Kūrca- the ring of Darbhā with five tips- it shall be bound with the rope made of grass. The leftovers of the sacrificial rites are to be put in a jar and the priest wearing a turban and chanting the mantra "Uttiṣṭha" etc., shall hold up the pot and proceed in a procession accompanied by hilarious people. He shall put the pot down in a well decorated pavilion and place it in a couch. Using the Mūlamantra it may be protected. (58-59)

बिम्बोद्धारविधौ सशान्तिकलशं कृत्वाग्रतः पावकं
सावित्र्याष्टसहस्रमत्र जुहुयाद् दूर्वास्त्रिमध्वाप्लुताः।
भूराद्यैरपि वा पयोद्रुसमिधः सम्पातमेतद्घटे
सिञ्चत् पञ्चभिरष्टशश्च जुहुयात् तत्त्वैः ससम्पातकम्।।60।।

विमर्शिनी

अथ जीर्णस्य बिम्बस्योद्धारविधिमाह-बिम्बोद्धारेति। बिम्बोद्धारविधौ बिम्बत्यागपक्षे प्रासादस्याग्रतः पावकं सशान्तिकलशं कृत्वा पावकं वि[1]धाय तद्दक्षिणे शान्तिदेवस्य कलशं च प्रपूज्य अग्निमुखान्तेऽत्र सावित्र्या मन्त्रेण त्रिमध्वाप्लुताः दूर्वाः अष्टसहस्रं जुहुयात्। भूराद्यैः व्याहृतिभिः पयोद्रुसमिधः पयोद्रुमाणां समिधो वा जुहुयात्। तत्संपातम् एतद्घटे शान्तिकलशे सिञ्चेत्। पुनः पञ्चभिस्तत्त्वैः प्रातिलोम्येन अष्टशश्च ससंपातं घृतं जुहुयात्।।60।।

In the matter of renovation of the idol, a sacrificial pit is to be made in front of the original idol and mantras like "sam no devih" are to be recited. A pot is to be sanctified and kept. Three strings of Dūrvā grass may be tied together and using this brush Trimadhura is to be dipped for offering an oblation in the fire chanting Savitrgāyatri 1008 times or Bhūrādimantra can be used to offer the Samit from the four milky trees. The balance may be kept apart as Sampāta which is to be applied to the pot. Using Pañcatattva in the Samhāra order (contraction), sacrifices like Sviṣṭakṛt are to be performed. (60)

संहारक्रमतः स्वतत्त्वमनुभिर्होमे सुक्लृप्तेऽमुना
सिक्त्वा शान्तिघटेन पायसनिवेद्याद्यं प्रकुर्वीत वा।

1. 'नि' ख. घ. ङ. च पाठः।

सिक्त्वा तत्त्वघटेन जीवकलशे प्रोद्वास्य नीत्वा बहि-
र्देवं बिम्बसमुद्धृतिं वितनुयाद् वासिच्य शान्त्यम्भसा ।।61।।

विमर्शिनी

अत्र क्रियाक्रमे पक्षभेदमाह-संहारक्रमत इति। तत्त्वहोमकाले संहारक्रमतः स्वतत्त्वमनुभिः होमे सुक्लृप्ते सति अमुना शान्तिघटेन देवं सिक्त्वा पायसनिवेद्याद्यं प्रकुर्वीत वा। तत्त्वघटेन सिक्त्वा जीवकलशे प्रोद्वास्य देवं बहिर्नीत्वा शान्त्यम्भसा आसिच्य बिम्बसमुद्धृतिं वितनुयाद्वा ।।61।।

After finishing the sacrifice with the Tattvamantras according to the Samhārakrama- the mode of contraction - the potful of sanctified water may be poured on the idol and oblation like Pāyasam be offered to him. This act is to be performed by the priest getting in to the sanctum with the pot in which the bunch of Dūrvā grass is dipped. The sacrifice is to be conducted with Sviṣṭakṛt. It is also suggested that the god may be brought out invoking his presence in the pot and placed in a couch and the bathing can be done with sanctified water (in connection with renovation). (61)

अथोज्जिहीर्षुः प्रतिमां विशीर्णा-
माचार्यवर्यः प्रणिपत्य देवम्।
विप्रोत्तमैस्तत्र पुरः स्थितः सन्
प्रवाचयेच्छान्तिमनन्यचेताः ।।62।।

विमर्शिनी

अथाचार्यवर्यो विशीर्णां भग्नां प्रतिमामुज्जिहीर्षुरुद्धर्तुमिच्छुः विप्रोत्तमैः सह देवं प्रणिपत्य तत्र पुरः स्थितः सन् अनन्यचेताः शान्तिं प्रवाचयेत् शान्तिवाचनं कुर्यात् ।।62।।

विवरणम्

इदानीमुद्वा(धि?सि)तससूत्रजीवस्य बिम्बस्य प्रतिपत्तिकर्मारभते-अथोज्जिहीर्षुरिति। विशीर्णामित्युद्धारे हेतुः प्रदर्शितः। देवं प्रणिपत्येति। सामान्यसिद्धं देवमित्यर्थः ।।62।।

The preceptor with a view to renovating the idol shall prostrate before him along with Brahmins standing in front and with single minded concentration they may pronounce Śānti mantra. (62)

शान्तिरस्तु शिवं चास्तु पुष्टिरस्तु सुमङ्गलम्।
स्वस्ति चास्तु समृद्ध्यस्तु सर्वेषां सन्तु सम्पदः ।।63।।
गोब्राह्मणेभ्यः क्षत्रेभ्यो विट्छूद्रेभ्यस्तथैव च।
लोकेभ्यः सर्वभूतेभ्यो राज्ञे जनपदाय च ।।64।।
ग्रामाय यजमानाय गुरवेऽस्मै गृहाय च।
बिम्बोद्धारविधेरस्तु साकल्यमिह सर्वदा[1] ।।65।।

1. 'दा।। ग'क. ग. पाठः।

इति।

विमर्शिनी

शान्तिवाचनपद्यानि पठति-शान्तिरस्त्विति।।63-65।।

The Śāntimantras are narrated in the stanzas as follows.

(1) Śāntirastu etc. (2) Gobrāhmaṇebhyaḥ etc. (3) Grāmāya yajamānāya etc. The concept is very clear that well being for the people of the country is intended. (63-65)

गर्भागारमथ प्रविश्य विधिवत् पुण्याहकृत् कौतुकं
बद्ध्वा स्वस्य सकर्तृमूर्तिपजनस्यारक्ष्य सर्वान् गुरुः।
पुष्पैः संहृतिपञ्चतत्त्वहुतसम्पातान्वितैर्वासना-
शक्तिं भास्करमण्डले प्रणवतः प्रोद्वासयेत् तद्गताम्।।66।।

विमर्शिनी

अथ गुरुः स्वयं गर्भागारं प्रविश्य विधिवत् पुण्याहकृद् भूत्वा सकर्तृमूर्तिपजनस्य यजमानस्य मूर्तिपानां स्वस्य च कौतुकं बद्ध्वा सर्वानारक्ष्य संहृतिपञ्चतत्त्वहुतसम्पातान्वितैः पूर्वं संगृहीतैः पञ्चतत्त्वहोमसंपातैः सहितैः पुष्पैः तद्गतां प्रतिमागतां वासनाशक्तिं प्रणवतो भास्करमण्डले प्रोद्वासयेत्।।66।।

विवरणम्

आरक्ष्ये[1]त्यस्त्रजपतालत्रयादिकमुक्तम्।।66।।

After entering the sanctum the priest shall perform Puṇyāha and tie the thread of wool in his wrist as well as on the idol after dipping it in the holy water. He shall sprinkle that sanctified water on the owner of the shrine as well as assistants on whom the woolen thread is tied. Using the mantra of Nirmālyadhārī Praṇava along with flowers and leftovers of the previous action, the priest shall draw out of the idol the remaining prowess or spirit and conjoin the same to the orb of the sun. (66)

उच्छ्वंचस्वेत्यादिकं नासदाद्यं सूक्तं चाप्यातेपितःपूर्वकं च।
पुंसूक्तादीन् मूलमन्त्रादिकं च मन्त्री तत्रावर्तयेन्मूर्तिपालैः।।67।।

विमर्शिनी

मन्त्री मन्त्रविशेषज्ञो गुरुः तत्रोद्धारकाले मूर्तिपालैः सह 'उच्छ्वं च स्वे' त्यादिकं, 'नासदासीद्' इत्यादिकम्, 'आ ते पितः' पूर्वकं च सूक्तं। पुंसूक्तादीन् पुरुषसूक्तादीन् मूलमन्त्रादिकं चावर्तयेत् आवृ[2]त्य जपेत्।।67।।

---

1. 'क्ष्येऽस्त्रजीवता' क पाठः।
2. 'वर्त्य ज' ख. घ. ङ पाठः।

During this time of extrication of divinity from the idol, the priest shall chant mantra such as "Uccham ca sva", "Nāsadāsīt", "Ā te pitaḥ" and Puruṣasūkta. In addition, the Sūkta dear to the deity shall also be chanted along with Mūlamantra, Upacāra and Gāyatrī. (67)

सौवर्णलाङ्गलमुखेन विदार्य पीठ-
बन्धं सुबध्य पशुबालकुशादिरज्जवा।
प्रोद्धारयेत् सुकलितेन वृषेण बिम्बं
तद्योग्यमन्त्रकृतसावयवीक्रियाद्यः ।।68।।

विमर्शिनी

पुनर्मन्त्री तद्योग्यमन्त्रकृतसावयवीक्रियाद्यः तद्योग्यस्य निर्माल्यधारिणे मन्त्रेण सकलीकृतो भूत्वा पशुबालकुशादिरज्जवा पशोर्बालरोमैः कुशादिभिश्च कृतरज्जवा सुकलितेन यथावद् बद्धेन वृषेण सौवर्णलाङगलमुखेन सुवर्णमयेन लाङ्गलाग्रेण पीठबन्धं विदार्य बिम्बं प्रोद्धारयेत्।।68।।

विवरणम्

सौवर्णलाङ्गलमुखेनेति। सुवर्णनिर्मितलाङ्गलाग्रेण बिम्बं पीठबन्धविदारणेन बिम्बं चालयित्वा पशुबालरोमकुशदर्भादिविरचितेन पाशेन बिम्बं परिबध्य मूर्तिपैः सह वृषेण कलिततत्पाशेन स्वस्थानात् सम्यगुद्वहेत्। शैवे तु पीठस्याध एव विदारणं कृत्वा पीठं पूर्वमपास्य बिम्बोद्धारः कार्यः। तद्योग्यमन्त्रजपसावयवीक्रियाद्य इति प्रागेव विष्वक्सेनादिमन्त्रसकलीकरणादिकमुक्तम्।।68।।

With a plough the tip of which is covered with gold the Aṣṭabandha is broken to take out the idol from the altar. Coir made up of hair from the tail of a cow as well as Darbhā grass entwined is fastened to it and drawn out tying the other end over the neck of a bull. (68)

पीठिकाबन्धविश्लेषे स्वस्वमूलमनुर्मनुः।
व्याहृतित्रयतारात्मा ततो बिम्बसमुद्धृतौ।।69।।

विमर्शिनी

पीठिकाबन्धविश्लेषे पीठिकावियोगे स्वस्वमूलमनुर्मनुः स्यात्। बिम्बसमुद्धृतौ व्याहृतित्रयतारात्मा 'भूर्भुवःस्वरोमि'ति मनुः।।69।।

विवरणम्

पीठबन्धच्छेदे बिम्बोदसने च मन्त्रमाह-पीठिकेति।।69।।

In this act of separating the idol from the base the mantra shall be the mantra of the god. While lifting up the idol the chants of "bhūr bhuvaḥ" may be used. (69)

पीठे याम्यशिरस्कमत्र विनिधाय क्षालयित्वा मना-
गिष्ट्वोद्वास्य च वासनां वसनसंवीतं शिरःपूर्वकम्।

नीत्वा न्यस्य बहिः सदर्भसिकते तद्याम्यदिक्स्थण्डिले
वामीकृत्य तिलाक्षतानि विकिरन् पर्येतु बिम्बं त्रिधा।।70।।

विमर्शिनी

अत्र पीठे याम्यशिरस्कं दक्षिणशिरसं विनिधाय शाययित्वा क्षालयित्वा मनागीषदिष्ट्वा वासनां च पूर्ववदुद्वास्य वसनसंवीतं[1] वस्त्राच्छादितं[2] तत्[3] शिरःपूर्वकं बहिर्नीत्वा (सदर्भसिकते) तद्याम्यदिक्स्थण्डिले प्रासादस्य दक्षिणदिक्स्थमण्डले स्थण्डिलं कृत्वा सिकतादर्भांश्च विन्यस्य तत्र दक्षिणशिरस्कं न्यस्य तिलाक्षतानि विकिरन् वामीकृत्य वामीकारेण त्रिधा बिम्बं पर्येतु।।70।।

विवरणम्

अत्रेति गर्भगृह एव। शिरःपूर्वकं बहिर्नीत्वा सदर्भसिकते तद्याम्यदिक्स्थण्डिले न्यस्येत्यन्वयः। अत्रापि दक्षिणशिरस्कतया न्यासः। वामीकरणमपसव्यकरणम्। त्रिधा त्रिवार्यकम्।।70।।

Putting the idol with its head placed towards the south on the altar and washing it with the mantras "Cittisruk" etc. and extracting divinity out of it and conjoining it with the orb of the sun, it may be covered with cloth and bound with coir of Darbhā grass. Thereafter taking it out of the sanctum with its head coming out first it may be placed towards the south of the altar stones on which the mothers are located. The place shall be leveled and plastered with cow dung over which grass and sand are sprinkled. Then the idol with its head facing south shall be laid. Sesamum and Akṣata are to be sprinkled on it. All those people connected with the act shall wear the sacred thread in the opposite way of usual style and make a circumambulation of it thrice again from the opposite direction-Apradakṣiṇa (from right to left) (70)

विसृज्य वस्त्राद्यभिषिच्य किञ्चनो-
पहृत्य तत्स्थामपि शेषवासनाम्।
रवौ समुद्वास्य सुवेष्ट्य वाससा
कुशैश्च नद्यादिजलाशयं नयेत्।।71।।

विमर्शिनी

पुनर्वस्त्रादि विसृज्याभिषिच्य किञ्चनोपहृत्य तत्स्थां शेषवासनामपि रवौ समुद्वास्य वाससा कुशैश्च सुवेष्ट्य नद्यादिजलाशयं नयेत्।।71।।

Thereafter removing the cloth and worshipping the idol with Jala and Gandha the remaining divinity shall be extricated and enjoined into the sun. Again covering the idol with fresh clothes and bound by the coir of Kuśa grass, it may be taken to a lake or river in procession. (71)

1, 2, 3. 'तां' क. पाठः।

तत्रागाधे पाथसि स्विष्टपीठे
विष्वक्सेनाद्यं स्वनिर्माल्यभाजम्।
तन्मन्त्रेणावाह्य सम्पूज्य यज्वा
तत्सात्कृत्य प्रक्षिपेद् बिम्बमप्सु।।72।।

विमर्शिनी

तत्र यज्वा गुरुरगाधे पाथसि जले स्विष्टपीठे विष्वक्सेनाद्यं [1]स्वं स्वं निर्माल्यभाजं तन्मन्त्रेण तत्तन्मत्रेणावाह्य संपूज्य बिम्बं तत्सात्कृत्य तादा[2]त्म्यं कृत्वा अप्सु प्रक्षिपेत्।।72।।

विवरणम्

तत्सात्कृत्य तदधीनवचने सातिः। विष्वक्सेनादिस[3]मर्पितं भावयन्नित्यर्थः।।72।।

In a deep spot in the lake or river the priest shall worship the altar and invoke the respective Nirmālyadhāri like Viṣvaksena with appropriate mantra and entrust idol to his care and put into the depth. Thereafter offering of flowers and mental worship are to be done. (72)

स्नात्वात्र कर्त्रा सह तर्पयेच्च स्वमूलमन्त्रेण यथाविधानम्।
प्राचीनपीठाद्यपनीय मूलवेश्माभिरक्ष्यारचयेच्च सर्वम्।।73।।

विमर्शिनी

अत्र कर्त्रा सह स्नात्वा स्वमूलमन्त्रेण यथाविधानं तर्पयेच्च। पुनरागत्य प्राचीनपीठादि निर्माल्यभूतं पीठनपुंसकशिलाद्यमपनीय मूलवेश्म मूलप्रासादमभिरक्ष्य सर्वं कर्मारचयेत्।।73।।

विवरणम्

प्राचीनपीठाद्यपनीयेति। पुराणं पीठं नपुंसकशिलां च।।73।।

Then the preceptor along with the owner shall take bath and offer oblation of water transferring the sacred thread over the left side. The damaged altar stones, images representing the guards etc; shall be cast away with out attracting pollution to the shrine. Thereafter the construction of the shrine and other acts of renovation has to be completed. (73)

अथाधिवास्योक्तवदल्पबिम्बं
हुत्वा तथाभ्यर्च्य सजीवकुम्भम्।
समण्डलं तत्परितो बलिं च
कृत्वा प्रसन्नापचितिं च[4] कुर्यात्।।74।।

---

1. 'स्वस्वनि क. ख पाठः।
2. 'त्म्यं तदधीनं कृ' ख., 'त्म्यादधीनं कृ' ङ पाठः।
3. 'मर्पकं भा'
4. 'प्र' क. पाठः।

विमर्शिनी

अथोक्तवदल्पबिम्बं सजीवकुम्भमधिवास्य तथा पूर्ववदेव हुत्वा समण्डलं सजीवकुम्भमल्पबिम्बगतं देवमभ्यर्च्य तत्परितो मण्डपस्य परितः बलिं च कृत्वा प्रसन्नापचितिं प्रसन्नपूजां च कुर्यात्।।74।।

विवरणम्

इदानीं जीवकलशस्य शय्यायां निधानं यदुक्तं तच्छेषमाह-अथाधिवास्येति। तथेति मूलबिम्बोक्तकर्मातिदेशः।।74।।

The preceptor returning after the bath and performing the usual daily rituals of the particular juncture of the day fill up the conch, perform self purification and take the smaller or portable idol for the temporary shelter and sanctified pot and perform Dhyānādhivāsa. Now he has to perform rites like Tattvahoma, Adhivāsa homa and Śāntihoma. He has to propitiate the god or divinity existing in the idol and pot. Oblations are to be distributed to the spirits located in the place extensively with the propitiation called Prasannapūjā. (74)

अथाल्पगेहे सुविशोधितेऽल्पपीठं च संशोध्य तथाधिवास्य।
संरक्ष्य गत्वाभिघटं निषद्य तद्रात्रिशेषं गमयेद् विनिद्रः।।75।।

विमर्शिनी

अथ सुविशोधिते अल्पगेहेऽल्पपीठं संशोध्य तथाधिवास्य संरक्ष्य मण्डपं गत्वाभिघटं घटाभिमुखं निषद्य विनिद्रस्तद्रात्रिशेषं गमयेत्।।75।।

विवरणम्

गत्वा अभिघटं निषद्येति। जीवकलशसन्निधिं गत्वा तत्रासीन इत्यर्थः। संरक्ष्येति वस्त्राच्छादनादिकमुक्तम्।।75।।

Thereafter purifying the temporary shrine the Pītha-the altar- may also be sanctified with the rite of Adhivāsana. It may be kept covered with fresh clothes after which the priest shall sit in front of the sanctified pot without falling into sleep. (75)

कृत्वा विधिं साम्प्रतिकं प्रभाते नान्दीमुखादिक्रमतोऽल्पगेहे।
पीठं प्रतिष्ठाप्य ततोऽर्चयित्वा संरक्ष्य तन्मण्डपमभ्युपेत्य।।76।।

उद्वास्य बिम्बे महितेऽखिलं तन्नीत्वोक्तवद् बिम्बघटक्रमेण।
कृत्वा परावाहनपूजनाद्यं बिम्बं प्रतिष्ठापयतूक्तनीत्या।।77।।

विमर्शिनी

पुनः प्रभाते साम्प्रतिकं संप्रतियोग्यं विधिं सन्ध्योपासनादिकं कृत्वा नान्दीमुखादिक्रमतः पूर्वक्रमेणाल्पगेहे पीठं प्रतिष्ठाप्यार्चयित्वा संरक्ष्य तन्मण्डपमभ्युपेत्य महिते पूजिते बिम्बेऽखिलमुद्वास्य बिम्बघटक्रमेणोक्तवन्नीत्वा परावाहनपूजनाद्यं कृत्वा उक्तनीत्या बिम्बं प्रतिष्ठापयतु।।76-77।।

विवरणम्

बिम्बघटक्रमेणेति। जीवकलशानयने स्थानमुक्तम्।।77।।

In the morning after performing the daily routine and sanctifying with Puryāha mantra an altar be installed in the little shrine with usual worship. Once the propitiation is over, rituals like Parāvāhana -invocation of the supreme spirit- is to be carried out and the idol is installed at an auspicious time. (76-77)

निद्राघटस्नपनपश्चिममत्र कृत्वा
सम्प्रार्थ्य साधु भगवन्निति सन्नतात्मा।
जीवाभिवाहनविधौ कलशेन तेन
सिञ्चेत् तदर्हमनुविन्यसनं च कुर्यात्।।78।।

विमर्शिनी

अत्र निद्राघटस्नपनपश्चिमं कर्म कृत्वा साधु सन्नतात्मा भूत्वा 'भगवन्नल्पगेहेऽस्मि'इति संप्रार्थ्य जीवाभिवाहनविधौ तेन जीवकलशेन सिञ्चेत्। तदर्हमनुविन्यसनं प्राणन्यासादिकं च कुर्यात्।।78।।

विवरणम्

तदर्हमनुविन्यसनं च कुर्यादिति। उक्तं हि पुरस्तात् "त्रिस्त्र्यात्मना व्याप्ये"त्यादि।।78।।

Now Nidrākalaśa- the potful of water symbolizing the sleep of deity is to be poured on the idol. The act should be done thrice. Prāṇanyāsa, Lipitattva, Akṣaranyāsa and Anganyasa are to be done one after the other before praying to god whose idol is fixed in with Aṣṭabandha - the gum to fix it to the base. The mantras for invocation are give under. (78)

भगवन्नल्पगेहेऽस्मिन् वासः क्लेशोऽपि ते हरे!।
वस्तव्यो भगवंस्तावद् यावद् गेहं समाप्यते।।79।।
कारकस्य परामृद्धिमनुजानन्महोदयाम्।
भक्तानामनुकम्पार्थमिह त्वं स्थातुमर्हसि।।80।।

इति।

विमर्शिनी

प्रार्थनामन्त्रं पठति-**भगवन्निति**।।79-80।।

विवरणम्

भगवन्नित्युक्तं मन्त्रं पठति-**भगवन्नल्पगेहेऽस्मिन्निति**।।79-80।।

Oh God even if it is inconvenient to be present in this small shrine you be present here till the new one is completed. "You be present here to ensure the prosperity of builder, devotees etc". (79-80)

हरौ गेहविधावेवं मनुरन्येष्विहोन्नयेत्।
तत्तद्दैवतबिम्बादिसमीप्सितपदान्वयम् ।।81।।

विमर्शिनी

हरौ गेहविधौ प्रासादनवीकरणे एवं मनुः स्यात्। इहान्येषु देवेषु बिम्बादिषु च तत्तद्दैवतबिम्बादिसमीप्सितपदान्वयं हरे इति स्थाने तत्तद्देवतानां नाम 'यावद् गेहं समाप्यत' इत्यत्र 'यावद् बिम्बं समाप्यत' इत्यादीष्टपदानाम् अन्वयं योजनम् उन्नयेत् ऊहयेत्।।81।।

These mantras are applicable in the case of Viṣṇu. In the case of the other deities the names may be suitably changed. The effect shall be the god to be present here till the renovation is completed. (81)

स्थूलाभिवाहनपुरस्सरमत्र सर्वं
निर्वर्त्य देवमभिपूज्य चरुं निवेद्य।
दत्त्वा बलिं परिषदां परितोष्य देवं
द्वारं पिधाय गमयेत् त्रिदिनं पुरोवत्।।82।।

विमर्शिनी

पुनरत्र स्थूलाभिवाहनपुरस्सरं सर्वं कर्म निर्वर्त्य देवमभिपूज्य चरुं निवेद्य परिषदां बलिं दत्त्वा देवं परितोष्य द्वारं पिधाय पुरोवत् त्रिदिनं गमयेत्।।82।।

Here acts like the invocation of the god in general terms, with the use of Stotra and employing mantra are done up to the offering of Pāyasa. The attendants are also to be given oblation to please the god. Now the door is to be kept closed for three days as in earlier cases. (82)

चातुर्थिकस्नपनयागमहोत्सवाद्यं
मूलोदितं सकलमत्र समादधीत।
बालालयन्यसनकर्म नपुंसकाश्म-
गे[1]होपधानरहितं विहितं तदेतत्।।83।।

विमर्शिनी

चातुर्थिकस्नपनयागमहोत्सवाद्यं चतुर्थदिवसस्नानं यजनमुत्सवाद्यं च मूलोदितं मूलबिम्बे निर्दिष्टं सकलं कर्मात्रापि समादधीत कुर्यात्। तदेतद् बालालयन्यसनकर्म देवस्य बालालसस्थापनकर्म नपुंसकाश्मगेहोपधानरहितं नपुंसकशिलया प्रासादस्येष्टकादिना च रहितं विहितं स्यात्।।83।।

विवरणम्

याग (इति) पूजाविशेषं कथयन्निष्क्रमणमुपसंहरति-बालालयेति।।83।।

On the fourth day the celebration of bath, sacrificial rites and festivals

1. 'रत्नोप' क. ख. न. पाठः।

are to be initiated as in the case of the original installation of the deity earlier. In this construction of the Bālālaya - the temporary shelter- the details like the altar stone to hold the idol and the rituals of placing jewels are not ordained. (83)

तद्बिम्बे रचिते समग्रगुणसम्पन्ने सपीठादिके
प्रत्यासीदति च प्रतिश्रुतमुहूर्त बीजवापादिकम्।
कृत्वा तत् परिगृह्य कारुकरतो बिम्बं जले वासयेत्
तत्प्रासादविशोधनं च तनुयात् पुण्याहकर्मान्तिमम्।।84।।

विमर्शिनी

एवं बालालये स्थापितस्य देवस्य मूलप्रासादप्रवेशे विधानमाह-**तद्बिम्ब** इति। समग्रगुणसम्पन्ने सस्पूर्णगुणयुक्ते सपीठादिके पीठनपुंसकशिलादिभिः सहिते तद्बिम्बे रचिते सति, पूर्वं प्रतिश्रुते प्रतिशाते मुहूर्ते च प्रत्यासीदति समीपं प्राप्ते सति, तत्कालक्लृत्या बीजवापादिकं कृत्वा तद्योग्यकाले तद् बिम्बं च कारुकरतः पूर्ववत् परिगृह्य जले वासयेत् अधिवासयेत्। तत्प्रासादविशोधनं च पुण्याहकर्मान्तिमं यथा भवति तथा तनुयात्।।84।।

विवरणम्

अथ प्रत्यासत्तिं वक्तुमारभते-**तद्बिम्ब** इति। प्रत्यासत्तिः सन्निधिः प्रतिश्रुतः पुरस्तात् कर्तृभिरनुयुक्तैः प्रतिज्ञातः। बीजवापादिकमिति त्रिषवणपूजोक्षणध्वजादिकमुक्तम्।।84।।

Once the new idol is made along with the altar, on the fixed time already made known, acts like the sowing of seeds etc; are to be carried out. Taking the idol from the hand of the sculptor it should be plunged in water for Jalādhivāsa. Thereafter the rites like Prāsādaśuddhi -sanctification of shrine etc., up to the Puṇyāha of the Vāstu have to be performed. (84)

उद्धृत्योदकतोऽभिषिच्य कलशैः स्वैर्बिम्बमग्राहिते
सम्यक्यंसस्कृतमण्डपेऽधिशयनं संवेश्य तत्पार्श्वतः।
विन्यस्येत् परिशोधिताल्पनिलयप्राक्स्थापितार्चास्थितं
देवं[1] प्रार्थ्य घटेऽभिवाह्य विधया सूत्रच्छिदासूक्तया।।85।।

विमर्शिनी

पुनर्बिम्बमुदकत उद्धृत्य स्वैर्बिम्बशुद्धिकलशैरभिषिच्य अग्राहिते मूलप्रासादस्याग्रतः स्थिते सम्यक्संस्कृतमण्डपे अधिशयनं शय्यायां संवेश्याधिवास्य तत्पार्श्वतः तस्याः शय्यायाः पार्श्वे एव[2] परिशोधिताल्पनिलयप्राक्स्थापितार्चास्थितं परिशोधितेऽल्पप्रासादे पूर्वं स्थापितायामर्चायां स्थितं देवं तत्त्वहोमाद्युपेतं सूत्रच्छिदासूक्तया विधया सूत्रच्छेद उक्तेन विधिना प्रार्थ्य घटे जीवकलशे अभिवाह्यानीय विन्यस्येत्।।85।।

1. 'वशं कलशेऽभि' ख. पाठः।
2. 'वं' क. ख. न. च. पाठः।

विवरणम्

स्वैः कलशैः निजनिजकथितैः बिम्बशद्धिकलशैः। अग्राहिते प्रासादस्याग्रतो विरविते। इदानीं बालबिम्बजीवसङ्क्रमणादिकमाह-तत्पार्श्वतो विन्यस्येदित्यादिना। सूत्रच्छिदासूक्तया विधया कलशेऽभिवाह्य तत्पार्श्वतो विन्यस्येत् इत्यन्वयः।।85।।

Lifting up from the water in which it is put for Jalādhivāsa and showered with the water from the sanctified pots, it shall be placed in a couch in a pavilion in front of the shrine after ritualistic purification. Purification of the temporary shelter, expiations needed for omissions, performance of sacrificial rituals are to be done one after the other. Seeking the permission of the deity the divinity may be transferred to jīvakalaśa with rites like Tattvakalaśa, Dhyānasaṅkoca etc. It is in the order of Samhāra- contraction- that the invocation is to be made. (85)

यात्रां कुरुष्व देवेश! भक्तानामनुकम्पया।
जीर्णमुद्धृत्य तद् भक्तैः कल्पितं बिम्बमुज्ज्वलम्।।86।।
तेन गेहं विशाद्येश! उत्तिष्ठ शिखिवाहन!।
एवं गुहार्चाविषये मन्त्रोऽन्यत्रोन्न[1]येद् बुधः।।87।।

विमर्शिनी

प्रार्थनामन्त्रं पठति-यात्रां कुरुष्वेति। गुहार्चाविषये स्कन्दस्य बिम्बोद्धारे एवं मन्त्रो भवति। अन्यत्र देवेषु प्रासादादिषु च बुधः तत्तद्योग्यपदज्ञो गुरुः स्वस्वपदम् उन्नयेत् ऊहयेत्।।86-87।।

In the case of Subrahmaṇya the mantra for request is like 'O God be pleased to move to the new shrine where a new idol is prepared. In the case of other deities the preceptor shall make appropriate modification in the name (like Uttiṣṭha garuḍadhvaja - get up Oh Viṣṇu etc.) (86-87)

उत्पाट्योक्तवदल्पबिम्बमुपनीयातो बहिः सन्दहेद्
गोसर्पिःस्नपितं तदर्हदहने तद् दारवं चेद् गुरुः।
लौहं चेद् गुरवे समर्पयतु तद् विद्राव्य यज्वाथवा
छित्त्वा नालमिदं विशोध्य सुशुभं तत्कौतुकं कल्पयेत्।।88।।

विमर्शिनी

ततः उक्तवत् पूर्वोक्तविधिनाल्पबिम्बमुत्पाट्य अतः तस्माद् बहिरुपनीय तद् दारवं चेत् गोसर्पिःस्नपितं कृत्वा तदर्हदहने अग्नौ निर्माल्यधारिणमावाह्य सम्पूज्य तत्र गुरुः स्वयं सन्दहेत्। तल्लौहं चेत् यज्वा यजमानोऽल्पबिम्बं विद्राव्य लोहमात्रमापाद्य गुरवे समर्पयतु। अथवा नालं छित्त्वा इदं विशोध्य सुशुभं तत्कौतुकं तस्य देवस्यैव कौतुकत्वेन कल्पयेत्।।88।।

---

1. 'ह' ग. पाठः।

विवरणम्

तद्वारवञ्चेत्तदर्हदहने सन्दहेदिति। निर्माल्यधारिणमाग्नौ सन्निधाप्य तदीयमन्त्रतर्पणं कृत्वा[1] तत्सात्कुर्यादित्यर्थः। लौहं चेत्तद्विद्राव्य गुरवे यज्वा समर्पयत्वित्यन्वयः। योनिभेदापेक्षया अयं प्रतिपत्तिभेदः। अथवेत्यादि प्रतिपत्त्यन्तरम्।।88।।

Once the idol for Installation is ready, the dilapidated one may be uprooted and brought out engaging the assistants. If it is made of wood, the preceptor shall smear it with ghee and after propitiating the Nirmālyadhārī and submitting to him by conception, burn it in fire. If the idol is made of metal it shall be melted and the owner shall present the metal to the preceptor. Or by cutting off the tubular parts of the idol, it shall be sanctified and used as the movable idol to be used on occasions like festival. (88)

आधाय प्रतिमाधिवासमधरेद्युस्तत्तदर्हार्हणा-
होमब्राह्मणतर्पणाद्युपरिषट्पीठाधिवासादिकम् ।
अन्येद्युः कृतरत्नकर्मणि समानीय प्रतिष्ठाप्य तत्-
पीठे बिम्बमथ स्वकीयकलशासेकादिकं चाचरेत्।।89।।

विमर्शिनी

अधरेद्युः पूर्वदिवसे तत्तदर्हार्हणाहोमब्राह्मणतर्पणाद्युपरिषट्पीठाधितासादिकं तत्तद्ध्यानोधिवास-पूजाधिवासहोमब्राह्मणपूजनादिकानन्तरं पीठाधिवासादियुक्तं प्रतिमाधिवासमाधाय अन्येद्युरुत्तरदिवसे कृतरत्नकर्मणि कृतरत्नन्यासे तत्पीठे तद्बिम्बमानीय प्रतिष्ठाप्याथ स्वकीयकलशासेकादिकं कुम्भेशनिद्राकलशजीवकलशानामभिषेकं तदाद्यं चाचरेत्।।89।।

विवरणम्

अथ जीवकलशन्यासशेषमनुसरति-**आधायति**। अर्हणा पूजा उपरिषदनन्तरं कर्तव्यम्। अन्येद्युर्मुहुर्त्तदिवसे तद्बिम्बं समानीय कृतरत्नकर्मणि पीठे प्रतिष्ठाप्येत्यन्वयः।।89।।

On the previous day of the installation the rites like Dhyānādhivāsa pūjā, Adhivāsa homa, Brāhmaṇa pūjā etc., are to be carried out. Purifying the base portion (where the idol is to be fixed) the idol is to be brought and installed. Next day the altar and the idol are to be properly fixed along with the rites like the deposits of jewels in the pit and Aṣṭabandha is used for fixing the idol. Rites up to Prasannapūjā are to be performed like pouring of sanctified pots of Kumbhakalaśa, Nidrākalaśa etc. Before these acts the supreme power is to be invoked into the idol. (89)

यत्राह्नैकेन तु समुदितं कर्म निर्मेयमत्र
प्रोद्वास्यैवं कलशमधिवास्यार्चया साकमग्रे।

---

1. 'त्वा सा' घ. पाठः।

मूलार्चादिच्युतिनिजविशुद्ध्यादिमन्मूलगेहे
संस्थाप्यैनां स्वचितिकलशासेचनाद्यं च कुर्यात्।।90।।

विमर्शिनी

उक्त एव निष्क्रामणे विशेषमाह-यत्रेति। यत्रावस्थायामेकेनैवाह्ना समुदितं सम्यगुक्तं। कर्म निर्मेयं कर्तुं शक्यं बिम्बमात्रस्यैव चेद् वैकल्यं तत्राप्येवं प्रोद्वास्य कलशं जीवकलशं सर्वलक्षणयुक्तया गृहीतया कृतजलाधिवासाद्यया अर्चया साकमग्रे मण्डपे अधिवास्य मूलार्यादिच्युतिनिजविशुद्ध्यादिमन्मूलगेहे विशीर्णां प्रतिमां पीठादिभिः सह यथोक्तप्रकारेण उद्धृत्य त्यक्त्वा कृतप्रासादशुद्ध्यादिके कृतरत्नन्यासे च तत्र प्रासादे प्रतिमां संस्थाप्य स्वचितिकलशासेचनाद्यं जीवावाहनकाले जीवकलशाभिषेकाद्यं च कुर्यात्।।90।।

विवरणम्

बालबिम्बनिष्क्रमणमुक्त्वा केवलकलशनिष्क्रमणमाह-यत्राह्नेति। निर्मेयं निर्वर्तनीयम्। अग्रे[1] अग्रतः कृते मण्डपे मूलार्चादिच्युतिर्मूलबिम्बपीठादीनां उक्तक्रमेण परित्यागः निजविशुद्धिः प्रासादशुद्धिरेव स्वचितिकलशो जीवकलशः।।90।।

When the new idol is to be installed without necessitating a temporary shelter (called Bālālaya) it can be done within the duration of a single day. Jalādhivāsa, Netronmīlana, placing in a couch, Dhyānādhivāsa, Adhivāsa homa etc, can be performed within a day. When the old altar serving as the base is changed the deposit of jewels in the pit of the new idol is needed along with the fixation of the idol using Aṣṭabandha. Thereafter the usual rites like the ceremonial bath on the fourth day and the festival are to be initiated as usual. (90)

बिम्बाजीर्तिविधौ विधाय सकलं सूत्रच्छिदै[2]कोदितं
मुक्त्वा प्रार्थ्य नमस्त इत्यधिघटं संयोज्य निर्याप्य तम्।
मूलार्चां परिरक्ष्य तक्षभिरभीष्टं कर्म निर्माप्य तत्-
कर्मान्ते परिगृह्य कारुकरतः प्रासादमुक्तक्रमात्।।91।।
पुण्याहावधिभिर्विशोध्य परिकल्प्यार्चिर्मयं तत्स्थितं
बिम्बं वारुणवारिणा सलिलवासे स्नापयित्वा सुधीः।
स्वस्वोक्तक्रमबद्धकौतुकमिदं सम्भाव्य पीठेऽर्चिते
कृत्वा बिम्बघटाभिषेकयजनाद्यं कर्म तत्रैव तत्।।92।।
बिम्बेऽग्राहितमण्डपेऽधिशयनं न्यस्ते च बालालया-
न्नीत्वा जीवघटेऽधिवास्य विधिवन्मूलालयादेव वा।

---

1. 'ग्रे तथा कृं' क पाठः।
2. 'दै' इति मूलकोशपाठः।

हुत्वा मण्डप एव जीवकलशे बिम्बे च संस्पृश्य त-
त्सम्पातं पृथगर्चनाद्यमखिलं निर्वर्त्य पूर्वोक्तवत्।।93।।
रत्नन्यासविधिं विधाय मनसा सम्पूज्य गर्भालयं
नीत्वा जीवघटाद्यमत्र सुविभा[1]व्यैतत्प्रतिष्ठापनम्।
जीवन्यासविधौ स्वजीवकलशेनासिच्य पूर्वोक्तवत्
कुर्यात् कर्मकलापमित्यभिहिता निष्क्रामणप्रक्रिया।।94।।

विमर्शिनी

बिम्बाजीर्तिविधौ बिम्बस्य वैकल्याभावे प्रासादे जीर्णे सति तस्य चिरकालेनैव कर्तुं शक्यते चेत् तत्रोक्तेषु कर्मसु मध्ये सूत्रच्छिदैकोदितं सूत्रच्छिदमेकमेवोक्तं कर्म मुक्त्वा वर्जयित्वान्यत् सकलं कर्म विधाय उद्वासनात् पूर्वं 'नमस्ते सर्वलोकेश' इति पद्याभ्यां प्रार्थ्य तं देवम् अधिघटं जीवकलशे संयोज्य निर्याप्य बहिर्नीत्वाल्पगृहे स्थापयित्वा मूलार्चां परिरक्ष्य तक्षभिरभीष्टं प्रासादकरणादिकं कर्म निर्माप्य तत्कर्मान्ते कारुकरतः प्रासादं परिगृह्य पुण्याहावधिभिः कर्मभिरुक्तक्रमाद् विशोध्य तत्स्थितं तत्र प्रासादे स्थितं बिम्बं संहृत्यार्चिर्मयमग्निमयं परिकल्प्य सलिलवासे सुधीः जलाधिवासशुद्ध्या वारुणवारिणा स्नापयित्वा स्वस्वोक्तक्रमबद्धकौतुकं स्वस्वकाले स्वस्वमन्त्रेण बद्धकौतुकम् इदं बिम्बम् अर्चिते पीठे सम्भाव्यावाह्य तत्रैव बिम्बघटाभिषेकयजनाद्यं कर्म कृत्वा तत्रैव तद्बिम्बे बालालयान्नीत्वा। मूलालयादिति बिम्बपीठिकादिचलनपरिहारार्थमुक्तम्। निष्क्रामणं क्रियते चेत् तथा सम्भवतीत्यभिप्रायः। अन्यथा चेत् तथा बालालयान्नीत्वा अग्राहितमण्डपे अधिशयनं शय्यायां न्यस्ते जीवघटे च उभयत्र सम्पूज्य विधिवद् अधिवास्य मण्डप एव हुत्वा जीवकलशे बिम्बे च तत्सम्पातं संस्पृश्य अर्चनाद्यम् अखिलं पृथक् पूर्वोक्तवत् निर्वर्त्य पुनः उत्तरदिवसे रत्नन्यासविधिं मनसा विधाय उभयत्र संपूज्य जीवघटाखमखिलं गर्भालयं नीत्वा अत्र पीठे एतत्प्रतिष्ठापनं सुविभाव्य मनसा कल्पयित्वा जीवन्यासविधौ (स्व) जीवकलशेनासिच्य पूर्वोक्तवत् कर्मकलापं कुर्यात्। इति निष्क्रामणप्रक्रिया क्रियारीतिरभिहिता।।91-94।।

विवरणम्

पक्षद्वयेऽपि विषयान्तरमाह-**बिम्बाजीर्तिविधाविति**। सूत्रच्छिदैकोदितं मुक्त्वा सकलं विधायेत्वन्वयः। 'नमस्ते सर्वलोकेश' इत्ययं मन्त्रोऽवसरे पठिष्यते। अधिघटं जीवकलशे।।91।।

पुण्याहं वास्तुपुण्याहः। तत्स्थितं बिम्बमर्चि[2]र्मयं परिकल्प्येति जलाधिवासकृते भूतसंहार उक्तः। अर्चिते पीठे सम्भाव्येति। पीठपूजां कृत्वा तस्मिन् विन्यस्तं कल्पयेदित्यर्थः।।92।।

बिम्बे जीवघटे चाधिवासविधिकृत् इत्यन्वयः। बालालयान्नीत्वा अग्राहितमण्डपे अधिशयनन्यस्ते इति। बालगृहसापेक्षपक्षे विशेषणम्। मूलाल्याादेव वेति। नीत्वेत्याद्यनुषङ्गः। केवलकलशपक्ष एतद्विशेषणम्। पृथगिति। मण्डपे प्रासादे चेत्यर्थः। संपूज्य पीठमिति शेषः।।93।।

अत्रैतत्प्रतिष्ठापनं सुविभाव्येति। तस्मिन्नर्चिते पीठे तद्बिम्बं प्रागुक्तन्यायेन मनसा प्रतिष्ठा[3]पितं

1. 'धाप्यैत' क. ग. पाठः।
2. 'र्चितं प'।
3. 'ष्ठितं'।

भावयेदित्यर्थः। जीवन्यासविधिर्जीवावाहनसमयः इत्यभिहिता निष्क्रामणप्रक्रियेति। चतुर्विधो निष्क्रमणप्रकार उपसंहृतः।।94।।

If in the case the idol is without damage and only the structure of the sanctum needs repair the idol has to be shifted out of the sanctum to a separate enclosure called Bālālaya. The spirit of the deity is invoked to a new pot called Jīvakalaśa and the idol (obviously without divinity) is bound -covered in a cloth and it is installed in the new enclosure. Once the structure is repaired it is received back from the hands of the sculptor and rites up to Puṇyāha are to be carried out. The idol taken out is also placed in a couch for the usual rites like Jalādhivāsa in conception. For reinstallation the idol is to be brought from the temporary abode and placed before the repaired structure. Thereafter the usual procedures are undertaken. Dhyānādhivāsa is to be conceived on both Jīvakalaśa (in which divinity is kept invoked) and idol (the original from which the divinity is shifted to the Jīvakalaśa). After the duration of the night rituals like Ratnādhivāsa is conceived in mind (since it is not actually needed). Taking the Jīvakalaśa inside the shrine Pratiṣṭhāmantra is chanted and the installation is conceived as done afresh. Aṣṭabandha is of course needed since it ensures the proper fixation of idol to the base. After the transfer of divinity back to the original idol the renovations come to an end. This action called Niṣkrāmaṇa taking out the idol from the sanctum involves usual rites like Sthūlāvāhana and Parāvāhana (the gross invocation and the subtle one). Thereafter the festival can be initiated as usual.] (91-94)

नमस्ते सर्वलोकेश! भूतानामभयप्रद!।
भक्तप्रिय! नमस्तेऽस्तु प्रसीद भुवनेश्वर!।।95।।
आगच्छ देवदेवेश! सर्वकारणकारण!
नवीकरणसि[1]द्ध्यर्थं कुम्भेऽस्मिन् सन्निधिं कुरु।।96।।

इति।।

विमर्शिनी

प्रार्थनापद्यद्वयं पठति-नमस्त इति।।95-96।।

विवरणम्

सम्प्रति मन्त्रं पठति-नमस्त इति।।95-96।।

The prayer addressed to the god is given in two stanzas. O God, dear to the beings, protector of all and the cause of primordial elements be present in this pot in order to facilitate the procedure of renovation. (95-96)

1. 'विध्यर्थं' क. च. पाठः।

निष्क्रामणैकविहितं विधिमत्र मुक्त्वा
शेषं विशेषविदिह प्रविधाय कर्म।
सम्प्रार्थ्य तत्त्वकलशेन तथाभिषिच्य
सङ्कोचमाचरतु वा गृहमात्रजीर्णौ।।97।।

विमर्शिनी

अत्र गृहमात्रजीर्णौ प्रासादमात्रस्यैव वैकल्ये सति विशेषवित् निष्क्रामणात् संकोचकर्मणि विशेषं विद्वानाचार्यः निष्क्रामणैकविहितं निष्क्रामणप्रधानत्वेन विहितं विधिं मुक्त्वा शेषं कर्म प्रविधाय 'देवेशे'ति संप्रार्थ्य तथा पूर्वोक्तप्रकारेण तत्त्वकलशेनाभिषिच्य संकोचमाचरतु वा। मासादधिकं प्रासादकरणकालश्चेत् निष्क्रामणं, ततोऽर्वाक् चेत् संकोच इति विकल्पस्य विभागः।।97।।

विवरणम्

अथ सङ्कोचनप्रकारं दर्शयति-**निष्क्रामणैकविहितमित्यादिना**। विशेषविदिति निष्क्रामणात् सङ्कोचविधौ विशेषं विद्वनित्यर्थः। सम्प्रार्थ्येति "नमो ब्रह्मण्यदेवाय" इत्यादिकमुक्तम्। तत्त्वकलशेन तथाभिषिच्येति समाधिसङ्कोचनादिकमुक्तम्। सङ्कोचनं आचरतु वेति वक्ष्यमाणो विशेषोऽभिप्रेतः।।97।।

If the dilapidation that necessitates renovation is limited to the sanctum, the preceptor shall take care in the acts leading to Saṅkoca-contraction. Here he has to pray to the god in the following lines. (97)

देवेश! प्रतिमामूर्ते! मन्त्रमूर्ते[1]!। परावरे।
अत्र सङ्कुचितो भूत्वा वासं कुरु तवाज्ञया।।98।।

इति।।

विमर्शिनी

प्रार्थनामन्त्रं पठति-**देवेशेति**।।98।।

विवरणम्

"क्लेशवासस्त्वया देव" इत्येतस्य स्थाने मन्त्रान्तरं पठति-**देवेशेति**।।98।।

O God of gods represented as idol, be pleased to be present here in contracted or succinct form. (98)

विष्वग्जागरिते विकृष्य बहिरङ्गादन्तरङ्गादपि
स्वस्मिन्नेव सुयोजिते स्वविभवोन्मेषे चिदेकात्मनि।
ऊर्ध्वाधः क्रमतोऽत्र पद्मयुगलं ध्यात्वा तदावारकं
स्वेच्छाशक्तिविभावितं पृथगतः सम्भाव्य चात्मोद्भिदाम्।।99।।

---

1. 'तौ' ख. पाठः।

त[1]त्राधारसरोरुहाग्रदलमध्यास्योर्ध्वपद्मोदरा-
च्छ्योतद्भिः परितर्प्य देवमुपहारैश्चित्सुधैकात्मकैः।
तस्मादेव तदीयमूर्ध्नि निपतन्तीमाविकासं सुधा-
धारां साधु विभाव्य तन्मुकुलितं कुर्याद् बहिष्ठोऽम्बुजम्।।100।।
ऊर्ध्वाब्जेन तदम्बुजं कबलितं कृत्वावतार्याथ तत्
संवेष्ट्य त्रिगुणात्मकेन मपरेणारक्ष्य चास्त्रौजसा।
स्वस्मिन् स्वोदितचित्सिराप्रसरविश्रान्त्या स्थितोऽर्चां वृतां
वस्त्राद्यैः परिरक्ष्य तक्षभिरिदं वेश्माञ्जसा कारयेत्।।101।।

विमर्शिनी

संकोचनप्रक्रियामाह-विष्वग्जागरित इति। स्वयं देवाभेदेन स्थितो भूत्वा स्वविभवोन्मेषे स्वस्य देवस्य संबन्धिनो विभवस्य व्याप्तेरुन्मेषे प्राकाश्ये विष्वग्जागरिते विष्वङ् महामर्यादापर्यन्तम् उद्बुद्धे तत्र बहिरङ्गादन्तरङ्गाच्च उक्तप्रकारेणैव बाह्यपद्मादन्तःपद्माच्च विकृष्याकृष्य स्वस्मिन्नेव चिदेकात्मनि चैतत्यमात्रे हृत्कमले सुयोजिते सति अत्र स्वेच्छाशक्तिविभावितं स्वस्येच्छाशक्तेरुद्भूतं तदावारकं तस्य चैतन्यात्मनः आवारकम् आच्छादनकरम् ऊर्ध्वाधःक्रमात् पद्मयुगलं ध्यात्वा अतो देवात् पृथग् आत्मोद्भिदां स्वस्य भेदं सम्भाव्य भावयित्वा तत्रानयोः पद्मयोर्मध्ये आधारसरोरुहाग्रदलम् आधारपद्मस्याग्रस्थं दलम् अध्यास्य अस्मिन्नुपविश्य ऊर्ध्वारविन्दोदरात् श्च्योतद्भिः स्रवद्भिः चित्सुधैकात्मकैः चैतन्यामृतमयैरुपहारैः देवं परितर्प्य संपूज्य प्रसाद्य तस्मादेव ऊर्ध्वपद्मोदरात् आविकासं यावद् विकासो भविष्यति तावत्पर्यन्तं तदीयमूर्ध्नि देवस्य ब्रह्मरन्ध्रे निपतन्तीं सुधाधारां साधु स्वगुरूपदेशक्रमेण विभाव्य स्वयं तस्मादब्जाद् बहिष्ठो भूत्वा तदम्बुजं मुकुलि[2]तं कुर्यात्।।99-100।।

ऊर्ध्वाब्जेनावतार्य अधोभागं नीत्वा तदम्बुजम् आधाराम्बुजं कबलितं ग्रसितं कृत्वाथ तत् पद्मं त्रिगुणात्मकेन सत्त्वरजस्तमोमयतन्तुरूपेण मपरेण संवेष्ट्य तद्बहिरस्त्रौजसा चारक्ष्य स्वोदितचित्सि-राप्रसरविश्रान्त्या स्वस्मादुद्गतस्य सुषुम्नानाड्या मार्गस्य विश्रान्त्या छेदेन हेतुना स्वस्मिन्नेव स्थितो भूत्वा वस्त्राद्यैः वस्त्रदर्भाद्यैः वृतामर्चां परिरक्ष्य इदं वेश्म प्रासादं तक्षभिरञ्जसा यथावत् कारयेत्।।101।।

विवरणम्

सङ्कोचनप्रकारमाह-विष्वगिति। बहिरङ्गं बाह्यं पद्मम् अन्तरङ्गमाभ्यन्तरं तत्र विष्वक्समन्ततो जागरितस्तत्तद्व्यापारनिष्ठो यः स्वविभावोन्मेषस्तत्तद्देवतालक्षणः तस्मिन्। उभाभ्यामपि पद्माभ्यां विकृष्य स्वस्मिन् चिदेकात्मनि हृदयकमलपुटगते सुयोजिते सतीत्युक्तानुवादशेषविधानार्थः। अत्र ऊर्ध्वाधः क्रमतः पद्मयुगलं ध्यात्वेति। अस्मिन् बिम्बे यदाभ्यन्तरकमलकर्णिकाभूतं हृदयकमलमधस्तादवस्थितं [3]तस्योपर्यपरमपि कमलं कल्पयेदित्यर्थः। स्वेच्छाशक्तिविभावितं कालात्मनः देवस्यैवेच्छाशक्त्या

1. 'अ' क पाठः।
2. 'लीभूतं' न पाठः।
3. 'तेभ्योप' क पाठः।

निर्मितमूर्ध्वं पद्मं हृत्पद्मस्य नित्यकल्पितत्वात् तदावारकं तस्य देवचैतन्यस्य विकासपरिहारायावरणभूतं पद्मयुगलम्। अतः आत्मोद्भिदां सम्भाव्येति। अस्मिन्नवसरे देवाभेदेन स्थितस्य आत्मनः तस्मात् पृथग्भावः कार्यः। निष्क्रमणे तु प्रागेव पृथग्भावो द्रष्टव्यः।।99।।

अध्यास्य स्वयं पृथग्भूतः सन् तत्रोपविश्येत्यर्थः। श्च्योतनं क्षरणं, तस्मादेवोपरिगतपद्मोदरात् तदम्बुजमधःपद्मं तदम्बुजमूर्ध्वाब्जेन कवलितं कृत्वेत्यन्वयः। अवतार्येति। यथा तदीयदलाग्रमधःपद्ममूले भवति तथाकरणमुक्तम्। मपरः प्रणवः। स्वस्मिन्नात्मनः शरीरे स्वोदितचित्सिराप्रसरविश्रान्तिः स्वस्मात् कालात्मनस्तस्मिन्देवे उदितो यश्चैतन्यांशस्य प्रसरस्तस्य स्वस्मिन्नेवानयनम्।।100, 101।।

After attracting the guardian forces that are vigilant in the protection of the shrine and those who are located from the outer boundary up to the sanctum sanctorum and uniting them with the heart of the idol, the priest shall conceive as two lotuses located up and down as identical with the supreme spirit. Thereafter imagining himself as different or separated from the god he may think that he is occupying the petal of the upper lotus from which the divine power is draining downwards the deity. Till the upper lotus is fully blown it drains nectar in to the Brahmarandhra of the deity. Once the process is over imagine that the lotus has closed its petals. (99-100)

Having conceived that the upper lotus has covered the lower one, and binding with three shreds of thread conceived as the three Guṇas- Sattva, Rajas, Tamas and chanting Praṇava affording protection with the prowess of Astramantra, the priest shall transfer his vital air through the Suṣumnā vein unto himself. Now the idol shall be bound with fresh clothes and coir made of Kuśa grass as if in a net. Thereafter the carpenter or sculptor shall be engaged to finish the repair of the sanctum. (101)

प्रासादं परिगृह्य तद्विधिसमाप्तौ शोधयित्वाथ तद्-
बिम्बं स्वो[1]दितसप्तशुद्धिहवनस्नानादिना शोधयेत्।
धारायामिह तत्सरोरुहविकासाद्यं विधेयं धिया
प्राक्सङ्ख्योचिततत्त्वसृष्टिहवनादौ कर्मणा चाचरेत्।।102।।

विमर्शिनी

पुनस्तद्विधिसमाप्तौ प्रासादे कृते सति प्रासादं परिगृह्य शोधयित्वाथ तद्बिम्बं तत्रस्थं बिम्बं स्वोदितसप्तशुद्धिहवनस्नानादिना उक्तैः क्षालनादिसप्तशुद्धिभिः प्रायश्चित्तादिहोमैः उत्तमादिक्रमेणोक्तैः कलशस्नानादिभिश्च शोधयेत्। आदिशब्देन दिशा[2]होमोत्सवादय उक्ताः। इह शोधनसमये धारायामारभ्यमाणायां तत्सरोरुहविकासाद्यं पूर्वोक्तपद्मयोः सङ्कोचापनयनम् ऊर्ध्वाधोनयनं च विधेयं

1. 'वो' इति मूलकोशपाठः।
2. 'शा' ख. घ. च. पाठः।

कर्म धियैवाचरेत्। प्राक्संख्योचिततत्त्वसृष्टिहवनादौ पूर्वप्रोक्तसंहारतत्त्वहोमे याभिः संख्याभिः परिच्छिन्नस्तत्त्वहोमः कृतः ततोऽधिकसंख्याभिः परिच्छिन्नेन सृष्टितत्त्वहोमे तत्त्वकलशस्नाने ब्रह्मकलशस्नाने च कर्मणा सङ्कोचविकासादिकमाचरेत्। तत्त्वहोमकलशस्ननादिकमेव पद्मद्वयस्य शङ्कोचविकासादिकर्मेन्यर्थः।।102।।

विवरणम्

धारायामिति। सप्तशुद्धिषु धारायामारभ्यमाणायां तस्य मुकुलितस्य पद्मस्य विकासं तच्चैतन्यकृत्स्नाङ्गप्रसरणहेतुभूतं मनसा कार्यम्। अथ तत्त्वहोमादिषु कर्मसु कर्मणा च तत्सर्वं कुर्यात्। चैतन्यस्यापाततः कार्त्स्न्येन च प्रसरणं ध्यानकर्मणोर्विशेषः। प्राक्संख्योचितेति। संहारसमये यावती संख्या परिगृहीता ततोऽधिकाधुना संख्या स्यादित्यभिप्रायः। निष्क्रमणेऽपि समानमेत्।।102।।

Once the sanctum is repaired and received back from the sculptor, the idol shall be subjected to ceremonial purificatory rites- Saptaśuddhi, Havana and Snāna. Here in the act of splashing with water in connection with the bathing, the lotus that was conceived earlier as closed has to be imagined as opened. Then follows the item like Tattvahomas, both Samharatattvas and Sṛṣṭitattvas - closing principles and creative principles after which the lotus is conceived as fully blown. (102)

जीर्णे सत्यष्टबन्धे तदधिगतचितिं स्वार्हसम्पातसिक्तां
देवे व्याप्यादिना तन्मलमपि परिशोध्याभिषिच्यार्चितेऽस्मिन्।
बीजेनावाह्य पीठे प्रकृतिमपि पुमांसं च मूलेन बिम्बे
साङ्गीकृत्योपहारान् स्नपनसमवसानान् समर्प्योभयोश्च।।103।।
पुण्याहप्रोक्षणान्ते द्वयमपि वसनाद्यैर्विभूष्योपहारै-
रिष्ट्वा कृत्वाष्टबन्धं विधिवदुभयसम्मेलनं भावयित्वा।
मूलेनावाह्य देवं प्रयजतु सकलीकृत्य भक्त्योक्तनीत्या
कुर्यात् तुर्याह्निकोक्तस्नपनमपि तदिज्येह तद्बिम्ब एव।।104।।

विमर्शिनी

एवं बिम्बप्रासादादिजीर्णोद्धारमभिधायाथाष्टबन्धे जीर्णे कर्तव्यं कर्माह–जीर्णे सतीति। अष्टबन्धे जीर्णे शिथिले सति प्रासादशुद्ध्यादिकलशस्नानभूतबलिपर्यन्तां शुद्धिं यथोक्तमार्गेण कृत्वा शक्तिहोमकाले पूजामन्त्रहोमावसाने नवशक्तीनां संहारमार्गाद्धोमेन सम्पातितसम्पातं स्वीकृत्य पुनर्नवशक्तिभिः सृष्टिक्रमेण यथाशक्त्याज्यं हुत्वा चतुर्द्रव्यं स्विष्टकृदादिकं च हुत्वा होमं समाप्यान्तर्गत्वा स्वार्हसम्पातसिक्तां संहारहोमात् सम्पादितेन सम्पातेन सिक्तां तदधिगतचितिं जीर्णाष्टबन्धगतचैतन्यम् आदिना प्रणवेन देवे व्याप्य उद्वास्य तन्मलं जीर्णाष्टबन्धशकलमपि परिशोध्य परितः शोधयित्वा अभिषिच्य रत्नसुवर्ण- सिकताभिस्तद्विवरं प्रपूर्यार्चितेऽस्मिन् पीठे बीजेन स्वस्वशक्तिबीजेन प्रकृतिं, बिम्बे मूलेन पुमांसमप्यावाह्य उभयोश्च साङ्गीकृत्य पीठे लिपिन्यासपीठन्यासादिभिः, बिम्बे लिपितत्त्वन्यासादिभिश्च सकलीकृत्य स्वपनसमवसानान् स्नानपर्यन्तानुपहारान् समर्प्य पुण्याहप्रोक्षणान्ते 'अष्टबन्धदेवताः प्रीयन्ताम्' इत्यादिविशेषेण सह पुण्याहं

कृत्वा द्वयं पीठं बिम्बमपि वसनाद्यैर्विभूष्यालङ्कृत्य जलगन्धादिभिरुपहारैः इष्ट्वा नवशक्तिहोमाज्जातं संपातं समर्प्य विधिवत् प्रतिष्ठापटलोक्तविधिनाष्टबन्धं कृत्वा स्थापयित्वा उभयसम्मेलनं प्रकृतिपुरुषयोरन्योन्यसंयोगं प्रणवव्यापकेन भावयित्वा मूलेन देवमावाह्य सकलीकृत्य भक्त्या तं देवं प्रयजतु। पुनरुक्तनीत्या प्रागुक्तविधिना तुर्याह्निकोक्तस्नपनमपि प्रतिष्ठावच्चतुर्थदिवसस्नानमपि कुर्यात्। इहाष्टबन्धे तदिज्या त्रिदिनगता पूजा तद्बिम्ब एव। नात्र कवाटबन्धनादिकं कर्तव्यमित्यर्थः।।103-104।।

विवरणम्

पीठादिजीर्णतायां निष्क्रामणं प्रागेव सिद्धम्। अष्टबन्धजीर्णतायां कः प्रकार इत्यत आह-जीर्णे सतीति। स्वार्हसम्पातसिक्तामिति। प्रतिलोमपठिताभिर्नवशक्तिभिर्हुत्वा तत्सम्पातेन संहारक्रमेण संस्पृश्येत्यर्थः। आदिः प्रणवः। अर्चितेऽस्मिन् पीठपूजापूर्वकं देव इति शेषः।।103।।

विधिवदिति। स्थापनसमये प्रतिपादितो निजो न्याय उक्तः। तदिज्येह तद्बिम्ब एवेति। न तु स्थापनोक्तवन्मण्डपे मन्त्रसन्तर्पणमात्रमिति भावः।।104।।

When the Aṣṭabandha is worn out an auspicious moment is to be fixed for replacing it with fresh compound. Before the damaged item is taken out the Caitanya has to be transferred to the deity. Using Navaśaktimantra sacrifices are to be performed and the leftovers are to be collected in a pot. After cleaning the tubular portion of the idol worship is to be done praying that the presiding deity of Aṣṭabandha be pleased. After the worship fresh Aṣṭabandha is to be prepared and brought near the pit of the altar where it is to be put to fix the idol. Both the idol and the altar are to be decorated and worshipped with Navaśakti mantras. The concept of Prakṛtipuruṣasamyoga -conjoining of the two forces is behind the fixation with Aṣṭabandha. Once the fixing is completed the usual propitiatory rites are to be carried out like Prāyaścitta homa-expiatory rites etc. Until it is firmly fixed the worship may be done there itself without closing the door of the sanctum. (103-104)

शङ्खः षड्गुणितः पयोधिगुणितः सर्जो द्विवृद्धाभया
कार्पासोपलवालुकाः सजतुकाः प्रत्येकमेकांशकाः।
लाक्षार्धामलकीसमेतमखिलं सञ्चूर्ण्य संयोजितं
तैलक्लिष्टसुपिष्टमात्मनवशक्त्यात्माष्टबन्धं विदुः।।105।।

विमर्शिनी

अष्टबन्धद्रव्याणि सपरिमाणान्याह-शङ्ख इति। शङ्खः षड्गुणितः षड्भिर्भागैर्युतः। सर्जः पयोधिगुणित चतुर्भिरंशैर्युतः। अभया द्विवृद्धा द्विभागयुता। सजतुकाः जतुकसहिताः कार्पासोपलवालुकाः प्रत्येकमेकांशकाः। एतानि चत्वारि द्रव्याणि प्रतिद्रव्यमेकैकांशयुक्तानि। लाक्षार्धामलकीसमेतं लाक्षाया जतुकस्यार्धांशमानेत आमलकीफलेन युतम्। एतदखिलं द्रव्याष्टकं संचूर्ण्य सम्यक् सूक्ष्मचूर्णानि सम्पाद्य संयोजितं सम्यगेकीकृतं तैलक्लिप्टसपिष्टं तैलेन क्लेदितं सुतरां पेषितां च तद् आत्मनव-शक्त्यात्मस्वस्वनवशक्तिस्वरूपमष्टबन्धं बुधा विदुः। अत्र कार्पासस्तत्काले योजनीय इत्युपदेशवशाद् भवति।।105।।

विवरणम्

सम्प्रत्यष्टबन्धद्रव्यादिकं दर्शयति-शङ्ख इति। द्विवृद्धा द्विगुणिता। अभया पथ्या। लाक्षा जतु लाक्षार्धमामलकी तया समेतम् अर्धप्रमाणामामलकीमित्यर्थः।। आत्मनवशक्त्या आत्माष्टबन्धमिति। आत्मनः परस्य या नव शक्तयः तदात्मकमष्टबन्धम्। अत्र नवम्या स्थानं तैलमवगन्तव्यम्।।105।।

(The preparation of Aṣṭabandha is noted down in this stanza)

There are six parts of the powder of Śaṅkha (conch); four parts of Sarja (resin of Pinus Dammer); two parts of Abhayā(the inknut, Terminalia Chebula); one part each of Jatukā (lac); Kārpāsa (cotton), Upala (a kind of soil) and Vālukā (river sand); half a portion of Āmalaka (Phylanthus Emblica). All these are to be mixed and pound together adding oil to make a compound. Thus forms the Aṣṭabandha which is the Navaṣakti of the particular deity. (Here Kārpāsa is to be added at the time of using it) (105)

बलिपीठमहाध्वजादिजीर्तौ
विहितैर्देवविशुद्ध्यवस्त्रुतैस्त् ।
सुविशोध्य समर्च्य देवमस्मै
बलिमाधाय निबोधयेद् विधेयम्।।106।।

विमर्शिनी

अथ परिवाराणां जीर्णोद्धारविधिमाह–बलिपीठति। बलीपीठमहाध्वजादिजीर्तौ इन्द्रादिबलिपीठानां महाबलिपीठस्य महाध्वजरङ्गादेश्च जीर्तौ सत्यां विहितैः कृतैः देवविशुद्ध्यवस्त्रुतैः देवस्य सप्तशुद्धिशेषैः होमकलशशेषैः कलशशेषैश्च तज्जीर्णमहापीठादिकं सुविशोध्य देवं समर्च्य भूतबलिं चाधाय अस्मै देवाय विधेयमनुष्ठेयं निबोधयेत् विज्ञापयेत्।।106।।

विवरणम्

परिवारविषयमाह–बलिपीठेति। देवस्य शुद्धिं कृत्वा तत्तच्छेषेण तस्यापि शुद्धिं कुर्यात्। देवं पूजयित्वा तस्यापि बलिहरणं कुर्यात्।।106।।

In the event of damage to the big altar stone, flag staff, Nirmālyadhārī (the idol of) and usual altar stones, purificatory rites are offered to the deity, including shower of a potful of sanctified water and sprinkling the stone and worshipping it offering oblation, the priest shall seek the permission of the god. (106)

अथ तत्पुरतः प्रतीपवृत्त्या
शरतत्त्वैर्हवनं विधाय मन्त्री।
अभिषिच्य च तद्घटेन तस्मिन्
स्वविभूत्यप्ययमञ्जसा प्रकल्प्य।।107।।

कलशे परिपूरिते तदग्रे
चितिमावाह्य ससूत्रमत्र[1] संस्थाम्।
उपनीय च गर्भधाम्नि सिक्त्वा
गमयेत् तत्सिरयैव देवदेवे।।108।।

विमर्शिनी

अथ मन्त्री मन्त्रातिदेशे कर्मातिदेशे च कुशलो गुरुः तत्पुरतः तस्य बलिपीठादेः पुरतः प्रतीपवृत्त्या संहारक्रमेण शरतत्त्वै स्वस्य देवस्य पञ्चतत्त्वैः हवनं तत्त्वहोमं विधाय तद्घटेन तत्तत्त्वहोमकलशेन तमभिषिच्य तस्मिन् महाबलिपीठादौ स्वविभूत्यप्ययं स्वस्वव्याप्तेः संहारमञ्जसा प्रकल्प्य तदग्रे परिपूरिते कलशे ससूत्रं सूत्रच्छेदविधानयुक्तं यथा भवति तथात्र संस्थां स्थितां चितिमावाह्य कलशे योजयित्वा तत्कलशमन्तरुपनीय देवाग्रे गर्भधाम्नि सिक्त्वा तत्सिरयैव तन्मार्गेणैव देवदेवे गमयेत् योजयेत्।।107–108।।

विवरणम्

अथ कर्तव्यं विज्ञापयेत् तत्रापि संहारतत्त्वह्लोममाह–**अथ तत्पुरत** इति। साध्विति सूत्रच्छेदरीत्येत्यर्थः। अञ्जसेति। पञ्जतत्त्वप्रणवव्यापकादिभिरित्यर्थः।।107।।

अत्र संस्थां चितिं जीवम्।।108।।

Then performing the sacrificial rites in the pit in front of the altars using the name of the particular deity a potful of water may be placed to the southern side. Using Pañcatattva and the Sṛṣṭikrama the rites shall be initiated and the leftovers may be kept apart. In the order of Samhāra the leftovers may be showered on the altars praying for one's prosperity. Thereafter the Parivāraśaktis- the power of the attendant spirits may be conjoined with that of the altar. Using Jīvamantra the invocation of Jīva is to be done. The pot sanctified thus is to be taken inside the sanctum moving to the right and pour it over the idol closing the door. That divine force is to be infused into the Suṣumnā vein of the deity. (107-108)

गर्भन्यासप्रभृतिविधिना कारुणा कारयित्वा
तोयावासप्रभृतिविधिभिः शुद्धिभिः सप्तभिश्च।
संशोध्यैतद् विधिवदधिवास्य प्रतिष्ठादि सर्वं
कुर्वीताथ प्रथमविधिवत् तुर्यवारोक्षणान्तम्।।109।।

विमर्शिनी

पुनस्तत्र तत् सर्वं जले त्यक्त्वा संशोध्य गर्भन्यासप्रभृतिविधिना पूर्वोक्तविधिनैव पूर्ववदेव कारुणा कारयित्वा तदानीं तोयावासप्रभृतिविधिभिः जलाधिवासबिम्बशुद्ध्यादिभिः क्षालनादिसप्तशुद्धिभिश्च

1. 'ग्र' ख. न. पाठः।

तत् संशोध्य विधिवत् पूर्वोक्तप्रकारोणैवाधिवास्य प्रतिष्ठादि सर्वं कर्म कुर्वीत। अथ प्रथमविधिवत् पूर्वप्रतिष्ठावत् तुर्यवारोक्षणान्तं चतुर्थदिवसस्नपनानन्तरं[1] तदवस्त्रावप्रोक्षणबलिदानपर्यन्तं कुर्वीत ।। 109 ।।

विवरणम्

विधिवदिति स्वस्थापनोक्तो न्यायः परामृष्टः ।। 109 ।।

Damaged altar stone etc., shall be thrown into lakes or rivers. Thereafter engaging the sculptors new ones shall be made afresh according to the chosen characteristic features and they shall be purified by the acts of Jalādhivāsa - submersion in water and the required seven types of purification and conceiving divinity by the process of Adhivāsa. Thereafter they shall be installed on the auspicious moment on the fixed day. As usual the bathing ceremony on the fourth day as well as Śrībhūtabali- offering to guardians represented by altar stone - shall be properly carried out. (109)

जीर्णोद्धृतिं स्थापितमन्त्रबिम्ब-
गृहादिजीर्तौ सपदीति कुर्यात्।
दुःस्थोऽन्यथा चेद् विपदे तथा चेत्
सुस्थोऽत्र देवो यदु[2] सम्पदे स्यात् ।। 110 ।।

विमर्शिनी

जीर्णोद्धारविधिमुपसंहरति-**जीर्णोद्धृतिमिति**। स्थापितमन्त्रबिम्बगृहादिजीर्तौ प्रतिष्ठापितस्य मन्त्रबिम्बस्य गृहादेः प्रासादादीनां त जीर्तौ वैकल्ये सति सपदि तदानीमेव इति उक्तप्रकारेण जीर्णोद्धृतिं नवीकरणं कुर्यात्। अन्यथा चेत् जीर्णोद्धारणं न क्रियते चेद् दुःस्थो दुःखरूपेण स्थितो देवो विपदे तत्संबन्धिनां विनाशाय स्यात्[3]। तथाचेत् जीर्णोद्धृतिः क्रियते चेत् सुस्थः सुखेन स्थितो देवोऽत्र स्थाने तत्संबन्धिनां च संपदे अभ्युदयाय स्यात्। यदु[4] यच्च यस्मात् तस्मात् जीर्णोद्धारं कुर्यादिति पू[5]र्वत्र संबन्धः ।। 110 ।।

विवरणम्

जीर्णोद्धारप्रकरणमुपसंहरंस्तदकरणे प्रत्यवायं करणेऽभ्युदयञ्च दर्शयति-**जीर्णोद्धृतिमिति**। यदु सम्पद इत्युकारः समुच्चयार्थोऽवधारणार्थो वा द्रष्टव्यः। यच्छब्दो हेत्वर्थः। यस्माद्देवः अन्यथा चेत् जीर्णोद्धृतावकृतायां दुस्थः सन्विपद एव स्यात्। तथा चेत् जीर्णोद्धारः कृत एव चेत् सुस्थस्सन् सम्पदे च स्यात्। तस्मात् सपदि सद्यो जीर्णोद्धृतिं कुर्यात् ।। 110 ।।

---

1. 'राव' ग. पाठः।
2. 'दि' ग. घ. पाठः।
3. 'त्। यस्मात् तथा' घ. ङ. च. 'त्। तस्मात् त' ख. पाठः।
4. 'दुतय' ङ पाठः।
5. 'र्वसं' ख. घ. ङ. च. पाठः।

When the installed idol of the deity and the sanctum sanctorum falls in to decay, acts of renovation shall be performed immediately. If not, the deity who is uncomfortable will prove to be a hindrance to the well being of the people of the locality and connected individuals. On the other hand the deity who is pleased shall prove to be beneficial to the prosperity of all concerned. (110)

इत्येकबेरविषये स्थापनाद्यं समीरितम्।
बहुबेरविधानेऽथ[1] भेदमात्रं प्रदर्श्यते।।111।।

विमर्शिनी

एकबेरप्रतिष्ठाकर्मोपसंहृत्य बहुबेरप्रतिष्ठां प्रस्तौति-इतीति। एकबेरविषये एक एव बेरो बिम्बं प्रतिमासाधनद्रव्यं यत्र स एकबेरः तथा बहुबेरशब्दोऽपि ज्ञातव्यः। तत्रैकबेरविषये एकबेरं बिषयीकृत्य स्थापनाद्यं स्थापनपूजनस्नानाद्यम् इति उक्तप्रकारेण समीरितं सम्यगुक्तम्। अथेदानीं बहुबेरविधाने बहुबेरकरणे तदनुष्ठाने च भेदमात्रं योऽयमुक्तकर्मणो भेदो विशेषः तन्मात्रमेवास्माभिः प्रदर्श्यते।।111।।

This is the procedure regarding the shrine where a simple idol alone is installed. In respect of shrines where more than one idol is present shall be dealt with herafter pointing out only the special features. (111)

शूलं वार्यधिवास्य बिम्बकलशैः सिक्त्वाधिवास्याग्रतः
प्रासादे परिशोधिते मणिगणन्यासादि कृत्वा गुरुः।
संस्थाप्य स्वपदेऽभिषिच्य कलशाभ्यां प्राच्र्य संरक्ष्य तत्
तक्ष्णा मृन्मयमूलबिम्बमुपबिम्बं चेप्सितं कारयेत्।।112।।

अथ प्रस्तुतं बहुबेरानुष्ठातं सूत्रयति-शूलं वार्यधिवास्यति। तत्र-

रत्नलोहशिलाधातुमृत्काष्ठालेख्यभेदतः।
प्रतिमा[2] सप्तधा ज्ञेया

इति विष्णुसंहितायां प्रीतमाया[3] सप्तविधत्वमुक्तम्। तथान्यत्र-

प्रतिमा योनिभेदेन पञ्चधा परिकीर्तिता।
शैलं रात्नं तथा लौहं दारवं मार्तिकं तथा।।

इति पञ्चविधत्वमुक्तम्। "प्रीतमाष्टविधा स्मृते"ति भागवते। षोढेति सिद्धान्तसारे। तत्र मणिलोहशिलाप्रतिमाः एकबेरविधानेन स्थाप्याः। इतरा बहुबेरविधानेन। तत्र मुरारिराह-

एकबेरं शिलालोहमणिजं सर्वदेष्यते।
मृद्दारुजं तथालेख्यं बहुबेरमिति स्थितिः।।

---

1. 'तद्भेद' क. पाठः।
2. 'ष्ठां'
3. 'नो' ख. च. च. पाठः।

इति। तत्र दारवी प्रतिमा यथोक्तप्रकारेण दारुं परिगृह्य यथोक्तप्रकारेण कारुभिः कारयित्वा वक्ष्यमाणबहुबेरानुष्ठानक्रमेण स्थापनीया। मृन्मयप्रतिमाविधानमिह किञ्चित् प्रकाश्यते। मृन्मयी प्रतिमा द्विविधा पक्वापक्वविभागेन। तत्र पक्वा नातिशुभा। अपक्वा तु सर्वाचार्यैः शुभेति प्रोक्ताः तथा नारदीयपद्धतौ–

मृन्मयीं प्रतिमां वक्ष्ये यथावत् तां निबोध मे।
पक्वापक्वे द्विधा प्रोक्ते मृन्मय्यौ प्रतिमा क्रमात्।।
न सर्वलोकाः शंसन्ति प्रतिमां दग्धमृन्मयीम्।
अपक्वा प्रतिमा शस्ता सैव कार्या विचक्षणैः।।
सुधया नैव कुर्याद्वै नाश्मचूर्णैस्तु कारयेत्।
मृदैव मृन्मयीं कुर्याद् यथावर्णानुरूपतः।।
ब्राह्मणस्य सिता मृद्वै क्षत्रियस्यारुणा स्मृता।
विशां पीता भवेन्मृद्वै कृष्णा शूद्रस्य कीर्तिता।।
मृदं वर्णानुरूपेण गृह्णीयात् क्षेत्रसम्भवाम्।
दधिसर्पिः पयोभिश्च अतसीस्नेहसंयुतैः।।
शर्करालोहपाषाणैश्चूर्णं कृत्वानुपूर्वशः।
समभागानि चूर्णानि मृत्तिकायां प्रयोजयेत्।।
खादिरेण कषायेण आर्जुनेन च पेषयेत्।
श्रीवेष्टकं सर्जरसं कुङ्कुमं कुष्ठमेव च।।
कुन्दुरुश्च रसा ह्येते सर्वे सर्वरसान्विताः।
नदीसंगमतीर्थेषु पुण्योद्यानेषु वा पुनः।।
आदाय मृत्तिकां तत्र स्नेहचूर्णसमायुताम्।
मासं पर्युषितो कृत्वा कारयेत् प्रतिमां ततः।।
त्रिरा[1]त्रोपोषिता सा तु शिलायससमा भवेत्।।

इति। तत्र मुरारिराह–

गर्तं कृत्वा निवा[2]ते तु स्थापयेत् तत्र मृत्तिकाम्।
शर्करालोहपाषाणचूर्णं दध्यादिभिः समम्।।
चतुर्थांशं मृदि क्षिप्त्वा कषायाभ्यां च पेषयेत्।
कषाये सर्वमालोड्य श्रीवेष्टादिसमन्विताम्।।
संगमादिमृदं पिष्टां सर्वपूर्णसमन्विताम्।
मासोषितां[3] पुनः पिष्ट्वा तनुयात् प्रतिमां शुभाम्।।

1. 'चौ' ङ पाठः।
2. 'पा' ख. ग. पाठः।
3. 'क्षि'

त्रिरात्रेण शिलावच्चेज्ज्ञेया तत्र सुयुक्तता।
पुनर्मासीषितत्वोक्तिरर्चाकाठिन्यसिद्धये ।।
ततो गर्भगृहे पीठं कुर्यान्छूलसमन्वितम्।।

इति। शर्करालोहपाषाणमिति। लोहं सुवर्णरजतताम्रकांस्यानि। एतानि समभागानि कृत्वा मृदश्चतुर्थांशं योजयेदित्यभिप्राय इति। रत्नावल्यामपि तथैवोक्तं–"पूर्वोक्तं मृदं संगृह्य विवातगतां कृत्वा स्थापयेदि"त्यादि। अथ मृत्परिग्रहे शिलापरिग्रहवदाचार्यो देवं संपूज्य शिल्पिभिः सह प्रशस्तं मृत्स्थानं गत्वा तत्रान्विष्य लब्ध्वा यथोक्तप्रकारेण होमादिकं सर्वं कृत्वा उपोष्य गहीत्वा शिल्पिने ददेत। तथाच शूलार्थं प्रतिमार्थं विहितं वृक्षविशेषं गत्वा यथोक्तप्रकारेण छित्त्वानीय शिल्पिभिः शूलानि कारयेत्। तत्र शूलकरणे मुरारिराह–

वंशदण्ड[1]: कटीदण्डो वक्षोदण्डस्तथैव च।
बाहुदण्डाश्च चत्वारः प्रकोष्ठास्तावदेव तु।।
पाददण्डावुभौ चैवं स्थूलदण्डास्त्रयोदश।

इति। स्थितस्य देवस्य शूलानि स्युः। तथाच तत्स्थिरीकरणाय चत्वारि शूलानि च योजयेत्। तथाच मुरारिराह–

प्रतिमासंमितायामं पृष्ठतो वृत्तमेव च।
उपघ्नशूलं कुर्वीत प्रतिमास्थितये पुनः।।
केचिच्चरणशूलं च पाशशूलं च कुर्वते।
चतुरः श्लेषयेद् दण्डान् द्विशिखानेव तान् पुनः।।
दण्डाः सप्तदशैते तु स्थाने प्रोक्ता विचक्षणैः।

इति। एवं स्थितस्य देवस्य सप्तदश वा त्रयोदश वा शूलानि कुर्वीत। आसीने देवे तु मुरारिराह–

तत्र स्याज्जानुसन्धिकम्।
जङ्घादि द्विशिखं कुर्यादूरुमेकशिखं तथा।।
एंकोनविंशतिर्ज्ञेयाः शूलदण्डास्तथासने।
शयने च तथा दण्डा अत ऊर्ध्वं न कारयेद्।।

इति। इत्यासनशयनयोरप्येकोनविंशतिः शूलदण्डा भवन्ति। रत्नावल्यामपि तेथैवोक्तं–"खादिरादीन् पूर्वोक्तान् वृक्षान् समानीय पुण्याहं कारयित्वा प्रोक्ष्य शिल्पिभिस्तक्षयित्वा शूलानि कारयेद् यथोक्तप्रमाणानि"त्यादि। तत्र शूलं वार्यधिवास्येति। शूलमिति जातावेकवचनम्। त्रयोदशसंख्यानि सत्तदशसङ्ख्यानि एकोनविंशतिसङ्ख्यानि वा शूलानि शिल्पिभ्यो यथोक्तप्रकारेण गृहीत्वा यथोक्तप्रकारेणैवेकरात्रं जलेऽधिवास्य उत्तरेद्युर्बिम्बकलशैः स्वस्वबिम्बशुद्धिकलशैः सिक्त्वाग्रतो मण्डपे यथोक्तप्रकारेणाधिवास्य अत्राधिवासहोमेन सह रत्नहोमं कृत्वा ततो यथोक्तकालं यथोक्तप्रकारेण वास्तुपुण्याहान्तकर्मणा प्रासादे परिशोधिते सति सुमुहूर्तदिने पुण्याहपूर्वं नपुंसकशिलां प्रतिष्ठाप्य

1. 'ण्डाः' ख. घ. ङ. च. पाठः।

मणिगणन्यासादि रत्नन्यासपीठस्थापनादिकं कृत्वा गुरुः प्रतिष्ठाविधानज्ञः मण्डपाच्छूलान्यानीय स्थितासीनशयानानां (स्वपदे) स्वस्वोक्ते स्थाने संस्थाप्य तानि शूलानि तत्र सम्यक् स्थिरीकृत्य कुम्भेशनिद्राकलशाभ्यामभिषिच्य प्रार्च्य तत् संरक्ष्य मृन्मयमूलविम्बं स्वस्वपरिवारैर्युतं मृन्मयं मूलबिम्बं स्वेप्सितं तक्ष्णा कारयेत्। तथा उपबिम्बिमर्चनाबिम्बादिकं चेप्सितं कारयेत्। अथ मूलप्रतिमा महती चेत् प्रासादरचनात् पर्यमेव अधिष्ठाने कृते सति तत्र स्थले स्थलशुद्धिं कृत्वा यथोक्तिनीत्या राक्षोघ्नहोमवास्तुहोमवास्तुबल्यादि कृत्वा रत्नहोमं च विधाय पुण्याहानन्तरं तद्गर्ते यथोक्तप्रकारेण संस्कृतां नपुंसकशिलां प्रतिष्ठाप्य तद्गर्तेषु रत्नन्यासं यथोक्तप्रकारेण कृत्वा तत्र शूलस्थापनं कृत्वा संपूज्य संरक्ष्य तक्षभिः लेप्यां[1] महाप्रतिमां कारयेत्। उभयथापि मृल्लेपनात् पूर्वं शूलान्यन्योन्यं बन्धयेत्। तत्र तिष्ठतो देवस्य नपुंसकशिलाया उपरि पादशिलां पीठं च यथोपपत्ति निधाय पादशिलाया गर्तद्वये द्वे पादशूले नपुंसकशिलास्पृष्टे यथा भवति तथा कृत्वा ते पादशूले कटिपर्यन्ते कृत्वा तत्र कटिदण्डेन सह श्लेषयेत्। शूलानां श्लेषणे सुषिरं कीळं च न कारयेत्। त्रिशिखं द्विशिखं निम्नं[2] च कृत्वा पृथक् पृथक् श्लेषयेत्। वक्षोदण्डस्य मध्ये तथा कटिदण्डे च मध्ये निम्नं कृत्वा तयोर्निम्नयोर्मध्ये वंशदण्डं निश्छिद्रं बन्धयेत्। वंशदण्डं तु मुखाद् मूर्धान्तं किरीटान्तं च बुधा प्राहुः। वक्षोदण्डं त्रिशूळाग्रं कुर्यात्। बाहुमूलानि त्रिशिखानि, प्रकोष्ठं द्विशिखं कुर्यात्। पुनर्दण्डान् सर्वान् यथावच्छ्लेषयेत्। श्लेषिताञ्छलेषितांस्ताम्रपट्टेन वेष्टयेत्। यथा सन्धेर्दार्ढ्यं भवेत्, तथा वेष्टयेत्। एवं शूलानि बन्धयित्वा रन्त्रवेष्टनं कुर्यात्। तत्र मुरारिराह–

नालिकेरत्वचां सारं गृह्णीयाद् रज्जुकर्मणि।
समवत्तायता रज्जुर्नातिस्थूला न वा कृशा।।
शलाकामात्रनाहा सा शूलग्रन्थिविवर्जिता।
न चैवातिदृढा कार्या नातिमृद्वी कदाचन।।
एवं रज्जुमयं कृत्वा सर्वेष्वङ्गेषु वेष्टनम्।
यथा शरीरे सर्वेषां चतुष्पष्टिः सिराः स्मृताः।।
शूले तथैव पाशाः स्युः कर्तव्यास्तत्र कोविदैः।
शूलमस्थि सिरा रज्जुर्मृन्मांसं त्वक् पटो भवेत्।।
द्वाभ्यां द्वाभ्यां तु रज्जुभ्यां बद्ध्वा शूलं तु वेष्टयेत्।
मृदं संवाह्य पूर्वोक्तां ततो मासद्वयोषिताम्।।
चतुर्भिर्भाजिताभिश्च वालुकाभिर्विमिश्रयेत्।
ततस्त्रैकटुकं पूर्णं विंशत्यंशं तु मिश्रयेत्।
नीलिकेरत्वचां सारं छित्वा छित्वात्र मिश्रयेत्।।
आलोड्य त्रिफलातोये नालिकेररसान्विते।
नालिकेररसैः सार्धं सारयित्वा मृदं शनैः।
श्लेषयेत् स्थूलबधेषु सर्वाङ्गेषु शनैः शनैः।।

---

1. 'ख्यां' ख. च. पाठः।
2. 'म्ननं' ख. घ. पाठः।

आर्द्रेष्वेव चतुष्केषु तेषु रज्ज्वा प्रवेष्टयेत्।
वेष्टयित्वा समीकृत्य मृदा चैव शनैः शनैः।।
त्रिरेव रज्ज्युबन्धं च त्रिशुष्कं चापि दा[1]पयेत्।
अत ऊर्ध्वं न रज्जुं च न शुष्कं चापि दापयेत्।।
मृदालिप्य शनैर्ज्ञात्वा शुष्काशुष्कं विचक्षणः।
कुर्याच्छरीरसंवेष्टं छेदच्छिद्रविवर्जितम्।।
हस्तेनैव मृदं दद्यात् कुर्चेन कटुशर्कराम्।
पिष्ट्वा त्रिफलतोयैस्तु शर्कराकल्कमेव च।।
कार्पासतूलसंयुक्तं सम्यक् कृत्वा विचक्षणः।
कूर्चेनैव तु तत् कल्कं शनैरेव परामृशेत्।।
ततः कृकणिकाग्रेण न्युप्ताङ्गानि च लेपयेत्।
क्लृप्तेष्वङ्गेषु सर्वेषु पटैराच्छाद्य बुद्धिमान्।।
शुक्तिकादिक्रियास्तत्र सर्ववर्णांश्च कारयेत्।
वर्णयोगविधिं पश्चात् प्रकुर्वीत यथाक्रमम्।।

इति। इत्याद्युक्तप्रकारेणोत्तमादिक्रमवशान्मूलप्रतिमाम् अतिमनोहराङ्गीं कृत्वा[2] मूलबिम्बत्रिभागादिप्रमाणनिर्मितां कर्मार्चामष्टांशादिप्रमाणकल्पितस्नानार्चादिकं च यथायोग्यं कारयित्वा कर्माण्यारभेत।।112।।

विवरणम्

अथैकबेरविषयं स्था[3]पनादिकं प्रतिपादितम्। बहुबेरविषये तु विशेषः प्रतिपादनीयः। तमधुना प्रतिपादयन् प्रथमं शूलप्रतिष्ठामाह-शूलं वारीति। मार्त्तिकबिम्बप्रकृतिभूतं खदिरादिसारद्रुमनिष्पादनीयं शरीरवंशात्मकं शूलं तत्प्रतिष्ठासमुचितदिने प्रागुक्तनयेन परिगृह्य जलेऽधिवासयेत्। अग्रत इति। प्रासादस्य पुरोदेशे। संस्कृते मण्डप इत्यर्थः। मणिगणन्यासादि कृत्वेति। पीठप्रतिष्ठापनमादिशब्दार्थः। संस्थाप्य स्वपद इति। शूलमित्यनुवर्तते। अभिषिच्य कलशाभ्यामिति कुंभेशनिद्राकलशाभ्यामित्यर्थः। प्रार्च्येति प्रतिष्ठाशिष्टार्चनमात्रमुक्तम्।।111-112।।

Śūla or skeletons have to be prepared for certain types of images (especially made of wood, mud etc.) to serve as backbones over which the required materials are fixed. These (made of high quality wood) have to be submerged in water at least for a day for Jalādhivāsa. After that these are to be bathed by sanctified water from Bimbakalaśa. After purifying the sanctum and putting materials like jewels at the base, the preceptor shall perform ceremonial splashing of water. The creation of the Mūlabimba using

1. 'भावये' ख. पाठः।
2. 'त्वा बि' ख. च. पाठः।
3. 'स्वा' क. पाठः।

mud and Upabimba the secondary image for taking out on procession, are to be entrusted to carpenters. (112)

सप्रासादमिदं प्रगृह्य मनुबिम्बं कर्मबिम्बं तथा
तत्कृत्यावसितौ प्रणीय सलिले तद् वासयेत् कौतुकम्।
कृत्वा वास्तुविधिं सुवस्त्रपरिमार्ष्ट्यार्चां च संशोधयेत्
संहृत्याग्रभृताप्सु दर्पणकृतच्छायाधिवास्याथवा।।113।।

विमर्शिनी

तत्र[1] प्रतिमाःपरिग्रहादिकमाह–**सप्रासादमिति**। तत्कृत्यावसितौ तेषां शिल्पिनां कृत्यावसाने तत्रादौ यथाकालं बीजवापं कृत्वा तद्योग्ये दिने इदं मनुबिम्बं मूलबहुबेरबि[2]म्बं स्थिरीकृतं चेत् सप्रासादं प्रासादेन सहितम्, अन्यथा चेत् पृथगेव मूलबिम्बं तथा कर्मबिम्बं च पूर्वोत्ताप्रकारेण प्रगृह्य तत् कौतुकं कर्मबिम्वं जलाशयं प्रणीय सलिले वासयेत् जलाधिवासं कुर्यात्। परिग्रहात् पुरः कर्तव्ये नयनोन्मीलने अन्तःस्थितमूलबिम्वे घृतमधुलेशयुक्तया हेममय्या तूलिकया यथोक्तप्रकारेण वा दर्पणप्रतिबिम्बिते सम्यग[3]ञ्जयित्वा वा तच्छेषेण कर्मार्चापरिग्रहात् पुरस्तस्यामपि नयनोन्मीलनं पूरणं च यथोक्तं कुर्यात्। पुनः वास्तुविधिं प्रासादशुद्धिं च यथोक्तप्रकारेण कृत्वा सुवस्त्रपरिमार्ष्ट्या मुदुतरवस्त्रपरिमार्जनेन मूलार्शं च संशोधयेत्। अथवा संहृत्य भूतसंहारादिकं कृत्वा अग्रभृताप्सु पुरोभागगतकटाहस्थे जले दर्पणकृतच्छाया दर्पणे प्रतिबिम्बिता छायाधिवास्या भवेत्।।113।।

विवरणम्

तत्कृत्यावसिताविदं मनुबिम्बं सप्रसादं प्रगृह्येत्यन्वयः। तत् कृत्यं तक्ष्णां व्यापारः बिम्बविषयः प्रासादविषयश्च। कौतुकं[4] कर्म बिम्बमेव। वास्तुविधिः प्रासादशुद्धि सुवस्त्रपरिमार्ष्ट्यार्च्चाञ्च संशोधयेदिति बिम्बशुद्धिरुक्ता। मृदुवस्त्रेण परितो मार्जनमेव बिम्बशुद्धिः। अथवाग्रभृताप्सु दर्पणकृतच्छाया संहृत्याधिवास्या इत्यन्वयः। दर्पणं बिम्बाग्रे निधाय तद्गतां च्छायां प्रागुक्तनयेन भूतसंहारादि कृत्वाग्निमयीं ध्यात्वाग्रगतकटाहजलसंस्कारादिपूर्वकं तत्र सच्छायं दर्पणं शाययेदित्यर्थः।।113।।

The Manubimba - the one consecrated with the mantras and Karmabimba- the portable smaller image are purified by the preceptor along with the shrine. They too need Jalādhivāsa and other rites. After following Vāstu rules, these are to be covered by clothes. If it is not possible the bathing can be conceived in water seen reflected in mirrors. For this water may be placed in a large vessel near which mirror may be placed so as to get a reflection of water. (113)

---

1. 'त्र परि'
2. 'म्बे स्थिरीकरणं चे' ग. पाठः।
3. 'ग वाञ्चयित्वा त' ख. ग. घ. च. पाठः।
4. 'कं वि' च. पाठः।

नक्तं नक्तन्दिनं च त्रिनिशमपि जले वासयेज् रत्नलोहा-
श्मार्चास्तत्रोपनीय स्नपयतु कलशैः स्वादितैः कर्मबिम्बम्।
बध्नीयात् कौतुकं च स्मरजिति सकले बिम्बकेऽघोरतः प्रा-
ङ्नेत्रोन्मेषं च कुर्यात् तदुदितमनुभिर्लक्षणोद्धारकाले।।114।।

विमर्शिनी

जलाधिवासस्य कालनियममाह-नक्तमिति। रत्नलोहाश्मार्चाः रत्नमय्यो लोहमय्यः शिलामय्यश्चार्चाः क्रमेण नक्तं रात्रिमात्रं नक्तंदिनमहोरात्रं त्रिनिशं त्रिरात्रमपि जले वासयेत्। मृद्दारुशिलालोहरत्नार्चाः क्रमेण सप्तरात्रपञ्चरात्रत्रिरात्राहोरात्ररात्रिमात्रकालं जलाधिवासं कुर्यादिति केचिदाहुः। पुनः कर्मबिम्बं तत्र स्नानमण्डपे उपनीय स्वोदितैः स्वस्वोक्तैः बिम्बशुद्ध्यर्थं विहितैः कलशैः स्नपयतु। स्वस्वोक्तकाले कौतुकबन्धं नेत्रोल्लेखनं च कुर्यात्। तत्र स्मरजिति सकले बिम्बके विम्बशुद्ध्यनन्तरम् अघोरतः 'अघोरेभ्यः' इति मन्त्रेण कौतुकं च बध्नीयात्। तत्र प्राक् पूर्वं लक्षणोद्धारकाले लक्षणोद्धारस्य स्थाने तदुदितमनुभिः शिवनारायणस्य[1] नेत्रोल्लेखनार्थमुक्तैर्मन्त्रैः विधिवन्नेत्रोन्मेषं च कुर्यात्।।114।।

विवरणम्

नक्तन्दिनमिति। सायमारम्भादेकां रात्रिमपरमहश्चेत्यर्थः। शिवे तु कर्मबिम्बं सकळं निष्कळं वा स्यात्। तद्यदि सकळं तत्र विशेषमाह-बध्नीयादिति। प्रागिति बिम्बपरिग्रहे लक्षणोद्धारकाले नेत्रोन्मेषं च कुर्यादित्यन्वयः।।114।।

The idol made of jewel, metals and stones may be put in water for Jalādhivāsa-plunging up to three days. Thereafter it may be bathed in potfuls of sanctified water taking it into the pavilion intended for it. Thereafter rites up to Puṇyāha are to be performed. For the image of Śiva - the Aghora mantra is to be used for Kautukabandha- tying woolen thread. Netronmeṣa also has to be carried out on this idol. (114)

कर्मार्चामधिवासयेत् समुपनीयालङ्कृते मण्डपे
मूलार्चामनुसन्धिक्लृप्तकलशासेकां च मूलालये।
छायावार्यधिवासनं यदि कृतं तस्यां[2] पृथक् साम्प्रतं
छायाबिम्बघटाभिषेकमपि तच्छुद्ध्यै पृथक् प्रा[3]चरेत्।।115।।

विमर्शिनी

तदनु कर्मार्चामलङ्कृते मण्डप उपनीयाधिवासयेत्। अनुसन्धिक्लृप्तकलशासेकां ध्यानेन कृतबिम्बशुद्धिकलशां मूलार्चां मूलालये प्रासादे चाधिवासयेत्। तस्यां मूलार्चायां छायावार्यधिवासनं दर्पणच्छायायां जलाधिवासनं पृथक् कृतं यदि तर्हि साम्प्रतम् इदानीं तच्छुद्ध्यै तस्या मूलार्चायाः शुद्ध्यै (छाया) बिम्बघटाभिषेकमपि दर्पणच्छायायां पृथक् प्राचरेत्।।115।।

---

1. 'स्य मनुभिर्मधुवातेत्यादिभिः लक्षणोद्धार उक्तैः' च. पाठः।
2. 'स्या' इति मूलकोशपाठः।
3. 'चा' न पाठः।

विवरणम्

मूलालय इति। अधिवासयेदित्यनुषज्यते। यत्र मार्जनमात्रमेव शोधनं तत्र ध्यानबिम्बशुद्धिरियम्। दर्पणच्छायापक्षे तु कर्मबिम्बशुद्धिरित्या[1]ह छायेति।।115।।

Karmārcā- the portable small idol shall be brought to a well decorated pavilion and placed on a couch. Mūlabimba has to be covered with cloth inside the sanctum where Dhyānādhivāsa is to be done. If the Mūlabimba is bathed in water reflected in mirror even then purificatory bath is necessary along with the usual rites up to Puṇyāha. (115)

बिम्बं प्रासादसंस्थं विधिवदखिलतत्त्वाप्ययोत्पत्तिमन्त्रा-
त्मोन्मेषाध्वौघमन्त्रन्यसनमनु यजेन्मानसैश्चोपहारैः।
संशोध्यैतत् क्रियाबिम्बकमपि यजतां मण्डलेज्यादियुक्तं
तस्मिंस्तत्त्वाधिवासाहुतिभवमथ सम्पातमापातयेच्च।।116।।

विमर्शिनी

पुनः प्रासादसंस्थं मूलबिम्बं विधिवद् यथोक्तमार्गेण अखिलतत्त्वाप्ययोत्पत्ति-मन्त्रात्मोन्मेषाध्वौघमन्त्रन्यसनमनु अखिलानां तत्त्वानां संहारं शोषणादिकं तत्त्वानां सृष्टिं मन्त्रोदयप्राणायामादिकं षडध्वन्यासादिकं च विस्तरेण कृत्वा[2] 'मधु वाते'त्यादिभिर्लक्षणोद्धार उक्तैर्मन्त्रैः तदनु मानसैरुपहारैः यजेच्च। एतत् क्रियाबिम्बकमपि भूतसंहारादिभिः संशोध्य मूलमन्त्रप्राणाया-मन्यासादिसहितं मण्डलेज्यादियुक्तं मण्डलपूजादिभिः सह यजताम्। अथ तस्मिन् तत्त्वाधिवासाहुतिभव संपातं तत्त्वहोमेनाधिवासहोमैः शान्तिहोमेन च सम्भूतं सम्पातमापातयेत् स्पृशेच्च।।116।।

विवरणम्

अथाधिवासदिवसं दर्शयति-**बिम्बमिति**। तस्मिन्निति कर्मबिम्बे।।116।।

The idol installed in the sanctum shall be worshipped with the several Tattvas and mental devotion including Prāṇāyāma, Aṇḍabheda, Lipiprāṇāyāma, Mantrodayaprāṇāyāma, Pīṭhanyāsa, Mūrtyāvāhana, Tattvanyāsa, and Mūlakṣarānganyāsa. Offering flowers it may be propitiated. In the Arcanābimba placed in the couch inside the pavilion arso similar acts are to be done and leftovers from the rites performed shall be sprinkled on it. (116)

लेप्यादिप्रतिमासमेतमभितः प्रासादमष्टासु दिक्ष्वा-
धेयान्यधिवासनोक्तहवनान्यग्निं प्रणीयाग्निजे।
श्रीवृक्षप्रभवा निशाचरदिशि श्रीपर्णिकोत्थास्तथा
वायव्यां समिधोऽणुरस्त्रमुभयोः शेषः क्रमः पूर्ववत्।।117।।

---

1. 'मि' क पाठः।
2. 'त्वा त' ग. ङ. पाठः।

विमर्शिनी

तत्र कुमारे विशेषमाह-लेप्यादीति। अग्निजे लेप्यादिप्रतिमासमेतं मृन्मयादि बहुबेरबिम्बयुक्तं प्रासादमभितः परितोऽष्टासु दिक्षु कुण्डेष्वग्रस्थाद् गुरुकुण्डादग्निं प्रणीय गुरुमूर्तिपैरधिवासनोक्तहवनान्याधेयानि। तत्र निशाचरदिशि श्रीवृक्षप्रभवा बिल्वजाः, वायव्यां तथा श्रीपर्णिकोत्थाः काष्मर्यश्च समिधः स्युः। उभयोरस्त्रमेवाणुः। शेषः क्रमः पूर्ववदेव।।117।।

विवरणम्

अथ स्कन्दे विशेषं कञ्चिदाह-लेप्यादीति। लेप्या चित्रमयी मूलप्रतिमा। अभितः परितः। एकबेरेऽपि मण्डपं परितः स्यादयं होम इति केचित्।।117।।

In the case of Subrahmaṇya if the idol is made of mud etc., on all the eight directions outside the sanctum, sacrificial pit may be dug in to which fire from the central pit is to be put and kindled. For Adhivāsahoma materials like ghee, havis, parched rice, sesamum, yava and mustard are to be offered as oblations. Samit for the sacrificial pits at certain locations are also indicated. The rest of the items are as in case of Adhivāsahoma. (117)

नीत्वान्तः सकलं परेद्यवि परावाहादि कृत्वा सुधी-
मूलार्चान्यसनं विभाव्य विधिवद् विज्ञाप्य देवं ततः।
कर्मार्चामपि तत्पुरः पुनरियं सा देवते मूर्तिरो-
मित्युच्चार्य मनुं विहीनमणिके संस्थापयेत् स्वे पदे।।118।।

विमर्शिनी

परेद्यवि उत्तरदिवसे प्रातरेव प्रासादप्रतिष्ठां कृत्वा। बहुवे[1]रबिम्बं तदानीमेव स्थाप्यते चेत् तद् यथायोग्यं कुर्यात्। लेप्यादिप्रतिमा निश्चला प्रासादे पूर्वमेव स्थापिता चेत् प्रासादप्रतिष्ठानन्तरं नपुंसकशिलास्थापनं रत्नन्यासं पीठप्रतिष्ठां च मनसा विधाय पीठपूजां च कृत्वा। अत्रार्चनामूर्तिः स्थिरा चेत् तत्रपुंसकशिलामपि स्थापयित्वा पीठं चास्थाप्य सम्पूज्य मण्डपमासाद्य संपूज्य तत्र मूलबेरसद्भावे तत्रान्यथा चेत् कर्मबिम्बे सर्वमुद्वास्य यथाक्रममन्तः सकलं नीत्वा मूलार्चायां परावाहनमवस्यावाहनं मन्त्रावाहनं च कृत्वा मूलार्चास्थापनं यथाविधि भावयित्वा 'ध्रुवा द्यौरि'त्यादिना स्थिरीकरणं विभाव्य 'विश्वतश्चक्षुरि'त्यादिना प्रार्थयेत्। कर्मार्चायां परावाहनं मन्त्रावाहनं च कृत्वा संपूज्य मूलार्चागतं देवं विज्ञाप्य तत्पुरोभागे विहीनमणिके रत्नन्यासरहिते स्वे पदे 'इयं सा देवते मूर्तिरोमिति मूलमन्त्रपुटितं पञ्चतत्त्वमूलं प्रणवं चोच्चार्य कर्मार्चां संस्थापयेत्। सुधीरिति मूलबेरप्रतिष्ठायां प्रतिष्ठाकर्मोक्तमखिलं ध्यायन्नित्यर्थः।।118।।

विवरणम्

सकलमिति। स्यान्त्रीराजनमग्रत इत्याद्युक्तप्रकारेणेत्यर्थः। परावाहादीति परावाहनमवस्थावाहनमित्युभयत्र कार्यम्। मूलार्चान्यसनं विधिवद्विभाव्येति। ध्याने नपुंसकरत्नपीठे प्रतिष्ठापनमपि न्यायात्

---

1. 'रात्मबि' ख. पाठः।

प्रदर्शितमेव। विज्ञाप्येति लोकानुग्रहहेत्वर्थमित्याद्युपस्थानमुक्तम्। तत्पुरः तस्य मूलार्चाया अग्रभागे कल्पिते स्थाने पीठमात्रे च प्राक् प्रतिष्ठापित इत्यर्थः। "इयं सा देवते मूर्तिरोम्" इति तत्प्रतिष्ठामन्त्रः।।118।।

The next day the priest shall conceive the rites like installation, altar stone fixation, deposits of jewels and installation of Pītha as having been performed on the Arcanābimba - the portable image. Invocations like Parāvāhana are also to be imagined. Thereafter the Arcanābimba is to be placed in front of the original deity with in the sanctum. Various mantras are also to be chanted during the several acts. (118)

शैलादिस्थिरकर्मकौतुकविधौ चेष्टोऽष्टबन्धोऽत्र तत्-
प्राणन्यासवियुक्तमुक्तमखिलं कृत्वा निवेद्यान्तिमम्।
सूनैर्निस्सलिलैस्तदाहितचितिं संयोज्य मूले ततः
प्राणन्यासपुरस्सरं समुचितं सर्वं प्रकुर्वीत च।।119।।

विमर्शिनी

शैलादिस्थिरकर्मकौतुकविधौ शिलादिभिः स्थिरा कर्मार्च्चा स्थापिता चेदत्र अष्टबन्ध इष्टो योग्यः। अन्येष्वपि बिम्बेषु सत्सु तत्स्थापनं च कृत्वात्र कर्मार्चायां तत्प्राणन्यासवियुक्तमखिलम् अष्टबन्धध्रुवमन्त्रजपाद्यनन्तरं कुम्भेशनिद्राघटाभ्यां यथोक्तप्रकारेणाभिषिच्य जीवावाहनं स्थूलावाहनं स्तोत्रावाहनादिकं च कृत्वा मूलमन्त्रेणावाह्य संपूज्य पायसनिवेद्यान्ति[1]मं च च कृत्वा पुनः[2] निर्जलैः पुष्पैस्तदाहितचितिं तत्रस्थं चैतन्यं मूलपुटितपञ्चतत्त्वैर्मूलार्चायां संयोज्य प्राणन्यासपुरस्सरं सर्वं समुचितं कर्म तत्त्वन्यासं षडध्वन्यासादिकं मानसपूजनं च प्रकुर्वीत च 'लोकानुग्रहेत्यादि'स्तु[3]त्यादिकं च कुर्यात्।।119।।

विवरणम्

प्राणन्यासवियुक्तं[4] तदुक्तमखिलमत्र कृत्वेत्यन्वयः। अत्र कर्मबिम्बे ततो मूले संयोज्येति। संयोजनमन्त्रस्तु "प्रष्ठोङ्कारे"त्यादि सिद्ध एव ग्राह्यः। सर्वमिति। तत्र पुष्पैरेव[5] जीवावाह्नमप्युक्तम्।।119।।

If the movable idol is made of stone which is permanently fixed along with the Mūlabimba the fixation with Aṣṭabandha is ordained. But in that idol Prāṇapratiṣṭhā is not advised. If it is made up of metal then also several items except Prāṇapratiṣṭhā is accepted. Invocation of divinity, gross invocation, and use of Stotra etc., is advised in this regard. The Caitanya of Arcanābimba may have to be transferred to the original as occasion

1. 'तिलश्चतु पु' ख. पाठः।
2. 'नः शङ्खगतैः नि' ग. छ. पाठः।
3. 'दिकं' ग. पाठः।
4. 'मु' च. पाठः।
5. 'वं' क. पाठः।

demands. Mental worship, for the well being of the people is also performed. (119)

पीठेज्यादिसमुज्ज्वले समभिवाह्यातः क्रियाबिम्बके
मन्त्रन्यासपुरस्सरं विधिवदत्राभ्यर्च्य देवं स्वयम्।
नीत्वा मूलतनौ ततः स, सकलीकृत्योपहारैः परै-
रेनं मानसजैः समर्च्य परिजप्य प्रीणयेद् भक्तितः।।120।।

विमर्शिनी

ततो नित्यपूजाविधिमाह–पीठेज्यादीति पीठेज्यादिसमुज्ज्वले पीठपूज्या मूर्तिकल्पनया च युते अतः मूलबिम्बात् क्रियाबिम्बके प्रोक्तक्रमात् समभिवाह्य मूलेन स्वहृदयादप्यावाह्य मन्त्रन्यासपुरस्सरं विधिवदत्र देवमभ्यर्च्य निवेद्य परिषद्बलिं तत्प्रार्थनं प्रसन्नपूजां च कृत्वा पुनः पूर्ववद् देवं स्वयं मूलतनौ नीत्वा ततः सकलीकृत्य मानसजै परैरुत्कृष्टैरुपहारै एनं समर्च्य परिजप्य भक्तितः प्रीणयेत्। पुनर्यथोक्तान् मन्त्रान् जपित्वा चि[1]च्चेत्यसंमेलनादिकं च कृत्वा समापयेत्।।220।।

विवरणम्

पीठेज्यादीति मूर्तिकल्पनमप्युक्तम्। नियमपूजार्थं चैतदवगन्तव्यम्। ततस्सुसकलीकृत्येति षडध्वभिर्लिपितत्त्वमन्त्राक्षरादिभिर्वा यथाविधि सकलीकृत्येत्यर्थः।।120।।

In daily worship the divinity is transferred from Mūlabimba to the Arcanābimba which is considered as the deity for all purposes. Rituals up to Prasannapūjā are to be carried out in this Arcanābimba. At the end the power is to be transferred again to the Mūlabimba which is to be propitiated with mantras. (120)

तत्तत्कर्मकृते प्रणीय मनुबिम्बात् कर्मबिम्बेऽमुना
कुर्यात् तुर्यदिनाभिषेकयजनाद्यं कर्म सर्वं सुधीः।
स्थास्नुन्यत्र ततोऽपि देवमुपनीयान्यत्र बिम्बेऽमुना
स्नानादीनि समाचरेदिह समिज्या कर्मबिम्बे सदा।।121।।

विमर्शिनी

पुनः तत्तत्कर्मकृते तत्तत्कर्मविधानार्थं मूलमनुबिम्बात् कर्मबिम्बे प्रणीय अमुना कर्मबिम्बेन तुर्यदिनाभिषैकयजनाद्यं चतुर्थदिवसस्नानपूजादिकं सर्वं कर्म कुर्यात्। सुधीरिति तत्तत्कर्मानन्तरं तत्तत्कर्मसंस्कारं मूलबिम्बे योजयितुं समर्थ इत्यर्थः। अत्र कर्मबिम्बे स्थास्नुनि निश्चले ततः तस्मादप्यन्यत्र स्नानबि[2]म्बे देवमुपनीय अमुना स्नानादीनि समाचरेत्। अमुना स्नानबिम्बेन इह बहुबेरे समिज्या पूजा सदापि कर्मबिम्ब एव।।121।।

---

1. 'च्चै'
2. 'म्बे असुना दे' ङ पाठः।

विवरणम्

अमुनेति कर्मबिम्बेनेति। स्थास्नुन्यत्रेति। यत्र कर्मबिम्बमष्टबन्धयुतं स्थिरं कल्पितं तत्रापरं स्नानबिम्बमपि कार्यम्। तस्य च पूजाबिम्बेन सह संस्कारः स्थापनं च विधेयम्। तत्र स्नानसमये पीठपूजां कृत्वा मूर्तिं संकल्प्य तत्र स्थिरबिम्बादावाह्य स्नपनं कृत्स्नं कृत्वा पुनस्ततश्चलबिम्बात् स्थिरबिम्बे नियोज्य पूजां समापयेदित्यर्थः।।121।।

The wise preceptor shall for ritualistic purposes may transfer the divinity of the Mūlabimba to Karmabimba, in which all the usual procedures are to be done up to bathing on the fourth day. For this divinity has to be invoked to the idol fit for splashing of water. Naturally all rituals are to be performed in this idol. (121)

शुद्धौ चाखिलकर्म कर्मकृतबिम्बे योजयित्वा पृथक्
तत्त्वापीत्युदयादि मूलमनुबिम्बे कर्मबिम्बेऽपि वा।
उद्धारे जनितत्त्वसर्पिरुपबिम्बस्थे समर्प्य स्वगे
हुत्वाभ्यर्च्य पुरोगते स्वपदगे विश्वं विलाप्याग्रय[1]गे।।122।।
सिक्त्वा मूलगतं प्रणीय कलशे सिक्त्वामुना कार्मिकं
तस्माज्जीवघटे सुयोज्य लघुगेहस्थाल्पबिम्बे नयेत्।
कृत्वा सर्वमिहैकबेरविधिना सम्पाद्य सर्वं ततः
प्रत्यापत्तिमपि प्रसिद्धबहुबेरन्यायतः प्राचरेत्।।123।।

विमर्शिनी

शुद्धौ प्राप्तायाम् अखिलकर्म क्षालनादीनि कर्माणि कर्मकृतबिम्बे कर्मार्थं कृते बिम्बे पृथक् पृथक् योजयित्वा पृथक् पृथक्[2] संपूज्य पृथक् पृथक् योजयेत्। अत्र पञ्चकस्नानात् [3]पूर्वमुक्तं तत्त्वापीत्युदयादि तत्त्वसंहारादि मूलबिम्बे कुर्यात्, कर्मबिम्बेऽपि कुर्याद्वा। उद्धारे जीर्णोद्धारनिमित्ततत्त्वहोमे जनितत्त्वसर्पिः सृष्टितत्त्वहोमसंपातमुपबिम्बस्थे देवे समर्प्य स्वगे मूलबिम्बयोजिते देवे हुत्वा संहारतत्त्वहोमं कृत्वा ततः पुरोगते कर्मबिम्बे योजयित्वाभ्यर्च्य पायसं निवेद्य होमं समाप्य ससम्पातं तत्त्वकलशमन्तर्नीत्वा स्वपदगे मूलबिम्बगते देवे विश्वं विलाप्य[4] ध्यानसंकोचं कृत्वा अग्रयगे कर्मबिम्बगते देवे सिक्त्वा तत्त्वकलशेनाभिषिच्य मूलगतं मूलविम्बयोजितं देवं सिक्त्वा तस्मादप्यग्रगते जीवघटे सुयोज्य मण्डपमानीय तत्र शय्यायां शायितेनाल्पविम्बेन सहाधिवास्योत्तरेद्युः लघुगेहस्थाल्पविम्बे वालालयेऽल्पविम्बं संस्थाप्य अत्र नयेत् योजयेत्। इहाल्पविम्बस्य देवे चतुर्थदिवसस्नानादिकं सर्वं कर्मेकबैरविधिना कृत्वा ततः सर्वं मूलविम्बकर्म प्रासादादिकं संपाद्य सम्यक् कारयित्वा ततस्तस्मात् प्रत्यापत्तिं स्वप्रासादप्राप्तिमपि प्रसिद्धबहुबेरन्यायतः पूवोक्तबहुबेरानुष्ठानन्यायेन प्राचरेत्।।122-123।।

---

1. 'प्र' इति मुलकोशपाठः।
2. 'क् कृत्वा पृ' ग. पाठः।
3. 'र्वं त'
4. 'प्याङ्गसं' ग. पाठः।

विवरणम्

इत्थं बहुबेर[1]स्थापनमभिहितम्। पूजाप्रकारश्च दर्शितः। सम्प्रति शद्धिविषयं विशेषं दर्शयति– **शुद्धाविति**। तत्त्वापीत्युदयौ पञ्चकाभिषेकादर्वाक् कर्तव्यौ विवक्षतौ। अथ जीर्णोद्धारे भेदं वदति–उद्धार इति। जनिशब्दत् सृष्टिपर्यायः। देवशब्दोऽत्रानुकृष्यते। कर्मविम्बे पीठपूजादिपूर्वकं मूलविम्बाद् देवमावाह्य सूष्टितत्त्वसम्पातं तत्तस्थाने निषिच्य मूलविम्बे योजयित्व। नाडीसन्धानादि कार्यम्। पुनरनुज्ञार्चनं कर्मविम्ब आवाह्य विधेयम्। पुनर्मूलविम्बे कृत्वा ध्यानसङ्कोचं कृत्वा कर्मविम्ब आकृष्य संहारतत्त्वकलशेनाभिषिच्य मूलविम्बे नियुञ्जीत। तत्राग्रे जीवकलशं सम्पाद्य मूलबिम्बात् पुरोदीरितरीत्या कृत्स्नं देवं जीवकलशमुद्वास्य कर्मबिम्बेऽपि देवं संकल्प्य तं तेन सम्यगभिषिच्य व्यापकादिकं विधाय तत्राग्रतोऽपि जीवकलशं विधाय तस्मिन् कर्मविम्बात् पूर्ववत् उद्वास्य तं जीवकलशं प्रागुक्तक्रमेण विनियुञ्जीतेत्यर्थ।।122–123।।

Bimbaśuddhi, Kṣālana (washing) and Saptaśuddhi etc., have to be done on the Arcanābimbā as separated from the original. Tattvas and Upahāras could be employed on Mūlabimba or Arcanābimba as desired.

In the case of Jīrṇoddhāra- renovation of the leftovers of the rites may be applied in the Arcanābimba. The divinity may be transferred to the Arcanābimbạ to which offerings of Pāyasa etc, are to be given. The priest has to perform Dhyānasaṅkoca and then Jīvakalaśa etc., are to be poured on the Arcanābimba. Gross invocation and subtle invocation are to be performed as needed. The idol placed in the Bālālaya- the temporary shelter- during renovation has to be propitiated as representing the Mūlabimba. Once the renovation is over the divinity may be brought back to the original shrine. (122-123)

इति तन्त्रसमुच्चये श्रुतार्चाक्रमसिद्ध्यै रविजन्मसम्प्रणीते।
दशमः सुसमापितः सहैकः पटलो जीर्णसमुद्धृतिक्रियाढ्यः।।124।।

विमर्शिनी

पटलमुपसंहरति–इतीति। इति उक्तप्रकारेण श्रुतार्चाक्रमसिद्ध्यै गुरुमुखाच्छ्रुतस्य पूजाक्रमस्य सिद्ध्यै स्थिरतायै रविजन्मसंप्रणीते रविपुत्रेण नारायणेन सम्यग् विरचिते तन्त्रसमुच्चये ग्रन्थे जीर्णसमुद्धृतिक्रियाढ्यः जीर्णोद्धारविधिभिः बहुबेरविधिना च परिपूर्णः सहैकः एकेन सहितो दशम एकादशः सुसमापितः सुष्ठु यथाक्रमं समापितः।।124।।

Thus the eleventh Paṭala of Tantrasamuccaya composed by the son of Ravi, dealing with the subjects like Jīrṇoddhāra-renovation has come to an end. (124)

इति तन्त्रसमुच्चयविमर्शिन्यां एकादशः पटलः।।



1. 'रे'

अथ द्वादशः पटलः



अथाभिधास्यामि समुक्तकर्मसु
प्रसक्ततत्साधनलक्षणादिकम् ।
अवश्यमत्रौपयिकं परामृश-
न्ननीरिताः कर्मकलाश्च काश्चन।।1।।

विमर्शिनी

एवमेकादशसंख्यैः पटलैः सप्रायश्चित्तानि सजीर्णोद्धाराणि प्रतिष्ठाकर्माण्यभिधाय द्वादशेन पटलेन सर्वपटलेष्वपि यत्किञ्चिदनुन्मीलितं कर्म विविच्याभिदधानः अत एवास्य पटलस्य कर्मशेषाख्या च भवतीति मन्यमानः तत्सङ्गतिं योजयन् पटलमारभते-**अथेति**। अथ कर्मणां कथनानन्तरं समुक्तकर्मसु सम्यगुक्तेष्वपि कर्मसु प्रसक्ततत्साधनलक्षणादिकं प्रकर्षेण सक्तानामनुबद्धानां तत्साधनानां लक्षणविनियोगादिकं परामृशन् अत्र साधनादौ यद्यदवश्यमौपयिकम् उपयोगि तत्तदहमभिधास्यामि वक्ष्यामि। अनीरिता अनुक्ताः काश्चन कर्मकलाश्चाभिधास्यामीति संबन्धः।।1।।

विवरणम्

अथशब्देन सम्बन्धं द्योतयन् पटलान्तरमारभते-**अथाभिधास्यामीति**। प्रतिष्ठाद्यखिलकर्म-समुक्त्यनन्तरं समुक्तकर्मसु प्रसक्तं तत्कर्मसाधनलक्षणादिकं अभिधास्यामीत्यर्थः। निधिकलशपालिका-कुण्डादीनि साधनानि। आदिशब्दस्तद्विन्यासप्रकारहोमद्रव्यपरिमाणाद्युपसङ्ग्रहार्थः। अत्र समुक्त(कर्म)स्वेव अवश्यमौपयिकं परामृशन्नित्यतिप्रसंङ्गपरिहारार्थमुक्तम्। अनीरिताः कर्मकलाश्च काश्चनेति दीक्षाद्यभिप्रयते। नन्वथ किन्तत्र तत्र नोक्तमेतदिति चेत् क्रियाक्रमावधारण-प्रतिबन्धत्वाल्लक्षणादीनां क्रियाक्रमेह्यवधार्यमाणे यद्यन्तरा चिरं तत्साधनं लक्ष्येत तर्हि बिलम्बनात् क्रियाक्रमप्रतिस[1]न्धानं न स्यादित्यभिप्रायः।।1।।

Hereafter I shall deal with the definition, purposes and other ancillary details of the rituals already enunciated as also a few items hitherto not dealt with. (1)

साक्षे शङ्कुमिनाङ्गुलं समतले कृत्वा पृथक्कालज-
च्छायाग्रारचितत्रिबिन्दुपरिवृत्त्योत्पाद्य मत्स्यद्वयम्।
तत्सौषुम्नसिरोत्थसूत्रयुगयोगाच्छङ्कुनाड्यन्तिमं
सूत्रं न्यस्य सुसाधयेद् यमधनेशाशे ततश्चेतरे।।2।।

---

1. 'बन्ध' क पाठः।

विमर्शिनी

तत्र प्रथमं 'क्षमां क्षमीकृत्य दिशश्च सम्यग् ज्ञात्वे'त्यत्र प्रसक्तं दिग्विभागज्ञानविधानमाह-साक्ष इति। साक्षे दिग्वभागापरिज्ञाते प्रदेशे समतले समीकृततले इनाङ्गुलं द्वादशाङ्गुलं शङ्कु शङ्क्वाख्यं काष्ठविशेषं कृत्वा स्थापयित्वा पृथक्कालजच्छयाग्रारचितत्रिबिन्दुपरिवृत्त्या पृथक् पृथक् कालवशाज्जातेषु त्रिषु बिन्दुष्वितरेतरान्तरालमानेन परिवृत्त्या वृत्तीकारेण मत्स्यद्वयं रेखाद्वयसंपुटितं मत्स्याकारं संस्थानविशेषम् उत्पाद्य जनयित्वा, तत्सौषुम्नसिरोत्थसूत्रयुगयोगात् तयोर्मत्स्योः सौषुम्नसिरे मध्यनाड्यौ ताभ्यामुत्थिताभ्यां सूत्राभ्यां युगं युग्मं यत् तस्य योगो दक्षिणे उत्तरे वा भवेत्। तस्माद् योगात् शङ्कुनाड्यन्तिमं शङ्कोर्मध्यनाडीपर्यन्तं सूत्रं न्यस्य प्रक्षिप्य तेन सूत्रेण यमधनेशाशे दक्षिणां दिशमुत्तरां दिशं च सुसाधयेत् सुतरां स्थिरीकुर्यात्। ततश्च तस्मादेव सूत्रात् इतरे च वक्ष्यमाणरीत्या पूर्वपश्चिमाशे च सुसाधयेत्। अयं भावः-दिग्विभागं ज्ञातुं समीहिते भूप्रदेशे आदित्यातपे च प्रसरति सति समीकृते स्थले समान्तरालं वृत्तत्रयं कृत्वा तन्मध्ये स्वलक्षणयुतं शङ्कु समं निधाय यदा यदा तस्य छायाग्रं पृथक् पृथग् वृत्तं स्पृशति तदा तदा तत्र तत्र वृत्ते शङ्कुं कुर्यात्। तद्बिन्दुत्रयं मिथोऽन्तरालमानेन वृत्तत्रयं कुर्यात्। तदा मध्यमवृत्ते द्वौ मत्स्यौ भवतः। तन्मत्स्ययोर्मध्यगते द्वे सूत्रे प्रसार्य दीर्घीकुर्वाणे यस्मिन् प्रदेशे तयोः संयोगो भवति, तत्राङ्कं कृत्वा तस्मादङ्कात् शङ्कुमध्यसूत्रान्तं सूत्रं प्रसारयेत्। तथा सति दक्षिणोत्तरदिग्विभागो भवतीति। तथाच गुरुदेव आह। तत्रायं शङ्कुलक्षणश्लोकः-

भ्रमविरचितवृत्तस्तुल्यमूलाग्रभागो
द्विरदशनजन्मा सारदारूद्भवो वा।
सममृजुरवलम्बादव्रणः षट्कवृत्तः
समतल इह शस्तः शङ्कुरर्काङ्गुलोच्चः।।

इति।

निरक्षदेशे लङ्कादौ स्यादयं दिग्विनिर्णयः।
इत्याहुः केचिदित्यस्मात् साक्षदेशस्य कथ्यते।।
विशेषः साक्षदेशानामस्त्येवार्कापसर्पणात्।

इति च।

छायात्रयाग्रोद्भववृत्तमत्स्यस्पृक्सूत्रयोर्यत्र युतिः प्रदेशे।
याम्योत्तरा शङ्कुदिशा ककुप् स्यात् क्रमेण सौम्योत्तरगोलयोः स्यात्।।

इति शङ्कुस्थापनश्लोकः। तस्यायमभिप्रायः-जलसमीकृते स्थले प्रोक्तप्रमाणं शङ्कुं विन्यस्य पूर्वाह्णे वापराह्णे वा छायाग्रेष्वभिनिविष्टेषु त्रयो बिन्दवः कार्याः। तत एकं बिन्दुं मध्ये कृत्वा इष्टप्रमाणेन वृत्तमालिखेत्। तावतैव द्वितीयं बिन्दुमवलम्ब्य द्वितीयं वृत्तं, तद्वत् तृतीयं बिन्दुं मध्ये कृत्वा तृतीयं वृत्तं चालिखेत्। ततस्तावत्प्रमाणमेव वृत्तं तथाच लिखेत्, यथाच मध्यबिन्दुवृत्तं पार्श्वद्वयस्य खण्डमुत्पादयति। तथा कृते मत्स्यद्वयमुत्पद्यते। तयोश्च यस्यां दिशि महदन्तरं, ते मुखे भवतः। तयोश्च यस्यां दिशि सन्निकर्षः, ते पुच्छे भवतः। मुखयोः सूक्ष्मकीलकौ विन्यस्य तयोः सूत्रे बद्ध्वा पुच्छमध्यगे निस्सार्य स्वगत्यैकैकं नयेत्। तयोः सूत्रयोः मुखपुच्छगत्यनुसारेण यत्र सन्निपातः सा दिक् स्थिरा भवति। एवं

शङ्कुमूलयुति बिन्दुगामि सूत्रं प्रसार्य रेखां कुर्यात्। सा दक्षिणोत्तरा भवति। तत एकैकं बिन्दुं मध्ये कृत्वा वृत्तत्रयेण मत्स्यमुत्पादयेत्। तस्य मुखपुच्छावगाहि सूत्रं पूर्वपरा दिग् भवति। एवं साक्षदेशे दिक्साधनत्वमुक्तमिति।।2।।

विवरणम्

तत्र प्रथमं प्रथमपटले प्रस्तुतदिग्विभागकथनाय शङ्कुस्थापनं ब्रूते-**साक्षे शङ्कुमिति**। तत्रायं प्रकारः। साधनीयं प्रदेशं समतलं कृत्वा तन्मध्ये द्वादशाङ्गुलप्रमाणं शङ्कुं स्थापयित्वा पूर्वाह्णेऽपराह्णे वा तस्य छायाग्रे कालभेदवशाद्बिन्दुत्रयं कृत्वा परस्परप्रमाणेन पृथक् पृथक् परिवर्तिते सति मध्यमे वृत्ते द्वौ मत्स्यौ भवतः। तन्मत्स्ययोः सूत्रद्वये प्रसारिते सति उत्तरे दक्षिणे वा यत्र तत्सूत्रयोर्योगो भवति तत्र बिन्दुं निधाय शङ्कुमध्यस्थबिन्दौ तद्बिन्दौ चैकमेव सूत्रं प्रसार्य यमधनेशाशे सुसाधयेत्। तत इतरे च इति।।2।।

When the direction of a plot is not known the land is to be levelled and a gnomon of the length of twelve angulas is to be driven into the ground. Before it reaches noon one may find out from shadow of the pole of the length of one and a half rod (= three foot or 24 fingers= 28 inches) and one rod length and half rod length (three measures of distance from gnomon with one and a half; one and half). Those are to be marked and centering that, three circles of twelve fingers are to be formed. This will make the shape of two fishes. Through the centre of these fringes lines are to be drawn so as to make them unite. The joining place is called Sūtrayoga- bindu and the centre of the gnomon may be called Śaṅkumadhyabindu. The mouth portion and tail portion of these fishes could be united with a straight line which will locate east and west. This test shall be after the sunrise and before the sunset. (2)

स्तम्भोच्चस्य षडंशविस्तृततदष्टांशाधिकोच्चो घटः
पद्मोऽष्टांशसमुच्छ्रयोच्छ्रयनवांशोनप्रथोऽष्टच्छदः।
अष्टांशायततद्द्विपांशरहितव्यासायतार्धोच्छ्रयः
कूर्मो नागयवाग्रतद्द्विगुणमूला योगनालप्रथा।।3।।

विमर्शिनी

निधिकलशादीनां प्रमाणमाह-**स्तम्भोच्चस्येति**। स्तम्भोच्चस्य प्रासादस्तम्भायामस्य षडंशविस्तृततदष्टांशाधिकोच्चः स्तम्भायामस्य षडंशेन विस्तारयुक्तः विस्तारादष्टांशाधिकायामयुक्तश्च घटो निधिकलशः स्यात्। तदूर्ध्वगतः पद्मः शिलापद्मः, स तु अष्टांशसमुच्छ्रयोच्छ्रयनवांशोनप्रथः स्तम्भोच्चस्याष्टांशेनोन्नतियुक्तः उन्नतेर्नवांशहीनप्रथया विस्तारेण च युक्तः, अष्टच्छदः अष्टभिः पत्रैश्च युक्तः स्यात्। तदूर्ध्वस्थः कूर्मः शिलाकूर्मः अष्टांशायततद्द्विपांशरहितव्यासायताधोच्छ्रयः स्तम्भोच्चस्य अष्टांशेन दैर्घ्ययुक्तः, तस्यायतस्य अष्टांशेन रहितविस्तारः, आयतस्य अर्धांशेनोन्नतियुक्तश्च स्यात्। योगनालप्रथा कूर्मोर्ध्वभागस्थितस्य योगनालस्य प्रथा विस्तारः नागयवाग्रतद्द्विगुणमूला अष्टयवाग्रा एकाङ्गुलपरिमिताग्रविस्तारा तद्द्विगुणमूला तस्याग्रस्य द्विगुणेन द्व्यङ्गुलमानेन विस्तृतमूला च स्यात्। तथा चाहुः-

स्तम्भायामषडंशे स्यादेकांशो घटविस्तरः।
विस्ताराष्टमभागे स्यान्नवांशं चोच्छ्रयं भवेत्।।
मूलविस्तारमष्टांशो वेदांशः कण्ठविस्तरः।
वक्त्रान्तरेण भूतांशं कलशस्याकृतिर्भवेत्।।

इति।

स्तम्भोच्चे वसुभागे स्यादेकांशं पाद्ममुच्छ्रयम्।
पद्मोत्सेधे नवांशे स्यादष्टभागं तु विस्तरम्।।
उत्सेधं विभजितं कृत्वा षड्भागं तु विधीयते।
एकांशं पद्मपट्टं स्यादधः पद्मांशक[1]त्रयम्।।
ऊर्ध्वं पद्मद्वियंशं तु अष्टपत्रादिशोभितम्।।

इति।

"योगनालोऽङ्गुलव्यासो द्व्यङ्गुलं मूलविस्तरम्।"

इति।।3।।

विवरणम्

ततो निधिकलशादीनां प्रमाणमाह-**स्तम्भोच्चस्येत्यादिना**। घटो निधिकलशः। तस्य विस्तारस्तम्भदैर्घ्यषड्भागेन कार्यः। तस्य उन्नतिर्विस्ताराष्टांशाधिका कार्या। मुखोदरादिकमुपपत्त्या योज्यम्। पद्म इति कूर्मास्पदं पद्मं गृह्यते। स्तम्भोच्चस्येत्यनुवर्तनीयम्। स्त(म्भो? म्भा)ष्टंशेन पद्मस्योच्छ्रयः। उच्छ्रयान्नवांशोनो विस्तारः, तदवयवक्लृप्तिश्च प्रतिमापदमनयेन साधनीया। कूर्ममानमाह-अष्टांशेति। स्तम्भाष्टांशेन कूर्मस्यायामः। आयामादष्टांशहीनो विस्तारः आयामार्धेन च तस्योन्नतिः। योगनालस्याग्रविस्तारोऽष्टयवेन मूलभागे तद्द्विगुणेन।।3।।

A jar for depositing riches (Nidhikumbha) may be shaped with stone. The measurements shall be one six of the length of the outer pillar of the sanctum for circumference and one eighth of the circumference shall be its height. There shall be Śilā-Padma,lotus made of stone, with eight petals. Its height shall be one eighth of the door length and a circumference of one ninth of the same. There shall be an another structure- a Śilākūrma a tortoise made of stone with a height of one eighth part of the door length and a circumference a little lesser part, but with a height of half the door length. There shall be a Yoganāla - tube shaped copper material with an empty or hollow inside. The measurement shall be one angula at its top and two angulas in width. (3)

अष्टाशामिहिरैस्त्रिधायततदर्धव्यासपादोच्छ्रिता
यद्वार्काहियुगैर्मितातततिवितत्युत्सेधवत्योऽङ्गुलैः ।

---

1. 'क' ङ पाठः।

मार्त्तिक्यः पुटपाकलोहितरुचः शैल्योऽथवाष्टेष्टकाः
कर्तव्याश्चतुरूनिताश्चतुरुपेता वा गृहौचित्यतः।।4।।

विमर्शिनी

इष्टकानां प्रमाणमाह–अष्टति। अष्टाशामिहिरैः अष्टभिर्वा दशभिर्वा द्वादशभिर्वाङ्गुलैः त्रिधा त्रिप्रकारेण आयततदर्धव्यासपादोच्छ्रिताः आयताः तदर्धव्यासाः तत्पादोच्छ्रयाश्च, यद्वा अथवा अर्काहियुगैः द्वादशाष्टचतुर्भिरङ्गुलैः क्रमेण मिताततिवितत्युत्सेधवत्यः एतैर्मानैः परिमितेनायामेन विस्तारेणोच्छ्रयेण च युक्ताः, मार्त्तिक्यः मृत्तिकाभिर्निर्मिताः, पुटपाकलोहितरुचः पुटस्यान्तर्भागस्य पाकवशाल्लोहितवर्णाः, अथवा शैल्यः शिलानिर्मिताः अष्टेष्टकाः कर्तव्याः। गृहौचित्यतः प्रासादवशात् चतुरूनिताः चतस्रो वा चतुरुपेताः द्वादश वा। तथाच गुरुदेवः–

अङ्गुलैः संख्यया दीर्घा जगतीपङ्क्त्यनुष्टुभा[1]म्।
क्रमात् तदर्धविस्तारा विस्तारार्धसमुच्छ्रयाः।।
उत्तमादिविमानानां निर्दिष्टाः प्रथमेष्टकाः।।

इति। पाशुपते च–

यायामतस्तालमात्रास्तारतोऽष्टाङ्गुलाः क्रमात्।
अष्टौ सङ्कल्पयेदेवमुत्सेधाश्चतुरङ्गुलाः।।

इति।

"चतस्रोऽष्टौ द्वादश वा प्रादक्षिण्येन विन्यसेत्।।"

इति च।।4।।

विवरणम्

प्रथमेष्टकामानमाह–अष्टाशामिहिरैरिति।।4।।

Iṣṭakas-Bricks can be made with 8 angulas (a standard angula is 3 centimeter), 10 angulas and 12 angulas in length with a width of half the length and thickness of half the width. Or with a length of 12 angulas, width of 8 angulas and a thickness of 4 angulas. If made of mud it must be baked in a furnace till it appears as red in colour. They can be shaped with granite. Eight of them are to be prepared. According to the size of the shrine they may be lesser by four or added by four. (4)

स्तम्भायामद्वाशांशोपपन्न–
व्यासं व्यासार्धोच्छ्रयं गर्भपात्रम्।
तुर्यश्रं तच्छुद्धशुल्बप्रक्लृप्तं
स्वोत्सेधाङ्घ्र्यूनोच्छ्रयोर्ध्वच्छदाढ्यम्।।5।।

---

1. 'भः ङ पाठः।

विमर्शिनी

मर्भपात्रप्रमाणमाह-**स्तम्भायामेति**। स्तम्भायामद्वादशांशोपपन्नव्यासं स्तम्भायामस्य द्वादशांशेन युक्तविस्तारं, व्यासार्धोच्छ्रयं विस्तारादर्धमात्रोच्छ्रयं च स्वोत्सेधाङ्घ्र्यूनोच्छ्रयोर्ध्वच्छदाढ्यं स्वस्योच्चस्य पादहीनोच्चेनोर्ध्वच्छदेन च युक्तं, शुद्धशुल्बप्रक्लृप्तं निर्मलेन ताम्रेण निर्मितं, तुर्यश्रं चतुरश्रं तत् इष्टकागर्तमध्ये स्थाप्यं गर्भपात्रं स्यात्। क्रियासारे वैष्णवे-

चतुरश्रं तदर्धोच्चं शोधयेत् तद् यथाविधि।
सुगुप्तं तद् यथा भित्तौ भित्तिमानेन वा भवेत्।।
भित्तिस्तम्भचतुर्भागत्रिभागैकं तु तद् विदुः।।

इति।।5।।

विवरणम्

गर्भपात्रप्रमाणमाह-**स्तम्भायामेति**।।5।।

Garbhapātra- also called Garbhagṛha (the dark cell of the shrine room in the temple - the Sanctum Sanetorum - literally the womb chamber) made of copper with a square shape is to be placed in the Iṣṭakāgarta- the pit formed by the arrangement of the bricks. The measurements of the same shall be one- twelfths of the height of the pillar of the sacred structure for length and breadth; with lıalf the circumference as its height and three fourth of the same as the closing lid. (5)

नागैर्भित्तितति विभज्य चतुरो बाह्ये विहायांशका-
न्तस्त्रीनखिलेषु गोभिरजिते षड् द्वौ च षाण्मातुरे।
भूतैस्त्रीनपि चैककं वितनुयाद् गर्भं परांशे स्थितं
विप्रस्योपरि पादुकस्य भुवि राज्ञोऽधः क्रमादन्ययोः।।6।।

विमर्शिनी

गर्भन्यासस्थानमाह-**नागैरिति**। नागैः अष्टाभिः भित्तितितिम् आरूढभित्तेर्विस्तारं विभज्य बाह्ये चतुरः अन्तस्त्रीनप्यंशकान् विहाय त्यक्त्वा परांशे इतरांशे बाह्यादारभ्य पञ्चमांशे अन्तरारभ्य चतुर्थांशे च स्थितं गर्भं वितनुयात्। एवम् अखिलेषु देवेषु। अजिते गोभिः नवभिर्भित्तितिं विभज्य बाह्ये षड् अन्तः द्वौ च विहाय, षाण्यातुरे भूतेः पञ्चभिर्विभज्य बाह्ये त्रीन् अन्तरेककं च विहाय परांशे स्थितं गर्भं वितनुयात्। तत् तु गर्भं विप्रस्य विप्रो यजमानश्चेत् तस्य पादुकस्योपरिभागे, राज्ञः क्षत्रियस्य भुवि भूसामान्यस्थले, अन्ययोः वैश्यशूद्रयोः क्रमादधोऽधश्च स्थितं गर्भं वितनुयात्। पाशुपते-

आरुढभित्तिविस्तारमष्टधा विभजेत् पुनः।
बाह्येऽत्र चतुरो भागानन्तर्भागत्रयं त्यजेत्।।
तन्मध्ये स्थापयेद् गर्भं गर्ते प्रासादमानतः।।

इति। मञ्जर्यां च-

तद्भित्तिविस्तारमथाष्टभागं कृत्वाथ बाह्ये चतुरोऽत्र भागान्।
त्रिभागमभ्यन्तरतो विहाय तत्रान्तरे मर्भमथो न्यसेच्च।।

इति। विष्णुसंहितायां–

द्वारस्य दक्षिणे भागे तृतीयांशे द्विशेषिते।
गोमूत्रेणाप्लुते न्यस्येद् द्वारमूलस्य पार्श्वतः।।इति।

स्कन्दसंहितायां–

भित्तिं तु पञ्चधा भङ्क्त्वा त्रीणि बाह्ये परित्यजे्त्।
अन्तरेकं तु तन्मध्ये

इति।

पादुकोपरि विप्राणां नृपतेस्तत् समं भवेत्।
अधस्ताद् वैश्यशूद्राणाम्

इति च।।6।।

विवरणम्

मर्भविन्यासस्थानमाह–नागैर्भित्तिततिमिति। अखिलेष्विति। सर्वेषां साधारणमेतदित्यर्थः। गोभिरजिते षड् द्वाविति। गोभिर्विभज्य षड् बाह्येंऽशकानन्तर्द्वौ च विहायेति सर्वमनुषञ्ज[1]नीयम्। भूतैस्त्रीनपि चैककमित्यत्रापि तद्वद्व्योज्यम्। [2]परांशस्थितं गर्भं वितनुयादिति सर्वशेषः। परस्मिन्नवशेषितेंऽश इत्यर्थः।।6।।

The place for Garbhanyāsa is to be fixed as follows. The thickness of the wall of the Garbhagṛha shall be divided into eight of which four parts outside and three inside and the remaining portion is to be selected. This is the general rule. For Viṣṇu the thickness may be divided in to nine with six outside and two inside. For Subrahmaṇya the division may be in to five with three outside and one inside (with one portion remaining)

For the temple owned by a Brāhmin this Garbhanyāsa is to be located above the Pādukā - the ground course, for Kṣatriya it is in the level and for Vaiśya it is a little under the ground level. (6)

कृत्वा गर्भगृहं कुलाद्रिकृतिकोष्ठाढ्यं समन्तात् पदे
ब्राह्मे पञ्चदशांशकान् विरचयेत् सौम्याग्रसूत्रैः समम्।
तत्पृष्ठस्थितदैवमानुषपिशाचावारकेषु क्रमाद्
विश्वोमेशनवांशकानपि ततः स्वं स्वं पदं कल्पयेत्।।7।।

---

1. 'ज्व'
2. 'ध' क. पाठः।

विमर्शिनी

एवं प्रथमपटले प्रस्तुतान् कर्मशेषानभिधाय द्वितीयपटले प्रस्तुतान् वदन् प्रतिष्ठास्थाननियममाह-**कृत्वा गर्भगृहमिति**। गर्भगृहं समन्तात् सप्तसप्तविभागेन कुलाद्रिकृतिकोष्ठाढ्यम् एकोनपञ्चाशत्कोष्ठयुतं कृत्वा ब्राह्मे मध्यमे पदे सौम्याग्रसूत्रैः दक्षिणोत्तरायतैः सूत्रैः समं पञ्चदशांशकान् विरचयेत्। तत्पृष्ठस्थितदैव-मानुषपिशाचावारकेषु तस्य ब्रह्मपदस्य पृष्ठ एव स्थितेषु त्रिषु दैविकमानुषपैशाचाख्येषु आवरणपदेषु क्रमाद् विश्वोमेशनवांशकान् त्रयोदशैकाद(शे?श)नवभागानपि सौम्याग्रसूत्रैः समं कृत्वा ततः स्वं स्वं पदं स्थानं कल्पयेत्।।7।।

विवरणम्

प्रतिष्ठास्थानमाह-**कृत्वा गर्भगृहमिति**। गर्भगृहे प्रागग्राण्युदगग्राणि चाष्टाष्टसूत्राण्यास्फाल्य सप्तवर्गपदोपेतं सम्पादयेत्। तत्र मध्यमं पदं ब्राह्मसंज्ञम्। ततोऽनन्तरा परितः पङ्क्तिर्दैविकाख्या। ततोऽपि[1] परितो मानुषाख्या। ततः पैशाचाख्या। तत्र बाह्ये पदे पञ्चदशांशकान् विरचयेत्। मध्यगतं पदं दक्षिणोत्तरसूत्रैस्त्रयोदशभिः पञ्चदशभागान् विदध्यादित्यर्थः। सौम्याग्रसूत्रैरिति सर्वत्र सम्बध्यते। [2]तद्बाह्यस्थितेति। प्राग्द्वारे प्रासादे पश्चिमतः पश्चिमद्वारे तु पूर्वत इत्यर्थः। आवारकान्यावरणानि। पङ्क्तय इति यावत्। विश्वे त्रयोदश, उमेशा एकादश।।7।।

For locating the idol the place is to be fixed as follows. The inner circumference of the Garbhagṛha shall be divided to seven east west and seven north south to form 49 segments (by multiplying seven by seven)

The central part is Brahmapada outside of which there will be segments devoted to Deva, Mānuṣa and Piśāca by dividing suitably (Brahmapada will have 15 segments, Devapada 13, Mānuṣa 11 and Piśāca 9 segments). (7)

ब्राह्मेंऽशेन्तरनन्तरे महति चाल्पे चेशलिङ्गे हरौ
तार्तीये द्रुहिणांशमध्यपदतस्तुर्ये गुहेशाच्युते।
षष्ठे सुम्भजिति प्रतिष्ठितिपदं शार्ङ्गीश्वरे वाष्टमे
प्रोक्तं शस्तरि षोडशे गणपतौ विंशे तथैकोत्तरे।।8।।

विमर्शिनी

तत्र महति पञ्चकरादिदीर्घे ईशलिङ्गे स्थाप्ये सति ब्राह्मे अंशे अन्तः ब्रह्मांशस्य मध्यभाग एव प्रतिष्ठितिपदं प्रतिष्ठायाः स्थानं प्रोक्तं स्यात्। अल्पे एककरादिके ईशलिङ्गे तस्यानन्तरे अनन्तरपृष्ठपदमध्ये प्रोक्तम्। हरौ द्रुहिणांशमध्यपदतः ब्रह्मांशस्य मध्यपदमारभ्य गणने तार्तीये। गुहेशाच्युते स्कन्दे शङ्करनारायणे च तुर्ये चतुर्थे। सुम्भजिति षष्ठे पदे। शार्ङ्गीश्वरे अष्टमे वा। पूर्वं चतुर्थे प्रोक्तत्वाद् विकल्पः। शास्तरि द्रुहिणांशमध्यपदतः षोडशे दैविकाद्यपदादष्टमे। तथा गणपतौ द्रुहिणांशमध्यपदत एकोत्तरे विंशे दैविकान्त्यपदे प्रतिष्ठितिपदं प्रोक्तम्।।8।।

---

1. 'विपरीतो' क पाठः।
2. तत्पृष्ठेत्यस्य स्थाने तद्बाह्येति विवरणरीत्या पाठः।

विवरणम्

महत्यल्पे चेशलिङ्गे ब्राह्मेऽन्तः अनन्तरे चांशे प्रतिष्ठितिपदे प्रोक्तमिति सर्वत्र सम्बन्धनीयम्। अन्तरिति मध्ये पञ्चदशसु भागेषु। अष्टमे भागे। अनन्तरे ततो बहिर्भागे। द्वितीय इत्यर्थः।।8।।

If the Śiva linga is of large size it shall be installed in the centre of Brahmapada. If it is a little shorter it shall be in the second segment under Brahmapada. The place for Viṣṇu is in the third segment. For Subrahmaṇya it is the fourth segment. For Durgā the spot is in the sixth segment. For Śānkaranārāyaṇa it could be the eighth and for Śāstā if could be the sixteenth segments. For Gaṇapati it shall be in the twenty first segment. (8)

कृत्वोदङ्मुखमत्र सूत्रमथ मध्याद् द्वारविस्तारत-
स्तूत्कृत्याढ्यशतांशकं प्रतिगमय्योदीचि चैन्द्राग्रगम्।
सर्वेष्वीशहरीशयोः पुनरिदं वार्चांशतो वाखिले
दिश्यैश्यां गमयेद् यवं यवयुगं वार्चोद्भवं सन्धितः।।9।।

विमर्शिनी

एवं पृष्ठतो नीत्वात्र सीम्नि उदङ्मुखं दक्षिणोत्तराग्रं सूत्रं कृत्वा तदनन्तरं सर्वेषु देवेषु मध्यात् एतत्सूत्रस्य मध्यात् द्वारविस्तारतः द्वारस्य विस्ताराद् उत्कृत्याढ्यशताशकम् उत्कृतिः षड्विंशतिः तदधिकशतांशं कृत्वा तदेकांशप्रमाणेनोदीचि च प्रतिगमय्य ऐन्द्राग्रगं प्राक्प्रत्यगग्रं सूत्रं च कृत्वा इदम् उक्तमेतदुदग्गमनमीशहरीशयोः पुनरर्चांशतो वा कृत्वा अखिले सर्वदेवेषु सन्धितः तयोः सूत्रयोः सन्धेरर्चोद्भवं यवं यवयुगं वा प्रतिमाङ्गुलादष्टांशं चतुर्थांशं वा ऐश्यां दिशि च गमयेत्। अत्र विष्णुसंहितायां–

सप्तसप्तविभागेन गर्भागारे विभाजिते।
ब्रह्मदेवमनुष्याणां पिशाचानां पदानि च।।
मध्यादारभ्य यत्नेन क्रमाज्ज्ञेयानि सर्वतः।
ब्राह्मं पञ्चदशांशं स्याद् दैवे भागास्त्रयोदश।।
एकादशनवांशाश्च शिष्टयोः प्रविभागतः।
गमनं त्रिविधं प्रोक्तं पृष्ठसौम्येशभेदतः।।
कल्पनीयं यथान्यायं द्रव्यसंस्थानयोगतः।
स्थितासीनशयानानां स्थानानि परिकल्पयेत्।।
ब्रह्मांशे मध्यमं त्यक्त्वा द्वितीयं चापि पृष्ठतः।
स्थितैकवीरबिम्बस्य तृतीयं स्थानमिष्यते।।
त्रिभक्ते द्वारविस्तारे त्रिसप्तांशेषु मध्यमे।
मध्यार्धेनोत्तरं सूत्रं गमनार्थं तु कल्पयेत्।।
पश्चिमोत्तरसंयोगे कर्णसूत्रं प्रकल्प्य तु।
बिम्बाङ्गुलीयवेनैशे गमयेद् द्वियवेन वा।।

इति। तथा मञ्जर्यां च–

पञ्चाशत्पदमेकहीनमभितः कृत्वा च गर्भालये
ब्राह्मं दैविकमानुषौ च परितः पैशाचमन्त्यावृति।
ब्राह्मं पञ्चदशांशकं बहिरतो द्वे द्वे विहीनं क्रमा–
देवं पश्चिमदिक्स्थितं च गमनं वक्ष्ये च सौम्याश्रितम्।।

एकविंशतिविभागविभक्तं द्वारमत्र विनिधाय च मध्यम्।
अग्निभक्तमभिकल्प्य च तेषां सोमसंस्थितपदद्वयमध्ये।।

एकोनपञ्चदशकानि पदानि लिङ्ग–
विष्कम्भमाननिहितानि विधाय सम्यक्।
तन्मध्यसंस्थमथ पञ्चकृतिप्रभि[1]न्न–
भागान्[2] प्रकल्प्य चतुरो य(माङ्गा?मगां)स्त्यजेद् वा।।
लिङ्गस्य पञ्चकृतिभिः परिणाहतोऽर्ध–[3]
भानौर्विभज्य यमदिक्स्थयगतं त्यजेद् वा।
एकोनपञ्चदशभिः प्रविभज्य युक्तै–
र्भागैश्च पीठमथ मध्यगतं त्यजेद् वा।।

एवञ्च नीत्वा गमनं च सूत्रसङ्गात् ततोऽत्रापि यवद्वयं च।
नीत्वा प्रतिष्ठां विदधीत चैशे भागे प्रवक्ष्याम्यथ पश्चिमेऽपि।।
मध्ये महालिङ्गमथाल्पलिङ्गं नारायणः शङ्करकेशवौ च।
तत्रैव षड्वक्त्रनिवासभूमिः स्याद् वासुदेवो भगिनी च पश्चात्।।
सुखासनं सप्तपदे विदध्यादतोऽष्टमे वा हरवासुदेवौ।
ततः परस्मिन् मणिलिङ्गधाम व्यासस्तथैकादशरुद्रभूमिः।।
सूर्यस्तथाग्निर्भिषजौ वसूनां गण[4]श्च शास्ता प्रहराणि भूयः।
अष्टादशे मातृनिवासभूमिस्ततः परस्मादथवायुधानि।।
स्याद् वाहनं सूकरवामनौ च लक्ष्मीश्च तत्रैव वसुन्धरा च।
अनन्तमूर्तिप्रहराणि पञ्च पश्चादनन्तासनवाहनानि।।
विद्येश्वराश्चाथ गणेश्वराश्च मार्ताण्डचन्द्रौ मुनयः प्रदिष्टाः।
पैशाचभागे तु ततोऽनवेक्ष्य प्रायः प्रतिष्ठात्र यतो न शस्ता।।

इति। क्रियासारे शङ्करनारायणे उत्तरगमनविधौ॥

1. 'न्नं'
2. 'त' घ. ङ च.
3. 'र्ध्वं' ङ पाठः।
4. 'णा' घ. च. पाठ

बिम्बमध्यमवृत्तस्य चतुर्विंशतिभागतः।
नीत्वोत्तरे यवं तस्मादीशे नीत्वा यथाविधि।।

इति।।9।।

विवरणम्

पृष्ठगमनमुक्त्वोदग्गमनमाह-कृत्वेति। अत्रो[1]दङ्मुखं सूत्रं कृत्वेत्यन्वयः। यत्र भागे प्रतिष्ठापदमङ्कितं तत्र तस्मिन्नङ्क उदगग्रमप[2]रमपरमृजु सूत्रं सूत्रयेदित्यर्थः। द्वारस्य विस्तारमानं षड्विंशत्यधिकशतांशितं कृत्वा तदेकांशमात्रं तस्मादङ्कादुत्तरतो गमयित्वा तत्र प्रागग्रं सूत्रमापातयेत्। [3]अथाखिले दिश्यैश्याङ्गमयेदिति प्रागुदग्गमनमुच्यते।।9।।

It may be necessary to effect a Gamana - shift from the central line by a few angulas- towards the north or north east- for locating the exact spot of the installation. For this the width of the door of Garbhagṛha will have to be divided into 126 parts. It is from this line that the shift is to be effected. For all deities a line is to be drawn east west from which the shift is to be effected. For Śiva and Śaṅkaranārāyaṇa the shift may be just a little part with reference to the length of the idol also. For all gods one or two yavas could be the shift. (9)

ब्राह्मे कौतुकमामरे न्यसतु मूलार्चां स्थितामासिता-
मीषन्मानुषसंयुते समनृदेवांशे शयानामपि।
गर्भे षोडशवर्गभेदिनि पदैर्ब्राह्मं चतुर्वर्गकै-
स्त्रिद्व्येकोन्मितपङ्क्तिभिः सुरनृपैशाचान् प्रकुर्वीत वा।।10।।

विमर्शिनी

बहुबेरे स्थाननियममाह-ब्राह्म इति। ब्राह्मेंऽशे कौतुकं कर्मार्चां न्यसतु। आमरे दैविकमध्ये स्थितां तिष्ठन्तीं मूलार्चां च, ईषन्मानुषसंयुते किञ्चिन्मानुषांशयुक्ते दैविके आसितामुपविष्टां च, समनृदेवांशे दैविकं मानुषं च सममाश्रिते स्थाने शयानामपि मूलार्चां न्यसतु। ब्रह्मादिपदकल्पनायां विकल्पमाह-गर्भ इति। गर्भे गर्भगृहे षोडशवर्गभेदिनि आयामविस्ताराभ्यां षोडश पुटे सति मध्ये चतुर्वर्गैः षोडशभिः पदैः ब्राह्मं स्थानं प्रकुर्वीत। त्रिद्व्येकोन्मितपङ्क्तिभिः ब्रह्मस्थानाद् बहिः पुटत्रयेण पुटद्वयेन पुटैकेन च क्रमात् सुरनृपैशाचान् दैविकमानुषपैशाचानावरणभागान् प्रकुर्वीत वा। तथा विष्णुसंहितायां-

किञ्चिन्मानुषमाश्रित्य कुर्यादासनकर्म च।
दैवमानुषभागाभ्यां कुर्याच्च शयनं बुधः।।
अर्चनापीठिका ब्राह्मे स्थापना दैविके यदा।
मानुषेऽस्य परीवाराः पैशाचे त्वायुधानि च।।

1. 'त' च पाठः।
2. 'परं' परिमुज्य सूत्रं क पाठः।
3. 'तो वाखिले' इत्यस्य स्थाने 'तोऽथाखिले' इति विवरणादतः पाठः।

इति। तत्र किञ्चिन्मानुषमाश्रित्येत्येतस्यायमर्थः-नालं चतुर्धा विभज्यांशत्रये दैविके एकं मानुष इति। तत्र बहुवीरदैविके स्थापना स्थिता प्रतिमा विहिता इति च।।10।।

विवरणम्

एवं तावदेकबेरविषयं प्रतिष्ठास्थानमुक्त्वा बहुबेरविषयमाह-**ब्राह्मे कौतुकमिति**। तत्र गर्भगृहस्य विभजने भेदमाह-गर्भे षोडशवर्गेति।।10।।

If there is more than one idol, the Arcanābimba shall be located in Brahmapada. In case Mūlabimba is in a standing form it shall be installed in the Daivikapada. If the posture is sitting then Daivikapada with an extension to Mānuṣapada is suggested. In the case of a lying position the idol shall be located half in Daivikapada and half in Mānuṣapada. The location can be arrived by dividing the Garbhagṛha into 256 segments (multiplying sixteen by sixteen). The central part of 16 segments forms the Brahmapada. By joining the lines outside by three, two and one, the other location like Daiva, Mānuṣa, Piśāca segments can be formed for effective installation. (10)

ब्राह्मे षोडशमंशकं स्वपुरतो मध्याद् दलाढ्यैककं
वामे चाप्यपहाय वह्निभुवि बिम्बं स्थापयेत् स्थास्नुकम्।
एवं मानुषमध्यतोऽथ गमयित्वा पृष्ठतो वामत-
श्चांशे स्थापयतु स्वमूलमनुबिम्बं बाहुबेरे विधौ।।11।।

विमर्शिनी

षोडशमंशकमित्यस्यायमभिप्रायः-षोडशांशीकृतस्य ब्रह्मभागस्य मध्यसूत्रात् पृष्ठगतं पदं त्र्यंशीकृत्य तमेकमंशं वा अर्धसहितं द्व्यंशं वा पृष्ठतो गमयेत् । तन्मानं तदर्धं वा वामतश्च नयेदिति। वह्निभुवि बाहुबेरे विधौ ब्राह्मे उक्तैकोनपञ्चाशत्कोष्ठैः कल्पितम[1]ध्ये पदे षोडशमंशकं ब्रह्मभागस्य षोडशांशं मध्यात् स्वपुरतः अपहायातिक्रम्य दलाढ्यैककम् अर्धाधिकैकभागं वामे भागे चाप्यपहाय स्थास्नुकं निश्चलं यागबिम्बं वा स्थापयेत्। अथ मानुषमध्यतश्च एवमुक्तप्रकारेण पृष्ठतो वामतश्च गमयित्या परस्मिन् अंशे स्वमूलमनुबिम्बं स्थापयतु। तथाच स्कन्दसद्भावे-

पदान्येकोनपञ्चाशत् कल्पयित्वा विचक्षण!।
पदमेकं भवेद् ब्राह्मम्

इत्यादि। पुनः-

ब्राह्मं षोडशधा कृत्वा भागं सूत्रेण साधकः।
तत्त्र्यंशं वा तदर्धं वा मध्यात् प्रागुत्तरक्रमात्।।
प्राङ्मुखे तु भवेदेवं पश्चिमे दक्षिणात् परम्।
तन्मध्ये स्थापयेद् बिम्बं तैजसं शैलजं तु वा।।

---

1. 'ध्यप' ङ. पाठः।

मणिजं रत्नजं वापि इतरत्र कदाचन।
मृन्मयं दारुजं चापि मानुषेऽप्येवमेव तु।।
एकवीरासनं ब्राह्मे पश्चिमार्धे तु कल्पयेत्।
एतदेवार्चनापीठं बहुबेरासने भवेत्।।
बहुवीरासनं तद्वन्मानुषार्धे तु पश्चिमे।

इति। स्कन्दसंहितायां च–

ब्राह्मं षोडशधा भङ्क्त्वा भागमेकं पुनस्त्रिधा।
तद्भागगमनं प्राच्यां तदर्धं तत् तथोत्तरे।।
प्राङ्मुखे तु भवेदेवं पश्चिमे दक्षिणात् परम्।।

इत्यादि। नन्दिप्रोक्ते स्कान्दे[1] च–

ब्राह्मं षोडशधा भङ्क्त्वा नवमं विभजेत् त्रिधा
स्थितैकवीरबिम्बस्य तृतीयं स्थानमिष्यते।।
तन्मानेन तदर्धेन सैम्ये चैशे यमेऽसुरे।।

इति।।11।।

विवरणम्

तत्रापि कौमारे भेदमाह–ब्राह्मे षोडशमिति।।11।।

When the Bahubera (more than one) installation of Subrahmaṇya is required Brahmapada is to be divide into sixteen and from its central part one point is to be taken forward and one and a half moved to the left Arcanābimba is to be fixed. In the case of the installation of the god's Mūlabimba the location shall be a little backward from the center of the Mānusapada and a little to the left side of the same segment. (11)

बहुबेरविधानमूलबिम्बं सुसमं द्वारसमुच्छ्रयेण कार्यम्।
चरणांशविवृद्धमर्धवृद्धं चरणोनद्विगुणं द्विसंगुणं च।।12।।

विमर्शिनी

तत्रैव वह्निभुवि बहुबेर[2] प्रतिमाप्रमाणमाह–बहुबेरेति बहुबेरविधानमूलबिम्बं द्वारसमुच्छ्रयेण द्वारोन्नत्या सुसमं कार्यम्। चरणांशविवृद्धतच्चतुर्थांशयुक्तं द्वारोत्सेधं च, अर्धवृद्धम् अर्धेन सहितं द्वारोत्सेधं च, चरणोनद्विगुणं त्रिभागेन सहितं द्वारोत्सेधं, द्विसंगुणं द्विवृद्धं द्वारोत्सेधं च। तथा स्कन्दसंहितायाम्–

एकवीरे भवेदेवं बहुवीरे त्वथोच्यते।
अध्यर्धां पादहीनां वा द्विगुणां चोत्तमत्रयम्।।

1. 'स्क' ख. ङ. पाठः।
2. 'परिमा' ख पाठः।

पादाधिकं पादमानं मध्यमं कन्यसं क्रमात्।
दारुमृन्मयजान् नित्यं द्वारमानेन मानयेत्।।

इति।।12।।

विवरणम्

बहुबेरविधौ मूलबिम्बप्रमाणमाह-बहुबेरविधानेति।।12।।

The Mūlabimba in respect of Bahubera - more than one idol,shall be equal to the length of the door of the sanctum. It can be a little more by increasing one fourth or half or even double the length in calculating the length of the idol. (12)

पात्राणि वापविहितानि पृथग् द्विषड् वा
स्युः पालिकाश्च घटिकाश्च शरावकाश्च।
तत्त्वाष्टिभानुभिरिह प्रमिताङ्गुलैस्त-
दुत्सेधक्लृप्तिरथवाष्टिचतुर्दशार्कैः ।।13।।

विमर्शिनी

तृतीयपटले प्रस्तुतान् कर्मशेषानाह-पात्राणीति। वापविहितानि बीजवापार्थं विहितानि पात्राणि पृथक् प्रत्येकं द्विषट् द्वादश वा स्युः।'तेषु विनिदध्यात् पालिकाः षोडशे'त्युक्तेन ग्रन्थेनायं विकल्पः। तानि क्रमेणाह-पालिकाश्च घटिकाश्च शरावकाश्चेति। संज्ञासंस्थानभेदाभ्यां योगात् त्रिविधानि तानीत्यर्थः। तत्त्वाष्टिभानुभिः चतुर्विंशतिषोडश द्वादशभिरङ्गुलैस्तदुत्सेधक्लृप्तिः तेषां पात्राणामुत्सेधस्थितिः। अथवा अष्टिचतुर्दशार्कैः क्रमेण षोडशचतुर्दशद्वादशभिर्वा तदुत्सेधक्लृप्तिः स्यात्।।13।।

विवरणम्

अथ पालिकालक्षणे वक्तव्ये घटि[1]कालक्षणमपि वक्तुं पात्रविकल्पं तावदाह-पात्राणीति। पृथक् द्वि[2]षड्वा स्युः। प्रत्येकं द्वादश वा स्युः। केवलपालिकापक्षस्य बुद्धिस्थ[3]त्वात्तेन सहायं विकल्पो द्रष्टव्यः।।13।।

The vessels for sowing the seed shall be of three types and there shall be twelve in each category. The names of these are Pālikā (a plate), Ghaṭikā (jar or bucket) and Śarāva (a tray). Their height shall be 24 angulas, 16 angulas and 12 angulas respectively. (13)

तत्त्वांशकोनमुदितोच्छ्रयमत्र कृत्वा
षोढा द्वयेन वदने क्रमशः परांशैः।
तत्पीठदण्डगलसन्धिगलेषु कुर्याद्
दैर्घ्यं पुरोविरहितेन च पीठसन्धौ।।14।।

1. 'कादिल' च. पाठ।
2. 'त्रि' क. पाठः।
3. 'त्वेन' क. पाठः।

अङ्घ्र्यूनमंशमधिपीठमिहाधिदण्डं
चैके समुच्छ्रयमुशन्त्यपरेऽर्धवृद्धम्।
पीठेऽङ्घ्रिहीनमपरत्र च शिष्टयुक्त्या
सन्धिं गलांशगतमास्यबिलं च कार्यम्।। 15।।

विमर्शिनी

अथ श्लोकत्रयेण पालिकालक्षणमाह-**तत्त्वांशकोनमिति**। अत्र एषु पात्रेषु मध्ये। मङ्गलपालिकाया इति जातावेकवचनम्। मङ्गलभूतानां पालिकानाम् उदितोच्छ्र्यम् उक्तसमुत्सेधं तत्त्वांशकोन चतुर्विंशांशोनं कृत्वा शेषं षोढा कृत्वा द्वयेन द्व्यंशेन वदने दैर्घ्यं कुर्यात्। परांशैः परैश्चतुर्भिरंशैः क्रमशः तत्पीठदण्डगलसन्धिगलेषु तासां पालिकानां पीठे दण्डे गलसन्धौ गले च दैर्घ्यं कुर्यात्, पुरोविरहितेन पूर्वं त्यक्तेन चतुर्विंशांशेन पीठसन्धौ च।।14।।

एके बुधाः इह उक्ते दैर्घ्ये अधिपीठं पीठे अधिदण्डं दण्डे चोक्तषडंशाद् अङ्घ्र्यूनमंशं समुच्छ्र्यं दैर्घ्यं कार्यमुशन्ति इच्छन्ति। अपरे बुधाः पीठे अर्धवृद्धम् अर्धेनाधिकम्, अपरत्र दण्डे अङ्घ्रिहीनम् उक्तादंशाद् अङ्घ्रिहीनं च समुच्छ्र्यमुशन्ति। शिष्टयुक्तया शिष्टयोगेन सन्धिं पीठसन्धिं गलसन्धिं चेच्छन्ति। गलांशगतं गलांशेऽप्यधिगतम् आस्यबिलं मुखविवरं च कार्यम्। गलांशपर्यन्तमास्यबिलं च कार्यमिति वार्थः।।15।।

विवरणम्

पालिकावयवक्लृप्तिमाह-[1]**एकाङ्गुलोनमिति**। तत्त्वाष्टीत्येवं द्विधोक्तं पालिकाया उत्सेधमेकाङ्गुलोनं मनसा संकल्प तत्समं षोढा विभजेत्। तत्र द्वाभ्यां भागाभ्यां पालिकाया वदनं पुनरेकैकेन पीठादिचतुष्टयं कुर्यात्। पुरोविरहितेन एकाङ्गुलोनमिति परित्यक्तेन पीठसन्धिः। पीठदण्डयोस्सन्धिरिति यावत्। एकेऽपर इत्याचार्यवशाद् विकल्पं ब्रुवंस्तत्वाष्टिप्रमाणयोरन्यतरस्याचार्यवशाद् भिन्नस्य पञ्चविंशत्यङ्गुलोत्सेधस्यैवाय-मवयवक्लृप्तिविकल्प इति दर्शयति। इह पञ्चविंशत्यङ्गुलायां पालिकायां पीठे दण्डे च दर्शितोत्सेधं निजचतुर्भागरहितं एकैकं कथयन्ति। पीठे स्वार्थप्रमाणेनाधिकं स्वप्रमाणं दण्डे पूर्ववन्नि[2]जचतु-र्भागहीनमेवापरे वदन्ति। नन्विह पक्षद्वयेऽवशिष्यमाणस्य[3] द्व्यङ्गुलस्याङ्गुलस्य च कोपयोग इत्यत्राह-[4]इष्टयुक्त्येति। गलसन्धिवर्जं सर्वेष्ववयवेषु कल्पितेषु यावच्छिष्यते पञ्चाङ्गुलं त्र्यङ्गुलं वा तेन गलसन्धिरित्यर्थः। गलांशगतमास्यविलमिति गलस्यांशं गतं प्राप्तमेव। न तत्र प्रविष्टम्। यद्वा गलस्यांशे गतं तत्रापि प्रविष्टमिति वार्थः।। 14-15।।

In making a Pālikā its height may be divided into 24 of which one part is reduced and the balance is divided by six. Then two parts is to form its mouth (at the top). The remaining part is to form the portions of Pītha,

---

1. "तत्त्वांशकोनमित्यस्य स्थाने एकाङ्गुलोन'मिति।"
2. 'न्रियमच'।
3. 'स्याङ्गुलस्य च' क. पाठः।
4. 'शिष्टयुक्त्या' इत्यस्य स्थाने 'इष्टयुक्त्या' इति विवरणपाठः।

daṇḍa, Galasandhi and gala. In Pīṭhasandhi the part reduced at the beginning is to be added. (14)

According to another view the height of Pītha and danda is to be three fourth of a part. A different view is that Pītha shall have one and a half part for height and three fourths for the height of daṇḍa. In the case of reduction of the height of Pītha the height of Galasandhi will have to be increased. In the case where the height of Pītha is decreased, the height of Galasandhi is to be increased. The depth of the vessel shall be up to the gala. (15)

दण्डे स्वदैर्घ्यसुसमं द्विगुणं स्वदैर्घ्याद्
व्यासं परेषु वियुगांशमधः शिरोधेः।
तत्पीठिकाविततिखण्डमितं च पीठ-
सन्धौ प्रकल्पयतु मङ्गलपालिकायाः।।16।।

विमर्शिनी

दण्डे स्वदैर्घ्यसुसमं स्वदैर्घ्येण तुल्यं व्यासं प्रकल्पयतु। परेष्ववयवेषु स्वदैर्घ्यात् स्वस्वदैर्घ्याद् द्विगुणं, शिरोधेः (अधः) गलस्याधोभागे वियुगांशं गलाद् विगतचतुर्थांशं, पीठसन्धौ तत्पीठिकाविततिखण्डमितं तस्याः पीठिकायाः विस्तृ[1]तेरर्धमितं च प्रकल्पयतु।।16।।

विवरणम्

परेषु वदनगलत्सन्धिपीठेषु। स्वदैर्घ्याद् द्विगुणं व्यासमित्यन्वयः। वियुगांशमधः–शिरोधेरिति। गलादर्वाचीनानामवयवानां स्वस्वविस्तारं प्राप्तं चतुर्थांशेन विरहयेदित्यर्थः। अङ्घ्र्यूनमंशमित्यस्मिन् पक्षे तु विशेषः। युगशब्दो द्विवचनश्चतुष्टयवचनो वा ग्राह्यः। शिरोधेरध इति गलसन्धिमात्रमेव गृह्यते[2]। तेन ततोऽप्यर्वाचीनानां पीठतत्सन्धिदण्डानां यथोक्त एव व्यासो न तु चतुर्थभागहीनोऽर्धही[3]नो वा भवति।।16।।

For Pītha, mukha and gala the circumference and width shall be equal to the length. For the rest of the parts the circumference shall be double the length. Below the portion of the neck the width shall be three fourth of the length. For the variety called Maṅgalapālikā in the case of Pīṭhasandhi there shall be half a portion of increase of Pīthavistara. (16)

ऊर्ध्वार्धक्लृप्तपृथुबुध्नघटोत्तराङ्गे
दिक्षूर्ध्वतश्च घटिका घटितेषुवक्त्रैः।
वर्णाङ्गुलप्रततिभिः सगलैरधोर्धे
तत्पालिकावदुदिताङ्घ्रिससन्धिदण्डा।।17।।

---

1. 'तै' क पाठः।
2. 'ते। न' च. पाठः।
3. 'र्ध्व' च. पाठः।

विमर्शिनी

घटिकालक्षणमाह–ऊर्ध्वार्धेति।ऊर्ध्वार्धक्लृप्तपृथुबुध्नघटोत्तराङ्गे ऊर्ध्वार्धेन क्लृप्तो महदन्तर्भागयुतो घटो यथा भवति तथाभूतोर्ध्वप्रदेशे चतुर्षु दिक्षूर्ध्वतश्च वर्णाङ्गुलप्रततिभिः चतुरङ्गुलविस्तारैः सगलैः गलसहितैः इषुवक्त्रैः पञ्चभिर्मुखैः घटिता बद्धा घटिका स्यात्। अधोर्धे तत्पालिकावद[1] ङ्घ्रिससन्धिदण्डा अङ्घ्रिः पीठं पीठसन्धिसहितो दण्डश्च पालिकावदुदितेत्यर्थः।।17।।

विवरणम्

अथ घटिकां लक्षयति–ऊर्ध्वार्धेति। घटिकोत्सेधमानं द्विधा कृत्वा तत्रोपरिभागेन पृथु बुध्नं विस्तीर्णपृष्ठोद्देशं घटं विरचयेत्। तं घटाकारं द्विधा समं मनसा विभज्य तत्रोत्तरे भागे चतुर्दिक्षूपरि च पञ्चमुखानि घटवदनसदृशाणि कुर्यात्। तेषां चतुरङ्गुलो विस्तारः।...त्येकं गलं च यथाशोभं कार्यम्। तत्पालिकावदिति। अष्ट्यङ्गुलघटिकास्तत्वाङ्गुलपालिकावद्विरचन चतुर्दशाङ्गुलाया अष्ट्यङ्गुलपालिकावदेकधा विरचनमित्यर्थः।।17।।

Ghaṭikā may be shaped with more capacity inside the upper part above, the half portion with the shape of a pot. Above that there shall be five openings of four angulas each with separate necks. With the lower half Pītha, Pīthasandhi and danda may be formed as in the case of Pālikās. (17)

अब्ध्यङ्गुलात् समधिके सति पालिकायाः
पीठोच्छ्र्ये तु घटिकाघटिताङ्घ्रिदण्डौ।
त्रिद्व्यङ्गुलोच्छ्र्यनिजोच्चसमप्रतानौ
स्यातामिनाङ्गुलमितः सकलोच्छ्र्यो वा।।18।।

विमर्शिनी

पालिकायाः पीठोच्छ्र्यो अब्ध्यङ्गुलात् चतुरङ्गुलात् समधिके सति तत्र तु घटिकाघटिताङ्घ्रिदण्डौ घटिकायां योजितौ पीठदण्डौ त्रिद्व्यङ्गुलोच्छ्र्यनिजोच्चसमप्रतानौ क्रमात् त्रिद्व्यङ्गुलाभ्यामुच्चौ निजोच्चसमविस्तारौ च स्याताम्। घटिकायाः सकलोच्छ्र्यः इनाङ्गुलमितः द्वादशाङ्गुलप्रमितो वा स्यात्।।18।।

विवरणम्

तत्र कश्चिद्विशेषमाह–अब्ध्यङ्गुलादिति। यदा स्वपालिकापीठं चतुरङ्गुलादधिकमुन्नतं स्यात् तदा घटिकायाः पीठं त्र्यङ्गुलं दण्डो द्व्यङ्गुलः। तयोर्विस्तारस्तन्नतितुल्यः। तत्र च घटिकायाः कृत्स्न उत्सेधो द्वादशाङ्गुल एव। न तु चतुर्दशाङ्गुल इत्यर्थः।।18।।

If the height of the Pītha of Pālikā is four angulas in the case of Ghaṭikā the height of Pīṭhadaṇḍa shall be two or three angulas with that much

1. 'द् उक्तपालिकादङ्घ्रि'
2. 'यश्च।। ख पाठः।

circumference or breadth. Both Ghaṭikā and Pālikā shall have the height of twelve angulas. (18)

व्यासेन दैर्घ्यसुसमं दहनांशहीनं
वास्ये ततो हुतवहांशततं च पीठे।
कुर्याच्छरावमपकन्धरपालिकाव–
दूर्ध्वार्धमस्य घटिकावदथाध[1]रार्धम्।।19।।

विमर्शिनी

शरावलक्षणमाह–व्यासेनेति। शरावम् आस्ये मुखे व्यासेन विस्तरेण दैर्घ्यसुसमं दहनांशहीनां त्र्यंशहीनं वा कुर्यात्। पीठे ततो मुखविस्तारात् हुतवहांशततं त्र्यंशविस्तारं च। अस्य शरावस्योर्ध्वार्धम् अपकन्धरपालिकावत् अपगतगलपालिकावत्, अथास्याधरार्धं घटिकावच्च कुर्यात्।।19।।

विवरणम्

शरावलक्षणमाह–व्यासेनेति। मुखे व्यासेन दैर्घ्यसुसमं द्वादशाङ्गलमिति यावत्। दहनांशहीनं त्र्यंशहीनं नवाङ्गुलं वेति यावत्। ततो हुतवहांशततं पीठ इति। द्वादशाङ्गुले मुखव्यासे त्र्यंशततं तृतीयांशततं वा। नवाङ्गुले तु तृतीयांशततमेवेत्यभिप्रायः। अस्योर्ध्वार्धमपकन्धरपालिकावदिति। गलमुखव्यासार्धततं बिलतलमित्यर्थः। अस्यापरार्धं घटिकावदिति। पीठसन्धिगलसहितमित्यर्थः। घटिकात्र द्वादशाङ्गुलै[2]व गृह्यते।।19।।

For Śarāva on the upper half at the top the circumference the mouth portion be shaped with one third of its length. In Pītha one third of the circumference of the mouth may be the breadth. The top may be like the Pālikā without its neck portion. The lower half shall look like the Ghaṭikā. (19)

पीठाग्रकार्श्यपरिशेषितमूलकार्श्य–
वृत्तिक्रियादिरचना सकलेषु कार्या।
स्युस्तानि लोहरचितान्यथ मार्त्तिकानि
पात्राणि विष्णुविधिधूर्जटिदैवतानि।।20।।

विमर्शिनी

सकलेषु पालिकाघटिकाशरावेषु पीठाग्रकार्श्यपरिशेषितमूलकार्श्यवृत्तिक्रियादिरचना पीठे क्रमेणाग्रकृशता परिशेषितेषु दण्डादिषु मूलस्य कृशता च वृत्तिकरणं रेखाविशेषादीनां रचना च कार्या। तानि पात्राणि लोहरचितानि लोहानामन्यतमेन रचितानि, अथवा मार्त्तिकानि मृदा निर्मितानि स्युः। विष्णुविधिधूर्जटिदैवतानि पालिकादयः क्रमेण विष्णुब्रह्मरुद्रदेव[3]त्यानि च स्युः।।20।।

1. 'प' ख. घ.पाठः।
2. 'ल एव' क. पाठः।
3. 'दै' इति व्याख्याकोशपाठः।

विवरणम्

परिशेषितमूलकार्श्येति। वदनाद्यवयवानां निजनिजमूलप्रदेशे तनुत्वं कार्यम्। आदिशब्देन हनून्नतिमुखविकासादयो मुक्तादामाद्यलङ्काराश्च विवक्षिताः। विष्णुर्विधिधूर्जटिदैवतानिति त्रिपा[1]त्रपूजनार्थमेतदुक्तम्।।20।।

In all the three types of vessels the upper part above the Pīṭha shall be of lesser circumference and with lesser breadth from the daṇḍa to the mukha portion. They shall have a round shape with decorative line. These vessels can be made of metal or mud. The presiding deity of Pālikā is Viṣṇu, for Ghaṭikā is Brahmā and Śiva is the deity for Śarāva. (20)

क्षेत्रे षट्कृतिकोष्ठके पदचतुष्केऽन्तर्गते पालिका
न्यस्येद् द्वादश दिग्विद्वकेष्वपि बहिः कोणत्रिकोष्ठेष्वथ।
अग्न्या[2]द्यं घटिकाः परेष्वपि शरावान् पालिकादित्रयं
प्राक्प्रत्यङ्मुखवीथिकाविनिमयाद् वा वह्निकोष्ठादितः।21।।

विमर्शिनी

बीजवापकाले तेषां स्थापने नियममाह–क्षेत्र इति। षट्कृतिकोष्ठके आयामतो विस्तार(त)श्च षट्पुटवशात् षट्त्रिंश[3]त्पदे क्षेत्रे अन्तर्गते पदचतुष्के चतस्रः, बहिर्दिग्द्वि(दे?)केषु द्वादश शरावांश्च(?)। अथवा पालिकादित्रयं पालिकाघटिकाशरावान् प्राक्प्रत्यङ्मुखवीथिकाविनिमयात् प्राङ्मुखानां प्रत्यङ्मुखानां षण्णां पङ्क्तीनां व्यत्यासेन वह्निकोष्ठादितः वह्निकोष्ठमारभ्य दक्षिणवीथ्यां, पश्चिमत आरभ्य तदुत्तरवीथ्यां च द्वादश पालिकाः न्यस्येत्। तदुत्तरतः पूर्वादारभ्य पश्चिमत आरभ्य च वीथिद्वये घटिकाश्च, तथैव च तदुत्तरतो वीथिद्वये शरावांश्च न्यस्येत्।।21।।

विवरणम्

अथैषामुचितं क्षेत्रं विन्यासप्रकारश्चाह–क्षेत्र इति। मध्यगतचतुष्पदे तत एकपुटान्तरितेषु चतुर्दिग्गतद्विकेषु च द्वादश पालिकाः स्थापनीयाः चतुष्कोणगतत्रिकेषु घटिकाः। अन्तरालावशिष्यमाणपुटेषु शरावाश्चेत्यर्थः।।21।।

In a Padma diagram (drawn with coloured powders) with 36 segments- the four segments in the centre and on the outer corridors on the four directions is two segments each the twelve Pālikās may be placed. In all the four corners beginning with Agni- southeast, southwest, north west and northeast- Ghaṭikas may be arranged in three segments each. In the balance portion of the twelve segments in the centre Śarāvas are to be arranged (from Agni corner onwards it shall be in the Pradakṣiṇa order). (21)

---

1. 'त्रपक्षे पात्रपू' क. च. पाठः।
2. 'द्या' घ. पाठः।
3. 'शत्षट्पदे ख. पाठः।

तोरणानि युगहस्तमितानि क्ष्मोर्ध्वमर्धविवृतानि भवन्ति।
केतवः सुरगृहोत्तरदीर्घाः स्वोक्तवर्णसुविचित्रपताकाः।।22।।

विमर्शिनी

चतुर्थपटलगतान् कर्मशेषान् वदन् तोरणादीनां प्रमाणमाह-**तोरणानीति**। तोरणानि क्ष्मोर्ध्वं भूमेरुपरि युगहस्तमितानि चतुर्हस्तप्रमितानि अर्धविवृतानि आयामादर्धेन द्विकरेण विस्तृतानि च भवन्ति। केतवः ध्वजाः सुरगृहोत्तरदीर्घाः प्रासादोत्तरदैर्घ्यसमानदीर्घाः स्वोक्तवर्णसुविचित्रपताकाः स्वस्वदिक्षूक्तेन वर्णेनारुण्यादिना सुतरां विचित्राभिः पताकाभिश्च युक्ताः।

अरुणोऽग्निनिभः कृष्ण[1]श्चैतः पीतस्तथा सित[2]ः।
श्वेतोऽन्यो बहुवर्णश्च कुमुदादिध्वजाः क्रमात्।।

इत्यादयः स्वा[3]गमेषूक्ता वर्णाः।।22।।

The Toraṇas- the gateways (ornamental arches or portals) may have a measurement of four daṇḍas of length and two daṇḍas of width above the ground level. There may be flagstaff's of the length of a Prāsādottora- wall plate with flags with suitable colours indicated for the location. (22)

प्रागग्रं सूत्रमुर्व्यामृजुतरमभिकल्प्यास्य मूलाग्रगाभ्यां
सूत्राभ्यां मत्स्ययुग्मं यमशशिहरितोः कल्पयित्वात्र सूत्रम्।
कृत्वा दिक्ष्वङ्कयित्वा सममिह वि[4]हितैस्सूत्रकैः कोणमत्स्यान्
कृत्वास्फाल्यैषु सूत्रं रचयतु चतुरश्रं पुरः क्षेत्रक्लृप्तौ।।23।।

विमर्शिनी

पञ्चमपटलगतान् कर्मशेषान् वदन् कुण्डमण्डलादीनां निर्माणार्थं चतुरश्रसाधनक्लृप्तिमाह-**प्रागग्रमिति**। क्षेत्रक्लृप्तौ क्षेत्रकल्पनायां पुरः पूर्वम् उर्व्यां भूमौ ऋजुतरं यथा भवति तथा प्रागग्रं प्रत्यक्प्रागायतं सूत्रम् अभिकल्प्य आस्फाल्य अस्य सूत्रस्य मूलाग्रगाभ्यां मूलादग्राच्च गताभ्यां परस्परं समाभ्यां सूत्राभ्यां वृत्तीकरणेन यमशशिहरितोः दक्षिणोत्तरदिशोः मत्स्ययुग्मं कल्पयित्वा अत्र मत्स्यमध्ये दक्षिणोत्तरं सूत्रं कृत्वा चतसृषु दिक्षु समप्रमाणम् अङ्कयित्वा चिह्नं कृत्वा इह अङ्के विहितैः निक्षिप्तैर्मध्यपर्यन्तैः सूत्रैः कोणमत्स्यान् चतुर्षु कोणेषु मत्स्यान् कृत्वा एषु मत्स्येषु सूत्राण्यास्फाल्य चतुरश्रं कल्पयतु चतुष्पदोपेतं चतुरश्रं कुर्यात्[5]।।23।।

---

1. 'श्चे' घ. 'श्चे' घ. पाठः।
2. 'चि' ङ. पाठः।
3. 'स्वसुक्ता' ख. पाठः।
4. 'नि' क. पाठः।
5. 'त्। क्षेत्रं कुर्यात्।। त' घ. ङ. च. पाठः।

विवरणम्

सम्प्रति कुण्डमण्डलसाधारणं चतुरश्रं क्षेत्रमुत्पादयितुमाह-प्रागग्रं सूत्रमिति। प्रथमं पश्चिमे सूत्रमूलं प्राक् च सुत्राग्रं विन्यस्यास्फालयेत्। पुनस्तन्मध्यात् सम्परिमाणेन सूत्रेण प्राक् पश्चाच्च अङ्कौ कृत्वा पश्चिमाङ्के सूत्रं निधाय तदग्रं पूर्वाङ्कपर्यन्तमायतं कृत्वा तेन सूत्रेण मध्याद्दक्षिणत उत्तरतश्च अङ्कौ कुर्यात्। एवं पूर्वाङ्कादपि तयोरङ्क[1]योरङ्कौ कुर्यात्। तदा दक्षिणत उत्तरतश्च मत्स्यौ भवतः। तयोर्मत्स्ययोः सूत्रं विन्यस्यास्फालयेत्। तद्दक्षिणोत्तरसूत्रं भवति। पुनर्मध्याच्चतुर्दिक्षु क्षेत्रसीमारूपेण समसूत्रैरङ्कयित्वा तेभ्योऽङ्केभ्यस्तैरेव सूत्रैः प्रत्येकं क्षेत्रकोणेष्वङ्कयेत्। पुनस्तेषु मत्स्येषु सूत्राणि कुर्यात्। तानि चत्वारि दिक्सूत्राणि भवन्ति। तच्चतुरश्रं क्षेत्रमित्थं सम्पन्नं भवति।।23।।

In order to give shape to a square (of equal measurement on all sides), first draw a straight line from east to west with a cord. Placing the cords at both ends of line two circles may be made using up to the three fourth of the line. Two designs of fish can be made at the joint of the two circles extending the line southwest which are to be marked. Thus at the four corners, shapes of fishes may be drawn. By joining together the end of these designs of fish one can arrive at a square. (23)

दोर्मात्रं परिसूत्र्य तत्र चतुरश्रं क्षेत्रमर्काङ्गुलं
खात्वा तद्द्विगुणं तु वावटतटे तन्मेखलाः कल्पयेत्।
मार्तण्डाहियुगाङ्गुलोच्छ्रयमिताः श्रुत्यङ्गुलव्यासिनी-
स्तिस्रोऽन्तः क्रमतो निजावटनिभाद्याब्ध्यश्ररूपे परे।।24।।

विमर्शिनी

तत्र समान्यतः प्राप्तं चतुरश्ररूपं कुण्डमाह-दोर्मात्रमिति। अत्र कुण्डस्रुक्स्रुवमण्डलादिकरणे पूर्वोक्तपालिकादिकरणे च मात्राङ्गुलं प्रमाणं स्यात्। तथाच रत्नावल्याम्- "अङ्गुलप्रमाणं त्रिविधं मानाङ्गुलं मात्राङ्गुलं देहलब्धाङ्गुलमिति। वातायनपथं गत्वा ये रविरश्मयो भान्ति, तत्र सूक्ष्मं विसर्पन्तो रेणवः। ताभिरष्टाभिः केशम्। एवं लिक्षं यूकं यवमिति क्रमशोऽष्टगुणैर्वृद्धं मानाङ्गुलं भवेत्। यजमानस्याचार्यस्य वा मध्यमाङ्गुलिमध्यपर्वायामो मात्राङ्गुलं स्मृतम्। प्रतिमायामं तालगणितं दशधा विभज्य एकं भागं द्वादशधा कृत्वा एकं देहलब्धाङ्गुलम्। तत्र प्रासादमण्डपादीन् मानाङ्गुलेन गणयेत्। यागोपकरणानि मात्राङ्गुलेन। देहलब्धप्रमाणेन प्रतिमामिति" इति। अत्र कुण्डादीनां यागोपकरणत्वादत्र मात्राङ्गुलं प्रशस्तम्। तच्चतुर्विंशत्यङ्गुलमिह दोर्मात्रं विवक्षितम्। दोर्मात्रं करमितं चतुरश्रं क्षेत्रं परिसूत्र्य परितः सूत्रपातैः। सम्पाद्य अर्काङ्गुलं द्वादशाङ्गुलं तद्द्विगुणं तु वा निम्नतायुक्तं खात्वा अवटतटे गर्तप्रान्ते एकामङ्गुलिं त्यक्त्वा वान्यथा वा तिस्रः तन्मेखलाः, तस्यावटस्य मेखलारूपाः संस्थानविशेषाः, कल्पयेत्। तास्[4]वन्तःक्रमतः अन्तरारभ्य क्रमेण मार्ताण्डाहियुगाङ्गुलोच्छ्रयमिताः द्वादशाष्टचतुस्संख्यैर-

1. 'ङ्कौ कु' क. पाठः।
2. 'यु' इति मूलकोशपाठः।
3. 'गु'
4. 'स्व' ङ पाठः।

ङ्गुलैर्मितोत्सेधयुक्ताः श्रुत्यङ्गुलव्यासिनीः चतुरङ्गुलविस्तारयुक्ताः। तास्वाद्या अन्तर्गता निजावटनिभा चतुरश्रभगाकारधनुर्वक्रादिकुण्डेषु यादृशोऽवटः तादृशी भवेत्। परो मध्यमा बाह्या च अब्ध्यश्ररूपे चतुरश्रसंस्थाने च भवेताम्।।24।।

विवरणम्

सर्वकुण्डप्रकृतिभूतमाचार्यकुण्डं लक्षयति–दोर्मात्रमिति। प्रथमं तावत् हस्तपरिमितं चतुरश्रं क्षेत्रं सूत्रयित्वा तत्र द्वादशाङ्गुलं हस्तमात्रमेव वावटं खात्वा तस्यावटस्य तटे अन्तरारभ्य क्रमतस्तिस्रस्तन्मेखलाः कुर्यात्। तत्रान्तर्मेखलाया द्वादशाङ्गुलोन्नतिः। मध्यमाया अष्टाङ्गुला। बाह्यायाश्चतुरङ्गुला। विस्ता[1]रस्तु तिसृणामपि चतुरङ्गुल एव भवति। निजावटनिभा यासामाद्या अब्ध्यश्ररूपे यासामितरे इति च समासः। सर्वकुण्डापेक्षश्चैतत्। अन्तर्मेखला तावच्चतुरश्रकुण्डे चतुरश्ररूपा। वृत्ते वृत्ता। त्र्यश्रे त्र्यश्रात्मिका। मध्यमा बाह्यापि सर्वत्र चतुरश्रैवेत्यर्थः।।24।।

The square shape shall be enclosed with wires on all four sides having a measurement of a danda. Once the area is thus fixed it shall be dug up with twelve angulas or even double the same as depth. They may be divided into three areas with twelve, eight or four angulas width. The first of these shall have the shape of a pit while the other two may be square shaped depths. (24)

योनिं पश्चिममेखलोपरि मितामर्काङ्गुलैरुच्छ्रया–
यत्योः सार्धयुगाङ्गुलैरपि तदूनैस्तैश्च विस्तारतः।
आम्नायाङ्गुलनालकां ससुषिरां स्वाख्यानयोग्याकृतिं
कुर्यात् कुण्डनतां स्वमूलपरिवृत्त्यग्रप्रक्लृप्त्यादिना।।25।।

विमर्शिनी

कुण्डानां योनिलक्षणमाह–योनिमिति। पश्चिममेखलोपरि पश्चिमदिग्भवानां मेखलानामुपरि उच्छ्र्यायत्योः उत्सेधे दैर्घ्ये च अर्काङ्गुलैः द्वादशाङ्गुलैर्मितां, विस्तारतः सार्धयुगाङ्गुलैः अर्धसहितयुगाङ्गुलैः। अर्काङ्गुलार्धं षडङ्गुलं, युगमङ्गुलं चतुरङ्गुलं, तैः दशाङ्गुलैरित्यर्थः। तदूनैः तस्मात् क्रमेणोनैः तैः सार्धयुगाङ्गुलैः। तत्राप्यर्धशब्देन षडङ्गुलमुच्यते। युगशब्देन चतुरङ्गुलं द्व्यङ्गुलं च। मध्ये दशाङ्गुलैः पुनः क्रमात् षडङ्गुलैश्चतुरङ्गुलैरग्रे द्व्यङ्गुलाभ्यां च मितां योनिं कुर्यात्। तथाच मञ्जर्याम्–

तालायता जलपतेर्दिशि संस्थिता स्यादश्वत्थपत्रसदृशा क्रमशोऽथ निम्ना।
नाभिर्दशाङ्गुलषडङ्गुलतः क्रमेण विस्तारतश्च चतुरङ्गुलगोलकाग्रा।।

इति। अथवा उच्छ्र्यायत्योः सार्धयुगाङ्गुलैरर्काङ्गुलैर्मिताम्। तत्पक्षे सार्धयुगाङ्गुलैरित्यस्यार्धसहितयुगाङ्गुलैस्त्र्यङ्गुलैरित्यर्थो भवति। ततः त्र्यङ्गुलसहितद्वादशाङ्गुलैः पञ्चदशाङ्गुलैरित्यर्थः। तत्र विस्तारतस्तदूनैः। अत्र तच्छब्देन युगाङ्गुलमेव गृह्यते। युग्माङ्गुलोनैः तैः दशाङ्गुलैरित्यर्थः। तैरिति द्वादशाङ्गुलैरिति चार्थः। तथाच प्रपञ्चसारे–

---

1. 'र इति ति'।

उत्सेधायामकाभ्यां प्रकृतिविकृतिसंज्ञाङ्गुलाष्टाङ्गुला स्याद्
विस्तृत्या द्वादशार्धाङ्गुलमितनमिताग्रा प्रविष्टेव कुण्डे।

इति। तथाच आम्नायाङ्गुलनालकां चतुरङ्गुलमितनालयुक्तां, ससुषिराम् अधोभागे परिस्तरणादिसिद्ध्यर्थं सुषिरेण युक्तां, स्वमूलपरिवृत्त्यग्रप्रक्लृप्त्यादिना स्वस्या योनेर्मूलप्रदेशस्य परिवर्तनेनाग्रक्लृप्त्यादिसंस्थानविशेषेण च स्वाख्यानयोग्याकृतिं स्वास्या योनेराख्यानस्य नाम्नः सदृशाकारयुक्तां, कुण्डनतां कुण्डे क्रमेणानतां च योनिं कुर्यात्।।25।।

विवरणम्

पश्चिममेखलोपरि योनिं कुर्यात् इति सम्बन्धः। उच्छ्रायायत्योरर्काङ्गुलैस्सार्धयुगाङ्गुलैरपि मितां उत्सेधे आयामे च केवलैर्द्वादशाङ्गुलैः परिमितां द्व्यङ्गुलाधिकैर्द्वादशाङ्गुलैः एकाङ्गुलाधिकैस्तैर्वा परिमितामित्यर्थः। युगस्यार्धमर्धयुगम्। युगशब्देन चतुस्संख्या द्विसंख्या वा लक्षयते। तदूनैस्तैश्च विस्तारतो मितां, तच्छब्देनार्धयुगं गृह्यते। अर्धं युगं येषान्तान्यर्धयुगानि चतुरङ्गुलानीति यावत्। तदूनैर[1]र्धाङ्गु-लैरष्टाङ्गुलैरित्यर्थः। अर्धं युगस्यार्धयुगं द्व्यङ्गुलं तदूनैर्दशाङ्गुलैरिति यावत्। तैश्चेति। केवलैर[2]र्काङ्गुलैर[3]पीति योज्यम्। इति त्रिधा योनेर्विस्तारायामावभिहितौ। ससुषिरामिति। मेखलासन्धौ परिस्तरणार्थं सुषिरं कार्यमित्यर्थः। स्वमूलपरिवृत्त्यग्र(प्र)क्लृख्यादिना स्वाख्यानयोग्याकृतिमिति सम्बन्धः। भागद्वयेऽपि त्रिदिक्स्पृक्सूत्रं कृत्वा तेनार्वाचीनदेशं भ्रमयेद्, इयं योनेर्मूलपरिवृत्तिः। अग्र[4]प्रक्लृप्तिरग्रप्रदेशस्य कुण्डे नतिः क्रमतनुता चेति।।25।।

Of the three regions of the west one should create a Yoni- architectural formula of orientation- with the length of twelve angulas and height of the top segment. Under that portion there shall be parts with eight angulas, with six angulas and with four angulas with a downward measurement. The one with four angulas with the shape of Yoni shall have a channel down towards the pit .This should be triangular one where small vessels for carrying ghee are to be put. (25)

क्षेत्रेऽत्राब्धिपुटे प्रतीच्यपुटयोः कर्णार्धसूत्रं निजं
संस्थाप्याप्पतिसन्धितः सुपरिवर्त्यार्कीन्दुसन्ध्यन्तिमम्।
ताभ्यां सूत्रयुगं प्रसार्य हरिदिग्बाह्य[5]हितेष्वंशत-
श्चिह्नेऽन्योन्यमिदं सुयोज्य शिखिकुण्डं योनिरूपं ख[6]नेत्।।26।।

---

1. 'रर्का' घ।
2. 'र्घा',
3. 'लैरिति',
4. 'ग्रक्लृ' च पाठः।
5. 'ह्यस्थि',
6. 'हु' क. पाठः।

विमर्शिनी

योनिरूपकुण्डलक्षणमाह–**क्षेत्र** इति। अत्र चतुरश्ररूपे अब्धिपुटे चतुष्पदे क्षेत्रे प्रतीच्यपुटयोः पश्चिमदिग्गतयोः पदयोर्निजं कर्णार्धसूत्रं तयोरेव निजं निजं कर्णार्धं सूत्रं मध्ये संस्थाप्य अप्पतिसन्धितः पश्चिमसन्धेरारभ्य आर्कीन्दुसन्ध्यन्तिमम् आर्किर्यमः इन्दुः सोमः तयोः सन्ध्यन्तिमं दक्षिणपदपध्ये स्थापितं सूत्रं वारुणासन्धेरारभ्य याम्यसन्ध्यन्तिमम्, उत्तरपदे स्थापितं सूत्रं वारुणसन्धेरारभ्य सौम्यसन्ध्यन्तिमं च परिवर्त्य ताभ्याम् (अर्के ?आर्की)न्दुसन्धिभ्यां सूत्रयुगं प्रसार्य हरिदिग्बाह्याहितेष्वंशतः इन्द्रदिक्सूत्रबाह्ये स्वदैर्घ्यपञ्चांशेन कृते चिह्ने इदं सूत्रद्वयम् (अन्योन्यं) सुयोज्य योनिरूपं योन्याकारं शिखिकुण्डं खनेत्।।26।।

विवरणम्

अथ योनिकुण्डमाह–**क्षेत्रेति**। चतुरश्रं प्रागायतोदगायतसूत्रयुतं क्षेत्रं विधाय नैर्ऋतखण्डे स्वकर्णार्धसूत्रस्य मूलं निधायाग्रेण स्वाग्निकोणादारभ्य स्ववायुकोणान्तं भ्रमयेत्। वायव्यखण्डे च तथा निर्ऋतिकोणादारभ्य शिवकोणान्तं भ्रमयेत्। तौ योनेर्मूलदेशौ भवतः। ततः पूर्वापरसूत्रस्य पञ्चमांशेन बहिः प्राग्दिश्यङ्कयित्वा वृत्तरेखाग्रयोस्तस्मिन्नङ्के च सूत्रे निधायास्फालयेत्। तद्योनेरग्रं भवति।।26।।

In a square plot with a daṇḍa in measurement on all sides draw a line in the centre to make it into four segments. In the centre of the two western segments by drawing a line from corner to corner make a circle. In the centre of the circles draw lines together to form a shape of a Yoni- womb, where a pit may be dug in the form a womb. On all sides the measure will be four daṇḍas each. (26)

क्षेत्रं विभज्य नवधोदगवाक् च भागौ
त्यक्त्वाचलांशकमितं परिवर्त्य सूत्रम्।
प्रागादिकाप्यककुबन्तमुदग्भुजां च
तावत् प्रसार्य रचयेच्छशिखण्डकुण्डम्।।27।।

विमर्शिनी

अर्धचन्द्राकारकुण्डलक्षणमाह–**क्षेत्र**मिति। दक्षिणोत्तरदैर्घ्यं क्षेत्रं नवधा विभज्योदगवाक् च भागौ उत्तरगतं दक्षिणगतं च भागं त्यक्त्वा अचलांशकमितं सप्ताशकमितं सूत्रं प्रागादिकाप्यककुबन्तं प्रागादिपश्चिमदिग्भागान्तं परिवर्त्य उदग्भुजां चोदग्गतं भुजासूत्रं च तावत् प्रसार्य शशिखण्डकुण्डं रचयेत्।।27।।

विवरणम्

अर्धवृत्तकुण्डमाह–**क्षेत्र**मिति पूर्ववत् चतुरश्रं क्षेत्रं कृत्वा दक्षिणोत्तरसूत्रं नवधा समं विभज्य तत्र दक्षिणोत्तरौ भागौ विहा[1]य परिशिष्टसूत्रपरिमितं सूत्रं गृहीत्वा तन्मूलं परिशिष्टसूत्रस्योदगग्रे निधायाग्रेण

1. 'घा'

प्रागारभ्य पश्चिमपर्यन्तं प्रादक्षिण्येन भ्रामयेत्। तदर्धं वृत्तस्य भवति। पुनस्तदुभयाग्रस्पृक् पूर्वापरसूत्रमास्फालयेत्। तदर्धचन्द्रं भवति।।27।।

By dividing a square plot with a measure of a daṇḍa into nine segments leaving away a segment each at the north and south directions, a cord extending to seven segments may be placed in the centre of the north. From the east such a cord may be placed up to west to form a semicircle. The cord at the north shall be extended to the centre to form a crescent shaped pit at the southern direction. (27)

षष्ठांशकं यमहिमांशुदिशोः प्रतीच्य-
सूत्रे सुयोज्य हरिदिग्बहिरङ्कयित्वा।
तेनैव तेषु सुविधाय च सूत्रपातं
कुर्यात् त्रिकोणपरिमण्डितवह्निकुण्डम्।।28।।

विमर्शिनी

त्रिकोणकुण्डलक्षणमाह-**षष्ठांशकमिति** चतुरश्रे चतुष्पदे क्षेत्रेप्रतीच्यसूत्रेपश्चिमसूत्रे यमहिमांशुदिशोः दक्षिणोत्तरदिशोः षष्ठांशकं क्षेत्रस्य षड्भागं सुयोज्याङ्कयित्वा हरिदिग्बहिः इन्द्रदिग्बाह्ये च तेनैव षड्भागेनाङ्कयित्वा तेषु चाङ्केषु सूत्रपातं सुविधाय त्रिकोणपरिमण्डितवह्निकुण्डं त्रिभिः कोणैरलङ्कृतं वह्निकुण्डं कुर्यात्।।28।।

विवरणम्

त्रिकोणमाह-**षष्ठांश(क)मिति**। तेनैव हरिदिग्बहिरङ्कयित्वेत्य[1]न्वयः। पश्चिमदिक्सूत्रे स्वषष्ठभागं दक्षिणोत्तरदिशोर्योजयेत्। तमेव भागं पूर्वापरसूत्राग्रे च योजयेत्। तेन मानेन तत्र तत्राङ्कं कुर्यादित्य[2]र्थः। अथ तेष्वङ्केषु त्रिषु त्रीणि सूत्राणि पातयेत्।।28।।

In a square plot of one daṇḍa on each side one sixth may be marked at the south and north. On the east put a mark taking one sixth and mark it. Draw the lines at south and north together and join the same as the west to form a triangular pit. (28)

कर्णार्धसूत्रस्य भुजार्धतोऽतिरिक्तांशकार्धं बहिरर्पयित्वा।
मध्यस्थसूत्रं परिवर्त्य कुण्डं कुर्वीत चण्डद्युतिमण्डलाभम्।।29।।

विमर्शिनी

वृत्तकुण्डलक्षणमाह-**कर्णार्धेति**। चतुरश्रे चतुष्पदे क्षेत्रे कर्णार्धसूत्रस्य कर्णसूत्रार्धस्य भुजार्धतः भुजासूत्रस्यार्धाद् अतिरिक्तः अधिको योंऽशः तस्यार्धं दिक्सूत्राद् बहिरर्पयित्वा योजयित्वा मध्यस्थसूत्रं क्षेत्रस्य मध्यसन्धिस्थं सूत्रं परिवर्त्य चण्डद्युतिमण्डलाभम् आदित्यमण्डलाकारं वृत्तकुण्डं कुर्वीत।।29।।

---

1. 'त्वेति भावः। प'।
2. 'र्थ। ते'।

विवरणम्

वृत्तकुण्डंदर्शयति-**कर्णार्धसूत्रस्येति**। दक्षिणदिक्सूत्रं भुजाभिधीयते। पश्चिमदिक्सूत्रं कोटिः। तदुभयाग्रस्पृक् कोणसूत्रं कर्णः। कर्णार्धपरिमितं सूत्रं भुजायां समं निदध्यात्। तत्र भुजार्धतो यावदतिरिच्यते तदर्धमात्रसूत्रेण पूर्वापरसूत्रस्य दक्षिणोत्तरसूत्रस्य च मूलाग्रेषु चतुरोऽङ्कान् विधाय तदङ्कस्पृग्वृत्तं निदध्यात्।। 29।।

Taking the middle of a square plot divided into two halves the cord is to be extended in a circular way to form a circular pit in the lower half of the plot looking like the orb of the sun. (29)

अङ्कौ प्रकल्प्य हरिपञ्चमदिक्पदिक्स्थौ
षष्ठांशतो बहिरतो निजमध्यतंश्च।
द्वौ द्वौ झषौ प[1]रदिशोरपि मत्स्यचिह्न-
षट्सूत्रकैर्विरचयेद् रसकोणकुण्डम्।।30।।

विमर्शिनी

षट्कोणकुण्डलक्षणमाह-**अङ्काविति**। चतुरश्रे चतुष्पदे क्षेत्रे क्षेत्रस्य षष्ठांशतः हरिपञ्चमदिक्पदिक्स्थौ हरिरिन्द्रः तत्पञ्चमो वरुणः अथवा हरिर्यमः तत्पञ्चमः सोमः तयोर्दिक्पयोः दिक्स्थितौ बहिः बाह्यभागे अङ्कौ प्रकल्प्य अतः अस्मात् अङ्कद्वयात् निजमध्यतः क्षेत्र[2]मध्यगत[3]सन्धेश्च सूत्रप्रस[4]रणेन परदिशोः, प्राक्प्रत्यग्भागगतावङ्कौ चेद् दक्षिणोत्तरदिशोः दक्षिणोत्तरदिग्गतावङ्कौ चेत् प्राक्प्रत्यग्दिशोः द्वौ द्वौ झषो मत्स्यावपि प्रकल्प्य मत्स्यचिह्नषट्सूत्रकैः चतुर्षु मत्स्येषु द्वयोश्चिह्नयोश्च विहितैः षड्भिः सूत्रकैः रसकोणकुण्डं षट्कोणकुण्डं विरचयेत्।।30।।

विवरणम्

षट्कोणकुण्डक्लृप्तिमाह-**अङ्काविति**। हरिरिन्द्रः, तस्य पञ्चमो दिक्पो वरुणः। षष्ठांशतः पूर्वापरसूत्रस्यैव षष्ठेन भागेन। अतो निजमध्यतश्चेति। आभ्यामङ्काभ्यां पूर्वापरसूत्रमध्याच्चेत्यर्थः। हरिवरुणदिगपेक्षयायं परशब्दः। यमशशिदिशोरिति यावत्। एतदुक्तं भवति। पूर्वापरसूत्रं निजं षोढा विभज्य तद्भागपरिमितसूत्रेण पूर्वापरसूत्रस्य मूलादग्राच्च बहिरङ्कौ कुर्यात्। पश्चिमाङ्के सूत्रं विन्यस्य मध्याङ्कपर्यन्तं सूत्रं प्रसार्य तेन सूत्राग्रेण दक्षिणत उत्तरतश्च क्षेत्रात् बहिरङ्को कृत्वा मध्याङ्के तदेव सूत्रं विन्यस्य तयोरङ्कयोरङ्कयेत्। तौ द्वौ पश्चिममत्स्यौ भवतः। एवमेव प्रागङ्कमध्याङ्काभ्यां क्षेत्रात् बहिरेव दक्षिणत उत्तरतश्च द्वौ पूर्वमत्स्यौ स्याताम्। ततो द्व[5]योर्द्वयोरङ्कयोः सूत्राणि विधाय षट्सूत्राणि समन्तत

---

1. 'रि' क. ग. घ. पाठः।
2. 'त्रे'
3. 'तः' ख. घ. च. पाठः।
4. 'रेण' प घ. च. पाठः।
5. 'द्वयोर' क. घ. पाठः।

आस्फालयेद् इति। एवं सति पश्चिमे कोणे योनिः स्यात्। अथवा हरिशब्दो यमवचनः। ततः पञ्चमो दिक्पश्च सोमः। शेषं तदनुसारेण योज्यम्। तथा हि सति पश्चिमसूत्रे योनिर्लभ्यते।।30।।

In the square plot marking one sixth of the area and marking at the direction of east and west create the shape of two fishes by joining together the spots in the middle of the line. By drawing lines to join the shapes of fishes one can make two hexagonal pits. (30)

क्षेत्रं प्रकल्प्य फणिभागयुतं समन्तात्
तद्बाहुसूत्रदलतोऽथ परिभ्रमय्य।
आख्यास्यमानविधिनाष्टदलं लिखित्वा
खात्वा प्रकल्पयतु पद्मनिभं च कुण्डम्।।31।।

विमर्शिनी

पद्माकारकुण्डलक्षणमाह-**क्षेत्रमिति**। पूर्वोक्तं क्षेत्रं समन्तात् चतुर्दिक्ष्वपि फणिभागयुतं स्वस्याष्टभागसहितं प्रकल्प्याथ तद्बाहुसूत्रदलतः तच्चतुरश्रीकृतक्षेत्रस्य भुजासूत्रस्यार्धेन परिभ्रमय्य वृत्तीकृत्य आख्यास्यमानविधिना मण्डलनिर्माणे वक्ष्यमाणविधानेनाष्टदलं लिखित्वा खात्वा पद्मनिभं कुण्डं च प्रकल्पयतु।।31।।

विवरणम्

पद्माकारं कुण्डमाह–**क्षेत्रं प्रकल्प्येति**। वृत्तकुण्ड इव अष्टमभागेन चतुर्दिक्षु अङ्कान् विधाय तेषु वृ[1]त्तान्निष्पाद्य वक्ष्यमाणाष्टदलनिष्पत्तिरीत्याष्टौ दलानि विलिखेदित्यर्थः।।31।।

By dividing a square plot into eight parts take one part to form a separate square. With the marginal lines of that square one can draw a lotus shaped pit by digging up at the northern direction. (31)

क्षेत्रे तत्र समन्ततो दिनकरांशं न्यस्य तुर्यश्रिते
कोणेभ्यो भुजसूत्रकेषु निहितैः स्वैः कर्णसूत्रार्धकैः।
द्वौ द्वौ दिक्षु झषान् प्रकल्प्य मकरेष्वास्फालितैरष्टभिः
सूत्रैरीश्वरदिङ्मुखे विरचयेदष्टाश्रकुण्डं सुधीः।।32।।

विमर्शिनी

अष्टाश्रकुण्डलक्षणमाह-**क्षेत्र इति**। चतुरश्रे क्षेत्रे समन्ततः चतुर्दिक्ष्वपि दिनकरांशं स्वस्य द्वादशांशं न्यस्य योजयित्वा तुर्यश्रिते चतुरश्रीकृते सति चतुर्भ्यः कोणेभ्योऽपि भुजसूत्रकेषु कोणानामुभय-दिग्गतभुजासूत्रकेषु निहितैः निक्षिप्तैः स्वैः स्वीयैः कर्णसूत्रार्धकैः चतसृषु दिक्षु द्वौ द्वौ एवं समुदायतोऽष्टौ झषान् मत्स्यान् प्रकल्प्य मकरेषु म[2]त्स्येष्वास्फालितैरष्टभिः सूत्रैरष्टाश्रकुण्डं विरचयेत्। ईश्वरदिङ्मुखे सुधीरिति पदयोः तत्तद्दिशि तत्तद्योग्यमेव कुण्डं विरचयेदित्यभिप्रायः।।32।।

1. 'तिं' क. पाठः।
2. 'ध्ये' ङ. पाठः।

विवरणम्

अथाष्टकोणकुण्डप्रक्रियामाचष्टे–क्षेत्रे तत्रेति। चकुरश्रं क्षेत्रं कृत्वा तस्य बहिः समन्तात् स्वद्वादशांशं प्रक्षिप्य दिक्सूत्रैरपरं चतुरश्रं विधाय तस्य बाह्यचतुरश्रस्य यत् कर्णसूत्रं तदर्धमितं सूत्रं गृहीत्वा तन्मूलमग्निकोणे निधायाग्रेण दक्षिणदिक्सूत्रे पूर्वदिक्सूत्रे च मत्स्यौ कुर्यात्[1]। पुनस्तेनैव सूत्रेण निरृतिकोणादिषु निहितेन यथोक्तरीत्या मत्स्यान् कुर्यात्। एवं प्रतिदिशं द्वौ द्वौ मत्स्यौ जातौ भवतः। पुनस्तेषु मत्स्येष्वष्टौ सूत्राणि कुर्यात्। निजनिजतृतीयमत्स्यसन्निपाते ह्यष्टौ सूत्राणि भवेयुः। तदाष्टकोणं क्षेत्रं सम्पन्नं भवति।।32।।

An expert in making sacrificial pits with different forms shall take up a square plot. One twelfth of a part may be marked apart to form another square. From the centre of that square extending lines to four directions and to the centre two shapes of fishes can be made. By joining the different points of these designs one can form an octagonal pit at the north east location. (32)

दोर्मात्रकुण्डे विधिरेष शेषेषून्नीय तन्वीत समस्तमस्मात्।
कुण्डानि तत्तद्धवनोपपत्त्या द्वित्रादिदोरत्रिमितान्यपि स्युः।।33।।

विमर्शिनी

एष विधिः दोर्मात्रकुण्डे हस्तमिते कुण्डे स्यात्। शेषेषु द्विहस्तादिषु अर्धहस्तादिषु अस्माद् एकहस्ताद् उन्नीय अतिदिश्य समस्तं गर्तमेखलायोन्यादिकं तन्वीति। तत्तद्धवनोपपत्त्या तत्तद्धोमसंख्यातारतम्येन द्वित्रादिदोरत्रिमितानि द्विकरत्रिकरादिमितानि अर्धकरादिमितानि च कुण्डानि स्युः।।33।।

The prescription given here for pits of one daṇḍa (in square). For other types appropriate changes may be effected depending on the types of sacrifices requiring two, three or half a daṇḍa in measure. (33)

कुर्यात् स्रुवं खदिरजं द्विजदारुजं वा
मित्राङ्गुलं शशधराङ्गुलमस्य वक्त्रम्।
अङ्गाग्निनेत्रयवदीर्घवितानानिम्न-
गर्तद्वयं यवदलाहितनेमिवीतम्।।34।।
मूलाग्रशातयवनिम्नबिलार्गलाढ्य-
माश्यानपङ्कगतधेनुप[2]दोप[3]मं च।
मूले यवाष्टकततं यवहीनमग्रे
दण्डं सुवर्तुलमिलायववेष्टनाग्रम्।।35।।

---

1. 'ताम्'। क. पाठः।
2. 'खुरोप'
3. 'मानम्' क. पाठः।

विमर्शिनी

होमसाधनकुण्डलक्षणमभिधाय पुनः स्रुवादीनां लक्षणमाह-**कुर्यादिति**। खदिरजं खदिरोद्भवं द्विजदारुजं वा पलाशोद्भवं वा मित्राङ्गुलं द्वादशाङ्गुलं स्रुवं कुर्यात्। अस्य स्रुवस्य वक्त्रं शशधराङ्गुलं एकाङ्गुलं कुर्यात्। अङ्गाग्निनेत्रयवदीर्घवितानिम्नगर्तद्वयं तद्वक्त्रं तु षड्यवदीर्घं त्रियवविस्तारं द्वियवनिम्नं च गर्तद्वयेन युक्तं च यवदलाहितनेमिवीतम् अर्धयवेन कृतया नेम्या परिवृतं च मूलाग्रशातयवनिम्नबिलार्गलाढ्यं मूलाग्रयोः कार्श्यर्युक्तेन यवमात्राधोगतेन बिलमध्यस्थेन रेखारूपेणार्गलेन युक्तम्, आश्यानपङ्कगतधेनुपदोपमम् ईषदाद्रपङ्कस्थितेन पशोः पदचिह्नेन समानं च। अस्य दण्डं सुवर्तुलं कुर्यात्। तस्य मूले यवाष्टकततम् अङ्गुलमात्रविस्तारयुक्तम्। अग्रे दण्डाग्रे ततो यवहीनं सप्तयवविस्तृतम्। इलायववेष्टनाग्रं दण्डाग्रे एकयवप्रमाणेन वलयाकारेण वेष्टनेन युक्तं च।।34-35।।

विवरणम्

कुण्डलक्षणानन्तरं स्रुवादिलक्षणमाह-**कुर्यात् स्रुवमिति**। द्वादशाङ्गुलातान- मङ्गुलवितानमृजुं काष्ठं विधायाङ्गुलेन मुखं विरचयेत्। तत्र द्वे गर्ते स्याताम्। तयोः षड्यवा आतानं त्रयो वितानः द्वाववगाहः। अर्धयवेन द्वयोस्सह समन्ततो नेमिः। गर्तयोरर्गला च कार्या। सा च मूलाग्रयोः क्रमेण सूक्ष्मा यवमात्रेण निम्ना च भवति।।34।।

इलायववेष्टनाग्रमित्येकेन यवेन दण्डमुखसन्धौ परिवेष्टनं कुर्यादित्यर्थः।।35।।

Sruva - the sacrificial ladle (for pouring ghee on the sacrificial fire) with the wood of Khadira or Palāśa with a length of twelve angulas. The mouth portion shall have a width of one angula or length of six yava, width of three yava with two cavities on either side (left and right) having a depth of two yavas. Around the side of these shall be a ridge. The shape of the pit shall be conical. In between the two pits there shall also be a ridge of a height of one yava. A round shaped handle also be a part of the ladle with eight yavas width at the bottom and seven yavas at the tip. The mouth shall have the appearance of the hoof of a cow. (34-35)

मार्ताण्डाङ्गुलदैर्घ्यतच्छरदशांशव्यासतीव्रा जुहू-
र्ब्राह्म्यायामशरांशतोऽत्र चतुरश्रं पुष्करं कल्पयेत्।
अद्र्यंशाहितमेखलावृतपदांशाखातगर्तान्वितं
तस्याग्रे गलमर्धविस्तृतितदर्धायामताभ्युज्ज्वलम्।।36।।

विमर्शिनी

जुहूलक्षणमाह-**मार्ताण्डेति**। ब्राह्मी पालाशी। मार्ताण्डाङ्गुलदैर्घ्यतच्छरदशांशव्यासतीव्रा द्वादशाङ्गुलदीर्घा दैर्घ्यपञ्चांशविस्तारा दैर्घ्यदशांशघना च जुहूः स्यात्। अत्र जुह्वाम् आयामशरांशतः दीर्घात् पञ्चभागेन चतुरश्रं पुष्करसंज्ञं स्थानं कल्पयेत्। तत्तु अद्र्यंशाहितमेखलावृतपदांशाखातगर्तान्वितं पुष्करस्य सप्तांशेन कृतया मेखलयावृ(ता?तं) चतुर्थांशनिम्नेन गर्तेन चान्वितम्। तस्य पुष्करस्याग्रे अर्धविस्तृतितदर्धायामताभ्युज्ज्वलं पुष्करार्धप्रमाणविस्तारेण तदर्धमानदैर्घ्येण चाभ्युज्ज्वलं दीप्तं गलं च कुर्यात्।।36।।

विवरणम्

पञ्चांशतो विस्तारः। दशांशतो घनम्। ब्राह्मी पलाशुद्रुमविकारः। यत्र हविरवदीयते तत्पुष्करं नामाभिधीयते। पदांशश्चतुर्थांश। घनचतुर्थांशेन गर्तनिम्नमित्यर्थः। तस्याग्र इत्यनेन पुष्करभागान्तर्गतमेव गलं न पृथगित्यपि दर्शितम्। स्वविस्तारादर्धेन गलविस्तारः। ततोऽप्यर्धेनायामः। त्रिपादेन चतुर्धा भक्ते त्रिभिर्भागैर्मूलविस्तारः। एकेनाग्रविस्तारः।।36।।

Juhū - the sacrificial spoon (a crescent shaped wooden ladle) shall be made of Palāśa twig, with twelve angulas in length and one fifth of the same as width. The thickness shall be half the width. On the upper part of half of the length there shall be a square shaped cavity called Puṣkara with one fifth of the length (of the upper half). One seventh of the width of Puṣkara be taken to form a Mekhalā-ridge and the depth shall be half the thickness. At the top with half width and half of it as length shall be shaped a gala- the neck portion. (36)

पञ्चांशायततत्त्रिपादशशिपादव्यासमूलाग्रकं
कुर्याद् व्यासगुणांशखातघृतकुल्योल्लासितं तन्मुखम्।
तच्छिष्टेन सुवृत्तपुष्करदलव्यासाढ्यमूलानलां-
शोनव्यासयुताग्रकं विरचयेद् दण्डं च गोपुच्छवत्।।37।।

विमर्शिनी

तन्मुखं तु गलोपरि पञ्चांशायततत्त्रिपादशशिपादव्यासमूलाग्रकं स्वदैर्घ्यपञ्चांशेनायतम् आयतत्रिपादविस्तारयुक्तमूलम् एकपादविस्तारयुक्ताग्रं च, तथा व्यासगुणांशखातघृतकुल्योल्लासितं स्वविस्तारत्रिभागखातया घृतकुल्यया चोल्लासितं शोभितं च कुर्यात्। तच्छिष्टेन पुष्करगलमुखेभ्यः शिष्टेन दण्डं च विरचयेत्। तं तु सुवृत्तपुष्करदलव्यासाढ्यमूलानलांशोनव्यासयुताग्रकं शोभनवृत्तं पुष्करार्धविस्तारमूलं तत्त्रिभागोनविस्तारयुक्ताग्रं गोपुच्छवद् गोपुच्छसदृशं विरचयेत्।।67।।

विवरणम्

पुष्करदलव्यासाढ्यं यस्य मूलं पुष्करदलादनलभागोनव्यासयुतं यस्याग्रमिति समासः।।37।।

There shall be a channel for the flow of ghee from the bottom to the mouth portion of Puṣkara with one third widths at the base, half of that at the middle and one fourth width at the top. The handle should be round and the overall appearance shall be like that of the tail of a cow. (37)

हस्तायामयु[1]गांशविस्तृतितदर्धोत्सेधयुक्ता महा-
स्रुक् स्याद् विस्तृतिदीर्घपुष्करगुणांशाखातवृत्तावटा।
बाह्याद्यर्धतदर्धतद्दलवशाच्छेषे चतुर्धा कृते
कुर्यात् तद्रशनात्रयं त्रिभिरथान्तस्थैः क्रमादंशकैः।।38।।

1. 'पदांश' ख पाठः।

विमर्शिनी

महास्रुग्लक्षणमाह–हस्तायामेति। हस्तायामयुगांशविस्तृतितदर्धोत्सेधयुक्ता करमात्रायामा षडङ्गुलविस्तारा त्र्यङ्गुलघना च महास्रुक् स्यात्। सा तु विस्तृतिदीर्घपुष्करगुणांशाखातवृतावटा स्वविस्तारसमदीर्घे चतुरश्ररूपे पुष्करे तत्त्रिभागखातेन वृत्तरूपेणावटेनोपलक्षिता च। शेषे अवटच्छिष्टे पुष्करे बाह्याद्यर्धतदर्धतद्दलवशात् बहिरारभ्यार्धे तदर्धे तस्याप्यर्धे च चिह्नं कृत्वा चतुर्धा कृते अथान्तस्थैः त्रिभिरंशकैः क्रमात् तद्रशनात्रयं तस्यावटस्य मेखलात्रयं कुर्यात्।।38।।

विवरणम्

युगांशो हस्तचतुर्थांशः। षडङ्गुल इति यावत्। तदर्धं त्र्यङ्गुलं विस्तृतिपरिमितदीर्घे पुष्करे गुणांशेनाखातं वृत्तमवटं यस्य इति समासः। षडङ्गुलं समचतुरश्रं पुष्करं कल्पयित्वा तन्मध्ये तृतीयांशेन विस्तृतां गर्तं वृत्तरूपं विदध्यादित्यर्थः। अथ शेषे चतुर्धा विभक्ते सति अन्तस्थैः त्रिभिः भागैर्मेखलात्रयं कुर्यात्। विस्तारेण[1] चतुर्धाकरणक्लृप्तिमाह–बाह्याद्यर्धतदर्धतद्दलवशादिति। प्रथमं बहिरर्धं ततोऽन्तर्भागस्यार्धं ततोऽप्यन्तर्भागस्यार्धं इत्येवंक्रमेणेत्यर्थः।।38।।

Mahāsruk- the larger ladle shall have a length of one daṇḍa, width of six angulas and thickness of three angulas (using Khadira or Palāśa wood). The part called Puṣkara shall have the length equal to the width, with a depth of one third of the width with a circular shape. The space over and above the depth shall be divided into half outside and one fourth inside and further one eighth inside. The three parts inside make it into three regions. (38)

बाह्येऽर्धे त्रियवं तदर्धमपरेंऽशे तद्दलं चान्यतः
संशोध्यावटमेखलां सुपरिवृत्तां पीठमब्जोज्ज्वलम्।
दण्डं त्र्यंशततं गलं ससुषिरं पादत्रिभागाततिं-
व्यासं पादविहीनपुष्करमितं कुर्याज्जुहूवन्मुखम्।।39।।
कर्षार्धं घृतमोदनं प्रजुहुयाद् ग्रासार्धकं मुष्टिगान्
लाजान् स्वप्रसृतिप्रमान् सपृथुकाञ्छालीन् यवांस्तण्डुलान्।
सक्तून् कर्षमितान् समुद्ग[2]तिलसिद्धार्थाह्वयान् पञ्चशो
दूर्वाग्राणि पुनस्त्रिशो दधिपयःक्षौद्रादि शुक्त्युन्मितम्।।40।।

विमर्शिनी

तत्र बाह्ये अर्धे त्रियवम् वापरे अंशे तदर्धम् एकार्धयवम् अन्यतस्तदन्तस्तु तद्दलं पादोनयवं च संशोध्य संतक्ष्य अवटमेखलाम् अवटपरिवृतां मेखलां सुपरिवृत्तां शोभनवृत्तोपेतां कुर्यात्। इतरे चतुरश्रे चेत्यर्थाद् भवति। पीठं मेखलाभ्योऽवशिष्टं स्थानमब्जोज्जवलं पद्मेन शोभितं च कुर्यात्। दण्डं त्र्यंशततं

1. 'ण कलृ घ. पाठः।
2. 'द्गयवसि' ख पाठः।

द्व्यङ्गुलविस्तृतं च दण्डं कुर्यात्। गलं पुष्करादुपरि गतं कण्ठं पादत्रिभागाततिव्यासं पादेन सार्धैकाङ्गुलायामेन त्रिभागेनाङ्गुलद्वय[1]विस्तारेण च युक्तं ससुषिरं घृतमार्गसुषिरयुक्तं च कुर्यात्। मुखं तदूर्ध्वभागं तु पादविहीनपुष्करमितं सार्धचतुरङ्गुलमितं जुहुवद् घृतकुल्यादिसमन्वितं च कुर्यात्।।39।।

होमद्रव्याणां प्रमाणमाह–**कर्षार्धमिति**। घृतं कर्षार्धम्। कर्षः पलाच्चतुर्भागः तदर्धं प्रजुहुयात्। ओदनमन्नं ग्रासार्धं ग्रासस्यार्धं, लाजान् मुष्टिगान्, पृथुकान् शालीन् तण्डुलान् यवांश्च स्वप्रसृतिप्रमान् स्वकरप्रसृतिमितान्, अङ्गुल्यग्रैरुद्धृता प्रसृतिः, सक्तून् कर्षमितान्, मुद्गतिलसिद्धार्थान् पञ्चशः, दूर्वाग्राणि त्रिशः, दधिपयःक्षौद्रादिद्रवद्रव्यं शुक्त्युन्मितं, पुष्पफललड्डुकापूपादीन्येकैकशश्च जुहुयात्।।40।।

विवरणम्

तेषां निम्नमाह–**बाह्यार्ध** इति। संशोधनं त्यागः। पीठं बाह्यतमो भागः। पादत्रिभागाततिव्यासमिति गलविशेषणम्। चतुर्थांशेन गलायामः। तृतीयांशेन तद्विस्तारश्च। पादहीनपुष्करमितं कुर्याज्जुहूवन्मुखमिति। पुष्करमानचतुर्थांशहीनं मुखातानं मानं भवति। जुहूवदिति त्रिपादशशिपादव्यासमूलाग्रत्वं व्यासगुणांशखातघृतकुल्यावत्त्वं चोक्तम्। ओदनं हविः।।39-40।।

Of the several regions the outer three shall have three yavas; the second shall have one and a half yavas. These portions shall be chiseled to form a circular cavity (made of all the three regions). There shall be a Pīṭha of the shape of an eight petalled lotus with half a portion of a region. There shall be a daṇḍa with one third thickness of Puṣkara. The gala- neck- portion above shall have a hole with one fourth lengths of the Puṣkara and one third widths. Gala will have one and a half aṅgula in length with a width of two angulas. There shall be a channel to facilitate the flow of ghee as in the case of Juhū. At the base, the width shall be one third of the length and at the ṭop one fourth of the same. (39)

Ghee having the measure of half a Karṣa (equivalent to the weight of eight kidney beans); havis-cooked rice; half a rice ball (morsel); a handful of lāja (parched rice); flattened rice; yava and rice that can be held in a palm are the items to be put in sacrificial fire. Further, fried and powdered rice enough to be held in a palm, Mudga (green peas, Phaseolus mungo), sesamum and mustard- five seeds each; three blades of Dūrvā grass, curd , milk and honey measured with the shell of pearl are also to be used for sacrificial oblations. (40)

एकद्विसागरकरप्रमितानि तानि
स्युर्भद्रकप्रकृतिकान्यथ मण्डलानि।
चक्राम्बुजं द्विकरमप्यवरं वरिष्ठं
तद् वेददोःप्रभृतिपन्नगहस्तनिष्ठम्।।41।।

---

1. 'त्र' ङ. पाठः।

विमर्शिनी

मण्डलानां लक्षणमाह–**एकेति**। अथ तानि अधिवासपटले प्रस्तुतानि भद्रकप्रकृतिकानि भद्रकमूलानि मण्डलानि एकद्विसागरकरप्रमितानि एकद्विचतुष्करमितानि अधममध्यमोत्तमक्रमेण स्युः। चक्राम्बुजमपि द्विकरम्। अवरम् अधमम्। वेददोःप्रभृतिपन्नगहस्तनिष्ठं चतुष्करादि अष्टहस्तावसानं तत् चक्राब्जं क्रमोत्कर्षेण वरिष्ठम् उत्तमं स्यात्।।41।।

विवरणम्

इदानीं मण्डलानि लिलक्षयिषुः तेषां प्रमाणं प्रकृतिविकृतिभावञ्चाह–एकेति। मण्डपविस्तारापेक्षया मण्डलपरिमाणविकल्पः। भद्रकं प्रकृतिरितरेषां भवति तत्रैव दलव्युत्पादनादिसौकर्यात्। अवरमिति। एकहस्तं तु नेष्यते इत्यर्थः।।41।।

The diagrams to be drawn (using colourful powder) are those named Bhadraka, Śaktidaṇḍa and Ṣaḍḍala- these with a square of one, two or four daṇḍas. Lesser ones are Cakrābja with two dandas etc., though they could be drawn bigger with the measurements of four, six, eight hastas in square. (41)

विकृतिकृतिपुटे षट्त्रिंशतान्तःस्थकोष्ठै-
र्नलिनमवनिपङ्क्त्या पीठिका वीथिकाथ।
पुटयुगपरिक्लृप्ता द्वारशोभोपशोभा-
श्रियुतपुटयुगल्या मुद्रिता भद्रके स्यात्।।42।।

विमर्शिनी

विकृतिकृतिपुटे विकृतयः षोडश तासां विकृतीनां कृतिर्वर्गः आयामतो विस्तारतश्च षोडशपुटे क्षेत्रे इत्यर्थः। अत्रायं भावः– 'प्रागग्रं सूत्रमुर्व्यामि'ति श्लोकोक्तप्रकारेण चतुरश्रं चतुष्पदं स्वेष्टमानमितं क्षेत्रं कृत्वा तेषु चतुर्षु कोणकोष्ठेषु कोणसूत्राण्युभयथाप्यास्फाल्य तन्मध्ये प्रागग्रमुदगग्रं च सूत्रमास्फाल्य चतुष्पुटं कृत्वा तत्कोणकोष्ठेष्वपि तथा कोणसूत्राण्यास्फाल्य तथा तन्मध्ये च दिक्सूत्राण्यास्फाल्य एवंक्रमेण षोडशपुटानि प्रत्यक्प्रागायतानि दक्षिणोतरायतानि च यथा भवन्ति तथा कृत इति। तत्र भद्रके षट्त्रिंशतान्तःस्थकोष्ठैः अन्तर्गतैः षट्त्रिंशत्कोष्ठैः नलिनं पद्मक्षेत्रं स्यात्। अवनिपङ्क्त्या पद्मस्य परितो गतयैकपङ्क्त्या पीठिका च। अथ पुटयुगपरिक्लृप्ता तत्पीठ[1]बाह्यगतेन पुटद्वयेन परितः क्लृप्ता वीथिका च तथा तद्बाह्ये द्वारशोभोपशोभाश्रियुतपुटयुगल्या द्वारशोभोपशोभाश्रिभिः युतया पुटद्वय्या मुद्रिता च वीथिका स्यात्।।42।।

विवरणम्

विकृतिकृतिपुटे षोडशवर्गपुटोपेते प्रागग्रैरुदग्रैश्च सप्तदशभिः सूत्रैस्सम्पादितक्षेत्र इति यावत्। षट्त्रिंशतान्तस्स्थकोष्ठैः पूर्वपरदक्षिणोत्तरसूत्रसन्धेः समं ततस्त्रिभिः त्रिभिः पुटैरित्यर्थः। ततो बहिरेकया परितः पङ्क्त्या पद्मस्य पीठिका, ततो द्वाभ्यां पङ्क्तिभ्यां एका परितो वीथिः। मुद्रितेति

1. 'ठाद्वाह्य'।

वीथिविशेषणत्वेनोक्तम्। वीथेरपि परितो बहिरवशिष्टपङ्क्तिद्वयेन द्वारादिकमित्यर्थः। तत्र चतुर्दिक्षु द्वाराणि। प्रतिद्वारं अभितः शोभे, शोभानां पार्श्वत उपशोभाः ततः कोणमिति विवेकः।।42।।

For the diagram called Bhadraka lines may be drawn east west and south north with sixteen lines to form a total of 256 segments. With the 36 segments in the middle an eight petalled lotus may be shaped. On the outer side of this taking one segment with a line a Pīṭha shall be made. Outside of this two lines may be used to form a corridor. Outside of this corridor shall be formed doors, embellishments called Śobha and Upaśobha and corners for which two lines each may be utilised. (42)

अब्जक्षेत्रे यवांशं बहिरिह परितोऽपास्य वृत्तीकृतेऽर्धे
मित्रांशेऽग्रार्थमन्तः सुसममथ चतुर्धा विभक्ते दलार्थम्।
सन्ध्यर्थं केसरार्थं भ्रमयतु परितः कर्णिकार्थं च सूत्रं
दिक्कोणाभ्यन्तरेऽ[1]टौ क्षिपतु च परितस्तत्र सूत्राणि तिर्यक्।।43।।

विमर्शिनी

अब्जक्षेत्रे मध्यगते पद्मक्षेत्रे बहिर्यवांशं यवमात्रमशं परितोऽपास्य त्यक्त्वा वृत्तीकृते इहार्धे मित्रांशे द्वादशांशे च अग्रार्थं दलाग्रार्थम्, अन्तः तदन्तर्भागे चतुर्धा सुसमं विभक्ते सति बाह्यादारभ्य परितो दलार्थं सन्ध्य[2]र्थं दलसन्ध्यर्थं, केसरा[3]र्थं केसरसीमार्थं, कर्णिकार्थं च सूत्रं भ्रमय[4]तु वृत्तीकरोतु। तत्र दिक्कोणाभ्यन्त[5]रे दिक्षु कोणाभ्यन्तरालेष्वपि अष्टौ तिर्यक् सूत्राणि च परितः क्षिपतु।।43।।

विवरणम्

इह यवांशं परितोऽपास्य वृत्तीकृते अब्जक्षेत्रे अर्धे अग्रार्थं मित्रांशे अथान्तर्दलार्थं सन्ध्यर्थं केसरार्थं कर्णिकार्थं च सुसमं चतुर्धा विभक्ते परितः सूत्रं भ्रमयत्वित्यन्वयः। मित्रांशे इत्यत्रापि मित्रांशेऽपि विभक्त इति सम्बन्धः। व्यधिकरणे च सप्तम्यौ। विभक्त इत्येतत्त्वर्ध इत्यस्य विशेषणम्। एतदुक्तं भवति। पद्मक्षेत्रे परितो यवमात्रं वर्जयित्वा वृत्तं कुर्यात्। ततः प्राचीनसूत्रार्धे चतुरोऽङ्कानालिखेत्। प्रथमं द्वादशांशेन अग्रेऽङ्कं कृत्वा ततश्शिष्टचतुर्भागेन त्रयोऽङ्काः कार्याः। तत्र अग्रतो भागो दलाग्रार्थः। तत्पश्चिमो दलार्थः। तत्पश्चिमो दलसन्ध्यर्थः। ततः केसरार्थो भागः। मध्यगतः कर्णिकार्थः। अथ मध्यात्तेष्वङ्केषु सूत्राग्रं निधाये चत्वारिवृत्तानि समन्ततो निष्पादयेदिति। दिक्कोणाभ्यन्तरेष्विति। यद्यपि पूर्वापरं दक्षिणोत्तरं कर्णसूत्रे च प्रागेवाभूतां तथापि वृत्तीकरणादिना विनाशात् पुनरपि तान्यभिव्यक्त्यर्थमास्फालनीयानि। तानि च दलमध्यसूत्राणि तेषामन्तरालेषु चाष्टौ सूत्राणि सम्पादनीयानि। तानि च दलसीमासूत्राणि भवन्ति।।43।।

---

1. 'ष्ट' इति, मूलकोशपाठः।
2. 'र्थं के'
3. 'र्थं क'
4. 'तु । त' ख. घ. च. पाठः।
5. रेषु' घ. पाठः।

In the Abjakṣetra–the area formed with 36 segments (in the shape of a lotus) taking a distance of one yava outside a circle may be made. In the middle or the centre of the circle one tenth shall be taken for dalāgra- end of a petal. Inside of the lotus may be divided in to four to form dala, dalasandhi, kesara and karṇikā (all parts of the lotus like petal, joint of petals, filament and pericarp of lotus). For this an additional five circles have to be shaped by moving the cord. Then in between the corners also eight lines may be drawn which are to cross the areas like kesara, dalasandhi and Vṛtta. (43)

अग्रादिसन्धिचरमं दलमध्यसंस्थं
सूत्रं सुवर्त्य परिलिख्य दलं तदग्रम्।
तत्सूत्रसम्मुखतयान्तिमवृत्तसंस्थं
तन्मात्रासूत्रमभिवर्त्य लिखेद् द्विपार्श्वे।।44।।

विमर्शिनी

पुनर्दलमध्यसंस्थं दलानां मध्यगतसूत्रस्थितं सूत्रम् अग्रादिसन्धिचरमं दलाग्रगतवृत्तादारभ्य दलसन्ध्यन्तं सुवर्त्य दलं परिलिख्य तदग्रं दलाग्रं तु तत्सूत्रसम्मुखतया दलसूत्राभिमुख्येन[1] अन्तिमवृत्तसंस्थम् अन्तिमवृत्तस्थितं तन्मात्रसूत्रं द्वादशांशतः क्षिप्त्वान्कत्यवृत्तविस्तारमात्रं सूत्रं द्विपार्श्वे तस्याग्रस्य पार्श्वद्वयेऽभिवर्त्य लिखेत्।।44।।

विवरणम्

दलनिष्पादनार्थमाह–अग्रादीति। दलानां मध्यसूत्रेष्ववाचीनवृत्तसन्धौ सूत्रं निधाय पराचीनवृत्त–सन्धिपर्यन्तं प्रसार्य तेन दलाग्रतः प्रवृत्तं दलद्वयसन्धिपर्यन्तं दलसीमासूत्रपर्यन्तं वृत्तं विरचयेत्। तदा दलान्यर्धवृत्तात्मकानि भवन्ति। दलाग्रार्थमाह–तदग्रमिति। तदग्रं लिखेदिति सम्बन्धः। दलाग्रभागे यत् पराचीनं वृत्तं तद्धीहान्तिमं वृत्तं, तत्र सू[2]त्रं निधायार्वाचीनसूत्रपर्यन्तमुन्नीय तेन दलमध्यसूत्रपराचीन–वृत्तसन्धिनिहिताग्रेण पराचीनवृत्तस्थेनार्वाचीनवृत्तपर्यन्तमेकपार्श्वे भ्रमयित्वा पुनरपरपार्श्वेऽप्येवं [3]भ्रामयेत्। तदेकदलाग्रं सम्पद्यते। एवं सर्वदलाग्राणि विरचयेदित्यर्थः।।44।।

In the circle of Dalamadhya a cord may be placed which is equal to the width. From these there shall be made as overlapping at two outer directions to make a semicircle. If such a semicircle is made as Dalāgravṛtta one can make dalāgras. This is how to make a lotus with eight petals. (44)

दिशि करयुगकोष्ठैर्द्वारमन्तर्बहिष्ठै–
स्त्रिशशिपदविपर्यस्तैश्च शोभोपशोभे।
त्रिभुवनपदक्लृप्तं कोणमम्भोजपीठं
श्रुतिदहनपदोद्यद्गात्रपादान्वितं च।।45।।

1. 'न दिग्गते द्वे कोणगते द्वे अन्तराले चतस्र इत्यत्राभिसुख्येन अ' घ. ङ. च. पाठः।
2. 'त्रणीय'
3. 'भ्र' क पाठः।

विमर्शिनी

पुनर्वीथ्या बहिर्द्वारशोभादिस्थाने[1] अन्तर्बहिष्ठैः अन्तर्गतैः बहिर्गतैश्च क्रमेण करयुगकोष्ठैः द्विचतुष्कोष्ठैः द्वारं स्यात्। त्रिशशिपदविपर्यस्तैः शोभोपशोभे अन्तस्त्रिभिर्बहिरेकेन शोभा, तद्व्यत्यासेनोपशोभा। त्रिभुवनपदक्लृप्तम् अन्तर्बहिश्च त्रिभिस्त्रिभिः कोष्ठैः कोणम्। अम्भोजपीठम् अष्टदलबहिर्गतं पीठं श्रुतिदहनपदोद्यद्गात्रपादान्वितं दिक्षु चतुष्पदगात्रान्वितं कोणेषु त्रिपदपादान्वितं च।।54।।

विवरणम्

अथ द्वारादिक्लृप्तिमाह-**दिशीति**। अन्तर्बहिष्ठैरिति प्रत्येकं विशेषणम्। अन्तर्द्वे बहिः पङ्क्तौ चत्वारि च पदानि मार्जयन्नेकं पदं कुर्यात्। तद्द्वारमभिधीयते। त्रिशशिभिश्शोभाः विपर्यस्तैश्शशित्रिपदैरुपशोभाः। अन्तर्बहिश्च त्रिभिः त्रिभिः पदैः कोणानि। श्रुतिपदैः पद्मपीठस्य गात्रम्। ईषादण्डः। दहनपदैः केणेषु [2]पादा स्युः।।45।।

Doors can be made on all four sides taking two inner segments and four outer segments. For Śobhā, three segments from inside and one from outside. For Upaśobhā one segment for inner circle and three for outer circle may be utilised. One can make four corners using three segments each. Then with four segments Gātra can be shaped on four sides and with three segments, Pāda can be shaped of Aṣṭadalapītha. (45)

पीता पङ्कजकर्णिका दलततिः श्वेतान्तराळं हरि-
द्वर्णं रक्तरुचोऽश्रयः सितपदारक्तेष[3]कं पीठकम्।
वी[4]थी कल्पलतादिचित्रिततराथ द्वारशोभोपशो-
भाश्रि स्यात् सितरक्तपीतशितिवर्णाकीर्णचूर्णोज्ज्वल[5]म्।।46।।

विमर्शिनी

अथ पङ्कजकर्णिका पद्मस्य कर्णिका पीता पीतवर्णा। दलततिः दलसमूहः श्वेता। अन्तरालं दलान्तरालं हरिद्वर्णं श्याममम्। अष्टदलाद् बहिः पीठस्यान्तर्गताः अश्रयः रक्तरुचः रक्तवर्णाः। पीठकं सितपदारक्तेषकं सितवर्णपादम् आरक्तवर्णगात्रं च। वीथी कल्पलतादिचित्रिततरा कल्पलतादि-भिर्वैचित्र्ययुक्ता। द्वारशोभोपशोभाश्रि[6] क्रमेण सितरक्तपीतशितिवर्णाकीर्णचूर्णोज्ज्वलं श्वेतरक्तपीत-कृष्णवर्णैः आकीर्णैः क्षिप्तैः चूर्णैः रजोभिः उज्ज्वलं दीप्तं स्यात्।।46।।

1. 'ने' दिग्गते द्वे कोणगते द्वे अन्तराले चतस्त्र इत्यत्र अ ख पाठः।
2. 'वाद्याः स्यु' च. पाठः।
3. 'षु' घ. पाठः।
4. 'थिः' ख. पाठः।
5. 'लाः' क. पाठः।
6. श्रीः ङ. पाठः।

विवरणम्

वर्णान् दर्शयति-**पीतेत्ति**। **दलततिः** दलसमूहः दलाष्टकमिति यावत्। **अन्तराले** दलानामेवान्तरान्तरावकाशः। **हरिच्छ्यामाः अश्रयो** दलमण्डलपीठान्तरालदेशाः। सितानि पदान्यारक्ता ईषाश्च यस्येति समासः। **चूर्णोज्ज्वलेति**[1] सर्ववर्णनिर्माणप्रदर्शनार्थमेतत्।।46।।

The Karṇikā (the Pericarp) of the Aṣṭadala diagram shall have yellow colour (using powder). The eight petals shall be in white colour. The spaces in between the petals shall have green colour. Outside the Aṣṭadala and the square inside the Pīṭha shall be red while two corners of Pīṭha shall be white. Gātras are to have red colours. The Vīthis- the corridors - shall be decorated with the designs of Kalpalatā- creepers- and flowers. The four doors shall have white colour, the eight Śobhas shall have red colour and the eight Upaśobhās shall be yellow in colour and the four corners be dark or black in colour. These colour combination shall be effected by powders having such colours. (46)

पीताणुमूलपृथुलारुणमध्यशुभ्र-
बिन्द्वग्रकाः प्रतिदलं युगलात्मकाः स्युः।
तत्केसरा बहिरथ त्रिगुणात्मकाश्च
रेखा लघीयसि; महीयसि भूतरूपाः।।47।।

विमर्शिनी

तत्केसराः तस्याष्टदलपद्मस्य केसराः **पीताणुमूलपृथुलारुणमध्यशुभ्रबिन्द्वग्रकाः** पीतवर्णकृशमूलाः अरुणवर्णस्थूलमध्याः सितवर्णबिन्दुयुक्ताग्रकाश्च **प्रतिदलं** दले दले **युगलात्मकाः** द्विद्विसंख्याश्च **स्युः**। **अथ लघीयसि** अल्पे मण्डले द्वारादीनां **बहिः त्रिगुणात्मकाः** सत्त्वरजस्तमोरूपाः श्वेतरक्तकृष्णवर्णाः **रेखाश्च स्युः**। **महीयसि** महत्तरे मण्डले **भूतरूपाः** पृथिव्यप्तेजोवाय्वाकाशात्मकाः पीतश्वेतरक्तश्याम-कृष्णवर्णा **रेखा**[2]**: स्युः**। तत्र सर्वमण्डलेष्वपि हरिद्रादिरजोभिरेव वर्णाः कल्पनीयाः। तथा च प्रपञ्चसारे–

हारिद्रं स्याद् रजः पीतं ताण्डुलं च सितं भवेत्।
तथा दोषारजः क्षारसंयुक्तं रक्तमुच्यते।।
कृष्णं दग्धपुलाकोत्थं श्यामं बिल्वदलादिकम्।

इति।।47।।

विवरणम्

तत्र **पीतमणु च मूलं पृथुलमरुणं च मध्यं शुभ्रो बिन्दुरग्रे** केसराणां स्यात्। **लघीयसीति**। चतुर्हस्तपर्यन्तग्रहणम्। **त्रिगुणात्मिकाः** सितरक्तासिताः। **भूतरूपाः** पीतशुभ्रारुणश्यामकृष्णाः।।47।।

---

1. 'पि' क. पाठः।
2. 'खाश्च स्युः'।

With the eight petals in yellow colour with slender lower parts and red center and white filaments, the design may be made. If the eight petals are shorter there shall be three lines to suggest Satva, Rajas, Tamas- the three qualities. These lines shall have white, red and black colours respectively. If the petals numbering eight are bigger the five columns of yellow, white, red, green and black are to be used to suggest the five elements of Pṛthivī, Āpaḥ, Tejas, Vāyu and Ākāśa. This is how the Bhadrakapadma design is to be drawn. (47)

चक्राब्जेऽत्र विकारवर्गपदवत्क्षेत्रेऽन्तरर्धेऽभितो
विथीक्षेत्रशरद्विभागसहिते वृत्तीकृतेऽर्धीकृते।
बाह्यार्धे दहनांशनेमिपरिशिष्टं स्यादरक्षेत्रकं
शेषार्धे श्रुतिभागनाभिपरिशिष्टं चाम्बुजक्षेत्रकम्।।48।।

विमर्शिनी

अथ चक्राब्जे मण्डले विकारवर्गपदवत्क्षेत्रे पूर्वविधिना षट्पञ्चाशदधिकद्विशत–पदसहिते क्षेत्रे अत्रान्तरर्धे अभितश्चतुर्ष्वपि दिक्षु वीथीक्षेत्रशरद्विभाग सहिते वीथीक्षेत्रं पञ्चांशीकृत्य तद्द्विभागमन्तर्योजिते त[1]त्र वृत्तीकृते च सति, अर्धीकृते तदवृत्तविस्तारस्यार्धेन[2] वृत्तीकृते च सति, तयोरर्धोर्बाह्यार्धे दहनांशनेमिपरिशिष्टं तृतीयांशं बहिर्नेम्यर्थं त्यक्त्वा तदवशिष्टमरक्षेत्रं स्यात्। शेषार्धेऽन्तरर्धे श्रुतिभागनाभिपरिशिष्टं चतुर्थांशं बहिर्नाभ्यर्थं त्यक्त्वा तदवशिष्टम् अम्बुजक्षेत्रकं च स्यात्।।48।।

विवरणम्।

इदानीं चक्राब्जे विशेषान् दर्शयति–चक्राब्जेऽत्रेति। अभित: समन्तत:। वीथीक्षेत्रशरद्विभागसहिते द्विपङ्क्तिमयी[3] वीथिरभिहिता। तत्र पञ्चधा विभक्ते त्रिभिरेव भागैरिह वीथि:स्यात्। भागद्वयं त्वन्तरर्धे योजनीय:। दहनांशानेमिपरिशिष्टं स्यादिति। बाह्यार्धं त्रेधा विभज्य बहिस्तृतीयांशं नेमिभागं कल्पयेदित्यर्थ:। एवं श्रुतिभागनाभिपरिशिष्टमिति।।48।।

For Cakrābja the ground shall be square in which 256 segments may be effected by drawing 16 lines each lengthwise and breadth wise. In the centre outside the eight segments there shall be corridors made of two segments each. Two fifth parts of the same shall be used to form a circle inside which a smaller circle also may be made using half the part. The part outside shall be divided into three. Of the three, one at the periphery shall be used to draw a circle. The other two parts divided into four shall also be used to form a circle. The rest of the portion shall also be made use for eight petalled lotus. (48)

---

1. 'अ' ग. पाठ:।
2. 'न च वृ' ग. पाठ:।
3. 'यी हि वी क. च. पाठ:।

प्राग्वत् पञ्चविभक्तमम्बुजपदं त्रित्रिद्विभक्तं क्रमात्
कृत्वा नाभ्यरनेमिकं च परिवर्त्याराण्यथास्फालयेत्।
दिक्सूत्रस्पृगरान्तवृत्तनिहितैराकर्णिकान्तायतैः
सूत्रैर्द्वादशधा भ्रमादरपदं षोढा च भङ्क्त्वैकशः।।49।।

एष्वष्टादशकोष्ठवत्स्वरपदेष्वन्तःस्थषट्कोष्ठगा-
न्यन्तर्वृत्तगतैककोच्छुरितपार्श्वद्वन्द्वतुन्दीनि च।
इत्यष्टाष्टपदैरराण्यपदिशं कुर्यादिह द्वादशा-
थैतावन्ति हरित्पदानि परिशिष्टान्यन्तरालान्यपि।।50।।

विमर्शिनी

पञ्चविभक्तं पञ्चधा विभक्तम् अम्बुजपदम् अष्टदलपद्मस्थानं प्राग्वत् भद्रकोक्तवत् कुर्यात्। नाभ्यरनेमिकं नाभ्यरनेमिस्थानानि क्रमात् त्रित्रिद्विभक्तं नाभ्यरस्थानं च त्रित्रिभक्तं नेमिस्थानं द्विभक्तं च कृत्वा तानि स्थानानि परिवर्त्य वृत्तीकृत्याथाराण्यास्फालयेत्। आस्फालनप्रकारमाह-दिक्सूत्रेति। दिक्सूत्रस्पृगरान्तवृत्तनिहितैः दिक्सूत्रस्पृष्टेषु अरपर्यन्तवृत्तेषु निहितैः स्थापितैः आकर्णिकान्तायतैः कर्णिकामध्यपर्यन्तदीर्घैः सूत्रैर्भ्रमात् अरपदम् अरस्थानं द्वादशधा भङ्क्त्वा पुनरेकशः षेढा च भङ्क्त्वा अष्टादशकोष्ठवत्सु एषु अरपदेषु अन्तःस्थषट्कोष्ठगानि अन्तर्गतषट्कोष्ठेषु गतानि अन्तर्वृत्तगतैक-कोच्छुरितपार्श्वद्वन्द्वतुन्दीनि मध्य[1]मवृत्तगतैकैकस्योच्छुरणेन वर्धनेन पार्श्वद्वये तुन्दीनि उदरयुक्तानि च इति उक्तेन विधिनाष्टाष्टपदैः उपदिशं दिग्भ्योऽन्यत्र द्वादश अराणि कुर्यात्। अथेह एतावन्ति द्वादशसंख्यानि हरित्पदानि द्वादशपदानि दिग्गतानि च परिशिष्टानि अरेभ्यः परिशिष्टान्यन्तरालान्यपि कुर्यात्।।49-50।।

विवरणम्

प्राग्वत् पञ्चविभक्तमम्बुजपदमिति। दलाग्रदलतत्सन्धिकेसरकर्णिकार्धमित्यर्थः। परिवर्त्येत्यनेन च सम्बन्धः। नाभ्यन्तरनेमिकं क्रमात् त्रित्रिद्विभक्तमिति। नाभिं त्रिधा विभज्य अरक्षेत्रमपि त्रिधा नेमिक्षेत्रं तु द्विधा समं विभजेदित्यर्थः। अथ दिक्सूत्रस्पृगरान्तवृत्तनिहितैः आकर्णिकान्तायतैस्सूत्रैः भ्रमाद् द्वादशधा अरं एकशः षोढा च भङ्क्त्वाराण्यास्फालयेदित्यन्वयः। दिक्सूत्राण्यत्र पूर्वापरदक्षिणोत्तरसूत्राणि। तत्र प्राचीनसूत्रस्यारपराचीनवृत्तस्य च यस्सन्धिस्तत्र सूत्रं निधाय गर्भाङ्कपर्यन्तं सूत्रं सारयित्वा तेन सूत्राग्रेण तस्मिन्नेव वृत्ते उत्तरतो दक्षिणतश्चाङ्कौ कुर्यात्। [2]तावुत्तरैशानयोः यम्याग्नेययोश्चारयोस्सन्धी भवतः। एवं दक्षिणपश्चिमोत्तरसूत्रवशात् सन्धयः कार्याः। अथ तेषु सन्धिषु स्वषष्ठसन्ध्यन्वयेन[3] सूत्राण्यास्फालयेत्। तानि द्वादशारपदानि सम्पद्यन्ते। ततः प्रत्यरं समं पञ्चभिरङ्कैः अर्वाचीनपराचीनवृत्तयोष्षोढा विभज्य पञ्च पञ्च सूत्राणि कुर्यात्।।49।।

अष्टादशकोष्ठवत्स्वरपदेष्विति। प्रतिपदं प्राग्विरचितवृत्तत्रयभेदेन त्रिस्त्रिर्विभागलाभात्।

---

1. 'ध्युवृ' ख. घ. च. पाठः।
2. 'ता उत्त' क पाठः।
3. 'ये सु' च. पाठः।

अन्तस्थषट्कोष्ठगा[1]नीति। प्रतिपदं त्रीणि षट्कानि हि सन्ति तत्र प्रतिषट्कमभितो द्वे द्वे पदे विहायान्तरवशिष्यमाणे द्वे द्वे पदे मार्जयेदित्यर्थः। अन्तर्वृत्तगतैककोच्छुरितपार्श्वद्वन्द्वतुन्दीनि चेति। उच्छुरितं मित्रितं पार्श्वद्वन्द्वं तेन तुन्दीनि स्थविष्ठमध्यप्रदेशानि। मध्यवृत्तेऽभितो ये द्वे द्वे पदे विहीने तयोरान्तरे पदे अरेष्वेव योजयेदित्यर्थः। अष्टाष्टपदैरिति। अर्वाचीनवृत्ते द्वे पदे, मध्यमे चत्वारि, पराचीने च द्वे, सम्भूयाष्टौ पदानीत्यर्थः। अपदिशमिति चतुर्दिक्ष्व[2]न्तराणि न स्युः। अपि त्वरसन्ध्य एवेत्यर्थः। एतावन्तीति द्वादश ककुप्पदानि दशपदानि। पूर्ववृत्ते चत्वारि, मध्यमे द्वे, पराचीने चत्वारि च पदानि, सम्भूय दश स्युरित्यर्थः।।50।।

The place for Aṣṭadala shall be divided into five and an Aṣṭadala be formed, with three parts as nābhi- navel, ara-spoke (or radius) and nemi-edge or rim. Of these nābhi and ara places shall be divided into three and nemi divided into two. Making circles spokes may be made. By shaking threads the place called Ara shall be divided into twelve. The shaking of threads will help to make 12 Arakṣetras and eighteen segments by joining the end. Of the eighteen segments of Ara (spoke) the six inside shall be strengthened with one segment each at the two sides. Thus this portion thick for appearance. Similarly 12 Aras may be formed with eight segments each. The rest of the segments shall form the Antarālas- the spaces in between with ten segments each. (49-50)

अन्तःस्थानरमध्यबध्नदुभयान्तान् द्वादशाथ [3]प्रथीन्
बाह्यानान्तरमध्यबद्धशिरसः कुर्यात् पुनस्तावतः।
सत्त्वाद्युक्तरुचिस्त्रिनाभिररुणाराल्यन्तरं कृष्णरुक्
पर्यायारुणपीतरुक् प्रथिगणोऽन्यद् भद्रकोद्दिष्टवत्।।51।।

विमर्शिनी

अथान्तःस्थान् द्वादश प्रथीन् अरमध्यबध्नदुभयान्तान् अराणां मध्येषु सम्बध्यमानोभयाग्रान् कुर्यात्। पुनर्बाह्यानपि आन्तरमध्यबद्धशिरसः अन्तरालानां मध्येषु बद्धशिरसः तावतः द्वादश कुर्यात्। त्रिनाभिः नाभित्रयं सत्त्वाद्युक्तरुचिः सत्त्वरजस्तमसामुक्तश्वेतरक्तकृष्णव[4]र्णम्। अराली अराणां समूहः। अरुणा रक्तवर्णा। अन्तरम् अन्तरालं कृष्णरुक् कृष्णवर्णम्। प्रथिगणः प्रथीनां गणः पर्यायारुणपीतरुक् पर्यायेण एकैकान्तरेणारुणपीतवर्णः। अन्यत् कर्णिकादि वीथीद्वारादि च भद्रकोद्दिष्टवत् भद्रकोक्तप्रकारेण।।51।।

विवरणम्

द्विधाविभक्ते नेमिक्षेत्रे द्वादशः द्वादश नेमयः कार्याः। तेष्वान्तरनेमीनामरमध्यसूत्रान्तेषु सीमाः

---

1. 'का' क. घ. पाठः।
2. 'क्ष्वरा' क. पाठः।
3. 'प्रथमे प्रथिरित्येक इति क्षीरस्वामी।
4. 'र्णः' क. पाठः।

बाह्यानामरसन्धिमध्यसूत्रान्तेषु सीमाः स्युः। बध्नदिति शतृप्रत्ययः सम्बध्यमानवचनः। अन्तरशब्दोऽत्रारसन्धिवचनः। सत्त्वाद्युक्तरुचिः। सिता रक्ता कृष्णा चेत्यर्थः। अराली अराणां गणः। अन्तरमरसन्धिरेव। पर्यायारुणपीतरुगिति। एको नेमिररुणः अपरःपीतः इत्येवं न्यायादित्यर्थः।।51।।

The 12 nemis- rims- inside shall be formed in such a way that their ends shall meet at the centre of Aras- (spoke or radius). Those outside shall also be arranged in similar way. The three Nābhis - navels- shall have the colour of Sattva, Rajas, Tamas (white, red and dark). All Aras shall be red; the spaces in between shall be dark. Nemis shall have colours of red and yellow alternatively. Other items like Karṇikā, Vīthi and Dvāra shall be as prescribed for Bhadraka. (51)

धृतिकृतिपुटक्षेत्रे मध्ये विधाय विधानतो
विकृतिकृतिसङ्ख्यातैः कोष्ठैः समीरितभद्रकम्।
लिखतु परितःपङ्क्तौ शक्त्यष्टकं रसकोष्ठकै-
र्दिशि विदिशि च स्वोपान्तस्थोपकोष्ठदलाञ्चलम्।।52।।

विमर्शिनी

शक्तिदण्डकभद्रकलक्षणमाह–धृतीति। धृतिकृतिपुटक्षेत्रे धृतिरष्टादश तत्कृतिस्तद्वर्गः तत्संख्यपदे क्षेत्रे मध्ये विकृतिकृतिसंख्यातैः षोडशवर्गसख्यैः कोष्ठैर्विधानतः समीरितभद्रकम् उक्तं भद्रकं विधाय परितः पङ्क्तौ रसकोष्ठकैः षट्कोष्ठैः दिशि विदिशि च अष्टदिक्षु शक्त्यष्टकं शक्तीनामष्टकं लिखतु। स्वोपान्तस्थोपकोष्ठदलाञ्चलं स्वानां स्वानां षण्णां कोष्ठानां समीपस्थेऽर्धकोष्ठेऽञ्चलमग्रं यथा भवति तथा लिखतु।।52।।

विवरणम्

शक्तिभद्रकमाह–**धृतिकृतिपुटक्षेत्र** इति। दिशि विदिशि च रसकोष्ठकैरित्यन्वयः। स्वोपान्तस्थोपकोष्ठदलाञ्चलमिति। षण्णां पदानामनन्तरं यदुभयत्र कोष्ठं तदुपकोष्ठं तच्च शक्तेरुपान्तस्थं भवति तस्य दलेनार्धेनाञ्चलमग्रं यस्येति समासः। एवमष्टपदसम्पाद्या शक्तिः कोणगतं तु पदमुपेक्ष्यत एव। तथा च दिशि शक्तेरष्टौ पदानि विदिशोरुभयत्र चत्वारि चत्वारि कोणयोरेकमेकम्, एवमष्टादशपदानि विनियुक्तान्यवगन्तव्यानि।।52।।

A ground in which 18 lines is marked lengthwise and breadth wise a diagram shall be formed with 314 segments. Taking 256 inside a Bhadrakapadma shall be formed at first. Outside that there will be 62 segments in a line (with in the first corridor). In the four directions and 4 corners Śaktyaṣṭaka may be formed with 6 segments each. The tip of each segment shall touch the half segments nearby located. (52)

मध्येशक्ति पदद्वयेन रचयेन्मुष्टिं दिशास्वश्रिषु
त्यक्त्वा कोणगतैककं पदयुजा तत्प्रान्तयुक्स्थास्नुना।

मुष्ट्युद्दिष्टपदान्तपार्श्वयुगदोस्सूत्रेण शक्त्यग्रके
तत्तार्तीयककोष्ठमध्यमिलिताग्रेणालिखेद् द्वे अपि।।53।।

विमर्शिनी

तत्र शक्तीनां लेखनप्रकारमाह-**मध्येशक्तीति**। दिशासु मध्येशक्ति शक्तेर्मध्ये पदद्वयेन मुष्टिं शक्तेर्मुष्टिप्रदेशं रचयेत्। अश्रिषु कोणगतैकैकं पदं त्यक्त्वा तत्प्रान्तयुक्स्थास्नुना तस्य कोणपदस्य समीपस्थितेन पदद्वयेन मुष्टिं रचयेत्। द्वे शक्त्यग्रके शक्तीनां द्वे द्वे अग्रे अपि मुष्ट्युद्दिष्टपदान्तपार्श्वयुगदोस्सूत्रेण मुष्ट्युद्दिष्टपदद्वयान्तस्य पार्श्वयुग्मस्थितेन भुजासूत्रेण तत्तार्तीयककोष्ठमध्यमिलिताग्रेण तस्य मुष्टेरन्तद्वयात् तृतीयकोष्ठमध्ये संयुक्ताग्रेण सूत्रद्वयेनालिखेत्।।53।।

विवरणम्

दिशासु मध्येशक्ति पदद्वयेन मुष्टिं रचयेदित्यन्वयः। अष्टपदा ह्येका शक्तिः। तस्या मध्ये द्वाभ्यां मध्यसूत्रमभितो गताभ्यां ग्रहणप्रदेशमारचेत्। कोणगतैकैकं त्यक्त्वा तत्प्रान्तयुक्स्थास्नुना पदयुजेत्यन्वयः। मुष्टिं रचयेदित्यनुषङ्गः। कोणस्थमेकं पदमुपेक्ष्य तम[1]भितो गताभ्यां पदाभ्यां अर्धशो मुष्टिमारचयेदित्यर्थः। मुष्ट्युद्दिष्टेति। ये मुष्ट्यर्थमुद्दिष्टे पदे तयोरन्तं पार्श्वयुगं मध्यसूत्रानन्तरसूत्रस्य पुटसूत्रयोश्च सन्धी तत्र यद्दोःसूत्रं बाहुरूपेणायतं सू[2]त्रं तच्चोभयं निजतृतीयपदमध्ये मिलिताग्रं भवति तदा द्वे शक्त्यग्रे स्याताम्।।53।।

In the centre of Śaktis an item called Muṣṭi is to be formed taking two segments each. Taking away one segment each from the corners and taking two segments each from outside a Muṣṭisthāna shall be formed. At the end of the Muṣṭi of two segments, two lines may be drawn. On the third segment the corner points shall be united for which lines are to be made. (53)

विन्यस्यच्छोटिकां मुष्ट्यभिहितपदयुङ्मध्यदिक्सूत्रसंस्थां
सूत्रं तावत्प्रमाणं भ्रमयतु बहिरन्तश्च दोस्सूत्रसंस्थम्।
सूत्रं तत्प्रान्तयोस्तद्दलमितमपि संवर्तयेत् कोणसिद्ध्यै
दिश्येवं कोणमुष्टिं विरचयतु तथा सन्धिभुग्नावलग्नम्।।54।।

विमर्शिनी

मुष्ट्यभिहितपदयुङ्मध्यदिक्सूत्रसंस्थाम् मुष्टेरुक्तपदद्वयमध्यगतदिक्सूत्रस्थितां छोटिकां छोटिकामुद्रां बहिरन्तश्च विन्यस्य तावत्प्रमाणं दोस्सूत्रसंस्थं सूत्रं भ्रमयतु। तत्प्रान्तयोः तस्य समीपयोः कोणसिद्ध्यै तद्दलमितं तदर्धसम्मितमपि संवर्तयेत्। एवं दिशि विरचयतु। तथा कोणमुष्टिं कोणगतां मुष्टिं सन्धिभुग्नावलग्नं सन्धिषु भुग्नं वक्रीभूतमवलग्नं मध्यं यथा भवति तथा विरचयतु।।54।।

विवरणम्

मुष्टावेवेति कर्तव्यताविशेषं दर्शयति-**विन्यस्येति**। मुष्टिरूपे ये पदे तयोर्मध्ये यन्मध्यसूत्रमस्ति तत्र

---

1. 'दं' क
2. 'ग्रं चोभ' च पाठः।

छोटिकां विन्यस्याङ्कं कृत्वा[1] तत्प्रमाणं सू[2]त्रं भ्रमयेत्। अथ तस्या मुष्टेर्बहिः पराचीनपुटसूत्र-मध्यसूत्रसन्धिलग्नमूलेन तावत् परिमाणेन भ्रमयेत्। एवमन्तरपि द्रष्टव्यम्। तस्या मुष्टेरेवोभयोरन्तरयोरुक्तपरिमाणार्धसम्मितसूत्रेण दोस्सूत्रस्थेन बहिरन्तश्च भ्रमयेत्। ते मुष्टिकोणे भवतः। दिश्येवमित्युक्तोपसंहारः। तथेति छोटिकाविन्यासाद्यतिदेशः। सन्धिभुग्नावलग्नमिति। सन्धौ भुग्नमवलग्नं मध्यप्रदेशो यथा भवतीति क्रियाविशेषणमेतत्।। 54।।

In the line between the two segments forming the Muṣṭi by measuring by Choṭikā both inside and outside, two semicircles may be drawn by placing a central point. With first semi-circle angles may be formed by placing thread in such a way. Muṣṭi on the corners may be shaped with a curve on both sides. (54)

शक्त्यग्रान्तरमुष्टिशिष्टपदवर्णं रक्तपीतारुणा-
कृष्णं श्यामलकोणगैककविराजद्देवताविग्रहम्।
शोभे पीतहरिद्रुची विरचयेत् कोणं त्रिशूलोज्ज्वलं
पीतां विथिमथाङ्घ्रिगात्रमसितारक्तं परं पूर्ववत्।।55।।

विमर्शिनी

तत्पूरणप्रकारमाह-**शक्त्यग्रेति**। शक्त्यग्रान्तरमुष्टिशिष्टपदवर्णं शक्त्यग्रस्य तदन्तरस्य मुष्टेरवशिष्टपदस्य च वर्णं क्रमात् रक्तपीतारुणाकृष्णं विरचयेत्। श्यामलकोणगैककविराजद्देवताविग्रहं श्यामलेषु कोणगतैकपदेषु शोभमानं देवताया भगवत्या विग्रहं च विरचयेत्। अत्र शोभे शोभेपशोभे पीतहरिद्रुची पीतश्यामवर्णे। कोणं त्रिशूलोज्ज्वलं कोणानि त्रिशूलोनोज्जवलानि। वीथीं पीताम्। अथ अङ्घ्रिगात्रं पीठस्य पादान् गात्राणि च असितारक्तं कृष्णानि रक्तानि च। परम् उक्तादवशिष्टं पूर्ववत् भद्रकोक्तवत्।।55।।

विवरणम्

शक्तेरग्रस्यान्तरस्य मुष्टेः शिष्टपदस्य च वर्णमिति समासः। शक्तेरग्रं रक्तं [3]अन्तरं पीतं मुष्टिः पीतः। अन्तरालं कृष्णमित्यर्थः। शोभे इति शोभोपशोभयोर्ग्रहणम्। अङ्घ्रिगात्रं पद्मपीठस्य पादाः। ईषादण्डश्च।।55।।

The colours to be used are- in the segments at the top of Śaktis red colour, middle part yellow colour, in Muṣṭi red colour and in the rest of the diagram black colour. In all the four corners the form of goddess may be drawn using green powder. Śobhā shall have yellow colour while Upaśobhā requires green powder. In all the four corners the replica of Sūla (trident) is to be drawn. The corridors shall be filled up with yellow colour. The Pītha

1. 'त्वा तत्र त' क. पाठः।
2. 'त्रं' प्रभ्रम घ. पाठः।
3. 'आ' घ पाठः।

shall have colour in its base. Gātra requires yellow powder. The rest of the portion is to be coloured as prescribed in Bhadraka design. (55)

कुर्यात् षड्दलमब्धिवर्गपुटकेऽत्रान्तश्चतुष्कस्फुरद्–
वृत्तेषु त्रिषु कर्णिकां च दलसन्धिं[1] षड्दलाम्यंशकैः।
सन्ध्यर्धेऽत्र तु केसरांश्च रचयेद् द्वाराणि दिक्षु द्विकैः
कोणान्येकपदैरितीषुजनुषि स्यात् षड्दलं मण्डलम्।।56।।

विमर्शिनी

अब्धिवर्गपुटके षोडशपदक्षेत्रे षड्दलं मण्डलं कुर्यात्। अत्र अन्तश्चतुष्कस्फुरद्वृत्तेषु अन्तर्गतचतुष्के स्फुरत्सु त्रिषु वृत्तेषु अंशकैः क्रमात् कर्णिकां दलसन्धिं षड्दलानि च रचयेत्। अंशकैरित्यनेन षड्दलानां विभागोऽप्युक्तः। तत्र दक्षिणोत्तरसूत्रस्पृष्टवहिर्वृत्ते स्थित्वा तस्माद् कर्णिकामध्यमानेन तस्मिन् वृत्ते चतुरोऽङ्कान् कृत्वा तेषु सूत्राण्यास्फाल्य षोढा विभजेदित्यर्थः। अत्र तु अत्रापि सन्ध्यर्धे दलसन्धेरर्धप्रमाणान् केसरांश्च रचयेत्। दिक्षु द्विकैर्द्वाराणि, एकपदैरे[2]कैकपदैः कोणानि च रचयेत्। अत्र पूरणं भद्रकोक्तवदेव। इति इषुजनुषि स्कन्दे षड्दलं मण्डलं स्यात्।।56।।

विवरणम्

अब्धिवर्गपुटके पञ्चसूत्रास्फालनसिद्धे। सन्ध्यर्थाहितकेसरांश्चेति। दलसन्धिभागं समं द्वैधं कृत्वा वृत्तमालिख्य अन्तर्वृत्ते प्रागुक्तरीत्या केसराः कार्याः । बहिर्वृत्त एव तु दलसन्धयः स्युरित्यर्थः। दिक्षु द्विकैरिति शोभा विरहाद्दीर्घचतुरश्रं द्वारं समचतुरश्रं च कोणं भवति।।56।।

For making a Ṣaḍḍala design a square plot of 16 segments has to be made by drawing four lines each lengthwise and breadthwise. In the location where the four segments inside are joined together a six-petalled diagram is to be made. Karṇikā and dalasandhi are to be made with the half portion. The entire part of the eircle may be used to divide the design into six. Doors are to be made into two segments each on four sides. For corners one segment each is to be set apart. In the middle of sandhi filaments are to be located. The colour scheme can be as in Aṣṭadala. The first one is for Subrahmanya who likes a lotus design of six petals. (56)

सम्यक्साधितमण्डपेऽथ जनिमज्जाज्वल्यमानानलो-
द्दीप्ते स्वेप्सितमन्त्रदैवतसमिज्याभ्युज्ज्वलन्मण्डले।
क्वाथोदादिसुसम्भृताञ्चितघटाढ्ये दक्षिणीयं गुरुः
शुद्धं प्राशितगव्यमन्तरुपनीय स्थापयेदग्रतः।।57।।
पृथ्व्यादिप्रतिसर्गविग्रहविशुद्ध्युत्पत्तिमन्त्रोदय-
न्यासार्चेशकराभिमर्शविधिभिः संशुद्धि[3]बुद्धात्मनि।

1. 'न्धीन्' इति मूलकोशपाठः।
2. दैः को' ख. ङ च पाठः।
3. 'द्ध' ख. ग. पाठः।

तत्राराधितमण्डलाधिगतदेवेक्षात्तपुण्योच्चये-
ऽन्वारब्धेऽथ करोतु तत्त्वहवनं तत्संस्क्रियार्हं सुधीः ।।58।।

विमर्शिनी

इति मण्डलान्यभिधाय तत्प्रसङ्गादाचार्य[1]कसिद्धयेऽवश्यकरणीयं दीक्षाविधिं संक्षेपेणाह–**सम्यगिति**। अथ सम्यक्साधितमण्डपे यथोक्तप्रकारेण संस्कृते[2] मण्डपे जनिमज्जाज्वल्यमानानलोद्दीप्ते कृताग्निजननत्वात् कृताग्निमुखत्वाच्च प्रदीप्ताग्नौ स्वोप्तितमन्त्रदैवतसमिज्याभ्युज्ज्वलन्मण्डले च स्वस्येप्सितमन्त्रदेवतावाहनपूजनादिना प्रशोभमाने मण्डले क्वाथोदादिसुसम्भृताञ्चितघटाढ्ये कषायपञ्चगव्यादिना सम्पूर्णेन पूजितेन कलशेन च युक्ते अन्तः अन्तर्भागे गुरुः दक्षिणीयं दीक्षायोग्यं, शुद्धम् उभयकुलपरिशुद्धं स्नानादिना च शुद्धं, प्राशितगव्यं दीक्षार्थमुपोषितं प्राशितपञ्चगव्यं शिष्यमुपनीय स्वस्याग्रतः स्थापयेत् ।।57।।

अथ सुधीः दीक्षाविधानतत्त्वज्ञो गुरुः पृथ्व्यादिप्रतिसर्गविग्रहविशुद्ध्युत्पत्ति-मन्त्रोदयन्यासार्चेशकराभिमर्शविधिभिः पृथ्वादिप्रतिसर्गेण पृथिव्यादितत्त्वानां संहारेण विग्रहविशुद्ध्या शरीरस्य शोषणदाहनादि[3]विशेषशुद्ध्या उत्पत्त्या तत्त्वसृष्ट्या मन्त्रोदयप्राणायामेन मन्त्रन्यासैरर्चनेन स्वस्येशस्य कराभिमर्शेन विष्णुहस्तादिभिः स्पर्शनेन च एवंविधैर्विधिभिः संशुद्धि[4]बुद्धात्मनि सम्यक्शुद्ध्या प्रबुद्धात्मस्वरूपे आराधितमण्डलाधिगतदेवेक्षात्तपुण्योच्चये आराधितपूर्णपुष्पाञ्जलौ मण्डलेऽधिगतस्य देवस्येक्षणेन परिगृहीतपुण्यसञ्चये तत्र शिष्ये अन्वारब्धे अग्निसमीपे दर्भेण संस्पृश्य दक्षिणत उपविष्टे सति तत्संस्क्रियार्हं तस्य शिष्यस्य संस्काराय योग्यं तत्त्वहवनं करोतु ।।58।।

विवरणम्

एवं बहिरङ्गानि साधनान्यभिधाय अन्तरङ्गानि मन्त्रादिरूपाणि साधनानि वदन् तेषां मन्त्राणां दीक्षापूर्वकमेव श्रोतव्यत्वाद् दीक्षाविधानं संक्षेपेण ब्रूते–**सम्यक्साधितमण्डप** इति। अत्रायं प्रयोगक्रमः। मण्डपसंस्कारमग्निजननं च कृत्वा तस्मिन् मण्डपे स्वेष्टदेवतायोग्यं मण्डलमालिख्य तत्र पीठं विरचय्य घटं विन्यस्य विधिवत् कषायादिना सम्पूर्य स्वेष्टदेवतां विधिवदावाह्य सम्पूज्य गुरुर्दीक्षायोग्यं शुद्धं प्राशितपञ्चगव्यं शिष्यमाहूयाग्रतः स्थापयेत्। पुनस्तत्त्वसंहारं शोषणादिकं तत्त्वसृष्टिं च लिपिन्यासान्तं विधाय मन्त्रोदयमन्त्रन्यासादिभिः सकलीकृत्य शिष्येण मण्डलगतं देवं पुष्पपूर्णाञ्जलिराराधयित्वा नेत्रबन्धं विमुच्य तं दर्शयित्वा कुण्डसमीपं गत्वा तद्दक्षिणतः संस्थाप्य तत्त्वहोमं यथार्हं कुर्यात् ।।57-58।।

Making an auspicious pavilion possessing all qualities a ground may be prepared in it. In a sacrificial fire kindled there the preceptor shall worship his own tutelary deity in a diagram with the shape of a lotus. There a pot containing decorations, Pañcagavya and other materials may be arranged. Thereafter he shall bring a disciple born in a noble family and well initiated

---

1. 'त्व'
2. 'त' ख. घ. ङ. च. पाठः।
3. 'दिना वि' ग. ङ. पाठः।
4. 'द्ध' इति व्याख्याकोशपाठः।

and suitable to receive the holy initiation. He may be seated in a plank placed above a Svastika design after making him partake Pañcagavya. (57)

Thereafter the preceptor shall in the body of the disciple to be initiated perform acts like Bhūtasamhāra, Śoṣaṇa, Bhūtimantra, Prāṇāyāma, Aṇḍabheri, Lipiprāṇāyāma, Lipinyāsa, Mantrodayaprāṇāyāma and Pīṭhanyāsa. Worshipping the Pīṭhas, offering flowers and Mānasapūjā write the mantra of his own tutelary deity and place that palm over his head and chant mantras. Now he is to advise jñānamārgopadeśa- initiation into the jñṣānamārga. Thereafter he shall make the disciple worship the god and make circumambulation and prostration. The disciple shall go near the preceptor and sit on a seat of Kuśa grass. Now the preceptor is to perform Tattvahoma and anvādhāna to make the disciple fit for receiving the advice. (58)

हुत्वाज्यं मनुभिः शतं विहितबीजस्थैः पृथिव्यादिभि-
र्मन्त्री तत्र निवृत्तिपूर्वककलात्मान्तैः क्रमात् पञ्चभिः।
अन्त्यं स्वात्मनि पूर्णया परतरे नीत्वा समित्पूर्वकं
हुत्वा निष्कृतयेऽस्त्रतः प्रणवतः शान्त्यै च तावद् हुनेत्।।59।।
कृत्वा होमसमाप्तिमत्र परिशुद्धे धारणाभिस्ततः
क्षेत्रे क्षेत्रविदं सुयोज्य जनयित्वा तात्त्विकं विग्रहम्।
साकल्यं परिकल्प्य पूर्णकलशेनासिच्य देवाग्रतः
संश्राव्याणुवरं तदर्हसमयाद्यं च स्वयं शिक्षयेत्[1]।।60।।

विमर्शिनी

तत्र होमे मन्त्री दीक्षायां प्रसक्तानां मन्त्राणां प्रयोगकुशल आचार्यः विहितबीजस्थैः 'ह्लां ह्वीं ह्रूं ह्रैं ह्रौं' इति[2] बीजानामुपरिगतैः निवृत्तिपूर्वककलात्मान्तैः 'निवृत्तिकलात्मने स्वाहा[3]' प्रतिष्ठाकलात्मने स्वाहा' इत्याद्यवसाने युक्तैः पृथिव्यादिभिः पञ्चभिर्मनुभिः क्रमाच्छतं शतमाज्यं हुत्वा अन्त्यं तत्त्वं पूर्णया परतरे स्वात्मनि नीत्वा समित्पूर्वकं चतुर्द्र[4]व्यकं हुत्वा निष्कृतये प्रायश्चित्तायास्त्रतः शान्त्यै प्रणवतश्च तावत् शतं हुनेत्।।59।।

पुनर्गुरुः स्वयं होमसमाप्तिं कृत्वा ततो धारण[5]ाभिः परिशुद्धेऽत्र क्षेत्रे क्षेत्रविदं जीवात्मानं सुयोज्य तात्त्विकं विग्रहं जनयित्वा साकल्यं परिकल्प्य पूर्णकलशेनासिच्य देवाग्रतोऽणुवरं संश्राव्य तदर्हसमयाद्यं च शिक्षयेत्[6]। संश्राव्येत्यस्यायमभिप्रायः–मन्त्रोपदेशकाले क्वचिच्छुद्धे भूतले अष्टवर्गिणीं मातृकामालिख्य

1. 'त्।। अथ शि' ख. पाठः।
2. 'त्यादिबि ग. घ. ङ पाठः।
3. 'हा इ'
4. 'व्यं हु' ग. पाठः।
5. 'णादपि' ङ. पाठः।
6. 'त्।। अत्र' ख. घ. ङ. च. पाठः।

तयैवावाह्य संपूज्य तस्या मातृकाया मन्त्रगतानक्षरानुद्धृत्य क्वचिदालिख्य तद्गतान् दोषान् परिहृत्य सम्पूज्य शिष्यायोपदिशेदिति।।60।।

विवरणम्

"ह्रां पृथिव्यै निवृत्तिकलात्मने हुं फट् स्वाहा" इत्यादिभिः पञ्च[1]भिर्मन्त्रैः शतं शतं हुत्वा पूर्णाहुतिं च कृत्वा मूलेन चतुर्द्रव्यं च तावद्धुत्वास्त्रमन्त्रेण प्रणवेन च तावद्धुत्वा होमं समापयेत्। पुनरेवं सत्त्वशुद्धिसंपन्नं शिष्यं धारणाभिर्विशोध्य क्षेत्रज्ञं योजयित्वा तत्त्वसृष्ट्यादिभिः साकल्यं कल्पयित्वा यथाविधि तेन कलशेनाभिषिच्य मन्त्रमुपदिश्य समयाद्यं शिक्षयेदिति।।59-60।।

Now the preceptor shall, using the five mantras prefixed with Pṛthivi, Āpaḥ etc; shall offer oblations in sacrificial fire, a hundred times each. For the sake of expiations also he shall offer oblations chanting particular mantras 108 times. Ghee is the main item for oblations. (59)

Concluding the sacrificial ritual (like Sviṣṭakṛt) having purified the limbs of the disciple with Bhūtasamhāra and other rites Sampāta- the leftovers of the sacrifice shall be anointed and Jīvātman- the soul is to be conceived in him and a conceptual form (or idol) is to be created with Tattvanyāsa, Lipinyāsa and Pīṭhanyāsa. Imagining the creations of this body possessed of all limbs the soul of the disciple may be conceived in full to be worshipped with oblations and bathed with the contents of the holy pot in which decoction or Pancagavya is stored. After waving light and presenting garments and offering flowers the disciple shall be made to sit in front of the god occupying the pavilion. Writing the mantrākṣara on a bit of palm leaf, the preceptor shall pass it on to him and make him listen to the mantra. Thereafter the preceptor shall advice him the principles and mode of chanting the mantra as well as the result of the Mantrasamkhyā. (60)

आद्येषुस्वरभान्तबिन्दुरुदितस्ताराभिधो मन्त्रराड्
ब्रह्माद्योऽस्य मुनिः प्रजापतिरथो दैव्यादिगायत्र्यपि।
छन्दः स्यान्मनुदेवता च परमात्मा क्लीबहीनस्वर-
द्वन्द्वान्तर्गततारतोऽङ्गमथवा सत्योनभूरादिभिः।।61।।

विमर्शिनी

अत्र प्रस्तुतान् मन्त्रानुद्धरन् पूर्वं प्रणवमुद्धरति-आद्येति। आद्येषुस्वरभान्तबिन्दुः आद्योऽक्षरः अकारः, इषुस्वरः पञ्चमस्वर उकारः, भान्तो मकारः, बिन्दुरनुस्वारः, एवं चतुर्भिर्वर्गैरुपेतः ताराभिधो मन्त्रराट्। सर्वेषां मन्त्राणामाधिपत्याद् राजशब्दोपचारः कृतः। अस्य तारस्य ब्रह्माद्यः प्रजापतिः ब्रह्मप्रजापतिः मुनिः ऋषित्वे उदितः। अथो दैव्यादिगायत्र्यपि दैवी गायत्री छन्दः स्यात्। परमात्मा मनुदेवता मन्त्रस्य देवता च स्यात्। क्लीबहीनस्वरद्वन्द्वान्तर्गततारतः ऋ ॠ लृ ॡ इति चत्वारः क्लीबाः नपुंसकानि[2],

1. 'श्वम' क. पाठः।
2. 'नि। संश्राव्येत्यस्यायमभिप्रायः-मन्त्रोपदेशकाले क्वचिच्छुद्धे भूतले अष्टवर्गिणीं मातृकामालिख्य तयैवावाह्य सम्पूज्य

तैर्हीना अवशिष्टा द्वादशस्वरा:, तेषां स्वरद्वन्द्वानामन्तर्गतैस्तारै: 'अं ओं आं हृदयाय नम:' इत्याद्यैरङ्गम्। अथवा सत्योनभूरादिभि: सत्यरहितैर्भूरादिभि: षड्भि: 'ओं भूरात्मने हृदयाय नम:' इत्याद्यैरित्यर्थ:।।61।।

विवरणम्

एवं संक्षेपेण दीक्षामभिधाय मूलादिक्रमेण मन्त्रानुद्धरन् प्रथमं सर्वमन्त्रसामान्यं प्रणवमुद्धरति-**आद्येषुस्वरेति**। आद्योऽकर:, इषुस्वर: पञ्चमस्वर उकार:, भान्तो मकार:, बिन्दुरनुस्वार:, एतै: संश्लिष्ट: प्रणवाभिधो मन्त्रराज: क्लीबहीनस्वरद्वन्द्वान्तर्गततारतोऽङ्गमिति। "अं ओं आं हृदयाय नम:" इत्याद्यङ्गानीत्यर्थ:।।61।।

To begin with the Praṇavamantra - the combination of 'a', 'u' and'm' is spoken of as the king of mantras. For this, Brahmaprajāpati is the Ṛsi and Daivīgāyatrī is the cchandas and Paramātmā is the devatā. Then there is Aṅganyāsa with certain vowels. According to another view up to the word "Satya" in the Daśapraṇava may be the Aṅganyāsa. (61)

अथ शिवनारायणयोस्तारनमोन्ते स्वनामनी ङेन्ते।
रसवसुवर्णसमेतौ मूलमनू मन्त्रविद्भिरुद्दिष्टौ।।62।।

विमर्शिनी

मूलमन्त्रानुद्धरति-**अथेति**। अथ मन्त्रविद्भि: शिवनारायणयो: शिवे विष्णौ च तारनमोन्ते 'ओं नम:' इत्यवसाने ङेन्ते चतुर्थ्येकवचनान्ते स्वनामनी 'शिवाय' 'नारयणाय' इति द्वे रसवसुवर्णसमेतौ षडक्षरयुक्तोऽष्टाक्षरयुक्तश्च मूलमनू उद्दिष्टौ।।62।।

विवरणम्

ततो मूलमन्त्रानुद्धरति-**अथेति**। तारनमोन्त इति। तारनमसोरन्ते ङेन्ते स्वनामनी भवत:। शिवनारायणयोरिति निर्देशवशादेव नामविशेषोऽपि दर्शितो द्रष्टव्य:। शिवनारायणे दुर्गायां च समानमेतत्।। 62।।

For Śiva and Viṣṇu, Praṇava ending with Namaḥ in dative case in the mantra. For Śiva it can be of six letters and for Viṣṇu it can be eight letters also as Mūlamantra. (62)

तारोपरि सवसुस्वरलववियदन्तस्थङेन्तनिजनाम।
शिवनारायणमूलं नत्यन्तं मन्त्रिभि: समुद्दिष्टम्।।63।।

विमर्शिनी

तारोपरि प्रणवोर्ध्वभागे सवसुस्वरलववियदन्तस्थङेन्तनिजनाम वसुस्वरेण ॠकारेण लवेन बिन्दुना च सहितं वियत् हकार: 'हृं' इत्यर्थ:, तदवसाने स्थितं चतुर्थ्येकवचनान्तं निजनाम 'ओं हृं' इत्यन्ते

तस्या मातृकाया मन्त्रगतानक्षरानुद्धृत्य क्वचिदालिख्य तद्गतान् दोषान् परिहृत्य तत्तन्मत्रेण सम्पूज्य शिष्यायोपदिशेदिति। ते:'। ख.घ.ङ.च. पाठ:।

शिवनारायणाय' इति नत्यन्तं नमोन्तमेतद् मन्त्रिभिः शिवनारायणमूलं समुद्दिष्टमुक्तम्। मन्त्रिभिः समुद्दिष्टमित्यनेन अत्र नामान्तरं न युञ्ज्यादित्यभिप्रायः।।63।।

विवरणम्

वसुस्वर ऋकारः, लवो बिन्दुः, वियदाकाशो हकारः, 'हृं' इति यावत्। तस्य बीजस्यान्ते स्थितं निजनामेति समासः।।63।।

Śaṅkaranārāyana has a Mūlamantra like "Śivanārāyaṇa namaḥ" name prefixed with Praṇava and Bījākṣara. (63)

तारभुवनाधिनाथान्तस्थं निजनाम ङेनमोन्तमिह।
दुर्गायां सप्तार्णं मूलं दुंबीजि नाम वस्वर्णे।।64।।

विमर्शिनी

दुर्गायां तारभुवनाधिनाथान्तस्थं 'ओं ह्रीं' इत्यनयोरन्तस्थितं ङेनमोन्तं चतुर्थ्येकवचननमोन्तं निजनाम 'दुर्गायै नमः' इति सप्तार्णं मूलं, वस्वर्णे अष्टार्णे दुंबीजि दुंबीजयुक्तं नाम भवति।।64।।

विवरणम्

वस्वर्णे नाम दुम्बीजित्यन्वयः। दुर्गामूले अष्टाक्षरे तन्नाम दुंबीजसहितं स्यादित्यर्थः।।64।।

For Durgā, Praṇava along with Bījākṣara form' the Mūlamantra ending in dative case. (64)

मेदःस्पृग्रसवर्णस्पृक्षोडशभिन्नतच्चतुर्विंशः ।
उद्योतितः षडर्णो वेनम इति षण्मुखेऽणुराद्यादिः।।65।।

विमर्शिनी

षुण्मुखे मेदस्पृग्रसवर्णस्पृक्षोडशभिन्नतच्चतुर्विंशत् मेदो वकारः, स्पृग्रसवर्णः स्पर्शानां षष्ठश्चकारः, स्पृक्षोडशेन तकारेण भिन्नः सम्भिन्नो युक्तः, तच्चतुर्विंशो भकारः, स तु उद्योतितः उकारेणालङ्कृतः, वेनमः इति स्वरूपम् इति षडर्णोऽणुः आद्यादिः आदिः प्रणवः स आदौ युक्तश्च भवति।।65।।

विवरणम्

मेदो वकारः, स्पृग्रसवर्णः स्पर्शषष्ठाक्षरः चकारः, स्पृक्षोडशभिन्न तच्चतुर्विंशः। स्पर्शषोडशसहितं स्पर्शचतुर्विंशाक्षरं उद्योतितः उकारेण सहिताः। पूर्वस्यैतद्विशेषणम्। आद्यादिः प्रणवादिः। स्वरार्णोऽणुः सप्ताक्षरो मूलमन्त्रः।।65।।

For Subrahmaṇya the mantra is given as "Vacadbhuve namaḥ" prefixed with Praṇava. It consists of six letters. (65)

स्पर्शतृतीयं गणपे प्रथमेन चतुर्दशेन वाचाढ्यम्।
लवलसितमेकवर्णं मूलमुशन्त्यादिमादितोऽत्रापि।।66।।

विमर्शिनी

गणपे स्पर्शतृतीयं गकारः, प्रथमेनाकारेण चतुर्दशेन औकारेण वा अचा स्वरेणाढ्यं युक्तं। लवलसितं बिन्दुनालङ्कृतं च एकवर्णं मूलम् उशन्ति इच्छन्ति। आचार्या इति शेषः। अत्राप्यादितः आदिं प्रणवं चेच्छन्ति।।66।।

विवरणम्

अचाढ्यमिति छेदो द्रष्टव्यः। आदिमादितोऽत्रापीति प्रणवसहितत्वमुक्तम्।।66।।

For Gaṇapati Praṇava with a single alphabet is the mantra, Om Gam Namaḥ." (66)

स्पर्शचतुर्थहुताशनषष्ठस्वरबिन्दुरूपबीजान्ते ।
सनतिपरा[1]याष्टार्णं गोप्त्रेर्णं शास्तृमूलमाद्यादि।।67।।

विमर्शिनी

स्पर्शचतुर्थहुताशनषष्ठस्वरबिन्दुरूपबीजान्ते स्पर्शचतुर्थः घकारःस हुताशनो रेफः, षष्ठस्वर ऊकारः बिन्दुरनुस्वारः, एतद्रुपबीजस्य 'घ्रूं' इत्यस्यान्ते सनतिपराय 'नमःपराय'सहितं 'गोप्त्रे' इत्यर्णम् अष्टार्णं शास्तृमूलम् आद्यादि प्रणवादि च भवति।।67।।

विवरणम्

नवार्णं शास्तृमूलमित्यन्वयः।।67।।

For Śāstā the Mūlamantra like "Parāya goptre namaḥ" prefixed with Praṇava and Bījākṣara. (67)

साध्यनारायणो दैवी गायत्री हरिमूलके।
ऋषिच्छन्दोदेवताः स्युः परमात्मापि च क्रमात्।।68।।

विमर्शिनी

तेषां मूलमन्त्राणामृष्यादिकं कथयति–साध्येत्यादिभिः। हरिमूलके साध्यनारायण ऋषिः, दैवीगायत्री छन्दः, परमात्मापि देवता च क्रमात् स्युः।।68।।

For the Mūlamantra of Viṣṇu the Rishi is Sādhyanārāyaṇa, chandas is Daivigayatri and devatā is Paramātmā. (68)

ऋष्याद्या गिरिशे वामदेवपङ्क्तिसदाशिवाः।
[2]ब्रह्मातिजगती स्थाणुहरौ हरिहरः क्रमात्।।69।।

विमर्शिनी

गिरिशे वामदेवपङ्क्तिसदाशिवाः ऋष्याद्याः। स्थाणुहरौ ब्रह्मा, अतिजगती, हरिहरश्च क्रमाद् ऋष्याद्याः।।69।।

---

1. 'य नवार्णं'
2. 'शार्ङ्गीशे ब्रह्मजगतीशिवनारायणाः स्मृताः।।' ख. पाठः।

For Siva the Rṣi-chando -devatās are respectively Vāmadeva, Paṅkticchanda and Sadāśivarudrodevatā. (69)

क्रमान्नारदगायत्रीदुर्गा महिषविद्विषि।
सनत्कुमारगायत्रीसुब्रह्मण्याः षडानने।।70।।

विमर्शिनी

महिषविद्विषि क्रमान्नारदगायत्रीदुर्गाः स्युः। षडानने सनत्कुमारगायत्रैसुब्रह्मण्याः।।70।।

For Durgā the respective the sages etc. are Nārada, Gāyatri and Durgā and forc Subrahmaṇya they are Sanatkumāra, Gāyatri and Subrahmaṇya himself. (70)

गणकाख्यो निचृद्गायत्र्यथो गणपतिः स्वयम्।
विघ्ने रेवन्तगायत्रीशास्तारो भूतनायके।।71।।

विमर्शिनी

विघ्ने गणकाख्यः गणकः, निचृदगायत्री, अथो गणपतिः स्वयं च । भूतनायके रेवन्तगायत्रीशास्तारश्च।।71।।

For Vighneśa, Gaṇaka is the rishi, Nicṛdgāyatrī is the cchandas and Gaṇapati is the devatā. (71)

अङ्गान्यथ हृदयशिरःशिखाश्च कवचं च नेत्रेमस्त्रमिति।
प्रायोऽखिलेषु षट् स्युः, सोदरपृष्ठानि तानि हरिमूले।।72।।

विमर्शिनी

अङ्गनामान्याह–अङ्गानीति। अथाखिलेषु हृदयशिरःशिखाश्च कवचं च नेत्रमस्त्रमिति प्रायः सामान्येन षडङ्गानि स्युः। हरिमूले तानि सोदरपृष्ठानि उदरपृष्ठयुक्तानि।।72।।

विवरणम्

अङ्गमन्त्रलक्षणमाह–अङ्गानीति।।72।।

For all deities there are six angas in this connection. They are Hṛdaya, Śiras, Śikhā, Kavaca, Netra and Astra. But for Viṣṇu the number is eight and Udara and Pṛṣṭha are also included. (72)

नेत्रास्त्रक्रमविनिमयवन्ति हरिस्कन्ददुर्गासु।
स्वोदितबीजार्णान्ते ङेन्ताख्यानानि जातियुक्तानि।।73।।

विमर्शिनी

हरिस्कन्ददुर्गासु तानि नेत्रास्त्रक्रमविनिमयवन्ति नेत्रास्त्रयोः क्रमस्य व्यत्यासयुक्तानि। अङ्गमन्त्रानाह–स्वोदितेति। स्वोदितबीजार्णान्ते स्वस्वोदितबीजरूपाणां अक्षराणामन्ते ङेन्ताख्यानानि चतुर्थ्यन्तानि नामानि। 'हृदयाय' 'शिरसे' इत्यादीनि जातियुक्तानि 'नमः' स्वाहे'त्यादिभिः वक्ष्यमाणाभिर्जातिभिर्युक्तानि।।73।।

विवरणम्

स्वोदितेति-क्वचिद्बीजानि क्वचिद्वर्णांश्च अङ्गार्थं वक्ष्यन्ते। ङेन्ताख्यानानि 'हृदयाय' 'शिरसे' इत्यादीनि जातयस्तु वक्ष्यमाणाः।।73।।

For Viṣṇu, Subrahmaṇya and Durgā the sequence of Netra and Astra may be changed as Astra and Netra. For all other deities, that names may be in dative case and shall end with namaḥ, svāhā etc. (73)

लवलसितमूलवर्णैर्हरौ, हरे तैर्विसर्गिवर्णास्त्रैः।
अङ्गानि मूलवर्णैः पञ्चमवर्णान्वितेक्षणानि गुहे।।74।।

विमर्शिनी

अङ्गानां बीजान्याह-**लवेति**। हरौ लवलसितमूलवर्णैः बिन्दुसहितमूलाक्षरैः सहितान्यङ्गानि स्युः। हरे च विसर्गिवर्णास्त्रैः विसर्गसहितषष्ठाक्षरयुक्तास्त्रैः तैर्वर्णैः। गुहे च मूलवर्णैः लवलसितैरित्यवगन्तव्यम्। पञ्चमवर्णान्वितेक्षणानि मूल[1]पञ्चमवर्णान्वितनेत्राण्यङ्गानीति।।74।।

विवरणम्

तत्र वर्णानङ्गोचितानाह-**लवेति**। हरावष्टाङ्गानि। विसर्गिबीजास्त्रैरिति। यकारं सविसर्गमुक्त्वा अस्त्रं कुर्यादित्यर्थः। पञ्चमबीजान्वितेक्षणानि गुह इति। वकारादिचतु[2]र्भिर्वर्णैः कवचान्तानि म इत्यस्त्रं नकारो नेत्रमित्यर्थः।।74।।

In the case of Viṣṇu the eight aṅgas (Hṛdaya, Śiras etc) shall be Anusvāra and Mūlakṣara. For Śiva Mūlaksara forms the Aṅgabīja. The bīja to Astra should be with Visarga (like "yaḥ"). For Subrahmaṇya Mūlakṣara along with "na" for Netra is prescribed. (74)

अक्लीबसमकलालवयुतवियतेशाच्युतेऽमुनाग्निमता।
व्यत्यस्तान्त्ययुगाचा दुर्गायैवर्णशालिनार्यायाम्।।75।।

विमर्शिनी

ईशाच्युते अक्लीबसमकलालवयुतवियता क्लीबरहितयुग्मस्वरबिन्दुयुतेन हकारेण 'हां हृदयाय नमः' 'हीं शिरसे स्वाहा' इत्याद्येन। आर्यायाम् अग्निमता रेफयुक्तेन अमुना अक्लीबसमकलालवयुतवियता (व्यत्यस्तान्त्ययुगाचा) दुर्गायैवर्णशालिना प्रत्येकं 'दुर्गायै' इति वर्णयुक्तेन।।75।।

विवरणम्

अक्लीबाः समाः कला आ ई ऊ ऐ औ अः इत्येते स्वराः। वियदाकाशो हकारः। अमुनेति तत्तत्कलान्वितो हकारो गृह्यते। व्यत्यस्तान्त्ययुगाचेति। विसर्गेणास्त्रं पञ्चममौकारेण नेत्रं षष्ठमित्यर्थः। 'ह्रां दुर्गायै हृदयाय नमः' इत्यादयो मन्त्राः।।75।।

---

1. 'लस्य प' ख. पाठः।
2. 'तुर्व' क. पाठः।

For Śaṅkaranārāyaṇa the letter "ha" along with certain vowels and Anusvara is the Aṅga (as noted in the commentary). For Durgā the same "ha" with "repha" is needed for Aṅganyāsa with a change in the sequence of Netra and Astra. (75)

गामाद्यैराद्यमनौ द्वितीयमन्त्रेऽङ्गकानि तैरेव।
पञ्चदशस्वरनेत्रैर्विघ्ने षणमन्त्रकैः प्रभानाथे।।76।।

विमर्शिनी

विघ्ने आद्यमनौ 'गं' इति मन्त्रे गामाद्यैः 'गां' गीं' इत्याद्यैः, द्वितीयमन्त्रे 'गौं' इति मन्त्रेऽपि तैरेवाङ्गानि। तत्र पञ्चदशस्वरनेत्रैरिति विशेषः। प्रभानाथे षण्मन्त्रकैः रेवन्तादिभिर्वक्ष्यमाणैः।।76।।

विवरणम्

आद्यमनुः प्रथमस्वरा[1]ढ्यो गकारः। गामित्यक्लीबसमकलादिपरामर्शः।।76।।

For Vighneśa two Mūlamantras with "ga" are prescribed. In the case of the second for Netra "gam" is noted. For Śāstā six mantras are noted for Aṅganyāsa. (76)

उत्कपदैः क्रुद्धमहावीरद्युसहस्त्रपूर्वठयुगान्तैः।
साख्याजातिभिरजिते पञ्चाङ्गान्यखिलमन्त्रयोग्यानि।।77।।

विमर्शिनी

पञ्चाङ्गमाह–उत्कपदैरिति। अजिते क्रुद्धमहावीरद्युसस्त्रपूर्वठयुगान्तैः 'क्रुद्धमहावीरद्युसहस्त्र' इति पूर्वतो युक्तेः ठयुगान्तैः 'स्वाहा' इत्यन्ते युक्तैश्च। ठयुगान्तैरित्[2]यनेनोत्कपदस्य चतुर्थ्येकवचनान्तत्वमपि द्रष्टव्यम्। क्रुद्धोत्काय स्वाहा' इत्याद्यैरित्यर्थः। साख्याजातिभिः 'हृदयाय नमः' इत्यादियुक्तैः पञ्चाङ्गानि[3] नेत्ररहितान्यखिलमन्त्रयोग्यानि सर्ववैष्णवमन्त्रेषु योग्यानि।।77।।

विवरणम्

'क्रुद्धोत्काय स्वाहा हृदयाय नमः' इत्यादयो मन्त्राः। अखिलमन्त्रयोग्यानीति षडक्षरादिग्रहणम्।।77।।

For Viṣṇu these can be Mūlamantras like Dvādasākṣara, Aṣṭākṣara and Ṣaḍaskṣara. For the Pañcagāyatri the words like "utka 'and 'svāhā" are to be added suitably. (As noted in the commentary) (77)

सनभःस्वाहावषडथ हुंवौषट्फट् च जातयः षट् स्युः।
अस्त्रान्तेषु तदूर्ध्वं नम इति पञ्चाङ्गके न नेत्रविधिः।।78।।

---

1. 'रा ह्याका' क. पाठः।
2. 'त्यंशेनो' खः घ. ङ. च. पाठः।
3. 'नि ता' घ. ङ. च. पाठः।

विमर्शिनी

जातीः कथयति। **सनम** इति। अथ सनमःस्वाहावषट् नमः स्वाहा वषडिति युक्तं हुंवौषट्-फडिति षड् जातयश्चास्त्रान्तेष्वङ्गेषु क्रमेण स्युः। तदूर्ध्वम् उदरादिषु नम इति। पञ्चाङ्गके नेत्रविधिर्न भवति।।78।।

विवरणम्

इदानीं जातिं दर्शयति-**सनम** इति। तदूर्ध्वं नम इति। उदरपृष्ठयोः बाहूरुजानुपादेष्वप्येतत्। पञ्चाङ्गके न नेत्रविधिरिति। यत्र पञ्चैवाङ्गानि तत्र नेत्रं विनेत्यर्थः।।78।।

At the end of Astramantra the following six are suffixed. Namaḥ, svāhā, Vaṣad, hum, vauṣad and phaṭ. For the balance aṅgas not covered by these the word namaḥ is to be suffixed. In the Pañcāṅganyāsa there is no element as Netra. (78)

नारायणाय विद्महे वासुदेवाय धीमहे।
तन्नो विष्णुरिति श्रीशे गायत्री स्यात् प्रचोदयात्।।79।।

विमर्शिनी

गायत्रीः कथयति-नारायणायेत्यादिभिः। श्रीशे इति गायत्री स्यात्।।79।।

विवरणम्

गायत्रीरपि दर्शयति-नारायणायेत्यादिना।।79।।

The Gāyatrī for Viṣṇu is given here as "Nārāyaṇāya" etc. (79)

नारायणादित्रिपदस्थाने शङ्कर इत्यपि।
नारायणश्च पुरुषः संयोज्याः शिवशार्ङ्गिणि।।80।।

विमर्शिनी

शिवशार्ङ्गिणि नारायणादित्रिपदस्थाने शङ्करः नारायणश्च पुरुष इत्यपि त्रयः शब्दाः संयोज्याः।।80।।

For Śaṅkaranārāyaṇa first three words of the above mentioned Gāyatri are to be replaced by the words Śaṅkara, Nārāyaṇa and Puruṣa. (80)

कात्यायन्यादिदुर्गान्तार्यायां कन्याकुमार्यपि।
गुहेऽत्र शक्तिहस्तादिस्कन्दान्तश्च षडाननः।।81।।

विमर्शिनी

आर्यायां दुर्गायां कात्यायन्यादिदुर्गान्ता कात्यायन्याद्या दुर्गान्ता च। मध्यगता कन्याकुमारी। गुहे अत्र त्रिपदं शक्तिहस्तादिस्कन्दान्तो मध्यस्थः षडाननश्च।।81।।

For Durgā the Gayatri is in the form of the synonym of Kātyāyanī,

Kanyākumāri and Durgā. For Subrahmaṇya the words Śaktihasta and Ṣaḍānana are to be used to form the Gāyatrī. (81)

विनायकादिर्विघ्[1]नान्तो गजवक्त्रो गणाधिपे।
भूताधिपादिशास्त्रन्तो भवपुत्रोऽ[2]त्र शास्तरि।।82।।

विमर्शिनी

गणाधिपे विनायकादिः विघ्नान्तः मध्यस्थो गजवक्त्रश्च। शास्तरि अत्र भूताधिपादिशास्त्रन्तः 'भूतनाथाये'त्यादिशास्त्रन्तः। मध्यस्थो भवपुत्रश्[3]च।।82।।

In the case of Gaṇapati the words Vināyaka, Gajavaktra are to be used. For Śāstā the words Bhūtādhipa, Bhavaputra are also be used along with Sasta to form Gāyatrī mantra. (82)

तन्महेशाय विद्महे वाग्विशुद्धाय धीमहे।
ब्रवीतु शिवगायत्र्यां तन्नः शिवः प्रचोदयात्।।83।।

विमर्शिनी

शिवगायत्र्याम् एवं ब्रवीत्वित्यर्थः।।83।।

For Śiva Gāyatrī and the words Maheśa, Vagviśuddha and Śiva are to be used. (83)

व्योमव्योमाय विद्महे व्योमेश्वराय धीमहे।
ब्रवीतु व्योमगायत्र्यां तन्नो व्योमः प्रचोदयात्।।84।।

विमर्शिनी

व्योमगायत्र्यां तद्वदेव व्याख्येयम्।।84।।

For the Vyoma Gāyatri of Śiva the words to be included are Vyomavyoma,Vyomeśvara and again Vyoma. (84)

श्रियो बीजं वह्नीलवसहितमस्थ्यस्य च भृगु-
र्निचृच्छ्रीर्ऋष्याद्या गगनमिति शक्तेः पुनरजः।
तथा गायत्री च प्रकृतिरपि मूलाक्षरयुता
द्वयोरङ्गं दीर्घाज्भिदुरनिजबीजेन गर्दितम्।।85।।

विमर्शिनी

श्रीबीजादिकमुद्धरति-श्रिय इति। वह्नीलवसहितं रेफेण ईकारेण बिन्दुना च सहितम् अस्थि शकारः श्रियो बीजम्। अस्य बीजस्य भृगुर्निचृत् श्रीश्च ऋष्याद्याः। शक्ते[4]: पुनः इति एवंभूतं गगनं हकारः

1. 'वि' ख. पाठः।
2. 'थ' घ. पाठः।
3. 'श्च भवति।।' ख. ध ङ च. पाठः।
4. 'क्तेश्च पु' न पाठः।

बीजम्। तथा अजः गायत्री मूलाक्षरयुता प्रकृतिः मूलप्रकृतिश्च ऋष्याद्याः। द्वयोः श्रीशक्तिबीजयोः दीर्घाज्भिदुरनिजमूलेन दीर्घाज्भिः भेदयुक्तेन निजमूलेन 'श्रां' 'श्रीं' इत्यादिना 'ह्रां' 'ह्रीं' इत्यादिना च अङ्गं गदितमित्यर्थः।।85।।

For the goddess Śrī the bija is "srim" the Ṛsi is Bhṛgu and the chandas is Nicṛt. For Śakti the bīja is "hum", Rṣi is Aja, chandas is Gāyatrī and devatā is Mūlaprakrti. There is an option in that the Mūlamantra could be "Śram Śrim" and "hram hrim". (85)

तारप्रणामौ भगवाक्षराणि तेवासुदेवाय हराविनार्णाः।
मन्त्रः प्रजापत्यभिधोऽस्य गायत्र्यृष्यादयो विष्णुरपि क्रमेण।।86।।

विमर्शिनी

वैष्णवं द्वादशाक्षरमुद्धरति–तारेति। हरौ तारप्रणामौ 'ओं नमः' इति, भगवाक्षराणि, 'भगव' इत्यक्षराणि तेवासुदेवाय इत्यक्षराणि च इनार्णः द्वादशाक्षरो मन्त्रः स्यात्। अस्य प्रजापत्यभिधः प्रजापतिः गायत्री विष्णुश्च ऋष्यादयः।।86।।

विवरणम्

मन्त्रान्तराणि प्रतिदैवतमाह–तारप्रणामावित्यादिना। तेवासुदेवायेति षडक्षराण्युच्चरितानि। इनार्णो द्वादशाक्षरमन्त्रः।।86।।

For Viṣṇu "Om Namaḥ" is to be added along with"bhagava"to form the Dvādasāksara Mūlamantra as "Om namo Bhagavate Vāsudevāya". The Rsi is Prajāpati, chandas is Gāyatri and devatā is Viṣṇu. (86)

मन्त्रार्णैर्द्विषडङ्गकान्युदितवत् तेष्वष्टकं कल्पयेद्
बाहूरुद्वयजानुपादसममिख्यातानि चत्वार्यथ।
पञ्चाङ्गानि मनोर्मनीषिभिरमुष्योक्तानि वर्णैः क्रमात्
पृथ्वीनेत्रपयोधिसायकमि[1]तैः सर्वैश्च मन्त्रोदितैः।।87।।

विमर्शिनी

अस्य मन्त्रार्णैः द्विषडङ्गकानि द्वादशाङ्गानि। तेष्वङ्गेषु मध्ये अष्टकम् उदितवत् अष्टाक्षरोक्ताष्टाङ्गवत्। अथ बाहूरुद्वयजानुपादसमभिख्यातानि' सु बाहुभ्यां नमः' 'दें ऊरुभ्यां नमः' 'वां जानुभ्यां नमः' 'यं पादाभ्यां नमः' इति चत्वारि कल्पयेदित्यर्थः। अस्यैव मन्त्रस्य पञ्चाङ्गमान्याह–पञ्चाङ्गानीति। अमुष्य मनोर्मनीषिभिः मन्त्रोदितैः मन्त्रोक्तैः पृथ्वीनेत्रपयोधिसायकमितैः एकद्विचतुष्पञ्चमितैः सर्वैश्च वर्णैः क्रमात् पञ्चाङ्गान्युक्तानि।।87।।

विवरणम्

द्विषडङ्गकानि द्वादशाङ्गानि यावत्। सर्वैरपीति। समस्तेनेत्यर्थः।।87।।

1. 'तैः कुर्वीत सर्वैरपि।।' ख. पाठः।

With the mantras of Dvādasākṣara when used for worship one alphabet each of the Mūlamantra are to be added for the Nyāsa of the twelve aṅgas-limbs. Of the eight shall be from Hṛdaya upto Pṛṣṭha as the Aṣṭākṣara pūjā. Rest of four angas to be placed in Bāhu, Ūru, Jānu and Pāda. There is a Pañcāṅganyāsa of this mantra to be located at Hrdaya, Siras, Śikhā, Kavaca and Astra. (87)

विष्णौ षड्वर्णमन्त्रो ध्रुवनतिसहितं विष्णवेर्णं निराख्यै-
हूँ कं शिं हुं ह इत्येभिरिह नतियुतैः स्युस्तदङ्गानि पञ्च।
तारान्ते हूं समेतो यदि भवति सबीजोऽणुरङ्गानि तारा-
द्यर्णैर्हामादिमत्स्वाह्वयनतिसहितैर्नेत्रनिष्ठानि षट् स्युः।।88।।

विमर्शिनी

षडक्षरमाह-विष्णौ षड्वर्णेति। विष्णौ ध्रुवनतिसहितं 'ओं नमः' इति युक्तं 'विष्णवे' इत्यर्णं षड्वर्णमन्त्रः। इह मन्त्रे निराख्यैः हृदयादिनामरहितैः हूं कं शिं हुं हः इत्येभिर्बीजैर्नतियुक्तैः 'हूं नमः' 'कं नमः' शिं नमः' 'हुं नमः' 'हः नमः' इति तदङ्गानि पञ्च स्युः। तारान्ते हूंसमेतो यदि प्रणवान्ते 'हूं' इति युक्तश्चेत् तर्हि सबीजोऽणुः सबीजः षडक्षरो भवति। हामादिमत्स्वाह्वयनतिसहितैः 'हां' 'हीं' इत्यादियुक्तैः हृदयादिस्वस्वनाम्ना प्रत्येकं नत्या च युक्तैः ताराद्यर्णैः प्रणवादिभिः षड्भिरक्षरैः नेत्रनिष्ठानि षडङ्गानि स्युः। 'ओं हां हृदयाय नमः' 'न हीं शिरसे नमः' मों हुं शिखायै नमः' इत्यादीत्यर्थः।।88।।

विवरणम्

निराख्यैरिति जातीनामप्युपलक्षणम्। 'हुं नमः' इति हृदयमन्त्रः। एवमन्येऽपि। सबीजो भवतीति सम्बन्धः। हामादिमत्स्वाह्वयनतिसहितैः 'ओं हां हृदयाय नमः'। 'नं हीं शिरसे नमः' इत्यादिभिः।। 88।।

For Viṣṇu Ṣaḍaṅganyāsa - the use of six aṅgas are prescribed. The six lettered mantra'is "Om namo Viṣṇave". The places for Nyāsa are also mentioned here with bijas and they are to end with "namaḥ" (88)

अन्तर्यान्यभिधः स्यादस्य मनो रसलिपेर्ऋषिः प्रोक्तः।
गायत्री च छन्दो विष्णुः स्वयमेव देवता तद्वत्।।89।।

विमर्शिनी

अस्य रसलिपेः षडार्णस्य सबीजस्याबीजस्यापि मनोरन्तर्यामी इत्यभिधः ऋषिः प्रोक्तः स्यात्। गायत्री च छन्दः। तद्वद् विष्णुः स्वयमेव देवता।।89।।

For this Ṣaḍvarṇa mantra of Viṣṇu, Ṛṣi is Antaryāmī, chandas is Gāyatrī and devatā is Viṣṇu. (89)

प्रोक्तस्तारसहस्त्रपूर्वमरहुंफट् चक्रमन्त्रोऽहिर-
स्यर्षिर्बुध्न्युतः सुदर्शनमहाविष्णुः स्मृता देवता।
छन्दोऽनुष्टुबथाङ्गकानि गदितान्यायाग्रिजायान्तिकै-
श्चक्रैराविसुधीसमित्यपि पुनर्ज्वालेति चादौ युतैः।।90।।

विमर्शिनी

सुदर्शनमन्त्रमुद्धरति-**प्रोक्त** इति। तारसहस्रपूर्वं प्रणवान्ते सहस्र इति पदपूर्वम् अरहुंफडिति चक्रमन्त्रः प्रोक्तः। अस्य ऋषिः बुध्न्ययुतः अहिः अहिर्बुध्न्यः, स ऋषिरित्यर्थः। सुदर्शनमहाविष्णुर्देवता स्मृता। अनुष्टुप् छन्दः स्मृतम्। अथ आयाग्निजायान्तिकैः 'आय स्वाहा' इत्यन्ते युक्तैः आविसुधीसमिति पुनः ज्वालेति चादौ युतैश्चक्रैः अङ्गानि गदितानि उक्तानि। 'आचक्राय स्वाहा हृदयाय नमः' 'विचक्राय स्वाहा शिरसे स्वाहा' इत्याद्यङ्गानीत्यर्थ।।90।।

विवरणम्

चक्रमन्त्रस्य 'आचक्राय स्वाहा' इत्यादयोऽङ्गमन्त्राः।।90।।

Sudarśanamantra of Viṣṇu consists of words of Praṇava, Sahasra, Ara, hum phat. Ahirbudhnya is its Ṛṣi, Anuṣṭup is chandas and Sudarśanamahāviṣṇu is devata. A set of six mantras are suggested here along with Ṣaḍaṅganyāsa. (90)

जितं ते पुण्डरीकाक्ष! नमस्ते विश्वभावन!।
सुब्रह्मण्य! नमस्तेऽस्तु नमः पुरुषपूर्वजः।।91।।

विमर्शिनी

उपचारमनुं वदन् पूर्वं तदेव पठति-जितं त इति।।91।।

The Upacāramantra of Viṣṇu is narrated here as "jitam te" etc. (91)

उपचारमनुः सोऽयमजिते सम्प्रकीर्तितः।
केवलाद्यद्वितीयोपान्त्यान्त्याच्प्रपुटिताः क्रमात्।।92।।

स्युर्वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धकाः।
नमोभगवतेर्णाद्या ङेन्ताश्च हरिमूर्तयः।।93।।

विमर्शिनी

अजिते स पठितः अयमुपचारमन्त्रः सम्प्रकीर्तितः। मूर्तिमन्त्रानुद्धरति केवलेत्यादिना। केवलाद्य-द्वितीयोपान्त्यान्त्याच्प्रपुटिताः, अत्र केवलशब्दः प्रत्येकं संबध्यते, केवलेन आद्येन केवलेन द्वितीयेन उपान्त्येन अन्त्येन च अचा स्वरेण प्रपुटिताः, नमोभगवतेर्णाद्याः नमो भगवत इत्यक्ष(राणि?रैः) आदौ युक्ताः ङेन्ताः चतुर्थ्येकवचनान्ताः वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धकाः क्रमात् हरिमूर्तयः स्युः। 'अ ओं नमो भगवते वासुदेवाय अ' 'आ ओं नमो भगवते सङ्कर्षणाय आ' इत्याद्या इत्यर्थः।।92-93।।

विवरणम्

केवलाद्याद्वितीयोपान्त्याच्प्रपुटिताः इति। 'अ ओं नमो भगवते वासुदेवाय अ' इत्याद्या मूर्तयः।।92-93।।

The above mentioned Mantra happens to be the one related to Viṣṇu. In all mantras the words "Om namo bhagavate "should be added in the

middle. The names of the God like Vāsudeva, Sankarṣaṇa, Pradyumna, Aniruddha may be added in their dative case. Bījakṣaras mentioned here also should be added in all the cases. (92-93)

तथैव हादिशान्तार्णैः सप्रतिष्ठैः सबिन्दुभिः।
शान्तिश्च श्रीसरस्वत्यौ रतिस्तन्मूर्तिशक्तय[1]:।।94।।

विमर्शिनी

शक्तिमन्त्रानाह-**तथैवेति**। तथैवेत्यनेन चतुर्थ्येकवचनान्तत्वं गृह्यते। हादिशान्तार्णैः हकारादिशकारान्तैः ह स ष श इत्यक्षरैः सप्रतिष्ठैः प्रतिष्ठया आकारेण युक्तैः सबिन्दुभिः बिन्दुयुक्तैः एवंभूतैर्बीजैर्युक्ताः शान्तिः श्रीसरस्वत्यौ रतिश्च तन्मूर्तिशक्तयः वासुदेवादीनां शक्तयः। 'ओं हां शान्त्यै नमः' इत्याद्या इत्यर्थः।।94।।

विवरणम्

तथैव हादिशान्ता[2]र्णैः सप्रतिष्ठैः सबिन्दुभिरिति। हां सां षां शां इति शान्त्यादिशक्तीनां बीजानीत्यर्थः।।94।।

The Śaktis of the deities like Vāsudeva are Śānti, Śrī, Sarasvatī and Rati. They are to be made part of the four mantra along with the Bījākṣara ha- śa- ṣa- and sa along with Anusvāra (like "ham Śāntyai namaḥ" etc.) (94)

किरीटकेयूरहारपदान्याभाष्य मन्त्रवित्।
मकरान्ते कुण्ड[3]लं च चक्रशङ्खगदा[4]दिकम्।।95।।
अब्जहस्त[5]पदं चोक्त्वा पीताम्बरधरेति च।
श्रीवत्साङ्कित[6]माभाष्य वक्षःस्थलमथो वदेत्।।96।।
श्रीभूमिसहित[7]स्वात्मज्योतिर्द्वयपदं वदेत्।
[8]दीप्त[9]मुक्त्वा करायेति सहस्रादित्यतेजसे।
[10]हृदन्तः प्रणवादिः स्यात् किरीटादिमनुस्त्वयम्।।97।।

1. 'सः।। ईशे' इति ख. ग. पाठः।
2. 'न्तावर्णैः' च. पाठः।
3. 'लार्णं तक्र'
4. 'दान्ततः।।'
5. 'स्तेति पिताम्बरेति चोक्त्वा धरीति च।'
6. 'तशब्दान्ते वक्षस्थलपदं ततः।।'
7. 'तात्मान्ते ज्यो',
8. 'ततो दीप्तिक' घ. पाठः।
9. 'प्ति' इति मूलकोशपाठः।
10. 'नम इत्युच्चरेदेष किरीयख्यो महामनुः।। ई' घ. पाठः।

विमर्शिनी

किरीटमन्त्रमुद्धरति-**किरीटेति**। 'किरीटकेयूरहार' इति पदानि आभाष्य उक्त्वा। मन्त्राविदित्यनेन मकरान्ते 'मकर' इत्यन्ते 'कुण्डलालङ्कृत' इत्यध्याहार्यः। चक्रशङ्खगदादिकं 'चक्रशङ्खगदा' इत्यादिकम् अब्जहस्तपदम् 'अब्जहस्त' इति पदं चो[1]क्त्वा 'पीताम्बरधर' इति च 'श्रीवत्साङ्कित' इति पदमाभाष्य 'वक्षःस्थल' इति पदं वदेत्। 'श्रीभूमिसहित' इति पदं स्वात्मज्योतिर्द्वयपदं 'स्वात्मज्योतिर्द्वय' इति पदं वदेत् 'दीप्ति[2]' इति पदं 'कराय' इति 'सहस्रादित्यतेजसे' इति च उक्त्वा इति किरीयदिमनुः। अयं हृदन्तः नमोऽन्तः अन्ते 'नम' इति युक्तः, प्रणवादिः स्यात्।।95-97।।

The preceptor proficient in mantras shall pronounce the words-Kirīṭakeyūrahāra followed by "Makarakuṇḍalālamkṛta", "Cakraśaṅkhagadābjahasta", "Pitāmbaradhara", "Śrīvatsālaṅkrta" and "Vakṣasthala". Thereafter he shall pronounce the words "Śrībhūmīsahita Svātmajyotirdvaya" and "Dīptakarāya sahasrādityatejase". This is called Kirīṭamantra which shall be prefixed with Praṇava in the beginning and shall end with "namaḥ". The form of the mantra is given by the commentator as follows:

"Om Kirīṭakeyūrahāramakarakuṇḍalālamkṛta cakraśankha-gadābjahasta pītāmbaradhara Śrīvatsālaṅkṛta vakṣasthala śrībhūmīsahita Svātmajyotirdvaya diptakarāyasahasrādityatejase namaḥ" (95-97)

ईशे मनुस्वरलवोद्भिदुरं विहायः
प्रासादनाममनुरक्तचराः शिवान्ताः।
ऋष्यादिकाः सलवदीर्घकलाविभिन्न-
व्योम्नाङ्गषट्कमिह विश्वकलाक्ष्ण्यभीष्टा।।98।।

विमर्शिनी

शैवान् मन्त्रानुद्धरति-**ईश** इति। ईशे मनुस्वरलवाद्भिदुरं चतुर्दशस्वरबिन्दुभ्यां युक्तं विहायः हकारः प्रासादनाममनुः प्रासादमन्त्रः स्यात्। शिवान्ता उक्तचराः षडक्षरे उक्तपूर्वाः ऋष्यादिकाः। सलवदीर्घकलाविभिन्नव्योम्ना बिन्दुयुक्तदीर्घस्वरैः भेदितेन हकारेणाङ्गषट्कं स्यात्। इह प्रासादमन्त्रे अक्ष्णि विश्वकला त्रयोदशस्वरः अभीष्टा उक्ता। 'हो नेत्रत्रयाय वौषट्' इत्यर्थः।।98।।

विवरणम्

विहायः आकाशो हकारः। उक्तचराः वामदेवपङ्क्तिसदाशिवा इति पूर्वमुक्ताः। विश्वकलाक्ष्ण्यभीष्टा 'हों' इति नेत्रे योज्यम्।।98।।

For Śiva, the Prasādamantra is the Sudarśnamantra spoken of as earlier with Vāmadeva as Ṛṣi, Paṅkti cchandas and Sadāśiva (rudra) devatā. The

---

1. 'प्रो' इति व्याख्याकोशपाठः।
2. 'प्ति' घ. ङ. च. पाठः।

six aṅgas are modifications of "ha"(for Hṛdaya, Śiras, Śikhā, Kavaca, Netratraya and Astra. (98)

ईशानस्तत्पुरुषाघोराख्यौ वामदेवनामाथ।
सद्योजातश्चोक्ता मन्त्रितमैः पञ्च मूर्तयो गिरिशे।।99।।

विमर्शिनी

मूर्तिमन्त्रानाह-ईशान इति। मन्त्रितमैः गिरिश ईशान इत्याद्याः पञ्च मूर्तय उक्ताः।।99।।

The five mantras of Śiva are given as follows by proficient preceptors. They are Īśāna, Tatpuruṣa, Aghora, Vāmadeva and Sadyojāta- the five manifestations. (99)

नाद्यैः पञ्चार्णविधौ नादविधौ विश्वपूर्वविषमाज्भिः।
विक्लीबैर्बिन्दुयुतैर्भिदुरेण विहायसा युता[1]ः प्रोक्ताः।।100।।

विमर्शिनी

पञ्चार्णविधौ एताः नाद्यैः नकारादिपञ्चभिरक्षरैः युताः। नादविधौ प्रासादविधौ विक्लीबैः नपुंसकार्णरहितैः बिन्दुयुतैः विश्वपूर्वविषमाज्भिः त्रयोदशैकादशपञ्चमतृतीयप्रथमस्वरैः भिदुरेण भेदयुक्तेन विहायसा हकारेण युताः प्रोक्ताः।।100।।

विवरणम्

नाद्यैर्मूलाक्षरैः। विश्वपूर्वेति। 'हों हें हुं हिं हम्' इत्युक्तानि।।100।।

In the Pañcākṣaranyāsa the letters namaḥśivāya are to be added along with the mantras like "namo Īśānāya 'etc. Thereafter bījākṣaras which are modifications of "ha" are also to be added like "ham Īśānāya namaḥ" (100)

पञ्चब्रह्ममहामनुराम्नायाम्नानतोऽत्र विज्ञेयः।
ईशपुरुषाग्निवामादिकदेवहराश्च भूर्यनुष्टुबथ।।101।।
गायत्र्यनुष्टुभौ कृत्यनुष्टुभावीश्वरस्तथापश्च।
आपो भगो भगश्चेतीशानादिक्रमात् तदृष्याद्याः।।102।।

विमर्शिनी

अत्र पञ्चब्रह्मोपदेश[2]ने आम्नायाम्नानतः वेदपाठरीत्या पञ्चब्रह्ममहामनुर्विज्ञेयः।ऋष्यादीनाह-ईशेति। ईशपुरुषाग्निवामदेवहराः ऋषयः। अथ भूर्यनुष्टुप्, गायत्री, अनुष्टुप्, कृतिरनुष्टुप् च छन्दांसि। ईश्वरः आपः आपः भगो भगश्च देवताः। तदृष्याद्याः ईशानादिक्रमाज्ज्ञातव्या इत्यर्थः। ईशानादिक्रमादित्यनेन तथैवात्र मन्त्रपाठ इत्यपि सूचितः।।101-102।।

1. 'ताश्चैताः' इति मूलकोशपाठः।
2. 'शेन आ' ख. पाठः।

विवरणम्

भूर्यनुष्टुबित्येकं छन्दोऽवगन्तव्यम्।।101।।

There is a mantra called Pañcabrahma mahāmanu mentioned in Yajurveda. The ṛṣis are Īśa- puruṣa-agni-vāmadeva- hara and meters are Bhūryanuṣṭup-Gāyatrī ,Anuṣṭup, kṛtiranuṣṭup, and devatās are Īśvara, Āpaḥ, bhago and Bhaga. These respectively are Rṣis, ccchandas and devatās of Pañcabrahma. (101-102)

पञ्चध्रुवोपरिष्टात् सर्वज्ञायेति हृन्मनुः प्रोक्तः।
अमृते तेजोमालिनि तृप्तायै ब्रह्मशिरस इति च शिरः।।103।।

विमर्शिनी

अङ्गमन्त्रानुद्धरति–पञ्चेति। पञ्चध्रुवोपरिष्टात् पञ्चप्रणवोपरिभागे 'सर्वज्ञाय' इति हृन्मनुः हृदयमन्त्रः प्रोक्तः। 'अमृते' इत्यादि 'शिरसे' इत्यन्तः शिरोमन्त्रः।।103।।

Hṛdaya mantra is as "Sarvajñāya" after the chanting of five praṇavas. The Śiromantra is in the form of "Amṛtatejomālin "etc, ending with Brahmaśiras. (103)

ज्वलितशिखिशिखे च शिखा त्वनादिबोधा समीरिता ङेन्ता।
वर्ममनुर्वज्रिण इति वज्रधराय द्विठः स्वतन्त्राय।।104।।

विमर्शिनी

ज्वलितशिखिशिखे इति ङेन्त अनादिबोधा 'ज्वलितशिखिशिखे अनादिबोधायै' इति शिखा समीरिता इत्यर्थः। वज्रिणे इति, वज्रधरायेति, द्विठः स्वाहा इति, स्वतन्त्राय इति च 'वज्रिणे वज्रधराय स्वाहा स्वतन्त्राय' इति वर्ममनुः कवचमन्त्रः।।104।।

The Śikhā mantra is as "jvalita śikhaśikhe" etc; followed by Anādibodha in dative case. The Kavacamantra is as Vajriṇe vajradharāya etc. (104)

सौंचौंहौमितिपूर्वः प्रोक्तोऽत्रालुप्तशक्तयेऽक्षिमनुः।
पाशुपतमन्त्रपूर्वः प्रोक्तश्चानन्तशक्तयेऽस्त्रमनुः।।105।।

विमर्शिनी

'सौं चौं होम्' इति बीजत्रयपूर्वः 'अलुप्तशक्तये' इत्यक्षिमनुः नेत्रमन्त्रः प्रोक्तः। पाशुपतमन्त्रपूर्वः वक्ष्यमाणपाशुपतास्त्रमन्त्रान्ते 'अनन्तशक्तये' इत्यस्त्रमनुः प्रोक्तः।।105।।

Akṣimanu or Netramantra is as "Aluptaśaktaye etc; after Praṇava mantra. The Astra mantra is after Pāśupata mantra with the addition of Ananataśaktaye' (105)

ईशानादिकलाः स्युः शशिनी पुनरङ्गदेष्टदा च मरीचिः।
ज्वालिन्यपि च निवृत्तिः प्रतिष्ठया विद्यया च शान्त्यभिधाना।।106।।

तामस्याख्या मोहा क्षया च निद्राह्वया पुनर्व्याधिः।
अथ मृत्युरूपिणी च क्षुधा तृषाख्या ततो रजोरूपा।।107।।
रक्षा रतिश्च कामा क्षमा च संयमनिका क्रिया सन्ध्या।
स्थिरया च कालरात्रिर्भ्रामण्यपि मोहिनी तथा श्रीश्च।।108।।
सिद्धिरथर्द्धिर्द्युतिरपि मेधा कान्त्याह्वया तथा प्रज्ञा।
भूयः प्रभा सुधा चेत्यष्टात्रिंशत् समीरिताः क्रमशः।।109।।

विमर्शिनी

अष्टात्रिंशत्कला आह-ईशानादीति। इति ईशानादिकलाः, 'ईशानः सर्वविद्याना-मि'त्यादिमन्त्रखण्डानामष्टात्रिंशत्संख्याः कलाः क्रमशः समीरिताः स्युः। शशिनी अङ्गदा इष्टदा मरीचिः ज्वालिनी इति पञ्चेशानकलाः। निवृत्तिः प्रतिष्ठा विद्या शान्तिश्च इति चतस्रस्तत्पुरुषकलाः। तामसी मोहा क्षया निद्रा व्याधिः मृत्युरूपिणी क्षुधा तृषा इत्यष्टावघोरकलाः। रजोरूपा रक्षा रतिः कामा क्षमा संयमनी क्रिया सन्ध्या स्थिरा कालरात्रि भ्रामणी मोहिनी श्रीः इति त्रयोदश वामदेवकलाः। सिद्धिः ऋद्धिः द्युतिः मेधा कान्तिः प्रज्ञा प्रभा सुधा इत्यष्टौ सद्योजातकला इति।। 106-109।।

There are five Īśānakalas narrated as Śaśinī, Aṅgadā, Iṣṭadā, Marīcī and Jvālinī. Tatpuruṣakalas are four as Nivṛtti, Pratiṣṭhā, Vidyā and Śantī. Aghorakalas are eight as Tāmasī Mohā, Kṣayā, Nidrā, Vyādhi, Mṛtyurūpiṇī, Kṣudhā and Tṛṣā. Vāmadevakalās are thirteen as Rajorūpā, Rakṣa, Rati, Kāma, Kṣamā, Samyamanī, Kriyā, Sandhyā, Sthirā, Kālārātrī Brahmaṇi, Mohoni and Śrī. The eight Sadyojātakalas are Siddhi, Ṛddhi, Dyutiḥ, Medhā, Kānti, Prajñā, Prabhā and Sudhā. (106-109)

सातङ्गोरगविश्वबाणनिगमैरष्टाष्टवेदाब्धिभि-
र्वेदेषुद्व्यृतुभूतवह्निशरबाणैस्तत्कलाः संयुताः।
सस्तेष्विष्विषुदोर्नगेषुदृगगाङ्काशाश्विषड्भिः क्रमा-
दष्टादष्टाश्विगुणेषुवेदनयनाङ्गैश्चाक्षरैर्मन्त्रजैः ।।110।।

विमर्शिनी

ईशानादीनामक्षरसंख्याविभागमाह-मातङ्गेति। तत्कलाः ईशानादीनां कलाः मन्त्रजैः अक्षरैः क्रमात् संयुताः इत्यन्वयः। मातङ्गाः अष्टौ, उरगाश्चाष्टौ, विश्वदेवास्त्रयोदश, बाणः पञ्च, निगमाः चत्वार इतीशानखण्डाः। अष्ट, अष्ट, वेदाश्चत्वारः, अब्धयश्चत्वार इति तत्पुरुषखण्डाः। वेदाश्चत्वारः, इषवः पञ्च, द्वि, ऋतवः षट्, भूतानि पञ्च, वह्नयस्त्रयः, शराः पञ्च, बाणाश्च पञ्च इत्यघोरखण्डाः। सप्त, इषुशब्दास्त्रयोऽपि पञ्चैव, दोरिति द्वे, नागाः सप्त, इषवः पञ्च, दृग् द्वे, अगाः सप्त, अङ्काः नव, आशाः दश, अश्विनौ द्वौ, षडिति वामदेवखण्डाः। अष्टाष्ट, अश्विनौ द्वौ, गुणास्त्रयः, इषवः पञ्च, वेदाश्चत्वारः, नयने द्वे, अङ्गानि षडिति सद्योजातखण्डा इति।।110।।

विवरणम्

अगा: पर्वता:। अक्षरैरिति 'अथ अघोरेभ्य: अनादिभवे उद्भवाय नम:' इत्येवं विभागो द्रष्टव्य:।।110।।

The thirty-eight kalas are given here as mantras with the proper prefixes and suffixes (the commentary gives the form of the mantras) (110)

तारान्ते बिन्द्वन्वितादित्रिदीर्घान्
ब्रूयाद् व्योमव्यापिनेऽर्णं ध्रुवं च।
सोऽयं व्योमव्यापिमन्त्रो दशार्णो
व्योमाद्यर्णैः स्युस्तदङ्गानि पञ्च।।111।।

विमर्शिनी

व्योमव्यापिमन्त्रमुद्धरति-**तारान्त** इति। तारान्ते प्रणवान्ते बिन्द्वन्वितादित्रिदीर्घान् बिन्दुयुक्तानादौ भवांस्त्रिदीर्घान् 'आं' 'ईं' ऊं इति, 'व्योमव्यापिने' इत्यर्णं, ध्रुवं च प्रणवं ब्रूयात्। सोऽयं दशार्णो व्योमव्यापिमन्त्र: स्यात्। व्योमाद्यर्णै: 'व्योमव्यापिने' इति पञ्चभिरक्षरै: पञ्च तदङ्गानि स्यु:।।111।।

विवरणम्

बिन्द्वन्वितादित्रिदीर्घानिति विशेषणसमास:। 'आं' 'ईं' 'ऊं' इत्येतानित्यर्थ:। ध्रुव: प्रणव:। व्योमाद्यर्णै: 'व्यों मं व्यां पिं नें' इत्येतै:।।111।।

Vyomavyāpimantra having 10 alphabets is given here. This is to be chanted after Praṇava. There are five aṅgas for the same according to the number of alphabets. (111)

तारं व्योमव्यापिने व्योमरूपायार्णं सर्वव्यापिनेर्णं शिवाय।
भूयोऽनन्तायेत्यनाथाय चेति प्रोदीर्याथानाश्रिताय ध्रुवाय।।112।।
ङेन्तं ब्रूयाच्छाश्वतं योगपीठार्णाद्यं तद्वत् संस्थितायेति वर्णम्।
नित्यार्णाद्यं योगिनेवर्णमुक्त्वा ध्यानाहारायेति वर्णं ब्रवीतु।।113।।

विमर्शिनी

महाव्योमव्यापिमन्त्रं पदविभागेन सहोद्धरति-**तारमिति**। प्रणवमाद्यं पदं, 'व्योमव्यापिने' इति 'व्योमरूपाय' चेत्यर्णम् अक्षराणि, 'सर्वव्यापिने' इत्यर्णं, 'शिवाये'ति। अर्णमिति पदे पदे योज्यम्। भूय: 'अनन्ताये'ति 'अनाथाय' इति च प्रोदीर्य उक्त्वा अथ 'अनाश्रिताये'ति 'ध्रुवाये'ति च, शाश्वतं ङेन्तं 'शाश्वताये'ति ब्रूयात्। योगपीठार्णाद्यं संस्थितायेति वर्णम् अक्षराणि 'योगपीठसंस्थिताये'त्यर्थ:। नित्यार्णाद्यं योगिनेवर्णं 'नित्ययोगिने' इत्युक्त्वेत्यर्थ:। 'ध्यानाहाराय' इति वर्णम् अक्षराणि ब्रवीतु।।112-113।।

In Mahāvyomavyāpimantra the beginning should be with Praṇava followed by other words like Vyomarūpāya, Sarvavyāpine and Śivāya.

तामस्याख्या मोहा क्षया च निद्राह्वया पुनर्व्याधिः।
अथ मृत्युरूपिणी च क्षुधा तृषाख्या ततो रजोरूपा।।107।।
रक्षा रतिश्च कामा क्षमा च संयमनिका क्रिया सन्ध्या।
स्थिरया च कालरात्रिर्भ्रामण्यपि मोहिनी तथा श्रीश्च।।108।।
सिद्धिरथर्द्धिर्द्युतिरपि मेधा कान्त्याह्वया तथा प्रज्ञा।
भूयः प्रभा सुधा चेत्यष्टात्रिंशत् समीरिताः क्रमशः।।109।।

विमर्शिनी

अष्टात्रिंशत्कला आह–ईशानादीति। इति ईशानादिकलाः, 'ईशानः सर्वविद्याना–मि'त्यादिमन्त्रखण्डानामष्टात्रिंशत्संख्याः कलाः क्रमशः समीरिताः स्युः। शशिनी अङ्गदा इष्टदा मरीचिः ज्वालिनी इति पञ्चेशानकलाः। निवृत्तिः प्रतिष्ठा विद्या शान्तिश्च इति चतस्रस्तत्पुरुषकलाः। तामसी मोहा क्षया निद्रा व्याधिः मृत्युरूपिणी क्षुधा तृषा इत्यष्टावघोरकलाः। रजोरूपा रक्षा रतिः कामा क्षमा संयमनी क्रिया सन्ध्या स्थिरा कालरात्रि भ्रामणी मोहिनी श्रीः इति त्रयोदश वामदेवकलाः। सिद्धिः ऋद्धिः द्युतिः मेधा कान्तिः प्रज्ञा प्रभा सुधा इत्यष्टौ सद्योजातकला इति।। 106–109।।

There are five Īśānakalas narrated as Śaśinī, Aṅgadā, Iṣṭadā, Marīcī and Jvālinī. Tatpuruṣakalas are four as Nivṛtti, Pratiṣṭhā, Vidyā and Śantī. Aghorakalas are eight as Tāmasī Mohā, Kṣayā, Nidrā, Vyādhi, Mṛtyurūpiṇī, Kṣudhā and Tṛṣā. Vāmadevakalās are thirteen as Rajorūpā, Rakṣa, Rati, Kāma, Kṣamā, Samyamanī, Kriyā, Sandhyā, Sthirā, Kālārātrī Brahmaṇi, Mohoni and Śrī. The eight Sadyojātakalas are Siddhi, Ṛddhi, Dyutiḥ, Medhā, Kānti, Prajñā, Prabhā and Sudhā. (106-109)

सातङ्गोरगविश्वबाणनिगमैरष्टाष्टवेदाब्धिभि–
र्वेदेषुद्व्यृतुभूतवह्निशरबाणैस्तत्कलाः संयुताः।
सस्तेष्विष्विषुदोर्नगेषुदृगगाङ्काशाश्विषड्भिः क्रमा–
दष्टादष्टाश्विगुणेषुवेदनयनाङ्गैश्चाक्षरैर्मन्त्रजैः ।।110।।

विमर्शिनी

ईशानादीनामक्षरसंख्याविभागमाह–मातङ्गेति। तत्कलाः ईशानादीनां कलाः मन्त्रजैः अक्षरैः क्रमात् संयुताः इत्यन्वयः। मातङ्गाः अष्टौ, उरगाश्चाष्टौ, विश्वदेवास्त्रयोदश, बाणः पञ्च, निगमाः चत्वार इतीशानखण्डाः। अष्ट, अष्ट, वेदाश्चत्वारः, अब्धयश्चत्वार इति तत्पुरुषखण्डाः। वेदाश्चत्वारः, इषवः पञ्च, द्वि, ऋतवः षट्, भूतानि पञ्च, वह्नयस्त्रयः, शराः पञ्च, बाणाश्च पञ्च इत्यघोरखण्डाः। सप्त, इषुशब्दास्त्रयोऽपि पञ्चैव, दोरिति द्वे, नागाः सप्त, इषवः पञ्च, दृग् द्वे, अगाः सप्त, अङ्काः नव, आशाः दश, अश्विनौ द्वौ, षडिति वामदेवखण्डाः। अष्टाष्ट, अश्विनौ द्वौ, गुणास्त्रयः, इषवः पञ्च, वेदाश्चत्वारः, नयने द्वे, अङ्गानि षडिति सद्योजातखण्डा इति।।110।।

विवरणम्

अगाः पर्वताः। अक्षरैरिति 'अथ अघोरेभ्यः अनादिभवे उद्भवाय नमः' इत्येवं विभागो द्रष्टव्यः।।110।।

The thirty-eight kalas are given here as mantras with the proper prefixes and suffixes (the commentary gives the form of the mantras) (110)

तारान्ते बिन्द्वन्वितादित्रिदीर्घान्
ब्रूयाद् व्योमव्यापिनेऽर्णं ध्रुवं च।
सोऽयं व्योमव्यापिमन्त्रो दशार्णो
व्योमाद्यर्णैः स्युस्तदङ्गानि पञ्च।।111।।

विमर्शिनी

व्योमव्यापिमन्त्रमुद्धरति-**तारान्त** इति। तारान्ते प्रणवान्ते बिन्द्वन्वितादित्रिदीर्घान् बिन्दुयुक्तानादौ भवांस्त्रिदीर्घान् 'आं' 'ईं' ऊं इति, 'व्योमव्यापिने' इत्यर्णं, ध्रुवं च प्रणवं ब्रूयात्। सोऽयं दशार्णो व्योमव्यापिमन्त्रः स्यात्। व्योमाद्यर्णैः 'व्योमव्यापिने' इति पञ्चभिरक्षरैः पञ्च तदङ्गानि स्युः।।111।।

विवरणम्

बिन्द्वन्वितादित्रिदीर्घानिति विशेषणसमासः। 'आं' 'ईं' 'ऊं' इत्येतानित्यर्थः। ध्रुवः प्रणवः। व्योमाद्यर्णैः 'व्यों मं व्यां पिं नें' इत्येतैः।।111।।

Vyomavyāpimantra having 10 alphabets is given here. This is to be chanted after Praṇava. There are five aṅgas for the same according to the number of alphabets. (111)

तारं व्योमव्यापिने व्योमरूपायार्णं सर्वव्यापिनेर्णं शिवाय।
भूयोऽनन्तायेत्यनाथाय चेति प्रोदीर्याथानाश्रिताय ध्रुवाय।।112।।
ङेन्तं ब्रूयाच्छाश्वतं योगपीठार्णाद्यं तद्वत् संस्थितायेति वर्णम्।
नित्यार्णाद्यं योगिनेवर्णमुक्त्वा ध्यानाहारायेति वर्णं ब्रवीतु।।113।।

विमर्शिनी

महाव्योमव्यापिमन्त्रं पदविभागेन सहोद्धरति-**तारमिति**। प्रणवमाद्यं पदं, 'व्योमव्यापिने' इति 'व्योमरूपाय' चेत्यर्णम् अक्षराणि, 'सर्वव्यापिने' इत्यर्णं, 'शिवाये'ति। अर्णमिति पदे पदे योज्यम्। भूयः 'अनन्ताये'ति 'अनाथाय' इति च प्रोदीर्य उक्त्वा अथ 'अनाश्रिताये'ति 'ध्रुवाये'ति च, शाश्वतं ङेन्तं 'शाश्वताये'ति ब्रूयात्। योगपीठार्णाद्यं संस्थितायेति वर्णम् अक्षराणि 'योगपीठसंस्थिताये'त्यर्थः। नित्यार्णाद्यं योगिनेवर्णं 'नित्ययोगिने' इत्युक्त्वेत्यर्थः। 'ध्यानाहाराय' इति वर्णम् अक्षराणि ब्रवीतु।।112-113।।

In Mahāvyomavyāpimantra the beginning should be with Praṇava followed by other words like Vyomarūpāya, Sarvavyāpine and Śivāya.

Further the words Anantāya, Anāthāya, Anāśritāya, Dhruvāya and Śāśvatāya shall be pronounced. The final words shall be Yogapīthasamsthitāya, Nityayogine and Dhyanāhārāya. (112-113)

तारप्रणामसहितं च शिवायवर्णं
सर्वप्रभुं वदतु ङेसहितं शिवाय।
ईशानपूर्वशरमूर्त्युपरीह ङन्ताः
स्युर्मूर्धवक्त्रहृदयान्यपि गुह्यमूर्ती।।114।।

विमर्शिनी

तारप्रणामसहितं 'ओं नमः' इति युक्तं शिवायेतिवर्णं 'ओं नमः शिवाये'त्येकं पदमित्यर्थः। ङेसहितं सर्वप्रभुं 'सर्वप्रभवे' इति वदतु, 'शिवाये'ति। इह ईशानपूर्वशरमूर्त्युपरि ईशानादिपञ्च-भूर्तीनामूर्ध्वभागे मूर्धवक्त्रहृदयानि गुह्यमूर्ती च ङेन्ता मूर्तयः स्युः। 'ईशान [1]मूर्धाय' 'तत्पुरुषवक्त्रायं' 'अघोरहृदयाय' 'वामदेवगुह्याय' 'सद्योजातमूर्तये' इति मूर्तिप्रधानानि पञ्च पदानि वदत्वित्यर्थः।।114।।

विवरणम्

'ईशानमूर्ध्ने तत्पुरुषवक्त्राय अघोरहृदयाय वामदेवगुह्याय सद्योजातमूर्तये'।।114।।

Further one shall chant "Om namaḥśivāya' to begin with. Thereafter the five words having the synonyms shall be incorporated as Īśānamūrdhāya, Tatpuruṣavaktrāya, Aghorahṛdayāya, Vāmadevaguhyāya and Sadyojātamūrtaye". (114)

तारप्रणामद्वितयं च गुह्यातिगुह्यमायार्णयुतं च गोप्त्रे।
ब्रूयात् तदन्तेऽनिधनाय सर्वविद्याधिपायेति पदं च मन्त्री।।115।।

विमर्शिनी

तारप्रणामद्वितयं 'ओं नमो न[2]मः' इत्येकं पदम्, 'आयं इत्यर्णयुतं गुह्यातिगुह्यं 'गुह्यातिगुह्यये'ति, 'गोप्त्रे' इत्यर्णं ब्रूयात्। तदन्ते 'गोप्त्रे' इति पदमुक्त्वा पुनः 'अनिधनाय' 'सर्वविद्याधिपाये'ति च पदं वदतु ब्रूयात्। मन्त्री पदविभागज्ञः।।115।।

विवरणम्

आयार्णयुतं गुह्यातिगुह्यमित्यन्वयः। 'गुह्यातिगुह्याय' इति यावत्। अनिधनायेति छेदः। मन्त्रीति पदक्लृप्तिं जानन्नित्यर्थः।।115।।

One who knows the Padavibhāga of the mantra shall speak "om namo namaḥ" as a single unit. Thereafter the word "guhyāti-guhyāya" and "goptre" are to be followed by Anidhanāya and Sarvavidyādhipāya. (115)

---

1. 'मूर्ध्ने' इति केषाञ्चित् पाठः।
2. 'मो नमः' घ. ङ. च. पाठः।

अथ वदतु सर्वयोगाधिगताय ज्योतिरादिरूपाय।
परमेश्वरपरपदमथ चैकोनत्रिंशमीरयेन्ङेन्तम्।। 116।।

विमर्शिनी

अथ 'सर्वयोगाधिगताये'ति, ज्योतिरित्यादिरूपाय 'ज्योतीरूपाये'ति च वदतु। अथ ङेन्तं परमेश्वरपरपदं 'परमेश्वरपराये'ति।। 116।।

Thereafter the words to be pronounced are "Sarvayogādhigatāya, jyotirūpaya and Parameśvaraparāya. (116)

अचेतनव्योमिपदे तथैव व्यापिन्नरूपिन् प्रथमेति तेज:।
ज्योतिश्च सम्बोध्य वदेदचेतनादीनि संवीप्स्य पदानि सप्त।। 117।।

विमर्शिनी

भूय: 'परमात्मन्' 'अचेतनव्यामि'पदे 'व्यापिन्' 'अरूपिन्' 'प्रथमा' 'तेज:' 'ज्योति:' इत्यष्टौ पदानि संबोध्य संबोधनविभक्त्या सह, तत्राचेतनादीनि सप्त पदानि संवीप्स्य द्विरुक्त्या च सह वदेत्। 'परमात्मन् अचेतनाचेतन' इत्यादिरूप:।। 117।।

After the word Paramātman, eight words are to be pronounced as invocations addressed to god. For this certain words are to be repeated as Vyomin, Vyomin, Vyāpin, Vyāpin etc. (117)

भूयोऽरूपानग्नेऽधूमाभस्माक्षराण्यनादेर्णम् ।
नानाना धूधूधू व्याहृतयस्तारपूर्विकास्तिस्त्र:।। 118।।

विमर्शिनी

भूय: 'अरूप' अनग्ने' 'अधूम' 'अभस्म' इत्यक्षराणि, 'अनादे' इत्यर्णं च, 'नानाना' इति, 'धूधूधू' इति च, तारपूर्विका: प्रणवाद्या: तिस्रो व्याहृतय: 'ओं भू:' 'ओं भुव:' 'ओं स्व:' इति स्यु: इति दश पदानि वदेदित्यर्थ:।। 118।।

विवरणम्

सर्वाण्येकैकानि प्रायेण पदानि 'ओं नम: शिवाय नानाना धूधूधू ओं नमो नम: शिवाय ओं नमो नम:' इति त्वधिपदानीति। 'अरूप', अनग्ने', 'अधूम', 'ओं भू:', 'ओं भुव:', 'ओं स्व:' ब्रह्मविष्णुरुद्रपर:।

भूभूतेधुशराग्निवेदजलधीष्वाग्न्यब्धिनागाशुगै:
भूताङ्गेषुहुताशनाक्षमुनिसप्ताश्वाश्वभूतैरपि ।
अङ्गाक्षीष्वृषिनागबाणफणिसप्ताब्ध्यब्धिषट्षट्श्रुति-
श्रुत्यग्न्यग्निजगज्जगच्छिखिशिखित्रिद्वयग्निदृक्सायकै:।।
त्रीषुद्विद्विचतुश्चतुश्चतुरिषुश्रुत्याशुगाब्ध्यूर्मिव-
दाम्नायश्रुतिभोगिसप्तफणिनागेभद्विपाब्ध्यब्धिभि: ।

षड्वेदाब्धिपयोधिवेदनयनद्वित्रीषुलोकेषुभिर्वर्णै-
रस्य पदान्यणुः सुषिरकृत्याढ्यत्रिशत्यक्षराः ।। 118 ।।

Thereafter ten words are to be pronounced beginning with Arupa, Anagane, Adhūma, Abhasna etc (as noted in the commentary) (118)

अनिधननिधने निधनोद्भवशिवशर्वान् क्रमात्
ससम्बुद्धीन्।
त[1]द्वन्महेश्वरमहादेवेत्युक्त्वा ततश्च सम्बुद्ध्या ।। 119 ।।
सद्भावेश्वर समहातेजोऽथो योगसंयुताधिपते।
मुञ्चप्रथमद्वितये शर्वयुगं भवयुगं भवोद्भव च ।। 120 ।।
स्यात् सर्वभूतादिसुखप्रदान्ते सर्वादिसान्निध्यकरेति वर्णम्।
सब्रह्मविष्ण्वन्तनिविष्टरुद्रपरेति चानर्चितयुग्मकं च ।। 121 ।।
भूयोऽसंस्कृतपूर्वस्थितसाक्षिपदानि तुरुपतङ्गौ च।
पिङ्गं ज्ञानं शब्दं सूक्ष्मं ब्रूयान्नव वीप्सया ससम्बुद्धीनि ।। 122 ।।
शिवशर्वसर्वदेति प्रणवनमोयुगमथो शिवायेति।
प्रणवनमोयुगलमिति व्योमव्यापी मनुः समुद्धार्यः ।। 123 ।।

विमर्शिनी

अनिधननिधने इति। निधनोद्भवशिवशर्वान् सम्बुद्धियुक्तान् 'अनिधन' 'निधन' 'निधनोद्भव' 'शिव' 'शर्व' इति संबुद्ध्यन्तानि पञ्च पदानीत्यर्थः, 'महेश्वर' इति 'महादेव' इति च तद्वत् संबुद्ध्यन्तमुक्त्वा ततः संबुद्ध्या संबोधनविभक्त्या सह 'सद्भावेश्वर' इति, समहातेज 'महातेज' इत्येकं पदं, योगसंयुताधिपते 'योगाधिपते', मुञ्चप्रथमद्वितये 'मुञ्च मुञ्चे'ति 'प्रथमप्रथमे'ति च, शर्वयुगं 'शर्वशर्वे'ति, भवयुगं 'भवभवे'ति, भवोद्भव च चशब्द एवार्थे, 'भवोद्भव' इति। स्यादिति पदे पदे योज्यम्। सर्वभूतादिसुखप्रद 'सर्वभूतसुखप्रद' इति, सर्वादिसान्निध्यकर इति वर्णं 'सर्वसान्निध्यकर' दृति सब्रह्मविष्ण्वन्तनिविष्टरुद्रपर ब्रह्मसहितविष्णोरन्ते निवेशितरुद्रपर इति 'ब्रह्मविष्णुरुद्रपर' इत्यर्थः, अनर्चितयुग्मकम् 'अनर्चितानर्चित' इति द्वादश पदानि संबुद्ध्या सह उक्त्वा भूयः 'असंस्कृतपूर्वस्थितसाक्षि'पदानि 'तुरुपतङ्गौ' 'पिङ्गं' 'ज्ञानं' 'शब्दं' 'सूक्ष्मम्' इति नव पदानि ससंबुद्धीनि संबुद्धियुक्तानि वीप्सया द्विरुक्त्या सह 'असंस्कृतासंस्कृत' 'पूर्वस्थितपूर्वस्थित' 'साक्षिन्साक्षिन्' 'तुरुतुरु' 'पतङ्गपतङ्ग' 'पिङ्गपिङ्ग' 'ज्ञानज्ञान' 'शब्दशब्द' 'सूक्ष्मसूक्ष्म' इति ब्रूयात्। 'शिव' इति 'शर्व' इति 'सर्वदे'ति पदानि, अथो प्रणवनमोयुगम् 'ओं नमो नम' इति पदम्, 'शिवाय' इति, पुनरपि प्रणवनमोयुगलम् 'ओं नमो नम' इति पदमिति व्योमव्यापि मनुः समुद्धार्यः सम्यगुद्धरणीयः ।। 119-123 ।।

Further one should chant the words Anidhana, Nidhana, Nidhanodbhava, Śiva, Śarva–the five words as Sambodhanā- invocative.

1. 'द्वत् सम्बुद्ध्यन्तौ परमात्ममहेश्वरौ महादेवः ।। सद्भा' ख. पाठः।

The commentary gives the full details as to how words are to be repeated, modified, supplimented, qualified etc. (119-123)

प्रो[1]क्तोऽयं मनुराट् चतुश्शतालिपिः पञ्चादिनादादिम-
द्दीर्घत्रय्युदितं यदादिमपदं स्यात् सर्वदान्ते ततः।
षड्वर्णं स्वयमेव शक्तिसुसमेतं शक्तिनादान्वितं
चास्य त्रीणि तदा पदान्यथ लिखाभ्यङ्गानि चास्य क्रमात्[2] ।। 124 ।।

'ओं नमः सर्वात्मने पराय परमेश्वरपराय योगाय योगसम्भवाय तुरुतुरु भवभव! भवोद्भव! वामदेव! सर्वकार्यप्रशमन! सदाशिव! नमोऽस्तु ते स्वाहा हृदयाय नमः। ओं सुं शिवशिव! नमो ब्रह्मशिरसे शिरसे स्वाहा। ओं शिवहृदये! ज्वालिनि! स्वाहा ज्वालिन्यै शिखायै वषट्। ओं,

विमर्शिनी

अत्र यदा पञ्चादिनादादिमद्दीर्घत्रय्युदितं पञ्चभिरादिभिः प्रणवैः नादेन प्रासादेन आदिना प्रणवेन च सहितेन दीर्घत्रयेण च उक्तं भवति 'ओं ओं ओं ओं ओं हौं ओं आं ईं ऊँ' इत्यादिमपदं स्यात्, तदा सर्वदान्ते सर्वदेतिपदावसाने षड्वर्गं स्वयमेव, ततः शक्तिसुसमेतं भुवनेश्वरीयुक्तं षड्वर्णं, शक्तिनादान्वितं भुवनेश्वरीप्रासादाभ्यां युक्तं षड्वर्णं चास्य मन्त्रस्य त्रीणि पदानि स्युः। एतस्मिन् पक्षे अयं मनुराट् चतुःशतलिपिः प्रोक्तः। अथास्य मन्त्रस्याङ्गानि क्रमाल्लिखामि।। 124 ।।

विवरणम्

व्योमव्यापिमन्त्र एवागमभेदेन भेदमाह–**प्रोक्तश्चेति**। पञ्चादयः पञ्च प्रणवाः। नादः प्रासादः आदिः प्रणवः तैर्युक्ता दीर्घत्रयी। ओं ओं ओं ओं ओं आं ईं ऊं इत्येवंविधं प्रथमपदम्। अन्ततः मन्त्रान्ते यत् सर्वद पदमुक्तं ततोऽप्यनन्तरम्। स्वयमेव शुद्धमेवेति यावत्। शक्तिसुसमेतषड्वर्णं द्वितीयं शक्तिनादान्वितं षड्वर्णं तृतीयम्।। 124 ।।

The king of mantra Mahāvyomavyāpin- is said to consist of 81 words with a total of 400 letters. It shall have Bījākṣaras, praṇavas etc.

The Ṣaḍaṅgas are also mentioned in this connection. (124)

शिवात्मकं महादेवं सर्वज्ञं प्रभुमव्ययम्।
आवर्तये महाघोरं कवचं पिङ्गलं शुभम्।। 125 ।।

विमर्शिनी

अङ्गमन्त्रान् लिखति–'**ओ नमः** सर्वात्मने पराये'त्यादि।। 125 ।।

आयाहि पिङ्गल! महाकवच! शिवाज्ञया हृदयं बन्धबन्धज्वलज्वल घूर्णघूर्ण किरिकिरि सूक्ष्मसूक्ष्म वज्रधर वज्रपाश वज्रशरीर मम शरीरमनुप्रविश्य सर्वदुष्टान् स्तम्भयस्तम्भय

---

1. 'क्तश्चाणुरयं च' ख.
2. 'त्।। न' ग. पाठः।

हुंफट् स्वाहा पिङ्गलाय कवचाय हुं। [1]ओं ह्रीं जुं[2] सः ज्योतीरूपाय नेत्रत्रयाय वौषट्। ओं ह्रीं स्फुरस्फुरेत्याद्यघोरास्त्रान्तेऽस्त्राय फट्।।

Aṅgamantras are narrated in this prose. "Om namaḥ sarvātmane", parāya etc.

Sivāmatka, Mahādeva, Sarvajña, Prabhu, Avyaya, Mahāghora etc., are synonyms of the god. Piĺgala, and Mahākavaca are also included. (125)

वसिष्ठोऽनन्तगायत्री चर्ष्याद्याः परमेश्वरः।
अमोघत्रिष्टुभौ व्योमव्यापिरुद्रः परैः समृताः।। 126।।

विमर्शिनी

अस्य मन्त्रस्य ऋष्यादीनाह-वसिष्ठ इति। वसिष्ठः अनन्तगायत्री परमेश्वरश्च ऋष्याद्याः। पक्षान्तरमाह-अमोघ इति। परै अमोघः ऋषिः, त्रिष्टुप् छन्दः, व्योमव्यापिरुद्रो देवता इति स्मृताः।। 126।।

Vasiṣṭha is the Rsi, Anantagāyatrī is cchandas and Parameswara is the devatā. According to another view ṛṣi is Amogha, Triṣṭup is the cchandas and Vyomavyāpirudra is the devatā. (126)

तारं स्पर्शाष्टममपि सबिन्दुश्रवोऽर्णं ससर्गं
सार्णं मृत्युञ्जयमृषिमुखानस्य चाहुः कहोलम्।
गायत्रीं दैव्युपपदसमेतां च मृत्युञ्जयाद्यं
रुद्रं चाङ्गान्यपि सलवदीर्घेण शुक्लाक्षरेण।। 127।।

विमर्शिनी

मृत्युञ्जयमन्त्रमुद्धरति-तारमिति। तारं प्रणवं, सबिन्दुश्रवः बिन्दुना दक्षिणश्रोत्रेण उकारेण च युक्तं स्पर्शाष्टममर्णं, ससर्गं विसर्गसहितं सार्णं 'स' इत्यक्षरं 'ओं जुं सः' इति मृत्युञ्जयमन्त्रमाहुः बुधाः। अस्य मन्त्रस्य कहोलं, दैव्युपपदसमेतां 'दैवी' इत्युपपदयुक्तां गायत्रीं, मृत्युञ्चयाद्यं रुद्रं च ऋषिमुखान् ऋषिच्छन्दोदेवताः आहुः। सलवदीर्घेण बिन्दुदीर्घाभ्यां सहितेन शुक्लाक्षरेण सकारेण, 'सां सीं' इत्यादि, अङ्गानि चाहुः।। 127।।

विवरणम्

श्रवोर्णं कर्णस्थानततो लिपिवर्णः ससर्गं सार्णं सः इत्येतत्। शुक्लाक्षरं सकारः।। 127।।

"Om jum sah" is the Mrtyuñjayamantra. The rsi is Kahola, cchandas is Daivigāyatrī and the devatā is Mrtyuñjaya rudra. The ṣaḍaṅgas are also mentioned as "sa" with anusvāra. It will be like "sam hṛdayāya namaḥ" etc. (127)

1. 'ओं जुं' ख. पाठः।
2. 'जूं' ग. पाठः।

तारं श्लीं पशु हुंफट् पाशुपतास्त्रं तदङ्गकान्यर्णैः।
ऋष्याद्याः स्युरघोरो गायत्री चास्य पाशुपतरुद्रः।।128।।

विमर्शिनी

पाशुपतमुद्धरति–तारमिति। तारं ओं, 'श्लीं पशु डुंफट्' इति पाशुपतास्त्रम्। तस्यार्णैः तदङ्गकानि स्युः। अस्य अघोरः गायत्री पाशुपतरुद्रश्च ऋष्याद्याः स्युः।।128।।

Pāśupatamantra is defined here with Bījākṣara and letters. The first six letters are made the angas for nyāsa. Aghora is the Ṛṣi, Gāyatrī is cchandaś and Pāśupatarudra is the devatā. (128)

तारान्ते शक्तिमुक्त्वा स्फुरपदयुगलं प्रस्फुरद्वन्द्वघोर-
द्वन्द्वे भूयस्तरार्णं तनुपदयुतरूपं चटद्वन्द्वकं च।
प्रार्णप्रोद्यच्चटद्वन्द्वकमथ कहयुग्मं वमद्वन्द्वबन्ध-
द्वन्द्वान्ते घातयद्वन्द्वमपि वदतु हुंफट् तदाघोरमस्त्रम्।।129।।

विमर्शिनी

अघोरास्त्रमुद्धरति–तारान्त इति। तारान्ते शक्तिमुक्त्वा 'ओं ह्रीं' इत्युक्त्वा स्फुरपदयुगलं 'स्फुरन्फुर' इति प्रस्फुरद्वन्द्वघोरद्वन्द्वे 'प्रस्फुरप्रस्फुर' 'घोरघोर' इति, भूयः तरार्णं 'तर' इति, तनुपदयुतरूपं 'तनुरूप', चटद्वन्द्वकं 'चटचट' इति, प्रार्णप्रोद्यच्चटद्वन्द्वकं 'प्रचटप्रचट' इति, कहयुग्मं 'कहकह' इति, वमद्वन्द्वबन्धद्वन्द्वान्ते 'वमवम' 'बन्धबन्ध' इत्युक्त्वा तदन्ते घातयद्वन्द्वमपि 'घातयघातय' इति, हुंफडिति च वदतु। तद् अघोरमन्त्रं स्यात्।।129।।

विवरणम्

तनुपदयुतरूपं 'तनुरूपे'ति यावत्। प्रार्णोपेतं चटद्वन्द्वकं 'प्रचट प्रचटे'त्येतत्।।129।।

Aghoramantra is defined here. After Praṇava the word Sphurasphura is repeated. The mantra is to end with the destructive words "ghātaya" which is repeated. (129)

ऋष्याद्याः स्युरघोरत्रिष्टुबघोरादिरुद्रकाश्चास्य।
पञ्चषडाशादशवसुमिहिरार्णैर्मन्त्रजैस्तदङ्गानि ।।130।।

विमर्शिनी

अस्य अघोरत्रिष्टुबघोरादिरुद्रकाः अघोर ऋषिः, त्रिष्टुप् छन्दः, अघोररुद्रो देवता इति ऋष्याद्याः स्युः। अस्याङ्गान्याह–पञ्चेति। मन्त्रजैः मन्त्राज्जातैः पञ्चषडाशादशवसुमिहिरार्णैः पञ्चभिः 'ह्रीं स्फुरस्फुर' इत्यक्षरैः, षड्भिः 'प्रस्फुरप्रस्फुर' इत्यक्षरैः, दशभिः 'घोरघोरतर तनुरूप', इत्यक्षरैः, दशभिः 'चटचट प्रचटप्रचट' इति, अष्टभिः 'कह्कह वमवम' इति, द्वादशभिः 'बन्धबन्ध घातयघातय हुंफट्' इत्यक्षरैः तदङ्गानि स्युः।।130।।

The Ṛṣis for Aghoramantra is Aghora, tṛṣṭup is the cchandas and

Aghorarudra is the devatā. The letters of the mantra are adopted for Aṅgas repeating several times. (130)

स्पर्शान्त्याष्टमवर्णावन्त्यार्णं च त्रयं कृशानुस्थम्।
षष्ठस्वरलवयुक्तं त्रिवर्णकं बीजभुख्यमनुमाहुः।।131।।

विमर्शिनी

बीजमुख्यमन्त्रमुद्धरति–स्पर्शेति। स्पर्शान्त्याष्टमवर्णौ मकारजकारौ, अन्त्यार्णं क्षकारश्च एतत्रयं कृशानुस्थं रेफोपेतं षष्ठस्वरलवयुक्तम् ऊकारेण बिन्दुना च युक्तम् 'म्रूं ज्रूं क्ष्रूं इति त्रिवर्णकं बीजमुख्यमनुम् आहुः गुरवः।।131।।

विवरणम्

स्पर्शान्त्यो मकारः। अष्टमो जकारः। अन्त्यार्णं क्षकारः।।131।।

Bījamukhyamantra is given here. The letters ma, ja and kṣa combined with repha and Anusvāra form the body. (131)

स्यांच्चिच्छिखेछिदिक्षिकृदिति ताराद्यष्टवर्णका क्षुरिका।
तारयुगमध्यसंस्थो हुंफट्कारः स्मृतश्च वज्रमनुः।।132।।

विमर्शिनी

तारादि विच्छिखेछिदिक्षिकृदिति क्षुरिका अष्टवर्णका स्यात्। तार युगमध्यसंस्थः हुंफट्कारः 'ओं हुंफट् ओं' इति वज्रमनुः स्मृतः।।132।।

Kṣurikāmantra is defined as having eight letters. Its form is Praṇava followed by words to mean cut to pieces. Vajramantra is in between two Praṇavas and noted as "hum phaṭ' (132)

तारः सशक्तिवाग्भवमन्मथबीजो विहायसा सौः स्यात्।
प्रारूढतारको हंसोऽष्टार्णो वर्णितोऽणुरौमेयः।।133।।

विमर्शिनी

औमेयमष्टाक्षरमुद्धरति–तार इति। तारः सशक्तिवाग्भवमन्मथबीजः शक्तिः भुवनेश्वरी, वाग्भवः ऐंकारः, मन्मथः क्लींकारः, विहायसा हकारेण सह सौः इति 'हुसौः' इत्यर्थः, प्रारूढतारकः प्र इत्यस्मिन्नारूढस्तारः 'प्रों' इति, 'हं स' इति स्वरूपम् 'ओं हिं ऐं क्लीं हसौः प्रों हं सः' इति औमेयः अष्टाक्षरो मन्त्रः वर्णित उक्ताः।।133।।

विवरणम्

विहायसा सौः स्यादिति। 'ह्सौः' इत्येतत्।।133।।

Aumeyāṣṭākṣara with eight letters consists of Praṇava, Śaktibīja and Vāgbhavamanmathabīja and the letter "sam" with "ha" which is the Bījākṣara and Aṣṭākṣara. (133)

नमोऽस्तु स्थाणुभूताय ज्योतिर्लिङ्गावृ[1]तात्मने।
चतुर्मूर्तिवपुश्छायाभासिताङ्गाय शम्भवे।।134।।

विमर्शिनी

स्थाणुमन्त्रसप्तकं वदन् अत्रान्त्यस्योपचारत्वेन प्रसिद्धत्वात् तं मनुं पठति-**नमोऽस्त्विति**।।134।।

This is the last and eighth part of Sthāṇumantra and it is the Upacāramantra of Śiva. (134)

एष स्थाणुमनुः स्याज्जोतिःस्थानेऽत्र बाणलिङ्गाद्यम्।
तत्तत्पदं सुयोज्यं मन्त्रितमैः शेषषण्मनूद्धारे।।135।।

विमर्शिनी

एष स्थाणुमनुः स्यात्। अत्र मन्त्रे ज्योतिःस्थाने शेषषण्मनूद्धारे मन्त्रितमैर्बाणलिङ्गाद्यं 'बाणलिङ्गावृतात्मने' इत्याद्यं तत्तत्पदं सुयोज्यम्। [2]कथं, बाणलिङ्गावृतात्म, तथा शम्भुलिङ्गा, स्वयम्भुलिङ्गा, परलिङ्गा, परात्परलिङ्गा।

नमोऽस्तु सकलाधारशक्त्याधाराया शम्भवे।
निराधाराय नित्याय ज्योतिर्लिङ्गावृतात्मने।।

इति। एतेषां पुष्पाञ्जल्यादौ विनियोगः। शङ्करनारायणे 'जितं ते' इत्येष एवोपचारमन्त्रः।।135।।

In this mantra the appropriate form of Śiva are to be used like Bāṇaliṅga, Śambhuliṅga, Svyambhūliṅga , Paraliṅga and Parātparaliṅga according to the purpose. It is up to the priest to decide upon this aspect. The form as desired is given by the commentator as " namostu sakalādhāra" etc. (135)

अथ दुर्गार्या देवी भगवत्यपि कन्यका चतुर्थ्यन्ताः स्युः।
दुर्गार्णवो नमोन्ताः पञ्चैताः सेदवेतजार्णैः सलवैः।।136।।

विमर्शिनी

दौर्गान् मन्त्रानुद्धरति-**अथेति**। सलवैः बिन्दुसहितैः सेदवेतजार्णैः 'सेदवेतजा' इत्यक्षरैरुप-लक्षिताश्चतुर्थ्यन्ता नमोन्ताश्च दुर्गा आर्या देवी भगवती कन्यकापि एताः पञ्च दुर्गाणवः। 'ओं सें दुर्गायै नमः', 'ओं दं आर्यायै नमः', 'ओं वै देव्यै नमः' 'ओं तं भगवत्यै नमः' 'ओं जां कन्यकायै नमः' एता इत्यर्थः।।136।।

The five Durgāmantras are formed with the synonyms in their dative case. The names are Durgā, Āryā, Devī, Bhagavatī and Kanyakā. They are to be prefixed by bījākaṣaras formed by word "Sedavetaja". So the mantras are like "Sem Durgayai namaḥ" etc. (136)

---

1. 'मृ' ग.
2. 'तथा बा' ङ. पाठः।

उपचारमनुः शक्तिः प्रणवद्वयमध्यगा।
तारं नमो भगवति! दुर्गे! दुर्गतिता[1]रणि!।।137।।
माये! महादिमायेऽथ प्रादीर्य च फणावले।
महिषासुरशब्दान्ते विनाशिनिपदं वदेत्।।138।।
दुष्टाद् भयङ्करीत्युक्त्वा विन्ध्यादिनिलयेपदम्।
जहीति च सुमर्दिन्यप्यथ देवासुरेत्यपि।।139।।
दैत्यपूजित इत्युक्त्वा वरदे नादिरायणि।
दामोदरप्रिये ह्रीं ह्रीं हूं हूं भुतग्रहेति च।।140।।
वेतालदुष्टराक्षसपिशाचांस्त्रासयद्वयम् ।
बन्धद्वयं मारययुक् तथा भक्तादिवत्सले।।141।।
भक्तप्रिये परबलमथिनीत्यथ शत्र्विति।
निकृन्तनीति सौभाग्यप्रदे भूयो जयप्रदे।।142।।
वित्तप्रदे यशोवत्यायुष्पप्रद इति क्रमात्।
कीर्तिप्रदे श्रीप्रदे सर्वप्रदे शान्त्यपि प्रदे।।143।।
महाभूते महाबलेऽथाम्बरं बिन्दुना सह।
आद्येन च द्वितीयेन तृतीयेन स्वरेण च।।144।।
चतुर्थेन च संयुक्तं शाक्तिबीजं त्रिधोद्धरेत्।
महामायेति नत्यन्तं विद्यामन्त्र उदाहृतः।।145।।

विमर्शिनी

तत्र प्रणवद्वयमध्यगा शक्तिः भुवनेश्वरी 'ओं ह्रीं ओं 'इत्युपचारमनुः स्यात्। विद्यामन्त्रमुद्धरति–तारमिति। तारम् 'ओं', 'नमो भगवति! दुर्गे! दुर्गतितार[2]णि! माये[3]!' इति प्रोदीर्य, यथ महा इत्यादिमाये 'महामाये' इति, 'फणावले' इति च प्रोदीर्य, 'महिषासुर' इति शब्दान्ते 'विनाशिनी'ति पदं वदेत्। दुष्टाद् दुष्टशब्दाद् भयंकरीति 'दुष्टभयंकरी'त्युक्त्वा, विन्ध्यादिनिलये 'विन्ध्यानिलये' इति पदं, 'जही'ति पदं, 'सुमर्दिनी'त्यपि पदम्, अथ देवासुरेति दैत्यपूजित इति 'देवासुरदैत्यपूजिते' इत्युक्त्वेत्यर्थः, वरदे ना इत्यादि रायणि 'वरदे नारायणी'त्यर्थः। 'दामोदरप्रिये ह्रीं ह्रीं हुं हूं भूतग्रहे' इति च वर्णानुक्त्वा, 'वेतालदुष्टराक्षसपिशाचान्' इत्युक्त्वा, त्रासयद्वयं 'त्रासयत्रासये'ति, बन्धद्वयं 'बन्धबन्धे'ति, मारययुक् 'मारयमारये'ति, तथा च भक्तादिवत्सले 'भक्तवत्सले' इत्यर्थः, 'भक्तप्रिये परबलमथिनी'त्युक्त्वा, अथ शत्र्विति निकृन्तनीति 'शत्रुनिकृन्तनी'त्यर्थः, 'सौभाग्यप्रदे' इति, 'जयप्रदे' इति, 'वित्तप्रदे' इति

---

1. 'रि' क. ग. पाठः।
2. 'रि' ख. ग. घ. च. पाठः।
3. 'ये माये इ' घ. ङ. च. पाठः।

यशोवती'ति, आयुष्यप्रदे इति कीर्तिप्रदे इति श्रीप्रदे इति, 'सर्वप्रदे' इति पदानि क्रमादुक्त्वा, शान्त्यपि प्रदे 'शान्तिप्रदे' इत्यर्थः, 'महाभूत' 'महाबले' इति पदद्वयमुक्त्वा, अथ अम्बरं हकारं प्रत्येकं बिन्दुना आद्येन द्वितीयेन तृतीयेन चतुर्थेन च स्वरेण संयुक्तः 'हं हां हि हीं' इति चत्वारि बीजान्युक्त्वेत्यर्थः, त्रिधा त्रिकृत्वः शक्तिबीजं 'ह्रीं ह्रीं ह्रीं' इत्युद्धरेत्। 'महामाये' इति पदं नत्यन्तं 'नमः' इत्यन्ते युतं विद्यामन्त्र उदाहृतः। अस्य मन्त्रस्य पुष्पावरणादौ विनियोगः।।137-145।।

The Upacāra mantra of Durgā is Śaktīja prefixed and suffixed with Pranava. It is given as "om namo" etc.

Thereafter recite the words "Māye Mahādimāye' etc. - the three words and add the word Mahiṣāsuravināśinī at the end.

Now recite the words Duṣṭabhayaṅkarī, Vidhyanilaye, Sumardinī, Devāsuradaityapūjite, Varade, Nārāyaṇi, Dāmodarapriye and Bhūtagrahe. Now recite the words Vetāla etc, upto "Bhaktavatsale".

Thereafter pronounce the words Bhaktapriye to Śāntiprade. Again recite Mahābale etc., to Mahāmāyā. Those ending in dative case shall be known as Vidyāmantra. This mantra is to be used in Puṣpāvaraṇa- showering the deity with lots of flowers. (137-145)

ओङ्काराद्यं दुर्गारूपिणि च कुमार्युपेतरूपिणि च।
आर्यावर्तिनि मायारुपिण्यपि चोत्सवादिवासिनि च।।146।।

अथ यागभक्तकारिणि सर्वादिकमन्त्रपूर्वकव्यापिनि च।
सर्वादिकर्मफलदायिनि सर्वादिक्रियादिवर्तिनिपदं च।।147।।

सर्वादिदोषमर्दिन्यथ सर्ववरादिदायिनीति वदेच्च।
भगवति ततः प्रसादं पुनरापादयतु चेति यागमनुः स्यात्।।148।।

विमर्शिनी

शान्तिहोमे प्रोक्तं यागमन्त्रमुद्धरति–ओङ्काराद्यमिति। ओङ्कारमाद्यं यथा भवति तथा 'दुर्गारूपिणी'ति पदं, कुमार्युपेतरूपिणीति 'कुमरीरूपिणी'त्यर्थः, 'आर्यावर्तिनि' 'मायारूपिणी'ति द्वे पदे, उत्सवादिवासिनीति 'उत्सववासिनी'त्यर्थः, अथ 'यागभक्तकारिणी'ति पदं, सर्वादिकमन्त्रपूर्वव्यापिनीति 'सर्वमन्त्रव्यापिनी'त्यर्थः, सर्वादिकर्मफलदायिनि 'सर्वकर्मफलदायिनी'त्यर्थः, सर्वादिक्रियादिवर्तिनिपदं चेति 'सर्वक्रियावर्तिनी'त्यर्थः, सर्वादिदोषमर्दिनीति 'सर्वदोषमर्दिनी'त्यर्थः, सर्ववरादिदायिनीति 'सर्ववरदायिनी'त्यर्थः, 'भगवती'ति च वदेत्। ततः 'प्रसादमि'ति, पुनः 'आपादयतु' चेति च वदेदिति यागमनुः स्यात्।।146-148।।

विवरणम्

सर्वादिकमन्त्रपूर्वकव्यापिनि चेति। 'सर्वमन्त्रव्यापिनी'ति यावत्।।147।।

Chant the following five words prefixed with praṇava- Durgārupiṇī,

Kumārirūpī, Āryāvartinī, Māyārūpiṇī and Utsavādivāsinī. Thereafter recite the four words Yāgabhaktakāriṇī, Sarvamantrayāpinī, Sarvādikarmaphalādiyinī and Sarvādikriyādivartinī.

Thereafter the words Sarvadoṣamardinī and Sarvavadāyinī shall be chanted with the final invocation to grant all blessings as her token of pleasure. It can be the Yāgamantra. (146-148)

भूतिः श्रीः पिङ्गलो बभ्रुर्भूतिर्विष्णुः सनातनः।
अ[1]ग्निमारुतयोर्भूतिर्भूतिः सेन्द्रश्च देवताः।।149।।

विमर्शिनी

पुनः कलशाभिषेके प्रस्तुतं भूतिश्रीमन्त्रं पठति-**भूतिः** श्रीरिति।।149।।

What is stated above is the mantra to be chanted while pouring sanctified water in the worship of Durgā. (149)

प्रणवनतिषण्मुखायेत्यपरो मनुरौपचारिकः स्कन्दे।
प्राग्वदिहाप्यृष्याद्यं मन्त्रार्णैः सलवकैः षडङ्ग[2]विधिः।।150।।

विमर्शिनी

अथ स्कान्दान् मन्त्रानुद्धरति-**प्रणवेति**। स्कन्दे प्रणवनतिषण्मुखायेति 'ओं नमः षण्मुखाये'ति अपरः अन्यः (मनुः) मूलमन्त्रः औपचारिकः उपचारसंज्ञश्च। इह ऋष्याद्यं प्राग्वत् पूर्वमन्त्रोक्तवत्। सलवकैः मन्त्रार्णैः 'नमः षण्मुखाये'ति षड्भिरक्षरैः षडङ्गविधिः स्यात्।।150।।

There is another Upacāra mantra for Subrahmanya which is as follows. "Om namaḥ Ṣaṇmukhāya" With the addition of mantrākṣara it is used for Ṣaḍaṅganyāsa like "Hṛdayāya namaḥ". (150)

सनत्कुमारस्कन्देन्द्रविशाखाः षष्ठिषण्मुखौ।
षण्मन्त्राः षण्मुखे प्रोक्ताश्चतुर्थ्यन्ता नमोन्विताः।।151।।

विमर्शिनी

षण्मन्त्रान् कथयति-**सनत्कुमारेति**। षण्मुखे नमोन्विताः 'नमः' इति युक्ताश्चतुर्थ्यन्ताः सनत्कुमाराद्याः षण्मन्त्राः प्रोक्ताः। अत्र चतुर्थीनमोयुक्तत्वं द्वादशनाममन्त्राणामप्युपलक्षणम्।।151।।

There are six mantras known as Ṣaṇmukha mantras addressing the god using the following names in the dative case: Sanatkumāra, Skanda, Indra, Viśākha, Śāstā and Ṣaṇmukha. Usual invocation namaḥ is to be added to them. (151)

स्कन्दो बाणो हेमचुडो भद्रसेनो भवस्तथा।
भवपुत्रोऽन्नाद्यशीलः कुक्कुटध्वज एव च।।152।।

1. 'आ'
2. 'ङ्ग वि' ख. पाठः।

मयुरवाहनगुहौ कुमारः सनदादिकः।
महासेनश्च सेनान्यां नामद्वादशकं स्मृतम्।। 153।।

विमर्शिनी

द्वादशनामानि कथयति–स्कन्दो बाण इति। 'अन्नाद्यशीलाय नमः', सनदादिकः कुमारः 'सनत्कुमाराय नमः इतिः। इति नामाद्वादशकं नाम्नां द्वादशकं स्मृतम् उक्तमित्यर्थः।।152–153।।

The twelve names of Skanda are chanted for worship. They are (1) Skanda (2) Bāṇa (3) Hemacūḍa (4) Bhadrasena (5) Bhava, (6) Bhavaputra (7) Annādyaśīla (8) Kukkuṭādhvaja (9) Mayūravāhana (10) Guha (11) Sanatkumāra and (12) Mahāsena. (152-153)

आद्यं दीर्घयुगं सबिन्दु सकलाणुर्गं गुहायेत्यणु-
र्नत्यन्तो महदाह्वयोऽब्धिनवनागैकोनविंशाः स्पृशः।
साद्र्यद्रीन्दुकरस्वरा विषयुतो यान्तोऽन्त्यवर्गे तुरी-
यार्णं तत्प्रथमौयुतं सलवषट्कं बीजमन्त्रो गुहे।।154।।

विमर्शिनी

सकलमन्त्रादिकमुद्धरति–आद्यमिति। सबिन्दु बिन्दुसहितम् आद्यं दीर्घयुगम् 'आं ईं' इति सकलाणुः। नत्यन्तः 'गृं गुहाये'ति महदाह्वयः अणुः महन्मन्त्रः। अब्धिनवनागैकोनविंशाः अब्धिश्चतुर्थः घकारः नव नवमः झकारः नागोऽष्टमो जकारः एकोनविंशो घकारः एते स्पृशः स्पर्शाक्षराः क्रमेण साद्र्यद्रीन्दुकरस्वराः अद्रि सप्तमः ऋकारः पुनरप्यद्रि ऋकारः इन्दुः अकारः कर आकारः एतैः स्वरैर्युक्ताः विषयुतो यान्तः विषं मकारः यान्तो रेफः, अन्त्यवर्गे यादिवर्गे तुरीयार्णं वकारः तत्प्रथमस्तस्य वर्गस्य प्रथमः यकारः, ओयुतम् ओकारयुतं, सलवषट्कं प्रत्येकं बिन्दुसहितमेतत् षट्कं 'घृं झृं जं धां म्रं व्यों' इति गुहे बीजमन्त्रः।।154।।

विवरणम्

सकलाणुः सकलसंज्ञको मन्त्रः स्पृशः स्पर्शवर्णाः। साद्र्यद्रीन्दुकरस्वरा इत्येषां क्रमेण संयोजनमुक्तम्। विषयुतो यान्तः, मकारयुक्तो रेफः अन्त्यवर्गे तुरीयार्णं वकारः। तत्प्रथमौयुतमिति तत्प्रथमो यकारः। ओकारश्च योज्यः। सलवषट्कमिति एषां षण्णां बिन्दुरपि स्यादित्यर्थः।।154।।

The six bījamantrās of Guha are enumerated here. His Sakalamantra and Mahāmantra are also mentioned. (154)

विघ्नविनायकविराः शूरो वरदश्च हस्तिमुखनामा।
षणमन्त्रा गणने स्युः सम्प्रोक्त ङेनमोन्विताः क्रमशः।।155।।

विमर्शिनी

वैघ्नान् मन्त्रानाह–विघ्नेति। गणपे ङेनमोन्विताः एते विघ्नाद्याः षण्मन्त्राः प्रोक्ताः स्युः।।155।।

The six mantras of Vighneśvara are indicated along with his synonyms.

The names of six aspects are given as (1) Vighna (2) Vināyaka (3) Vīra (4) Śūra (5) Varada (6) Hastimukha. (155)

वज्रदन्तो गजास्यश्च भीमश्च महिषास्यकः।
विघ्नो विनायको वीरः शूराख्यः सर्पमेखलः।।156।।

शूर्पकर्णो नागदन्ती ततो रुद्रास्यसम्भवः।
नामानि द्वादशैतानि कीर्तितानि गणेशितुः।।157।।

विमर्शिनी

द्वादशमन्त्रानाह–वज्रदन्त इति। गणेशितुः एतानि द्वादश नामानि कीर्तितानि उक्तानि।।156–157।।

The twelve names of the god is enumerated as (1) Vajradanta (2) Gajāsya (3) Bhīma (4) Mahiṣāsya (5) Vighna (6) Vināyaka (7) Vīra (8) Śūra (9) Sarpamekhala (10) Śūrpakarṇa (11) Nāgadantin (12) Rudrāsyasambhava. (156-157)

रे[1]वन्ताय महाशास्त्रे गोप्त्रे च प्रभवे तथा।
दीप्त्रे प्रशास्त्रे चार्ये स्युः षण्मन्त्राः न[2]मसा युताः।।158।।

विमर्शिनी

अथ शास्तृमन्त्रानाह–रेवन्तायेति। आर्ये(स?) नमसा युताः 'रेवन्ताय' इत्याद्या षण्मन्त्राः स्युः।।158।।

विवरणम्

दीप्तेत्यृकारान्तः शब्दोऽभिप्रेतः।।158।।

For Śāstā there are six mantras formed with the use of his names in dative case as follows. (1) Revanta (2) Mahāśāstā (3) Goptā (4) Prabhu (5) Dīpta and (6) Prasāda. (158)

गोप्ता च पिङ्गलाक्षश्च वीरसेनश्च शा[3]म्भवः।
आर्यः शास्ता च गोपालो गुहोऽथ भवपुत्रकः।।159।।
ना[4]मानि शान्तभूतेशभूतिदा द्वादशार्यके।

विमर्शिनी

द्वादशनामान्याह – गोप्तेति।।159½।।

The twelve mantras for Ārya are to be followed with the following

---

1. 'रेवन्तश्च तथा शास्ता गोप्ता च प्रभुरेव च। दीप्ता चैव प्रशास्ता च षण्मन्त्राः शास्तरीरिताः।।' ख. पाठः।
2. 'नामसंयु' ग. पाठः।
3. 'स' क. पाठः।
4. 'शास्तुर्द्वादशनामानि शान्तभूतेशभूतिदाः। आ' ख. पाठः।

twelve names (1) Gopta (2) Piṅgalākṣa (3) Vīrasena (4) Śāmbhava (5) Ārya (6) Śāstā (7) Gopāla (8) Guha (9) Bhavaputra (10) Śānta (11) Bhūteśa and (12) Bhūtida. (159)

आर्यः शास्ता गुहासन्नः सेनानीर्भूतवल्लभः।
रुद्रजो रूपवान् कामी वरदो लोकपूजितः।।160।।

नीलाश्व श्वेतमातङ्ग श्यामी पीतानुलेपनः।
रक्तमालाधरः शूरो मायो मातृगणप्रियः।।161।।

कालवासा गणाध्यक्षः खड्गहस्तो धनुर्धरः।
सहजायो जनावेशः साधुः संसाररक्षकः।।162।।

षडविंशतिरिमे मन्त्रा ङेनमोन्ताश्च तेऽखिला[1]ः।
'ओं श्रीं ह्रीं क्ष्मीं[2] ह्वं[3] घ्रूं शम्बरकुमाराय पद्मिने
स्वाहा।
बीजमन्त्रः[4] समुद्दिष्ट[5]ः सम्यक् सप्तदशाक्षरः[6]।।163।।

विमर्शिनी

षड्विंशतिनामान्याह–आर्य इति। इमे षड्विंशतिर्मन्त्राः। ते अखिलाः द्वदशमन्त्राः षड्विंशतिमन्त्राश्च ङेनमोन्ताः स्युः। बीजमन्त्रः[7] सप्तदशाक्षर इ[8]ति वदन् पूर्वं त[9]मेव लिखति–ओं श्रीमित्यादि। अस्य बीजमन्त्रस्य कौतुकबन्धने विनियोगः।।160-163।।

The 26 mantras of Śāsta are given as follows (1) Ārya (2) Śāstā (3) Guhāsanna (4) Senāni (5) Bhūtavallabha (6) Rudraja (7) Rūpavān (8) Kāmin (9) Varada (10) Lokapūjita (11) Nīlāśva (12) Śvetamātaṅga (13) Śyāmin (14) Pitānulepana (15) Raktamālādhara (16) Śūra (17) Māya (18) Mātṛgaṇapriya (19) Kāḷavāsa (20) Gaṇādhyakṣa (21) Khaḍgahasta (22) Dhanurdhara (23) Sahajāya (24) Janāveśa (25) Sādhu and (26) Samsārarakshaka. There is a bījamantra consisting of 17 letters ending with Śambarakumārapadmine svāhā. (160-163)

---

1. 'लाः।। प्राणा' ख. पाठः।
2. 'क्ष्म्रीं' घ. पाठः।
3. 'हुं ग्रं श' ग. पाठः।
4. 'न्त्रं'
5. 'ष्टं'
6. 'रम्' क. पाठः।
7. 'न्त्रं'
8. 'मि'
9. 'दे' क. घ. ङ. च. पाठः।

प्राणापानव्यानोदानसमानाः समीरिताः ङेन्ताः।
स्वाहान्ताः सकलेषु प्राणाद्यनिलाणवो निवेद्यविधौ।। 164।।

विमर्शिनी

अथ सामान्यमन्त्रानुद्धरति–**प्राणेति**। सकलेषु निवेद्यविधौ ङेन्ताः चतुर्थ्येकवचनान्ताः स्वाहान्ताश्च प्राणापानव्यानोदानसमानाः 'प्राणाय स्वाहा' इत्याद्याः प्राणाद्यनिलाणवः प्राणाहुतिमन्त्राः समीरिताः।। 164।।

Mantra for offering of Nivedya is narrated. This is called Prāṇāhuti mantra. Using the names of vital airs (1) Prāṇa (2) Apāna (3) Vyāna (4) Udāna and (5) Samāna. (164)

टान्तामृतौलवनमस्सहितं पराया-
थावात्मनार्णमपि टान्ततुरीयमूर्तिम्।
उक्त्वा निवेद्यमिति वस्तु सकल्पयामि-
वर्णं निवेद्यगरसार्पणमन्त्र एषः।। 165।।

विमर्शिनी

निवेद्यार्पणमन्त्रमुद्धरति–**टान्तेति**। यान्तामृतौलवनमः सहितं यान्तः ठकारः अमृतं वकारः, औकारः स्वयमेव लवो बिन्दुः नम इति एभिर्युक्तं (वौं? ठ्वौं) नम इति, 'पराय' इति स्वरूपम्। अथ 'अबात्मना' इत्यर्णमपि, यन्ततुरीयमूर्तिं टान्तां तृतीयैकवचनान्तां तुरीयमूर्तिं अनिरुद्धादिकां मूर्तिम् उक्त्वा कल्पयामीति वर्णैः सहितं निवेद्यमिति स्वरूपं वक्तु ब्रवीतु (वौं? ठ्वौं) नमः परायाबात्मनानिरुद्धेन निवेद्यं कल्पयामि' इत्यादिः। एषः निवेद्यगरसार्पणमन्त्रः निवेद्यगतस्य रसस्यार्पणे मन्त्रः।। 165।।

The mantra for Rasārpaṇa- placing the essence of Nivedya to the god- is presented here. It ends with the statement "nivedyam kalpayāmi" (165)

तत्तद्भूतनिदानबीजहृदयोपेतं परायाक्षरं
चाबाद्यर्णयुतात्मनार्णसहितं टान्तस्वमूर्त्याह्वयम्।
प्रब्रूयाज्जलपूर्वतत्तदुपहाराख्यां तथा कल्पया-
म्यन्तां चेत्युदिता जलादिरसदत्त्यै पञ्च मन्त्राः परे।। 166।।

विमर्शिनी

जलादिरसमर्पणार्थं पञ्च मन्त्रानुद्धरति–**तत्तद्भूतेति**। तत्तद्भूतनिदानबीजहृदयोपेतं तस्य तस्य भूतस्याबादेः निदानपादिकारणं वं इत्यादिकेवलबीजं, हृदयं नम इति, ताभ्यां युक्तं परायेत्यक्षरम्, अबाद्यर्णयुतात्मनार्णसहितम् अप्पृथिव्यादिवर्णैः सहितात्मनाक्षरैः युक्तं, टान्तस्वमूर्त्याह्वयं तृतीयैकवचनान्तस्वस्वमूर्तिनामयुक्तं, जलपूर्वतत्तदुपहाराख्यां जलं गन्धं पुष्पं धूपं दीपम् इति तत्तत्पूजासाधनाभिधां तथा कल्पयामीत्यन्तां च तामाख्यां प्रब्रूयात्। 'वं नमः परायाबात्मनानिरुद्धेन जलं कल्पयामि', 'लं नमः पराय पृथिव्यात्मना नारायणेन गन्धं कल्पयामि', 'हं नमः परायाकाशात्मना

वासुदेवेन पुष्पं कल्पयामि' 'यं नमः पराय वाय्वात्मना सङ्कर्षणेन धूपं कल्पयामि', 'रं नामः परायाग्न्यात्मना प्रद्युम्नेन दीपं कल्पयामि' इति विष्णौ। शिवादिषु वामदेवादयो मूर्तिमन्त्राः। एते जलादिरसदत्त्यै जलादीनां रसदानाया परे निवेद्यादन्ये पञ्च मन्त्रा उदिता उक्ताः।।166।।

विवरणम्

तत्तद्भूतनिदानबीजेति। निदानशब्दः कारणपर्यायः। वलहयराक्षराणिं हृदयं नमश्शब्दः। यन्तस्वमूर्त्याह्वयमिति। स्वां स्वामनिरुद्धवामदेवादिमूर्तिं तृतीयैकवचन सहितामुच्चरेदित्यर्थः। जलादिरसदत्तिर्द्दानं समर्पणमिति यावत्।।166।।

Another five mantras are presented for the submission of Jala, Gandha, Puṣpa, Dhūpa and Dīpa. In the case of Viṣṇu, the names of Mūrtis-Aniruddha, Nārāyaṇa, Vāsudeva, Saṅkarṣaṇa and Pradyumna are incorporated in the mantra in respect of Ap, Pṛthivi, Ākāśa, Vāyu and Tejas (This is called Pañcopahāra samarpaṇa) (166)

गुह्यातिगुह्यगोप्तस्त्वं गृहाणास्मत्कृतं जपम्।
सि[1]द्धिर्भवतु मे देव! त्वत्प्रसादाद्धृदि स्थिता[2]।।167।।

प्रीणातु भगवान् विष्णुः कर्मणानेन शाश्वतः।
आद्योऽर्पणे जपस्याणुः प्रीणात्वाद्यश्च कर्मणः।।168।।

विमर्शिनी

जपसमर्पणमन्त्रं कर्मसमर्पणमन्त्रं च पठति-गुह्यातीति। तयोर्विभागमाह-आद्य इति। जपस्यार्पणे आद्यः अणुः, कर्मणः अर्पणे प्रीणात्वाद्यः अणुः स्यात्।। 167-168।।

Then there are Japasamarpaṇa and Karmasamarpaṇa. "Guhyatiguhya" etc., forms the Japasamarpaṇa mantra while "Prīṇātubhagavan"etc., forms the Karmasamarpaṇa mantra. (167-168)

इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतः।
जाग्रत्स्वप्नसुषुप्त्यन्तेऽवस्थासु मनसेत्यपि।।169।।

वाचेति कर्मणेत्युक्त्वा हस्ताभ्यामिति कीर्तयेत्।
पद्भ्यामित्युदरेणेति शिश्नेत्यपि च यत् स्मृतम्।।170।।

यदुक्तं यत् कृतमिति तत्सर्वंब्रह्मवर्णकान्।
अर्पणं भवतु स्वाहेत्यपि ब्रह्मार्पणे मनु[3]ः।।171।।

विमर्शिनी

ब्रह्मार्पणमन्त्रमुद्धरति-इतः पूर्वमित्यादि।'इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतः जाग्रत्स्वप्नसुषुप्ति'

1. 'भक्तिर्भ' क. पाठः।
2. 'तः' ख. पाठः।
3. नुः 'अन्योन्य' ख. पाठः।

इत्यन्ते 'अवस्थासु' 'मनसा' इति 'वाचा' इति 'कर्मणा' इत्युक्त्वा 'हस्ताभ्यां' 'पद्भ्याम्' 'उदरणे'ति' शिश्ना' इत्यपि 'यत् स्मृतं' 'यदुक्तं' 'युत् कृतम्' इति 'तत्सर्वं ब्रह्म' इति वर्णकान् 'अर्पणं भवतु स्वाहा' इत्यपि कीर्तयेदिति ब्रह्मार्पणे मनुः स्यात्[1] ।।169।।

The Brahmārpaṇa mantra submits before the deity that whatever has been done hitherto is offered. The deeds performed knowingly or unknowingly ín all states like Jāgrat, Svapna, Suṣupti and by mind, words or deeds , by hands and legs, stomach, penis and whatever is thought of, performed etc., is submitted in reverence. All that be "brahmārpaṇam bhavatu svāhā" is the form of the mantra. (169-171)

सर्वाद्यादिषु तत्त्वकेषु निजमूर्त्यन्तेषु गन्धाहित-
त्त[2]न्मात्रोल्लसितस्वरूपपदमायान्तं तदन्ते पुनः।
ङेन्तात्मान्तसमानपूर्वकनिजप्राणान् नमोन्तान् वदे-
देवं संहृतिपञ्चतत्त्वमनवः प्रोक्ता विशेषान्विताः।।172।।

विमर्शिनी

निष्क्रमणविधिमधिकृत्य 'विशेषान्वितैः स्वैर्हुनेच्चेषुतत्त्वैः' इत्युक्तः पञ्चतत्वानां विशेषवत्त्वमाह- **सर्वाद्यादिष्विति**। सर्वाद्यादिषु 'लां नमः पराय सर्वात्मने' इत्यादिविष्ण्वादिषूक्तेषु पञ्चसु तत्त्वेषु निजमूर्त्यन्तेषु नारायणादिस्वस्वमूर्तिशब्दान्तेषु, मूर्तीनां चतुर्थ्येकवचनान्तत्वमपि ग्राह्यं, 'लां नमः पराय सर्वात्मने नारायणाय' इत्याद्यन्तेषु गन्धादितत्तन्मात्रोल्लसितस्वरूपपदं गन्धादिशब्दैः तन्मात्रशब्देन च युक्तं। स्वरूप इति पदम् आयान्तं च 'गन्धतन्मात्रस्वरूपाये'त्यादि सिद्धं भवति। पुनस्तदन्ते ङेन्तात्मान्तसमानपूर्वकनिजप्राणान् समानादीन् निजान् निजान् प्राणानात्मान्तान् ङेन्तांश्च 'समानात्मने' इत्यादीनित्यर्थः, तान् नमोन्तांश्च वदेत्। एवं सर्वदेवेषु विशेषान्विताः संहृतिपञ्चतत्त्वमनवः प्रोक्ताः। सूत्रच्छेदे तेषां हुंफडन्तत्वमपि ग्राह्यम्।।172।।

The Viśeṣapañcatattva - of Viṣṇu in which the special qualifications are to be added are noted here. After the name of the mantra the tanmātrās like Gandha are also to be mentioned in Samhāratattva homa. Then the mantra will be like this in addition to Praṇava and bījākṣaras- 'Om lam namaḥ parāya sarvātmane nārāyaṇāya gandha tanmātrā svarūpāya samānātmane namaḥ"

Thus in all the five mantras "Viśeṣa" is to be added in the mantras. (172)

तारं शक्तिसनादयादिमनुवर्णं कादितत्वाक्षरं
नत्यन्तेऽथ शिवाय चेति गिरिशे ब्रह्मादि ङेसंयुतम्।
ङेन्तोर्व्याद्यधिपत्युपर्यभिवदेद् ध्लामादिराजन्निवृ-
त्त्याद्युद्भिन्नकलात्मनेहुमिति चास्त्रान्तं विशिष्टोद्घृतौ।।173।।

1. 'त् रहस्यभूतानां।।' घ. ङ. च. पाठः।
2. 'न्मन्त्रोल्ल' क. पाठः।

विमर्शिनी

शिवे विशेषेण विशेषपञ्चतत्त्वान्युद्धरति–तारमिति। गिरिशे विशिष्टोद्धृतौ विशेषतत्त्वेनोद्धारे तारं, शक्तिसनादयादिमनुवर्णं शक्तिः भुवनेश्वरी सनादं नादसहितं नादः प्रासादः यादिमनुवर्णं यकारादिपञ्चाक्षरस्य प्रतिलोमवर्णेष्वेकैकं, कादितत्त्वाक्षरं कवर्गस्य[1] स्वस्वपञ्चभूतसम्बन्ध्यक्षरम्' ओं ह्रीं हौं यं कं' इत्यादि पञ्च पञ्च बीजानि सिद्धानि, नत्यन्तेऽथ शिवायेति 'नमः शिवाये'त्यर्थः, ब्रह्मादि ङेसंयुतं चतुर्थ्येकवचनान्तानि 'ब्रह्मणे' इत्याद्यधिदैवतनामानि, ङेन्तोर्व्याद्यधिपत्युपरि चतुर्थ्येकवचनान्तपृथिव्यादि (भिः?) सहिताधिपतिशब्दस्योपरि 'पृथिव्यधिपतये' इत्यादीनामुपरीत्यर्थः ह्लामादिराजन्निवृत्त्याद्यद्-भिन्नकलात्मनेहुमिति 'ह्लां' इत्यादीबीजैः सह 'निवृत्त्या'दिभिर्युक्तं 'कलात्मने हुं' इति वर्णान् अस्त्रान्तं फडन्तं यथा भवति तथाभिवदेत्। अत्रापि हुंफडन्तत्वं सूत्रच्छेद एव ग्राह्यम्।।173।।

For Śiva also similar qualifications are to be added in the mantras (as noted in the commentary).

The names of the murtis ,the name of the elements like - Prthivī and that of particular kalā (like nivṛtti, Śākti etc) are to form the mantra. For other deities also the mantras are to be suitably formed. (173)

स्थूलात्मतोन्मेषविधायिका चि-
दावाहनासुन्यसनादि कृत्वा।
क्रिया स्वनिद्राघटयुक्तितोऽत्र
कार्या कुमारार्यकयोः स्मृतं तत्।। 174।।

विमर्शिनी

एवं रहस्यभूतानि विशेषपञ्चतत्त्वान्यभिधाय गुरूपदेशादेवावगम्यमतिगुह्यं जीवावाहनस्वरूपमपि किञ्चिदुन्मीलयति–स्थूलात्मतेति। चिदावाहनासुन्यसनादि कृत्वा[2] चिदावाहना जीवावाहना असुन्यसनं प्राणादीनां न्यासः, आदिशब्देन पुर्यष्टकादिकं गृह्यते। एतानि कृत्वैव स्थूलात्मतोन्मेषविधायिका क्रिया कार्येत्यन्वयः। स्थूलात्मताया उन्मेष इति स्थूलावाहनं गृह्यते। तस्य विधायिका क्रिया तत्करणमित्यर्थः। इति स्थूलावाहनायाः पूर्वमेव जीवावाहनस्य काल इति द्योतितं भवति। अत्र जीवावाहने कुमारार्यकयोः स्तनिद्राघट्युक्तितः कुमारस्य [3]स्वकौमारकलशयोगेन आर्यके स्वनिद्राकलशयोगेन च तद् जीवावाहनं स्मृतम्।।174।।

After the Parāvāhana- the invocation of the supreme spirit- jīvāvāhana- the invocation of the individual soul like Prāṇanyāsa is to be carried out. Sthūlāvāhana- the invocation of the gross power is needed in particular cases. In the case of Subrahmanya this is to be done before the pouring of the sanctified water from the Kaumārakalaśa. In the case of Śāstā it should be at the time of pouring of water from Nidrākalaśa. (174)

---

1. 'स्य पञ्चस्वस्वभू' ख. पाठः।
2. 'त्का' ग. पाठः।
3. 'स्वस्य कौ' ख. पाठः।

अस्वायमोद्बुद्धहृदब्जयुक् स्वे
निध्याय निर्याप्य निजेडयास्य।
सुषुम्नयावेश्य दशासुचित्ता-
दीद्धां चितिं हृत्कमले निदध्याद्।।175।।

विमर्शिनी

अस्वायमोद्बुद्धहृदब्जयुक् प्राणायामेन विकसितं हृदयकमलयुग्मं स्वस्य देवस्य च येन स आचार्यस्तथोक्तः, स तु स्वे हृदयकमले निध्याय स्वगुरूक्तक्रमेणावलोक्य निजेडया नाड्या निर्याप्य निर्गमय्य अस्य देवस्य सुषम्नया नाड्यावेश्य प्रवेश्य दशासुचितादी (डां? द्धां) दशभिः प्राणैश्चित्तादिभिः मनोबुद्ध्यादिभिर्दीप्तां चितिं चैतन्यमस्य हृत्कमले निदध्यात् स्थापयेत्। एतदावाहनस्य मन्त्रादिकं स्वगुरुमुखादेव ग्राह्यमिति नोक्तम्।।175।।

The preceptor after making the heart of deity endowed with the soul shall unite his Ida with the Suṣumnā vein of the god shall conceive the totality of the divinity with daśaprāṇas etc. Finally the heart of the idol shall be conceived as possessing all the elements of divinity. (175)

त्रिस्त्र्यात्मना व्याप्य सुजप्य पञ्चतत्त्वानि हृद्येभिरथाखिलाङ्गे।
संव्याप्य संसूत्र्य तदासुजातन्यासादिना प्राणितमादधीत।।176।।

विमर्शिनी

अथ आवाहनानन्तरं (त्र्यात्मना) प्रणवेन त्रिर्व्याप्य हृदि स्पृशन् पञ्चतत्त्वानि सुजप्याथ एभिरेवाखिलाङ्गे संव्याप्य संसूत्र्य सूत्रस्थाने न्यस्य तदा पुनः असुजातन्यासादिना प्राणन्यासादिना प्राणितं संजातप्राणमादधीत।।176।।

After touching the idol thrice with the chanting of the Praṇava and pronouncing the Pañcatattva touching the heart of the deity, it should be enjoined with Daśaprāṇanyāsa and other rituals. (176)

प्राणं पादतलादि नोवधि ततः पृष्ठेऽन्यथापानकं
व्यानं व्याप्तमुदानमादृगुदरान्नाभेः समानं हृदि।
वाच्यक्ष्णोर्न्नसि नागकूर्मकृकलाख्यान् देवदत्तं बहि-
र्व्याप्यान्तश्च धनञ्जयं न्यसतु मन्त्री स्वाङ्गुलीबीजवित्।।177।।

विमर्शिनी

प्राणन्यासमपि किञ्चित् प्रकाशयति-प्राणमिति। स्वाङ्गुलीबीजवित् प्राणादीनामङ्गुलीबीजानि च जानन् मन्त्री मन्त्रांश्च जानन् प्राणं पादतलादि पदतलादि पदतलमारभ्य नोवधि नासिकान्तं न्यसतु। ततो नासिकाया आरभ्य पृष्ठे पृष्ठभागे अन्यथा पादतलपर्यन्तमपानकं च, व्यानं देहे व्याप्तम्, उदानमुदरादारभ्य आदृक् नेत्रपर्यन्तं, समानं नाभेरारभ्य हृदि हृत्पर्यन्तं, नागकूर्मकृकलाख्यान् क्रमेण वाच्यास्ये[1] ।।177।।

---

1. अक्ष्णोरित्याद्यंशव्याख्यानमादर्शेषु नोपलभ्यते।

The preceptor shall unite his fingers and chant Bījākṣara when touching the idol from head to foot. The five vital airs be conceived as occupying the idol. The nyāsa of the vital airs should be with the particular finger enjoined for it. The airs like Nāga (with Aṅguṣṭha) Kūrma (with Tarjanī) Kṛkalā (with Madhyamā) Devadatta (with Anāmikā) and Dhanañjaya (with Kaniṣṭhikā) are to be thus placed. (177)

न्यस्येत् पुरोऽव्यक्तपुरोगगन्धमात्रान्तिका[1]स्त्वष्ट हृदम्बुजस्य।
दलेष्ववाचीनमुखेषु मध्ये शक्तिं च पुर्यष्टकसन्निविष्टाम्।।178।।

विमर्शिनी

अव्यक्तपुरोगगन्धमात्रान्तिकाः अव्यक्तं प्रकृतितत्त्वं तदादिगन्धतन्मात्रान्तिकाः प्राणबुद्ध्यहङ्कारतत्त्वानि शब्दादितन्मात्रतत्त्वानि चाष्ट पुरः पुरीः न्यस्येत्ः, मध्ये कर्णिकायां पुर्यष्टकसन्निविष्टां पुर्यष्टकस्याश्रयभूतां स्वां शक्तिं च। अत्र तुशब्दः पक्षान्तरद्योतकः। तत्पक्षे अव्यक्तपुरोगगन्धमात्रन्तिका इति अव्यक्तं पुरोगतं यस्य बुद्धितत्त्वस्य तत् तथोक्तं, तत्र बुद्ध्यहङ्कारमनःशब्दतन्मात्रादीनि अष्टतत्त्वानि दलेषु, मध्ये शक्त्यात्मकमव्यक्तं च न्यस्येदिति।।178।।

The lotus heart may be conceived as possessing eight petals showing the Padmamudrā. The lowest petal may be taken as the first and the eight Tattvas like Prāṇa up to Gandha. In the middle of the place of Karṇikā" (pericarp of the lotus) Puryṣṭakanyāsa in center of which Śaktibīja also is to be placed. (178)

तन्मध्ये चिद्घनं जीवं मूलमन्त्राल्पकं न्यसेत्।
तत्त्वान्यपि यथास्थानं मूलव[2]र्णाङ्ककान्यपि।।179।।

विमर्शिनी

तन्मध्ये शक्तेर्मध्ये चिद्घनं चैतन्यासारं जीवं जीवतत्त्वं मूलमन्त्रात्मकं मूलमन्त्ररूपदेवस्वरूपं च न्यसेत्। पुनस्तत्त्वान्यपि यथास्थानं न्यसेत्। पुनर्मूलवर्णाङ्कान्यपि न्यसेत्।।179।।

In the centre of Śakti the essence of energy - the soul of the form of Mūlamantra is to be conceived. Thereafter the alphabets of the same are to be placed. (179)

अन्योन्यसम्पुटदृढ घटिताग्रहस्ता
मुद्राञ्जलिर्मुकुलिताम्बुरुहानुरूपा।
ब्रह्माञ्जलिर्विधिमदारचिता स्वमूर्ध्नि
सा वन्दनी स्वहृदि दक्षिणपार्श्वनम्रा।।180।।

---

1. 'मा' घ. पाठः।
2. 'मन्त्राङ्ग' क. पाठः।

विमर्शिनी

रहस्यभूतानां मन्त्राणामुद्धारानन्तरं तथाविधानां मुद्राणां लक्षणमाह-**अन्योन्येति**। अन्योन्यसंपुटदृढा परस्पराभिभूख्येने दृढबद्धा, घटिताग्रहस्ता संस्पृष्टहस्ताग्रा, मुकुलिताम्बुरुहानुरूपा मुकुलितपद्मसमाना या सा अञ्जलिर्नाम मुद्रा। स्वमूर्ध्नि विधिवत् पद्मासनस्थेन साधकेनारचिता सैव ब्रह्माञ्जलिर्नाम मुद्रा। स्वहृदि दक्षिणपार्श्वनम्रा दक्षिणपार्श्वे नम्रा सैव वन्दनी नाम मुद्रा।।180।।

विवरणम्

पूजाशेषमन्त्रानुक्त्वा मुद्रां लक्षयति-**अन्योन्येत्यादिना**। अन्येन्यसम्पुटौ दृ(ढा?ढौ) घटिताग्रौ च हस्तौ यस्यामिति समासः, हस्तस्पर्शाभिमुखौ श्लिष्टौ तदङ्गुलीश्च श्लिष्टाः कुर्यात्। साञ्जलिमुद्रेत्यर्थ। मुकुलिताम्बुरुहानुरूपेति तस्यां हस्तोदरकुम्भीकरणमुक्तम्। स्वमूर्ध्नि विधिवदारचिता अञ्जलिर्ब्रह्माञ्जलिर्नाम मुद्रा स्वहृदीत्यारचितेत्यनुषङ्गः।।180।।

To show the Añjalimudrā fingers of both palms are to be joined together at the tip like a closed lotus. The same placed at the head forms Brahmājali', when the same is held slightly turned towards the right side of the heart it is called Vandanī. (180)

या वाममुष्ट्युच्छ्रितपूर्वशाखाग्रहान्यमुष्टिर्लसितप्रधाना।
सा तूर्ध्वमुद्रा शिवलिङ्गमुद्रोद्गताग्रजा दक्षिणहस्तमुष्टिः।।181।।

विमर्शिनी

वाममुष्ट्युच्छ्रितपूर्वशाखाग्रहा वामकरं मुष्टीकृत्य तस्य करस्य पूर्वशाखामङ्गुष्ठशाखां गृह्णाति अन्यमुष्टिर्दक्षिणमुष्टिः लसितप्रधाना उच्छ्रिताङ्गुष्ठा या सा तूर्ध्वमुद्रा ऊर्ध्वाख्या मुद्रा स्यात्। उद्गताग्रजा ऊर्ध्वगताग्रया ज्येष्ठया युक्ता दक्षिणहस्तमूष्टिः शिवलिङ्गमुद्रास्यात्।।181।।

By closing the fingers of the left palm except the thumb which is raised and enclosing the same with the palm of the right hand Ūrdhvamudrā is formed. If it is done by the right hand it is called "Śivaliṅga Mudrā In this the four fingers of the right palm is closed. (181)

आकुञ्चिताग्राङ्गुलि हस्तयुग्ममायोज्य तर्जायुगलं प्रकल्प्य।
स्वमध्यमापृष्ठगमग्रजाभ्यामन्तर्लिखेत् स्यादिति योनिमुद्रा।।182।।

विमर्शिनी

योनिमुद्रामाह-**आकुञ्चितेति**। आकुञ्चिताग्राङ्गुलि ईषत्कुञ्चिताङ्गुल्यग्रं हस्तयुग्ममायोज्य परस्परं योजयित्वा तर्जायुगलं तर्जनीद्वयं स्वमध्यमापृष्ठगं स्वस्वमध्यमायाः पृष्ठगतं प्रकल्प्य अर्थात् मध्यमाद्वयमृजूकृत्य अग्रजाभ्याम् अङ्गुष्ठाभ्याम् अन्तर्लिखेदिति योनिमुद्रा स्यात्।।182।।

Holding both the palms open with fingers bent slightly, both the index fingers shall be held at the base of the middle finger along with the thumbs. (182)

मध्यानामान्तराङ्गुष्ठो निर्गतो मध्यमानता।
दक्षिणस्य तु मुष्टौ स्यान्मुद्रा वैनायकी त्वियम्।।183।।

विमर्शिनी

गणपतेर्मुद्रामाह–**मध्येति**। मध्यानामान्तरा मध्यमानामिकयोरन्तरा मध्ये अङ्गुष्ठो निर्गतो दक्षिणस्य तु मुष्टौ भवेत्। तत्र मध्यमानता च भवेत्। इयं वैनायकी मुद्रा स्यात्।।183।।

For Vināyakamudrā the right hand may be clenched into a fist, the index finger may be placed in between the middle finger and ring finger. Then the middle finger may be held down wards to the maximum to form the pose. (183)

अनामिकामध्यमिकान्तरालप्रसारिताङ्गुष्ठविशिष्टमुष्टिः ।
मुदा हृदि स्यात् प्रथमाग्रलग्न[1]तर्जाग्रमुष्टिः शिरसि प्रदिष्टा।।184।।

विमर्शिनी

अङ्गमुद्राः क्रमेणाह–**अनामिकेति**। अनामिकामध्यमिकान्तरालप्रसारिताङ्गुष्ठविशिष्टमुष्टिः अनामिकामध्यमयोरन्तराले प्रसारितेनाङ्गुष्ठेन विशिष्टा मुष्टिः हृदि हृदयमुद्रा स्यात्। प्रथमाग्रलग्नतर्जाग्रमुष्टिः अङ्गुष्ठाग्रे लग्नं तर्जाग्रं यस्या मुष्टेः सा शिरसि मुद्रा प्रदिष्टा स्यात्।।184।।

विवरणम्

अथाङ्गमुद्रां दर्शयति–**अनामिकेति**। प्रथमाग्रलग्नतर्जाग्रमुष्टिरिति समासः, मुष्टिं कृत्वा तस्य तर्जनीं ज्येष्ठाग्रेणोन्नमयेदित्यर्थः।।184।।

Making the right hand into a fist and holding the thumb between the middle finger and ring finger one may form the pose for touching the heart (called hṛdayamudrā). By bending the index finger and touching the middle finger at the top one may bend all other fingers inside to form the pose for touching the head. (184)

उत्था[2]पिताङ्गुष्ठविशिष्टमुष्टिर्मुद्रा शिखायां कवचेऽग्रदोर्भ्याम्।
गूढाग्रिमाभ्यामभिवेष्ट्य गात्रं समाहरेत् तर्जनिके स्तनान्ते।।185।।

विमर्शिनी

उत्थापिताङ्गुष्ठविशिष्ठमुष्टिः ऊर्ध्वीकृतेनाङ्गुष्ठेन विशिष्टा मुष्टिः शिखायां स्यात्। गूढाग्रिमाभ्याम् अन्तर्गताङ्गुष्ठाभ्याम् अग्रदोर्भ्यां कराग्राभ्यां गात्रं शरीरमभिवेष्टय स्तना(न्तरे?न्ते) स्तनमध्ये तर्जनिके तर्जनीद्वयं समाहरेत् योजयेत्। इयं कवचे भवेत्।।185।।

---

1. 'ग्रा' इति मूलकोशपाठः।
2. 'त्तानिता' ख. पाठः।

विवरणम्

गूढाग्रिमाभ्यां ज्येष्ठां मध्ये निधायेत्यर्थः।।185।।

By stretching out the index finger and closing the other four fingers a fist may be formed to touch the Śikhā- the back side of the head. By folding the thumbs of both palms inside and hiding the body with other fingers to the maximum one may place the index fingers at the tip of the breast to form Kavacamudrā. (185)

नाराचमुष्टी परिवर्त्य तिर्यगायम्य मुञ्चेदियमस्त्रमुद्रा।
भ्रूमध्यबद्धव्यवलम्बमानज्येष्ठाग्रमुष्टिः खलु नेत्रमुद्रा।।186।।

विमर्शिनी

नाराचमुष्टी शरग्रह[1]णमुष्टिद्वयं परिवर्त्य बहिर्मुखं कृत्वा तिर्यगायम्य तिर्यक् प्रसार्य मुञ्चेत्। इयमस्त्रमुद्रा स्यात्। भ्रूमध्यबद्धव्यवलम्बमानज्येष्ठाग्रमुष्टिः भ्रूमध्ये बद्धा अधोमूख[2]ज्येष्ठाप्रयुक्ता मुष्टिः खलु आगमप्रसिद्धा नेत्रमुद्रा।।186।।

For Astramudrā both palms may be placed so as to touch the index finger and middle finger into the shape of an arrow. For Netramudrā the middle finger of the right palm may be placed at the centre of the brow downwards. (186)

प्रदेशिनीमध्यमिकाग्रकाभ्यां सानामिकाभ्यामपि वाभिमर्शः।
स्यान्नेत्रमुद्रेति षडङ्गके तु स्वस्वास्पदस्पर्शनमात्रमूर्ध्वम्।।187।।

विमर्शिनी

तत्र पक्षान्तरमाह–प्रदेशिनीति। प्रदेशिनीमध्यमिकाग्रकाभ्यां नेत्रद्व[3]यं चेत्, नेत्रत्रयं चेत् सानामिकाभ्याम् जनामिकासहिताभ्यां वा अभिमर्शः स्पर्शो नेत्रमुद्रा स्यात्। इति षडङ्गे मुद्राः स्युः। ऊर्ध्वं त्वष्टाङ्गा[4]दिषु स्वस्वास्पदस्पर्शनमात्रं स्वस्वस्थानस्पर्शनमात्रमेव।।187।।

विवरणम्

सानामिकाभ्यामिति नेत्रत्रयविषयमेतत्। तत्र च मध्यमया ललाटनेत्रस्पर्शः कार्यः। अत ऊर्ध्वमिति।।187।।

If there are two eyes for the deity small finger and ring finger may be bent along with the thumb. Now the middle finger and index finger may be used to touch both the eyes. If there is a third eye also the ring finger and middle finger may be united to touch the third eye (in the forehead).

---

1. 'हमु' घ. च. पाठः।
2. 'गतेन ज्ये' ग. ङ. पाठः।
3. 'द्वन्दं चेत्रेत्रद्वयं चेत् सा'
4. 'ङ्गकादि' ख. पाठः।

These are the modes for Ṣaḍaṅganyāsa. For the nyāsa of other limbs like stomach and buttocks one may just touch these limbs with fingers. (187)

हस्तौ परावृत्य कनिष्ठिकाद्वयं
तर्जाद्वयं च प्रकलय्य गारुडीम्।
बध्नातु मूद्रामवलम्बिताग्रजां
चलत्तदन्याङ्गुलिक्लृप्तपत्रिकाम् ।।188।।

विमर्शिनी

गराडमुद्रामाह–हस्ताविति। हस्तौ परावृत्य विमुखौ कृत्वा कनिष्ठिकाद्वयं तर्जाद्वयं चान्योन्यं प्रकलय्य बद्ध्वा अवलम्बिताग्रजाम् अधोमुखीकृताङ्गुष्ठद्वयां चलत्तदन्याङ्गुलिक्लृप्तपत्रिकां चलद्भ्यामितराङ्गुलिद्वयाभ्यां क्लृप्ताभ्यां पक्षाभ्यां युक्तां च गारुडीं मुद्रां बध्नातु।।188।।

For showing the Gāruḍamudrā the fingers have to be moved slightly to effect the movement. Before doing this both the palms should be joined together and both little finger and index finger shall be fastened to each other. Both the thumb should be bent downwards. (188)

अन्योन्यमाबध्य कनिष्ठिकाद्वयं
ज्येष्ठाद्वयं चाप्यथ शेषिताङ्गुलीः।
अधोमुखीकृत्य निकुञ्चिता[1]ग्रकाः
परिभ्रमय्य प्रकरोतु गालिनीम्।।189।।

विमर्शिनी

गालि[2]नीमुद्रामाह–अन्योन्यमिति। करद्वयं परावृत्य कनिष्ठिकाद्वयं ज्येष्ठाद्वयं चान्योन्यमाबध्य अथ शेषिताङ्गुलीः इतराङ्गुलीः निकुञ्चिता(ग्राः? ग्रका) वक्रीकृताग्राः अधोमुखीकृत्य परिभ्रमय्य गालि[3]नीं मुद्रां प्रकरोतु।।189।।

For showing Gālinīmudrā (as in sifting with water) both the little finger and middle finger are to be joined together and the rest of the fingers held downwards and moved around. (189)

कनिष्ठिकानामिकयोः करद्वये
प्रदेशिनीमध्यमयोर्युगं मिथः।
व्यत्यस्तबद्धाग्रमधोमुखीकृतं
प्रकल्प्य मुदां प्रकरोतु सौरभीम्।।190।।

1. 'ग्रि' ख. पाठः।
2. 'ल' ख. ग. ङ. पाठः।
3. 'ल' ङ् च. पाठः।

विमर्शिनी

सुरभिमुद्रामाह-**कनिष्ठिकेति**। करद्वये कनिष्ठिकानामिकयोः प्रदेशिनीमध्यमयोश्च युगं युग्मं मिथः अन्योन्यं व्यत्यस्तबद्धाग्रं व्यत्यासेन बद्धाग्रमधोमुखीकृतं प्रकल्प्य सौरभीं धेनुमुद्रां प्रकरोतु।।190।।

For showing the Surabhimudrā both the little finger and the ring finger may be held downwards and at the same time they may made to touch the tips of the other fingers. (190)

उत्तानिताञ्जल्युदरद्वयनामिका-
मूलोल्लिखत्स्वप्रथमाभिवाह[1]नी।
अवाङ्मुखी स्थापनिका नताञ्जलि[2]ः
श्लिष्टोत्थिताङ्गुष्ठयुगा स्थिराकृतिः।।191।।

विमर्शिनी

आवाहन्यादिमुद्राः कथयति-**उत्तानितेति**। उत्तानिताञ्जल्युदरद्वयनामिका मूलोल्लिखत्स्वप्रथमा उत्तानिताया अञ्जल्या अन्तर्भागे द्वयोरनामिकयोर्मूले उल्लिखद्भ्यां स्वास्वाङ्गुष्ठाभ्यां युक्ताभिवाहनी मुद्रा स्यात्। अवाङ्मुखी अधोमुखी श्लिष्टोत्थिताङ्गुष्ठयुगा परस्परं श्लिष्टाभ्यामुत्थिताभ्यां अङ्गुष्ठाभ्यां युक्ता स्थिराकृतिः निश्चलाकारा नताञ्जलिः नमिताञ्जलिः स्थापनिका मुद्रा स्यात्।।191।।

विवरणम्

उत्तानितस्याञ्जलेरुदरे ये द्वे अनामिके तयोर्मूलमुल्लिखन्त्यौ स्वे प्रथमे अङ्गुलित्र(त्र?द्व) यसाभिवाहनी अवाङ्मुखीत्यभिवाहनीमेवावाङ्मुखीं कृत्वेत्यर्थः। श्लिष्टोत्थिताङ्गुष्ठयुगेति। तस्मादञ्जलिपृष्ठादूर्ध्वमुन्नतञ्च कार्यमित्यर्थः। स्थापनिकेति नामनिर्देशः।।191।।

For showing the Āvāhanīmudrā- the pose for invocation- both the palms may be held open and the base of the ring fingers should be scratched with the respective thumbs. By holding both palms downwards with fingers bent together raise both the thumbs to form the Samsthāpanī mudrā- the pose by which the invoked thing is held firmly. (191)

सा सन्निधापन्युदिता नताङ्गु[3]ली-
श्लिष्टोभयाङ्गुष्ठपरिभ्रमोज्ज्वला।
अवाङ्[4]मुखाङ्गुष्ठनताङ्गुलीगणा
मुष्टिद्वयी स्यादिह सन्निरोधनी।।192।।

---

1. 'हि',
2. 'हु' इति मूलकोशपाठः।
3. 'लि'
4. 'न्तर्गताङ्गुष्ठ' ख. पाठः।

विमर्शिनी

नताङ्गुलि[1]श्लिष्टोभयाङ्गुष्ठपरिभ्रमोज्ज्वला नतास्वङ्गुलीषु श्लिष्टाभ्यामुभयाङ्गुष्ठाभ्यां युक्तेन परिभ्रमणेनोज्ज्वला या सा सन्निधापन्युदिता। इह अवाङ्मुखाङ्गुष्ठनताङ्गुलीगणा अधोमुखयोरङ्गुष्ठयोः नतेनाङ्गुलीसमूहेन युक्ता मुष्टिद्वयी सन्निरोधनी मुद्रा स्यात्।।192।।

विवरणम्

श्लिष्टोभयाङ्गुष्टपरिभ्रमोज्ज्वलेति। परितो भ्रमणमात्रमस्या विशेषः। मुष्टिद्वयीति श्लिष्टतोपलक्षणं द्रष्टव्यम्।।192।।

For Sannidhāpanī both the palms may be held downwards with folded fingers and thumbs may be rotated along with the fist. For Sannirodhinī both the thumbs should be held downwards into the middle of the palms. The rest of the fingers may be bent together into a fist. (192)

यावाहनी सार्पितपुष्पमूर्ध्वतो
ह्यवाङ्मुखीव्यापितयावकुण्ठनी।
संयोजिता मूर्धनि धेनुमुद्रिका
मुद्रामृतीकृत्यभिधा समिरिता।।193।।

विमर्शिनी

या आवाहनी मुद्रा सैव अर्पितपुष्पं देवमूर्ध्न्यर्पितेन पुष्पेण युक्तं यथा भवति तथा ऊर्ध्वतः शिरस आरभ्य अवाङ्मुखीव्यापितया स्थिता हि अवकुण्ठनी मुद्रा स्यात्। मूर्धनि संयोजिता धेनुमुद्रिका अमृतीकृत्यभिधा मुद्रा समीरिता।।193।।

विवरणम्

आवाहन्या पुष्पं देवस्य मूर्धनि निधाय ततः प्रभृति पदपर्यन्तमवाङ्मुखी सती देवतनुं व्यापयेदितीयमवकुण्ठनी स्यात्। धेनुमुद्रिकेति।।193।।

Āvāhanī- the pose for invocation is to be held by showing flowers over the head of the idol. When the same is shown from head to foot it forms Avakuṇṭhanī- showing of Surabhimudrā over the head of the idol forms Amṛtīkaraṇamudrā. (193)

उत्तानमुष्टि त्वनुमोदनक्रमात्
प्रसारिते तिर्यगथ प्रसादनी।
सप्तेति मुद्रा अभिवाहनादिषु
क्रमेण कार्याः कथिताः समासतः।।194।।

---

1. 'लि' ख. ङ. च. पाठः।

विमर्शिनी

उत्तानमुष्टी उत्तानिते मुष्टी तु अनुमोदनक्रमात् प्रीणनरीत्या तिर्यक्प्रसारिते भवतः। इयं प्रसादनी मुद्रा। इति समासतः कथिताः सप्त मुद्राः अभिवाहनादिषु क्रमेण कार्याः।।194।।

विवरणम्

तिर्यक् प्रसारिते इत्यन्वयः। ननु पञ्चैव हि क्रियाः प्राणावाहनसमये प्रतिपादिताः। शिष्टयोः किं विधो विनियोग इत्यत आह- सप्तेति।।194।।

In Prasādanīmudrā the palms shall be held open and clenched together to move across towards the side.

These are seven poses beginning with Āvāhanī in ritualistic worship. (194)

व्यत्यस्य तूपाद्ययुगं करोतु वा
निरुध्य संस्थापनमातनोतु वा।
मुक्तामृतीकृत्यवकुण्ठनाह्वयाः
पञ्चैव मुद्राः समुशन्ति केचन।।195।।

विमर्शिनी

उपाद्ययुगं द्वितीयां तृतीयां च व्यत्यस्य विनिमय्य करोतु वा। निरुध्य निरोधनीं दर्शयित्वा संस्थापनमातनोतु संस्थापनीं दर्शयेद् वा। केचन मुक्तामृतीकृत्यवकुण्ठनाह्वयाः अमृतीकृतिमवकुण्ठनीं च त्यक्त्वा पञ्चैव मूद्राः समुशन्ति।।195।।

Both Samsthāpanī narrated as the second and Sannidhāpanī as the third pose are sometimes transposed. These are to the liking of the priest who sometimes avoid the poses of Amṛtīkaraṇa and Avakuṇṭhana poses and hold that there are only five poses that are needed. (195)

कृत्वाग्रहस्तौ मणिबन्धसक्तशाखौ मिथःश्लिष्टतलद्वयौ च।
परिभ्रमय्य प्रकरोतु चक्रमुद्रां परीताङ्गुलिदर्शितारम्।।196।।

विमर्शिनी

आयुधमुद्राः कथयति-कृत्वेति। अग्रहस्तौ मणिबन्धसक्तशाखौ मणिवन्धस्थानयोः सक्ताभिः शाखाभिरुपलक्षितौ मिथःश्लिष्टतलद्वयौ अन्योन्यं श्लिष्टेन तलद्वयेन युक्तौ च कृत्वा परिभ्रमय्य परिभ्रमणं कारयित्वा परीताङ्गुलिदर्शितारां परिवर्तिताभिरङ्गुलीभिः दर्शितैररैर्युक्तां चक्रमुद्रां प्रकरोतु।।196।।

विवरणम्

उदरपृष्ठादिष्वष्टाङ्गद्वादशाङ्गविषये मिथो मणिबन्धसक्तशाखावित्यन्वयः। परीताङ्गुलिदर्शितारामिति चक्राराणामङ्गुलिभिरभिव्यञ्जनमुक्तम्।।196।।

To show the Cakramudrā hold the fingers of both palms extended. The

four fingers of the right palm may be placed between the thumb and index finger of the left palm at the base. Join together both the palms and move around in circles. The index finger of both the palms shall be shown as the axle of a wheel in the act of movement. (196)

प्रसारिताङ्गुष्ठकतर्जनीकशिष्ट[1]त्तमुष्ट्युज्ज्वलदक्षदोष्णा।
निगीर्णवामप्रथमा तु शङ्खमुद्रान्यशाखामुकुलीकृताग्रा।।197।।

विमर्शिनी

प्रसारिताङ्गुष्ठकतर्जनीकशिष्टात्तमुष्ट्युज्ज्वलदक्षदोष्णा प्रसारिताभ्यां दीर्घीकृताभ्याम् अङ्गुष्ठतर्जनीभ्यामवशिष्टाभिः अङ्गुलीभिः कृतया मुष्ट्या उज्ज्वलेन दक्षिणकरेण निगीर्णवामप्रथमा कबलीकृतेन वामाङ्गुष्ठेन युक्ता अन्यशाखामुकुलीकृताग्रा वामहस्तस्यान्याभिः शाखाभिः मुकुलीकृतेनाप्रभागेन युक्ता शङ्खमुद्रा स्यात्।।197।।

विवरणम्

अन्यशाखामुकुलीकृताग्रेति। ये दक्षिणमुष्टेः प्रसारिते अङ्गुली या वामस्य शिष्टा अङ्गुलयश्चतस्रः ताभिष्षड्भिः सहाग्रं मुकुलीकृतं स्यादित्यर्थः।।197।।

For showing Śaṅkhamudrā the index finger of the right palm along with the middle finger are to be held extended and rubbed together. The rest of two fingers should be held closed. The thumb of the left palm may be inserted through them. The rest of the fingers of the left palm may be held around the right fist. (197)

स्याद् वाममुष्टिकबलीकृतदक्षिणाङ्गु-
ष्ठाग्रावसक्तपरिशेषितदक्षशाखा ।
तत्तर्जनीसमसमुच्छ्रितवामबाहु-
ज्येष्ठाग्रका निग[2]दितेत्यपि शङ्खमुद्रा।।198।।

विमर्शिनी

शङ्खमुद्रायाः पक्षान्तरं दर्शयति-**स्यादिति**। वाममुष्टिकबलीकृतदक्षिणाङ्गुष्ठाग्रावसक्त-परिशेषितदक्षशाखा वाममुष्ट्या कबलीकृतस्य दक्षिणाङ्गुष्ठस्या[3]ग्रे अवसक्ताः प्रसक्ताः परिशेषिताः दक्षिणस्य शाखा यस्याः सा तथोक्ता, तत्तर्जनीसमसमुच्छ्रितवामबाहुज्येष्ठाग्रका दक्षिणतर्जन्या समं समुच्छ्रितं वामकराङ्गुष्ठाग्रं यस्याः सापि तथोक्ता। इत्यपि शङ्खमुद्रा गुरुभिर्निगदिता स्यात्।।198।।

विवरणम्

वाममुष्टिना दक्षिणाङ्गुष्ठं कृत्स्नं गृहीत्वा तस्य मुष्ट्युपरि दृष्टाग्रस्याङ्गुष्ठस्याग्रे दक्षिणतर्जनीव्यति-

1. 'शिल' क. ख. पाठः।
2. 'भवतु वेत्यथ श' ख. पाठः।
3. 'प्रे प्र' ख. ङ. च. पाठः।

रिक्तास्तिस्रोऽङ्गुलीर्योजयित्वा तां तां तर्जनीं वामाङ्गुष्ठञ्च सहोन्नते श्लिष्टे कुर्यादिति शङ्खमुद्रायाः प्रकारान्तरमुक्तम्।।198।।

In another form of Śaṅkhamudrā the left fist shall cover the right thumb leaving other finger. With the four fingers of the right palm the left fist may be circled. The tip of the right palm and the thumb of the left palm may be held together for showing another variety of Śaṅkhamudrā. (198)

साधोग्रकाङ्गुष्ठकसम्मुखीनश्लिष्यद्द्विमुष्टिप्रसृतानताग्रम् ।
तन्मध्यमायुग्मकमाकलय्य प्रद[1]र्शयेदत्र गदाख्यमुद्राम्।।199।।

विमर्शिनी

गदामुद्रामह–**साधोग्रकेति**। साधोग्रकाङ्गुष्ठकसम्मुखीनश्लिष्यद्द्विमुष्टिप्रसृतानताग्रम् अधोग्राभ्यामङ्गुष्ठाभ्यां सहितायाः सम्मुखीनायाः श्लिष्यन्त्याश्च द्विमुष्टेः प्रसृतमानताग्रं च तन्मध्यमायामकं तस्य मुष्टिद्वयस्य मध्यमायुगलम् आकलय्य बद्धवा अत्र एतन्मुद्राबन्धनकाले गदाख्यमुद्रां प्रदर्शयेत्।।199।।

To show Gaḍāmudrā the thumbs of both the palms should also be bent down over which other fingers should be bent to form a fist. Now the middle finger shall be extended so as to touch each other and hold them downwards. (199)

मणिबन्धविषक्तपाणियुग्मप्रसृताष्टाङ्गुलिकल्पिताष्टपत्रा ।
प्रथमायुगक्लृप्तकर्णिकाढ्या परिदर्श्या पयसीरुहात्ममुदा।।200।।

विमर्शिनी

पद्ममुद्रामाह–**मणिबन्धेति**। मणिबन्धविषक्तपाणियुग्मप्रसृताष्टाङ्गुलिकल्पिताष्टपत्रा मणिबन्धे विशेषेण सक्तात् पाणियुग्मात् प्रसृताभिरष्टाभिरङ्गुलिभिः कल्पितैरष्टभिः पत्रैः उपेता, प्रथमायुगक्लृप्तकर्णिकाढ्या अङ्गुष्ठयुग्मेन क्लृप्तया कर्णिकया च युक्ता पयसिरुहात्ममुद्रा[2] पद्ममुद्रा परिदर्श्या स्यात्।।200।।

Joining the fist of both hands together using all the eight fingers except the thumbs, form the shape of a lotus of eight petals. Place the thumb at the place of the Karṇikā-pericarp of the lotus. This is called the Padṃamudrā. (200)

ति[3]र्यङ् निकुञ्च्य प्रहिताब्धिशाखा परश्वधस्योन्नमितप्रधाना।
प्रसारिताङ्गुष्ठशिरःस्थमध्या नामग्रका स्याद्धरिणस्य मुद्रा।।201।।

विमर्शिनी

परशुमुद्रामाह–तिर्यगिति। निकुञ्च्य वक्रीकृत्य तिर्यक् प्रहिताब्धिशाखा तिर्यग्गच्छन्तीभिः

1. 'योजये' क. ख. पाठः।
2. 'द्रा परि' ख. पाठः।
3. 'निकुञ्च्य तिर्यक्प्र' इति मूलकोशपाठः।

अङ्गुष्ठवर्जिताभिश्चतसृभिरङ्गुलीभिरुपेता, उन्नमितप्रधाना ऊर्ध्वीकृताङ्गुष्ठा च परश्वधस्य मुद्रा स्यात्। मृगमुद्रामाह–प्रसारितेति। प्रसारिताङ्गुष्ठशिरःस्थमध्यानामाग्रका प्रसारितस्याङ्गुष्ठस्य शिरस्थं शिरसि स्थितं मध्यानामिगयोरग्रं यस्याः सा हरिणस्य मृगस्य मुद्रा स्यात्।।201।।

विवरणम्

अब्धिशाखाः चतस्रोऽङ्गुलयः। मृगमुद्रायां तर्जनिकनीष्ठयोरुन्नमनमर्थसिद्धमवगन्तव्यम्।।201।।

For Paraśumudrā - the pose of Axe- the palm of the right hand may be kept fully open. Raise the thumb upwards with the palm and other fingers extended forwards. For Hariṇamudrā-the pose of deer - extend the left palm fully with ring finger, middle finger and thumb touching each other. (201)

बहिर्मुखोत्तम्भितपाणिशाखा मनाक्प्रकम्पाभयरूपमुद्रा।
उत्तानपाणिप्रसृताग्रशाखा निम्नोदरा स्याद् वरदानमुद्रा।।202।।

विमर्शिनी

अभयमुद्रामाह–**बहिरिति**। बहिर्मुखोत्तम्भितपाणिशाखा बहिर्मुखाभिः उत्तम्भिताभि–रूर्ध्वगताभिः पाणिशाखाभिर्युता, मनाक्प्रकम्पा ईषत्कम्पयुक्ता चाभयरूपमुद्रा अभयमुद्रा स्यात्। वरदमुद्रामाह–उत्तानेति। उत्तानेति। उत्तानपाणिप्रसृताग्रशाखा ऊर्ध्वमुखपाणौ प्रसृतैः शाखाग्रैर्युता, निम्नोदरा निम्नान्तर्भागयुता वरदानमुद्रा स्यात्।।202।।

For showing the Abhayamudrā the palm of the left hand extended forward showing all the fingers with a slight shake is prescribed. Varadamudrā is that in which the right palm is held open with the fingers held in a cup shape. (202)

शूलस्य संस्तम्भितमध्यमा मनाक् प्रभुग्नतर्जोपकनिष्ठिका सती।
मुद्रा कपालस्य कपालसङ्ग्रहाभिनीतिरुत्तानितपाणिना कृता।।203।।

विमर्शिनी

शूलमुद्रामाह–**शूलस्येति**। संस्तम्भितमध्यमा ऋज्वीकृतमध्यमा, मनाक्प्रभुग्नतर्जोपकनिष्ठिका ईषद्वक्रीकृतयोः तर्जन्यनामिकयोर्युक्ता सती शूलस्य मुद्रा स्यात्। कपालमुद्रामाह मुद्रेति। उत्तानितपाणिना कृता कपालसंग्रहाभिनीतिः कपालग्रहणाय कृतोऽभिनयः कपालस्य मुद्रा स्यात्।।203।।

विवरणम्

कपालसङ्ग्रहाभिनीतिः कपालस्य करेण धारितताममभिनयेदित्यर्थः।।203।।

For Śūlamudrā the middle finger of the right palm may be raised upwards. Index finger and ring finger should be held slightly bend to form the shape of a trident. For Kapālamudrā the palms of the left hand may be held as if holding a Kapāla (Skull) (203)

मुष्टी निजे चापपृषत्कमुद्रिके कृत्वा करौ द्वौ मुकुलीकृताग्रकौ।
निबध्य गाढं मणिबन्धयोर्द्विधा भ्रमेण कार्ये पविशक्तिमुद्रिके।।204।।

विमर्शिनी

निजे मुष्टी धनुर्मुष्टिः शरमुष्टिश्च चापपृषत्कमुद्रिके धनुर्मुद्रा शरमुद्रा स्याताम्। मुकुलीकृताग्रकौ द्वौ करौ कृत्वा गाढं मणिवन्धयोर्निबध्य द्विधा भ्रमेण पविशक्तिमुद्रिके वज्रमुद्रा शक्तिमुद्रा च कार्ये ।।204।।

विवरणम्

द्विधा भ्रमेणेति। दक्षिणपार्श्वे दक्षिणहस्ताग्रं दक्षिणतो भ्रमयेत्। वामपार्श्वे वामहस्तं दक्षिणतो भ्रमयेदित्यर्थः(?) ।।204।।

For the representations of Cāpa (bow) Śara (arrow) Vajra (bolt) and Śakti (spear) palms may be held in different positions to emulate them. Holding the left hand, as if carrying a bow, the pose by that name is shown. Holding the hand as if carrying an arrow Śaramudrā can also be shown. By holding the fist of right hand by left hand and vice- versa and shaking those in a slightly bent position Vajramudrā and Saktimudrā can be represented. (204)

कनिष्ठिकाद्याः क्रमशः प्रधानया
चतस्र एनां निजतर्जया स्पृशन्।
प्राणादिमुद्राः क्रमशः प्रदर्शयेत्
स्याद् ग्रासमुदा स्फुरदुत्पलाकृतिः ।।205।।

विमर्शिनी

प्राणादिमुद्राः कथयति-**कनिष्ठिकाद्या** इति। कनिष्ठिकाद्याश्चतस्रोऽङ्गुलीः क्रमशः प्रधानया, एनां प्रधानां निजतर्जया च स्पृशन् क्रमशः प्राणादिमुद्राः प्रदर्शयेत्। स्फुरदुत्पलाकृतिः विकसदुत्पलाकारा ग्रासमुद्रा स्यात्।।205।।

विवरणम्

एनां निजतर्जयेति प्रधानमित्यर्थः।।205।।

For the first four mudras of Prāṇāhuti- ceremonial eating of food by small quantities the four fingers beginning with small finger touching the thumb may be employed. For the fifth, thumb is to touch the index finger in this act. These shall be shown in the particular order. Grāsamudrā- the sign of holding the rice ball - is to be shown by holding the thumbs of the left hand, index finger and middle finger to emulate the shape of a blue lotus. (205)

क्रमात् कनिष्ठोपकनिष्ठिके स्पृशन्
प्रदेशिनीमध्यमिके च मुख्यया।
अनामिकामध्यमिके च तर्जनी-
युते च ते ताश्च करोतु वाखिलाः ।।206।।

विमर्शिनी

मुख्यया ज्येष्ठया क्रमात् कनिष्ठोपकनिष्ठिके, प्रदेशिनीमध्यमिके च, अनामिकामध्यमिके च, तर्जनीयुते ते च तर्जनीमध्यमानामिकाश्च, ताः चतस्रोऽङ्गुलीश्च स्पृशन् ताः अखिलाः प्राणादिमुद्राः करोतु वा ।।206 ।।

विवरणम्

तर्जनीयुते चतुर्थीमुद्रोक्ता ता अखिलाश्चेति पञ्चमी। मुख्यया स्पृशन्निति सर्वत्र सम्बध्यते[1] ।।206 ।।

According to another view the Prāṇāhuti poses are as follows:

(1) For Prāṇa, thumb, small finger and ring finger are employed.

(2) For Apāna, index finger and middle fingers together touch the thumb.

(3) For Vyāna, ring finger, middle finger and thumb are involved.

(4) For Udāna, ring finger, middle finger and index finger are used.

(5) For Samāna, all the five fingers together are involved. (206)

अनामिकामग्रजया कनीयसी-
मपि स्पृशन्नग्रभवां स्वतर्जया।
प्रधानया तर्जनिकादिकं त्रयं
करोतु तोयाद्युपहारमुद्रिकाः ।। 207 ।।

विमर्शिनी

षडुपहारमुद्राः कथयति-अग्रजया अनामिकां कनीयसीमपि, स्वतर्जया अग्रभवां, पुनः प्रधानया तर्जनिकादिकं त्रयं तर्जनीमध्यमानामिकाः स्पृशन् क्रमात् तोयाद्युपहारमुद्रिकाः जलगन्धपुष्पधूप-दीपनिवेद्यमुद्राः करोतु ।।207 ।।

Upahāra mantra for Mānasapūjā is indicated as follows. Holding the two palms together in an open position the respective thumbs are rubbed from base to top of the ring finger to smear the water. Thus with the touch of the little finger Gandha- incenses- is to be sanctified. In the case of puṣpa (flower) thumb is to be rubbed up to the tip of the index finger. With the thumb the three items of Dhūpa, dīpa and Nivedya are to be rubbed using other fingers as well - index finger, middle finger and ring finger are involved respectively along with the thumb. (207)

अनामिकामूललसत्प्रधानां निवेद्यमुद्रां प्रतनोतु दोर्भ्याम्।
हृद्बद्धमुष्टिर्बलिमुद्रिकाग्रस्थास्नुप्रधानोपकनिष्ठिका स्यात्।।208 ।।

विमर्शिनी

निवेद्यकालस्थां निवेद्यमुद्रामाह-अनामिकेति। दोर्भ्याम् अनामिकामूललसत्प्रधानाम् अनामिकयोर्मूले शोभमानां प्रधानां निवेद्यमुद्रां प्रतनोतु। बलिमुद्रामाह हृद्बद्धेति। अग्रस्थास्नुप्रधानोपकनिष्ठिका

1. इत उपरि घ. पाठो नास्ति।

मुष्टेरग्रभागस्थाभ्यां प्रधानोपकनिष्ठिकाभ्यां युक्त हृद्बद्धमुष्टिः हृदये बद्धा दक्षिणमुष्टिः बलिमुद्रिका स्यात्।।208।।

Mudrā for Nivedyamantra , the thumbs of both palms rubbing the ring finger from base to top. The tips of the thumb of the right hand and ring finger may be formed together keeping the other three folded or bent. The fist shall be placed at the position of the heart for Balimudrā - the sign of offering oblation. (208)

भूषायुधान्तेऽञ्जलिवन्दनीभ्यामूर्ध्वा हरौ शूलिनि लिङ्गसंज्ञा।
योन्याह्वया सुम्भजिति द्विपास्ये वैध्न्यञ्जलिर्वा कथितैषु मुदा।।209।।

विमर्शिनी

अञ्जल्यादिप्रधानमुद्राणां दर्शनकालमाह-भूषायुधान्त इति। भूषायुधान्ते भुषणायुधन्यासानामन्ते अञ्जलिवन्दनीभ्यां सह हरौ ऊर्ध्वा मुद्रा स्यात्। शूलिनि लिङ्गसंज्ञा, सुम्भजिति योन्याह्वया, द्विपास्ये वैध्नी, एषु सर्वेष्वप्यञ्जलिर्वा मुद्रा स्यात्।।209।।

After the nyāsa of weapons, for Viṣṇu the mudras of Añjali, Vandanī and Ūrdhva may be shown. For Śiva it is Liṅgamudrā while for Durgā it is Yonimudrā. For Gaṇapati Vināyākamudrā is ordained. Otherwise for all gods Añjali can be used. (209)

रात्वावाहनतः परं समधुपर्कादावृतिस्फूर्तित-
श्चाचामावधिकं पुरः स्नपनतोऽन्ते वस्त्रभूषाविधेः।
प्राङ् नैवेद्यविधेः परं त्रयमिदं गण्डूषतोऽर्घ्यं प्रसा-
दान्ते प्राक् च विसर्जनात् प्रतिसपर्यं वारि चाद्यन्तयोः।।210।।

विमर्शिनी

अर्घ्यादिक्लृप्त्या वा पाद्यादिक्लृप्त्या वोपहारदानस्य कालनियममाह-रात्विति। आवाहनतः परम् आवाह्य सकलीकरणान्ते आचामावधिकम् अर्घ्यपाद्याचमनीयक्रमेण वा पाद्यार्घ्याचमनीयक्रमेण वा इदं त्रयं रातु ददातु। समधुपर्कात् मधुपर्कद्रव्ययुक्तादुपहारदानात् परम्, आवृतिस्फूर्तितः आवरणस्फुरणात् परं, स्नपनतः स्नपनकर्मणः पुरः पूर्वं, वस्त्रभूषाविधेः वस्त्रविधेर्भूषणविधेरन्ते, नैवेद्यविधेः प्राक्, गण्डूषतः परं च इदं त्रयं रातु। प्रसादान्ते प्रसन्नपूजानन्तरं विसर्जनात् उद्वासनात् प्राक् चार्घ्यं रातु। प्रतिसपर्यम् उपहारसमर्पणे[1] आद्यन्तयोः वारि जलं च रातु।।210।।

After the invocation, madhuparka is to be followed up to the presentation of Arghya, Pādya etc. Then the attendants are to be taken care of. Even after the Snāna - the ceremonial bathing Vastra is to be presented. Before the offering of Naivedya water for gargling is to be given. At the end of Prasannapūjā" and before the Udvāsa - releasing the divinity- Arghya is

1. 'णाद्य' ख. ङ. च. पाठः।

to be given. At the beginning and end of each ceremonial presentation, the supply of water is a must. (210)

स्नानानि पञ्चामृतपञ्चगव्यमृत्क्वाथकोष्णोदकगन्धवार्भिः।
तीर्थाद्भिरष्टौ कलशाम्बुभिश्च कुर्वीत सावान्तरशूद्धतोयै।।211।।

विमर्शिनी

स्नानक्लृप्तिमाह–स्नानानीति। पञ्चामृतपञ्चगव्यमृत्क्वाथकोष्णोदकगन्धवर्भिः तीर्थाद्भिः कलशाम्बुभिश्च पञ्चामृतादिकलशजलान्तैः अष्टौ स्नानानि सावान्तरशुद्धतोयैः मध्ये मध्ये शुद्धजलसहितैः कुर्वीत।।211।।

Abhiṣeka- the ceremonial splashing of materials are to be carried out with the following items (1) Pañcāmṛta (2) Pañcagavya (3) muddy water (4) decoction (5) warm water (6) water with fragrance (7) water from holy ghats and (8)water from sanctified pots. In between each items splashing with pure water is required. (211)

गुरुभ्य इदमेवमादिपदपूवकेणाणुना
करोतु कुसुमाञ्जलिं गुरुपितृस्वमात्रात्मनः।
सहोदरकुटुम्बिनीतनयवंश्यसाध्यांस्तथा
महीतलसमाश्रितांस्त्रिभुवनाश्रितांश्चोद्दिशन्।।212।।

विमर्शिनी

प्रसन्नपूजाकाले साध्यपुष्पाञ्जलिक्रममाह–गुरुभ्य इति। गुरुभ्य इदमेवमादिपदपूर्वकेणाणुना 'गुरुभ्य इदं ओं नमो नारायणाय' इत्यादिना मन्त्रेण कुसुमाञ्जलिं पूर्णपुष्पाञ्जलिं त्रिशस्त्रिशः करोतु। गुरुपितृस्वमात्रात्मनः उद्दिशन् गुर्वादीनां तत्फलप्राप्तिं स्मरन् 'गुरुभ्य इदं' 'पितृभ्य इदं' मातृभ्य इदम्' 'अस्मभ्यमिदं', सहोदरकुटुम्बिनीतनयवंश्यसाध्यान् 'भ्रातृभ्य इदं' 'पत्नीभ्य इदं' 'पुत्रेभ्य इदम्' अस्मद्वंशभूतेभ्य इदं' 'साध्येभ्य इदं', महीतलसमाश्रितान् 'पृथिवीवासिभ्य इदं', त्रिभुवनाश्रितांश्च 'त्रिभुवनवासिभ्य इदम् ओं नमो नारायणाय' इत्यादिमन्त्रैरित्यर्थः।।212।।

The procedure for evening worship is also given. To begin with three handfuls of flowers are to be offered stating "Gurubhya". The chanting of Mūlamantra is required for this. Thereafter mantras like "Pitṛbhya idam" etc., relating to the members of one's family are to be recited including the people of the regions and the whole world. The final invocation may be to god Nārāyaṇa.

The names of the respective divinity and relation should be appropriately used to find the reason (as shown it the commentary) (212)

आवाह्याग्रगते स्वमूलमनुबिम्बात् कर्मबिम्बे निजै–
रभ्यर्च्यावरणैर्युतं विधिवदत्रोद्वासयेच्चान्ततः।

एवं स्याद् बहुबेरनित्यवरिवस्यावाहनोद्वासना-
हीनोऽर्चाविधिरेकबेरविषये न्यूनावृतिश्च क्वचित्।।213।।

विमर्शिनी

बहुबेर एकबेरे च पूजाक्लृप्तिमाह-आवाह्येति। बहुबेरविषये अर्चितपीठे कल्पितमूर्[1]तावग्रगते कर्मबिम्बे स्वमूलमनुबिम्बात् यथोक्तप्रकारेणावाह्य निजैरावरणैर्युतं विधिवदभ्यर्च्यान्ततोऽत्र मूलबिम्ब उद्वासयेत्। एवं बहुबेरनित्यवरिवस्या बहुबेरविषये नित्यपूजा स्यात्। एकबेरविषये अर्चाविधिः पूजाविधिः आवाहनोद्वासनाहीनः स्यात्। क्वचित्पक्षे न्युनावृतिश्च आवरणैर्विनैव स्यात्।।213।।

From the original idol divinity is to be invoked to Arcanābimba (the idol for practical purposes like processions). The priest is to invoke the divinity from one self to the idol and to perform Nyāsa. He is to propitiate the god along with attendants properly offering Nivedya and Prasannapūjā. The divinity may be transferred to the conch filling the same with flowers and drawing the water away. It is to be united with the Mūlabimba in which rites up to Mānasapūjā may be done. If it is only one bimba, Āvāhana and Udvāsana may be dispensed with (since invocation is not needed in such cases). For daily worship sometimes the attendants are not propitiated. (213)

भक्त्यैतद्विधिनाजितं यजतु चाक्षीणश्रियै मुक्तये
तत्तन्त्रप्रवराप्तयेह[2] जगदीशं कृत्स्नविच्चर्चया।
शर्वं सद्वितयश्रियं गजमुखं वातश्च भूयस्तरा-
राध्यां[3] सुम्भरिपुं तथार्यशरजं येन क्रियार्थोत्तरा[4]।।214।।

विमर्शिनी

अभिहितमेतत्तन्त्रसमुच्चयमुपसंहरति-भक्त्येति। इह पूजायोग्ये काले पूजायोग्ये बिम्बादिविषये च कृत्स्नवित् तन्त्रागमानां कार्त्स्न्येन तात्पर्यज्ञः पूजकः एतद्विधिना अत्रोक्तविधानेन तत्तन्त्रप्रवराप्तया तस्य तस्य देवस्य तन्त्रागमेभ्यो गृहीतया चर्चया पूजया जगदीशम् अजितं विष्णुं वा, शर्वं शिवं वा, सद्वितयश्रियं वैष्णव्या शैव्या च श्रिया सहितं शिवनागयणं वा, गजमुखं गणपतिं वा, अतोऽन्यां भूयस्तराराध्यां पूनः पुनराराधनार्हां सुम्भरिपुं दुर्गां वा, तथा आर्यशरजं तद्वदेव शास्तारं वा स्कन्दं वा, भक्त्या सह यजतु। भक्तिरेव पूजायां प्रधानं साधनम्। तदुक्तमुपहारप्रकाशिकायां-

"स्नेहविश्वाससम्मानभक्तिज्ञानजलादिना"

इति। भगवद्गीतायां च-.

1. 'र्घा' ङ. पाठः।
2. 'त्रि' ख. पाठः।
3. 'ध्यं' ख. ग. पाठः।
4. 'रा।। इति विधिमधिगम्य क्षेत्रसंस्कारपूर्वं परमपि सुविशुद्धिं ह्यमापाद्य तत्स्थाम्। परमपुरुषमेकं श्रद्धयाराध्नुयाद् यः स हि पुरुषधुरीणः स्यात् समग्रोन्मिषच्छ्रीः।।' क. ख. पाठः।

पत्त्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः।।

इति। किमर्थमिज्यत इत्यत्राह–अक्षीणश्रियै इति। प्रभूताय ऐहिकफलाय, मुक्तये मोक्षाय च। येन विधिना क्रिया पूजा अर्थोत्तरा सफला भवति तेन विधिनेति पूर्वत्र संबन्धः। अयं श्लोको ग्रन्थकृता चक्ररूपतया लेखनीयत्वेन विवक्षितः। तत्र समे स्थले वृत्तं विलिख्य तदन्तरेकैकाक्षरलेखनप्रदेशमात्रं व्यतीत्यापि वृत्तं विलिख्य, तत्र वृत्तद्वयवति स्थले समान्तरालानि त्रीणि पुटानि द्विद्विसूत्रास्फालनाद् बाह्यवृत्तादारभ्य तदन्तानि अन्योन्यं मध्यतः संसक्तानि कृत्वाक्षराणि लिखेत्। तत्र दण्डाकारेषु पुटत्रयेषु प्रादक्षिण्यक्रमेण श्लोकस्य पादत्र[1]यमूलत आरभ्याग्रपर्यन्तं लेखने तत्र दशममक्षरं जकारः पुटत्रयेऽपि समानं मध्ये यथा भवति तथा 'भक्त्यैतदि'त्यारभ्य एकोनविंशत्यक्षरान् त्रीन् पादान् विलिख्य चतुर्थं पादं 'राध्यां' सुम्भरिपुमित्यादिकं तृतीयपदान्त्यगतमेवाक्षरं पुनरप्यारभ्य षट्सु पुटान्तरालेषु द्विद्व्यक्षराणि च विलिख्य वाचयेत्। तत्र पुटान्तरालस्थैः द्वादशभिरक्षरैः पुटस्थैः षड्भिरक्षरैः सहाष्टादशाक्षरावसानेऽन्त्यगतं 'रा' इत्यक्षरमपि वाचयित्वा पादं पूरयेत्। तत्र पुटषट्केऽपि तृतीयतृतीयाक्षरवाचने 'तन्त्रसमुच्चय' इ[2]ति ग्रन्थस्य नामोक्तं भवति। षष्ठषष्ठाक्षरवाचने 'नारायणकृत' इ[3]ति ग्रन्थकर्तुः स्वस्य नामाप्युक्तं भवतीति।। 214।।

The wise preceptor shall after consulting the Āgama texts and discussion with authorities shall worship the deities following tantric precepts. Thus he may propitiate Viṣṇu, Śiva, Śaṅkaranārāyaṇa, Gaṇapati, Durgā, Śāstā and Subrahmaṇya with devotion for the wellbeing of himself and others in this world as well as in the world hereafter. The worship shall never be without any positive results. (214)

कल्यब्देष्वतियत्सु नन्दनयनेष्वम्भोधिसङ्ख्येषु यः
सम्भूतो भृगुवीतहव्यमनियुङ्मूले सवेदोन्वये।
प्राहुर्यस्य जयन्तमङ्गलपदे[4]द्धं धाम नारायणः
सोऽयं तन्त्रमिदं व्यधाद् बहुविधादुद्धृत्य तन्त्रार्णवात्।।215।।

विमर्शिनी

ग्रन्थकृते स्वस्य लोकप्रसिद्ध्यर्थं गृहगोत्रनामान्यपि अस्मिन् ग्रन्थे निबध्नाति–कल्यब्देष्विति। नन्दा नव, नयने द्वे, इषवः पञ्च, अम्भोधयश्चत्वार[5]ः। एकस्थानदशस्थानशतस्थानसहस्रस्थानेषु क्रमेण स्थिता नन्दाद्याः संख्या येषु कल्यब्देषु, कल्यब्दाः कलेरब्दाः संवत्सराः तेषु सवत्सरेषु, अतियत्सु अतिक्रम्य गच्छत्सु कालावयवेषु यः पुमान् भृगुवीतहव्यमुनियुङ्मूले भृगुर्वीतहव्य इत्यृषिद्वयमूलभूते सवेदोन्वये सवेदा इति कश्चिदृषिः तस्यान्वये वंशे। भृगोः पुत्रो वीतहव्यः, तस्य पुत्रः सवेदाः, तस्यान्वये

1. 'यं' घ. ङ. च. पाठः।,
2-3. 'मि' ख. ङ. च. पाठः।
4. 'दाब्यं धा' ख. ग. पाठः।
5. 'रः षड्भिरक्षरैरेक' ख. ग. पाठः।

इति स्वस्य प्रवरोऽप्युक्तो भवति। तस्मिन् वंशे यः सम्भूतः, यस्य पुनः जयन्तमङ्गलपदेद्धं 'जयन्तमङ्लम्' इति पदेन प्रकाशितं धाम गृहं भवति, सोऽयं नारायणः 'नारायण' इति लोके प्रशिद्धः इदं तन्त्रं बहुविधात् तन्त्रार्णवात्। तन्त्राणां बाहुल्यात् समुद्रकल्पत्वं द्योत्यते। तस्मादमृतमिवोद्धृत्य तन्त्रसमुच्चयाख्यं ग्रन्थं व्यघात् कृतवानित्यर्थः।।215।।

विवरणम्

स्वाध्याययोगयुक्तस्य प्रसीदतीति। तस्य गुणसामग्रीपरिग्रहेण हृदयपुटे विभाव्यमानस्य सकलगुणविलापनात् स्वरूपप्रतिपत्तिर्भवति। सैव चाभ्यासप्रबन्धात् परिपाकमासादयन्ति साक्षादनुग्रहायावकल्पते।।

अथ ग्रन्थकारो ग्रन्थावसाने स्वैः कालदेशवंशैस्सहात्मानं ग्रन्थे निदधान आनुषङ्गिकं श्रेयोविशेषं सम्पादयति-**कल्यब्देष्विति**। अतियत्सु वृत्तेषु सवेदोन्वये सम्भूत इति सम्बन्धः। सवेदा नाम कश्चित् प्रवरनिमित्तमृषिः। तस्यान्वयो वंशः। भृगुवीतहव्यमुनियुङ्मूल इति तद्विशेषणम्। भृगुर्वीत हव्य इतीमौ ऋषी। तस्यान्वयस्य मूलभूतौ स्त इत्यर्थः। व्यधात् निबद्धवान्।।215।।

In the Kali Samvatsara dated 4529 (equivalent to Malabar era 603 in the month of Meṣa AD 1428) the author was born in a family having two forefathers in Bhṛgu and Vītahavya. His family is Jayantamaṅgala (Cennamangala or Cennas to be short) There the present one called Nārāyaṇa was born. He having collected details and essential features from the ocean of Tantras, composed this work. (215)

सेयं कृतिस्तन्त्ररहस्यदृब्धा रक्ष्या मुहुर्मूर्खमुखप्रपातात्।
आचार्यवर्यैरियमेव शश्वद् विश्वेश्वरेज्यास्मदनु[1]ष्ठितास्तु।।216।।

विमर्शिनी

एतद्ग्रन्थकरणमपि विश्वेश्वरपूजा भवत्विति प्रार्थयन् ग्रन्थं समापयति-**सेयमिति**। सेयं कृतिः ममेयं ग्रथकरणक्रिया तन्त्ररहस्यदृब्धा तन्त्ररहस्यभूतैरर्थैः परिपूर्णा, अत एवाचार्यवर्यैः मूर्खमुखप्रपातान्मुहुः पुनः पुनरपि रक्ष्या। मूर्खास्तु यत्किञ्चिदेव ज्ञात्वा यत्किञ्चिदेव कुर्वन्ति। तस्मात् परमपुरुषवरिवस्याया हानिर्भवति। अतः सर्वप्रयत्नेन तेभ्यो रक्षणीयेत्यर्थ। (इयमेव) शश्वदनवरतम् अस्मदनुष्ठिता अस्माभिरनुष्ठिता विश्वेश्वरेज्या विश्वेश्वरस्य परमपरुषस्य पूजास्तु भवतु। 'तं देवं नित्यं समाराध्नुयामि'त्युपक्रमे देवस्य नित्यपूजाप्रार्थनाद् अन्ते 'विश्वेश्वरपूजास्त्वि'ति उपसंहाराच्च, मध्ये पुनर्दैवस्य नित्यपुजाप्रतिबिम्बप्रतिष्ठाकर्माङ्गतया गुरुवरणादिप्रतिष्ठापर्यन्तैः कर्मभिस्तत्साधनप्रकाशनात्, तदन्ते पूजाविधानात्, तच्छेपतया कलशादेः प्रकटनाच्च अस्मिन् ग्रन्थे सर्वोऽप्यर्थो विश्वेश्वरपूजातत्परतयैव प्रतिपादितः। अवसाने विशेषेण ग्रन्थकरणप्रयत्नोऽपि तस्य पूजास्त्वित्याचार्यस्याभिमतमिति जानन्तु विद्वांसः।।216।।

1. 'दुपार्जिता' ख. ग पाठः।

विवरणम्

समस्तोपप्लपरिहारायाह–**सेयमिति**। आचार्यवर्यैं रक्ष्येति सम्बन्धः।।216।।

This work complete with the essence of Tantric details needs to be protected by preceptors from the purview of unqualified people. Further it may prove to be beneficial to worship of the divinity in which I am engaged always. (216)

इति तन्त्रसमुच्चये श्रु[1]तार्चा-
क्रमगुप्त्यै रविजन्मसम्प्रणीते ।
पटलः परिशिष्टकर्मवादी
दशमोऽभुद् द्विपुरस्सरः समाप्तः।।217।।

विमर्शिनी

पटलमुपसंहरति–**इतीति**। इति तन्त्रसमुच्चये ग्रन्थे द्विपुरस्सरोद्गीति पदपुरोगतो दशमः द्वादशः पटलः समाप्तोऽभूत्। कथंभूते, श्रुतार्चाक्रमगुप्त्यै श्रुतस्य पुजाक्रमस्य रविजन्मसंप्रणीते रविपुत्रेण नारायणेन कृते। परिशिष्टकर्मवादी सर्वपटलेष्वपि परिशिष्टानां कर्मणां वदनस्वभावः पटलः समाप्त इत्यर्थः।। 217।।

Thus the Tantrasamuccaya composed by Ravijanman- son of Ravi- has come to an end with the twelfth Paṭala dealing with miscellaneous subjects relating to Tantra. (217)

यस्य हि तन्त्रसमुच्चयरचनाल्लोके समुत्थिता कीर्तिः।
तत्पुत्रेण कृतेयं शङ्करनाम्ना विमर्शिनी व्याख्या।।

इति तन्त्रसमुच्चयविमर्शिन्यां द्वादशः पटलः

समाप्तोऽयं ग्रन्थः।
शुभं भूयात्।



1. 'समस्तागमसारैकनिधौ सुधीसुगाहे। पटलः परिशेषकर्मरम्यो द' ख. पाठः।

Index

L

P

T

W

Y



MANUSCRIPTS USED FOR VOL III

In the preparation of this edition of the Tantrasamuccaya with the commentaries, the following manuscripts have been employed.

1. C. 710 marked 'Ka' gives commentary Vivaraṇa. This does not contain the commentary from stanza 73 in the 2nd Chapter to the end of the chapter. The manuscript belongs to Maheswaran Bhaṭṭatiri of Kulikkaṭṭillam, doubtless a successor of the celebrated Maheswaran Bhaṭṭatiri whose Malayalam commentary on the Tantrasamuccaya we have published in our Malayalam Series.
2. C. 1507 marked 'Kha'. This manuscript belongs to Kṛishṇaru Nārāyaṇaru of Muṭṭavilamaṭham. The maunscript contains the commentary Vivaraṇa up to the 3rd stanza of the 10th Paṭala.
3. 8991 marked 'Ga'. Belongs to the Raja of Chirakkal contains commentary up to the end of the 8th Paṭala.
4. L. 663 marked 'Gha'. This belongs to Nārāyaṇan Nampūtiripāḍ of Puliyannoor mana. It contains upto stanza 106 of the 12th Paṭala.
5. L. 964 marked 'ṅa'. This manuscript belongs to Maṟṟappaḷḷi Mana in Ankamali. Contains complete commentary.
6. L. 1048 (now 12753) marked 'Ca'. Belongs to Tiruvārpu Svāmiyār.

We have also mentioned these manuscripts in our edition of Part I of this work.

This part was originally published in the year 1962 as Trivandrum Sanskrit Series No. 200 and edited by Dr. K. Raghavan Pillai.

श्लोकानुक्रमणिका








₹ 5000 (Set of 3 Vols.)

ISBN 978-81-8315-222-8



NEW BHARATIYA BOOK CORPORATION
208, 2nd Floor, Prakashdeep Building,
4735/22, Ansari Road, Daryaganj,
New Delhi-110 002 (INDIA)
Ph: 011-23280214, 23280209
Email: deepak.nbbc@yahoo.in